॥ ॐ ॥

અમદાવાદ-ઝાંપડાની પોળ-નિવાસી

શેઠ મોહનલાલ છોટાલાલ તરફથી

તેમનાં ધર્મપત્ની

માણેકબાઈએ

નવપદજીની ઓળી

જ્ઞાન પંચમી, મૌન એકાદશી, વીશ-સ્થાનક અને રોહિણીના તપ કરેલા

卐 તે નિમિત્તે કરેલા ઉજમણામાં 卐

જ્ઞાનભકિત નિમિત્તે આ પુસ્તક સ્થાપન કરવામાં આવેલ છે. વિક્રમ સં. ૧૯૮૫

श्रेष्ठिवर्य देवचन्द लालभाई-जैनपुस्तकोद्धारे ग्रंथांकः ७६ ।

श्रीसर्वज्ञाय नमः ।

श्रीमद्विजयानंदसूरीश्वरपादपद्मेभ्यो नमः

श्रीशुभशीलगणिविरचिता

श्रीभरतेश्वरबाहुबलिवृत्तिः ॥

युगादौ व्यवहाराध्वा, सर्वो येन प्रकाशितः । स श्रीवृषभयोगींद्रो, दद्याद्वोऽव्ययसम्पदम् ॥ १ ॥ त्यक्त्वा चक्रिश्रियं सद्यो, ललौ यः संयमश्रियम् । स श्रीशान्तिजिनो भूया–ज्जनानां शिवशर्मणे ॥२॥ येनासाववतारेण, यदुवंशः पवित्रितः । स श्रीनेमिजिनाधीशो, भूयादव्ययसम्पदे ॥३॥ यस्य नामश्रुतेर्विघ्न–श्रेणिर्याति क्षयं क्षणात् । स श्रीपार्श्वप्रभुर्दद्या–त्कल्याणकमलां सताम् ॥ ४ ॥ सेवतेऽङ्कमिषात्सिंहो, यं बलेन पराजितः । स श्रीवीरविभुर्वर्यः श्रिये भूया-

च्छरीरिणाम् ॥५॥ महात्मनां मुमुक्षूणां, सतीनां च सुयोगिनाम् । नामोत्कीर्तनमात्रेण, शिवश्रीर्जायते नृणाम् ॥ ६ ॥ तपागच्छाधिपाः श्रीमन्–मुनिसुन्दरसूरयः । तच्छिष्यः शुभशीलाव्हो, भरतादिकथां व्यधात् ॥७॥ तथाहि, तत्र प्रथमम्–

भरहेसरबाहुबली, अभयकुमारो य ढंढणकुमारो ।
सिरिओ अन्निआउत्तो, अइमुत्तो नागदत्तो अ ॥ १ ॥

इत्यादि त्रयोदश गाथा । दानविषये श्रीभरतचक्रिबाहुबलिकथा । सा तु श्रीऋषभदेवचरित्रं विना वक्तुं न शक्यते, तेनादौ श्रीयुगादिदेवस्य त्रयोदश भवा उच्यन्ते—"धण १ मिहुण २ सुर ३ महबल ४ ललियंगसुर ५ वयरजंघ ६ मिहुणे य ७ ॥ सोहम्म ८ विज्ज ९ अच्चुय १० । चक्की ११ सव्वट्ठ १२ उसभे अ १३ ॥ १ ॥" तथाहि—पूर्वं क्षितिप्रतिष्ठिते पुरे धननामा सार्थवाहोऽजनि । तेनाऽन्यदा चिंतितं, लक्ष्मीं विना नरः शोभां नाप्नोति । यतः—" वरं वनं व्याघ्रगणैर्निषेवितं, जलेन हीनं बहुकण्टकाकुलम् । तृणैश्च शय्या वसनं च वल्कलं, न बन्धुमध्ये विधनस्य जीवितम् ॥ १ ॥ हुंतिए हुंति गुणा, जंतिए जीइ जंति संतावि । जीसे निस्सेसगुणा, धन्नाणं सा जयउ लच्छी ॥ २ ॥ आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां, मूकत्वं मितभाषितं वितनुते मौढ्यं भवेदार्जवम् । पात्रापात्रविचार-

भावविरहो यच्छत्युदारात्मतां, मातर्लक्ष्मि! तव प्रसादवशतो दोषा अपि स्युर्गुणाः॥३॥" विमृश्येति लक्ष्म्यर्थं वसंतपुरपत्तने गन्तुं पुरमध्ये पटहोद्घोषणामदापयद्धनः। ततो भूरिसमुदाये मिलिते सन्मुहूर्त्तं जग्राह। तृतीया तिथिः भृगुवारः रेवतीनक्षत्रम्। यतः—"आदित्यहस्तो गुरुणा च पुष्यो, बुधाऽनुराधा शनिरोहिणी च। सोमेन सौम्यं भृगुरेवती च, भौमाश्विनी चामृतसिद्धियोगाः॥ ४॥ अश्विनीपुष्यरेवंत्यो मृगमूलं पुनर्वसुः। हस्तज्येष्ठाऽनुराधाः स्युः, यात्रायै तारकाबले॥ ५॥" यावद्धनश्चलितुकामोऽभूत्तावच्छ्रीधर्मघोषसूरयस्तत्राभ्येत्य, धर्मलाभपूर्वं धनदत्तासने उपविश्य, धर्मकथामिति प्रोचुः। —"चत्वारो धनदायादा, धर्मचौराग्निभूभुजः। ज्येष्ठेऽप्यपमानिते पुंसां, घ्नन्ति त्रीणि बलाद्धनम् ॥१॥ गव्यूतं प्रव्रजन्मार्गे, यः पाथेयं करोति सः। मृत्युमार्गे न वै कुर्या-दुर्बुद्धिः सज्जनैर्विना ॥२॥ शम्बलं कुरु रे मूढ-धर्मं दानं तपो जपम्। इहाऽमुत्र हितार्थाय, न ज्ञातं व्रजनं भवेत्॥३॥ धर्माच्छम्बलतो नृदेवखचरव्यालेन्द्रसौख्यं भवे—दत्राऽमुत्र च चन्द्रनिर्मलयशः पूजादिकं प्रत्यहम्। पापेनैव च दुःखदुर्गतिभवं श्वभ्रादिकं दुःसहं, निन्दाकीर्तिगणं तदेव कुरु भो भ्रातः! यदिष्टं तव॥ ४॥ श्रुत्वेति धनः प्राह—किं कार्यं श्रीपूज्यपादानामादिशन्तु, गुरुभिरुक्तं वयं वसन्तपुरपत्तने जिगमिषवः स्मः। धनः प्राह—"भगवन्ममोपरि कृपां कृत्वा मया सार्धं समागच्छत। ममापि

मार्गे धर्मश्रवणश्रीपूज्यपादनमनात्पुण्यं भवति । ” ततः शोभने दिने सुशकुनेषु जायमानेषु, जम्बूचासमयूरदर्शन-प्रदक्षिणावर्त्तोत्तरणादिना धनसार्थवाहः श्रीधर्मघोषसूरिभिः सह चचाल । यतः—“जंबूचासमयूरे, भारद्दाये तहेव नउले य । दंसणमेव पसत्थं, पयाहिणे सव्वसंपत्ती ॥ १ ॥ व्रजित्वा वामदिग्भागं, दक्षिणात्मधुरस्वरः । काकः पूरयते नित्यं, प्रस्थितानां मनोरथान् ॥ २ ॥ चक्रवाकभारद्वाज—हंसहारीतसारसाः । कलविंकस्तु दात्यूह—चकोरज-लकुर्कुटाः ॥ ३ ॥ एतेषां लोमशश्चापि, दर्शनं मङ्गलप्रदम् । लटाखंजनचाषानां, दक्षिणे गमनं शुभम् ॥ ४ ॥ टिट्टिभः कौशिकश्चापि, वामो राजशुकः शुभः । मयूरश्च तथा श्येनो, दक्षिणाद्वामगः शुभः ॥ ५ ॥” मार्गेऽन्येद्युरुपायनागतं, परि-पक्वरसालफलपरिपूर्णं स्थालं, श्रीगुरूणां पुरो मुक्त्वा धनः सार्थवाहः प्राह—“भगवन् ! अमूनि सहकारफलानि गृहाण, मम पुण्यं भवति । ” गुरवस्तं भद्रकस्वभावं विज्ञाय जीवाजीवादिस्वरूपं तस्य पुर एवं प्ररूपयामासुः । मूलं धम्मस्स दया, असेसजीवाण होइ सा जणणी । जं तसथावरजीवाण, रक्खणं होइ जइ धम्मो ॥ १ ॥ जीवस्वरूपं त्वेव प्रोच्यते जिनेन्द्रैः—भूजलजलणाऽनिलवण—बितिचउपंचेंदिएहि नवजीवा । मणवयणकायगुणिया, हवंति ते सत्तवीसाओ ॥ २ ॥ इक्कासीई ते करणकारणाणुमइताडिया होइ । सच्चिय तिकालगुणिया, दुन्निसया हुंति तेआला

॥ ३ ॥ एतेषां जीवानां यो वधं मनसा वचसा कायेन करोति, तस्य दुर्गतिपातो भवति । यतः—"जीवहिंसां जनः कुर्व–न्निहाशं लभतेतराम् । परलोके समाप्नोति, दुःखं श्वभ्रादिकं स्फुटम् ॥१॥ जीवरक्षां जनः कुर्वन्, वाचा कायेन चेतसा । इहाऽमुत्र सुखश्रेणी, नराणां लभतेतराम् ॥२॥ आउं दीहमरोगमंगमसमं रूवं पगिट्ठं बलं, सोहग्गं तिजगुत्तमं निरूवमो भोगो जसो निम्मलो । आएसिक्कपरायणो परियणो लच्छी अविच्छेयणी, हुज्जा तस्स भवंतरे कुणइ जो जीवाणुकंपं णरो ॥३॥ परसमयेऽप्युक्तम्—" यो दद्यात्कांचनं मेरुं, कृत्स्नां चैव वसुन्धराम् । एकस्य जीवितं दद्या–न्नच तुल्यं युधिष्ठिर ! ॥ १ ॥ देहिनः सुखमीहन्ते, विना धर्म्मं कुतः सुखम् । दयां विना कुतो धर्म्मः, तस्मात्तस्यां रतो भव ॥ २ ॥ अथ हृदयमंजरीशैवागमेऽपि प्रोक्तम्—" सर्वेषां धर्माणामादि-रहिंसा निगद्यते सद्भिः । तद्रहिता नश्यन्ति हि, हतनायकसैन्यवत् धर्माः ॥ १ ॥ " गीतायां—" पृथिव्यामप्यहं पार्थ ! । वायावग्नौ जलेऽप्यहं । वनस्पतिगतश्चाहं, सर्वभूतगतोऽप्यहम् ॥ १ ॥ यो मां सर्वगतं ज्ञात्वा, न हिंसेत कदाचन । तस्याहं न प्रणश्यामि, स च मां न प्रणश्यति ॥ २ ॥ " यत्र जीवस्तत्र शिव इति वचनात् । अतः स्थावरेष्वपि जीवत्वं सिद्धं, अतः साधुभिः सर्वप्रकारेण त्रसेषु स्थावरेषु जीवेषु हिंसा न कर्तव्या । ततः प्रासुकान्येवान्नपानानि गृहीतव्यानि, तदलभेभिः फलैः

सचित्तैः। ततो धनोऽवग्—"भगवन्! अद्य प्रभृति मया प्रासुकान्येवान्नादीनि दातव्यानि" । ततः क्रमाच्चलनात् सार्थस्य वर्षाकालः समागमत्। स च कीदृग्-"सर्वत्रोद्गतकन्दला वसुमती वृद्धिर्जडानां परा, जाता निःकमला स्थली समालैनैः प्राप्तां घनैरुन्नतिः। सर्प्पन्ति प्रतिमंदिरं द्विरसनाः संत्यक्तमार्गो जनः, हा कष्टं कलिकाल एष वहति प्रावृट्स्वरूपं भुवि ॥१॥ मेघो वृष्टुं लग्नः, वैषम्यं कर्दमादिना जातं, क्वापि शैलपार्श्वे वर्षायां भुवि सर्वः सार्थो निवेशितो धनेन । माणिभद्र-श्राद्धदत्तोपाश्रये गुरवः स्थिताः। कालविलम्बेन क्षीणपाथेये, सर्वलोका कन्दमूलादि भक्षितुं लग्नाः। तत्र मासद्वये जातेऽकस्मात् धनसार्थवाहस्य गुरवश्चेतोमार्गे समाययुः। ध्यातं च तेन, मया श्रीगुरवः सार्थमाकारिताः एकशोऽपि मया न तेषां भक्तपानादिचिन्ता कृता। अतो धिग् मामधमं, प्रतिपन्नविस्मारकम्। ये प्रतिपन्नं न कुर्वन्ति ते अधमा एवोच्यन्ते ।

चलति कुलाचलचक्रं, मर्यादामाधिपतन्ति जलनिधयः। प्रतिपन्नममलमनसां, न चलंति पुंसां युगान्तेऽपि ॥ १ ॥
तत्तियमित्तं जंपह, जत्तियमित्ता च होइ निव्वाहो। वाया मूयाण नासइ, जीवंता मा मूया होंति ॥ २ ॥

ततस्तत्कालं समुत्थाय धनः श्रीगुरुपार्श्वे गतः, ननाम च तान् । ततो धनोऽवग्—"भगवन्! नाहं भाग्यवानास्मि । मया श्रीपूज्यपादानां सार्थमाकारितानामेकशोऽपि सारा न कृता। श्रीपूज्यपादानां निर्वाहो दुःशक्योऽस्ति।"

गुरवो जगुः—" महानुभाग ! महान् सार्थो विद्यते, श्राद्धाश्च बहवः सन्ति, तेषां शकटेषु प्रासुकमन्नपानादि सर्वं विलोक्यमानं सदा लभ्यतेऽङ्गीक्रियते च । भवतः सार्थ एव वयमागताः तत्पुण्यं तव महज्जायमानमस्ति " । सार्थेशोऽवग्—" यत्स्वहस्तेन दीयते तदेव लभ्यते शरीरिभिः । स्वहस्तेनान्नपानादि, दीयते यद्विवेकिभिः । लभ्यते तज्जनैः संख्यातीतपुण्यं न संशयः ॥१॥ मृतानामपि जन्तूनां, श्राद्धं चेत्तृप्तिकारणम् । तन्निर्वाणप्रदीपस्य, स्नेहः किं वर्द्धते शिखाम् " ॥२॥ धनसार्थवाहः प्राह—साधुयुग्मं प्रेष्यतां तत्र किमप्यहं प्रासुकान्नादि दास्ये । ततो गुरुभिस्तस्य शुद्धभावं मत्वा साधुयुग्मं धनस्योत्तारके प्रेषितम् । अन्नं दातुं यावत् सार्थपो विलोकतेस्म, तावदमत्रेषु किमपि न दृश्यते, पूर्वव्ययकरणात् । ततः स्त्यानीभूतं घृतं भाजनस्थं दातुं शुद्धभावात् सार्थप उत्थितो यावत्तावत् सार्थेशस्य शुद्धभावं मत्वा, प्रासुकं घृतं च वीक्ष्य साधुनाऽप्रेतनेन विहृतम्, तदा तेन सार्थेशेन घृतं ददता मनुष्यभवायुः, पुण्यानुबन्धिपुण्यमार्जितं, बोधिबीजं च । तथा च जिनागमः—"केसिंचि होइ वित्तं, पत्तं अन्नेसु उभयमन्नेसु । चित्तं वित्तं पत्तं, तिन्निवि केसिंचि धन्नाणं" ॥ १ ॥ सिद्धांतेऽप्युक्तं—तहारुवाणं समणाणं माहणाणं भंते ! फासुएणं एसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणेणं किं किज्जइ ? गोयमा ! तत्थ अट्ठकम्मपयडीओ धणीयबंधणबद्धाओ सिढिलबंधणबद्धाओ पगरइ,

दीहकालट्ठिआओ रहस्सकालट्ठिआओ पगरइ, इमं च णं दीहमद्धं चाउरंतं संसारकंतारं थेवेणावि कालेण परियट्टइ । तथा चोक्तं—" अन्नंपानं तथा वस्त्रं, आलयः शयनाऽसने । शुश्रूषा वंदनं तुष्टिः, पुण्यं नवविधं स्मृतम् ॥ १ ॥
साहूण कप्पणिज्जं जं नवि दिन्नं कहिंवि किंपि तहिं । धीरा जहुत्तकारिणो, सुसावगा तं न भुंजंति ॥ २ ॥
तथा च—ददस्वान्नं ददस्वान्नं, ददस्वान्नं युधिष्ठिर ! । सद्यः प्रीतिकरं लोके, किं दत्तेनापरेण हि ॥ ३ ॥
इत्यादि पात्रदानफलं धनो मत्वा घृतदानात्तदा मुक्तिगमनयोग्यं पुण्यं भावनयाऽर्जयामास । ततो धन उपाश्रये गुरून् वंदितुं सदा याति, गुरूक्तं धर्ममशृणोदिति-संसारसागरोत्तारतरीतुल्यस्य श्राद्धधर्मस्य प्रतिष्ठानप्रतिष्ठमादौ सम्यक्त्वं वीतरागेणोक्तम्—"वीतरागप्रभुर्देवः, सुसाधुश्च परो गुरुः । कृपामूलस्तु सद्धर्मः, सम्यक्त्वमभिधीयते ॥१॥ जिणवयण-मेव तत्तं तत्थ रुई होइ दव्वसम्मत्तं । जहभावणाण सद्धा, परिसुद्धं भावसम्मत्तं ॥ २ ॥ सम्मत्तंमि य लद्धे, पलियपुहुत्तेण-सावओ हुज्जा । चरणोवसमखयाणं, सायरसंखंतरा हुंति ॥३॥ अंतमुहुत्तं पालिय, सम्मत्तं जो वमेइ पज्जंते । तस्स य अवड्ढपुग्गल, परियट्टो चेव संसारो ॥ ४ ॥ भट्ठेण चरित्ताओ, सुट्ठुयरं च दंसणं गहेयव्वं । सिज्झंति चरणरहिया, दंसण-रहिया न सिज्झंति ॥ ५ ॥ सव्वत्थ उचियकरणं, गुणाणुराओ रई अ जिणवयणे । अगुणेसु अ मज्झत्थो, सम्म-

दिट्ठिस्स लिंगाइं ॥ ६ ॥ आइपुढवीसु तीसुं, खइयं उवसामगं च सम्मत्तं । वेमाणियदेवाणं, पणियं तिरियाण एमेव ॥ ७ ॥ सेसाणं नारयाणं, तिरियित्थीणं च तिविहदेवाणं । पंचविहं सम्मत्तं, पन्नत्तं वीयराएहिं ॥ ८ ॥ अण-कोहाइचउक्के, सम्माईपुंजतियगखवियंमि । जीवस्स सुहो भावो, अपुग्गलं खाइयं सम्मं ॥ ९ ॥ मिच्छतं जमुइन्नं तं–खीणं अणुदियं च उवसंतं । मीसीभावपरिणयं, वेज्जं जं तं खउवसमं ॥१०॥" इत्यादिसदुपदेशामृतैर्मिथ्यात्वं मुक्त्वा सम्यक्त्वं धनसार्थवाहो ललौ । वर्षान्तेऽगस्त्युदयं ज्ञात्वा धनसार्थवाहस्ततश्चचाल । यतः–" दिवा च कुरुते यस्मि–न्नुदयं मुनिपुङ्गवः । अनावृष्टिस्तदा घोरा, पिता विक्रयते सुतम् ॥ १ ॥ वर्षाकाले दिने यस्मि–न्नुदिते मुनिपुङ्गवः । ततः स्तोकं पयोवाहो, मुञ्चते सलिलं भुवि ॥ २ ॥ " क्रमाद्धनसार्थेशो वसन्तपुरं ययौ । तत्र कृतक्रयविक्रयोपार्जित-भूरिधनः पुनः स्वपुरं प्रति चचाल । स्वपुरं समागतश्च क्रमात् समायातावसाने सप्तक्षेत्र्यां धनं व्यधत् । कृताराधनकः, पालितनिःकलङ्कश्रावकधर्म्मः, समाधिना विपद्य, उत्तरकुरुषु सीतासरित उत्तरतो जम्बूतरोश्च पूर्वतो युगलिधर्मत्वे-नोत्पेदे धनः । तत्र दशविधकल्पद्रुमास्तस्य मानसेप्सितं ददुः । तथाहि—" ते मत्तंगा १ भिंगा २ तुडीयंगा ३ दीव ४ जोइ ५ चित्तंगा ६ । चित्तरसा ७ मणियंगा ८, गेहागारा ९ अगणिया य १० ॥ १ ॥ मत्तंगएसु मज्जं,

मधु पिज्जं भायणाइ भिंगेसु । तुडियंगेसु य संगयतुडियाइं बहुपयाराइं ॥ २ ॥ दीवसिहा जोइसि–नामंगा एए करंति उज्जोयं । चित्तंगेसु य मज्जं, चित्तरसा भोयणट्ठाणा ॥ ३ ॥ मणियंगेसु य भूसण–वराइ भवणरुक्खेसु । अणियंगेसु य घणियं । वत्थाइ बहुप्पगाराइं ॥ ४ ॥ इत्थं दशविधकल्पवृक्षेभ्योऽधिगतानि सुखान्यनुभूय, तदायुःप्रांते विपद्य, प्राग्जन्मकृतदानपुण्यानुभावात् सौधर्मे स्वर्गे सुरोऽजनि ॥

॥ इति तृतीयभवः ॥

तत्र सुखान्यनुभूय चिरं ततश्च्युतः स सुरोऽपरविदेहे गन्धिलावतीनाम्नि विजये वैताढ्यगिरौ गन्धारदेशे गन्धसमृद्धपुरे शतबलनाम्नो विद्याधरस्य महाबलनामा सुतोऽजनि । स चाभ्यस्तशस्त्रशास्त्रकलाकलापः समये पित्रा राज्येऽभिषिक्तः । तत्सुखानि भुंजानोऽन्यस्मिन्नवसरे समलंकृतास्थानसिंहासनः, संगीतके प्रवर्तमाने स्वयम्बुद्धाभिधेन सचिवेन राजा विज्ञप्तः इति—धिद्धी एस पमाओ, गलहत्थेइ जो जियाण जिणधम्मं । नलिणीदलग्गघोलिर–जललवपरिचंचले जीए ॥ १ ॥ इति तस्यानवसरोपदेशात् स नृपः किमेतदिति पृच्छन् मन्त्रिणाऽभाणि—"यदद्य मया वने गतेन चारणमुनिर्भवत आयुःस्वरूपं पृष्टः सन् जगौ । मासमेकमस्य भूपस्यायुरस्ति" । इति तद्वचनादनु राजा जगौ—"अद्य निशाशेषे संभिन्नश्रोतप्रमुखैरमात्यैरहमंधकूपे पातितोऽपि स्वयम्बुद्ध ! भवता एकेनोद्धृतः, इति

सद्यः स्वप्नफलसंवादी ममायं भवदुपदेशः" । स नृपः इत्युच्चरन् क्षीणे आयुषि किंकर्तव्यतामूढतयाऽनुतप्यमानः सचिवेनोचे—"एगदिवसंपि जीवो, पवज्जमुवागओ अनन्नमणो । जइवि न पावइ मुक्खं अवस्स वेमाणिओ होइ॥१॥" इति जैनसिद्धान्तगिःप्रामाण्यात् चारित्रग्रहणात् सफलय स्वं जन्म, परलोकं साधय । श्रुत्वेति मंत्रिवचः क्षितिपतिः स्वं पुत्रं राज्ये निवेश्य, कृताष्टान्हिकामहःपुरस्सरं प्रव्रज्यां जग्राह, गुरुपार्श्वे । गुरूक्तविधिना गृहिताऽनशनः समाधिना विपद्य, ईशानदेवलोके श्रीप्रभविमाने ललिताङ्गनामा सुरः, प्रस्फुरद्दीप्तिभासुरशरीरः समजनि। तस्य स्वयम्प्रभाभिधा देवी-पत्नी बभूव तया समं दिव्यान् भोगान् चिरं भुञ्जानस्य तस्य देवस्य कदाचिदायुःक्षये स्वयम्प्रभा देवी स्वर्गात् च्युता । तस्या देव्या विरहेण विधुरोऽभूल्ललिताङ्गः । ततः उद्यानादिवापिषु रममाणः क्षणं न रतिं लेभे । यतः—" देवाऽवि देवलोए, दिव्वाभरणेण रंजियसरीरा । जं परिवट्टति तत्तो, तं दुक्खं दारुणं तेसिं ॥ १ ॥ तं सुरविमाणविभवं, चिंतिअ चवणं च देवलोगाओ । इय बलियं च जं नवि, फुट्टइ सयसक्करं हिययं ॥ २ ॥ ईसाविसायमयकोह—मायालोभेहि एवमाईहिं । देवाऽवि समभिभूया, तेसिं कुत्तो सुहं नाम ॥ ३ ॥ इतश्च स्वयम्बुद्धोऽपि मंत्री गृहीतव्रतोऽनशनेन मृत्वा तस्मिन्नेव कल्पे दृढधर्माभिधः शक्रसामानिकोऽभूत् । यतः—तवनियमेण य मुक्खो

दाणेण य हुंति उत्तमा भोगा । देवच्चणेण रज्जं, अणसणमरणेण इंदत्तं ॥ १ ॥ स एव देवः प्राग्भवसौहार्दात्, ललिताङ्गसुरं विरहविव्हलं वीक्ष्य प्राह शोकापनोदाय—" विषयगुणः कापुरुषं, करोति वशवर्तिनं न सत्पुरुषम् । बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गम् ॥ १ ॥ स्त्रीरागसागरस्यान्तश्चेतःपोतान्निमज्जतः । अपयाति मतिर्लज्जा पौरुषं साधुतावृत्तिः ॥ २ ॥ मा विषादं कुरुष्व त्वं, देव्या विरहितो मनाग् । कुरु चित्तं स्थिरं तस्मात्, सुखी-भवासि संततम् ॥३॥ संझरागजलबुब्बुउवमे, जीविए वि जलबिंदुचंचले । जुव्वणे य नईवेगसन्निभे, पावजीव किमयं न बुज्झसि ॥४॥ दुप्पयं चउप्पयं बहुप्पयंच अप्पयं समिद्धमहणं वा । अणवकए्वि कयंतो हणइ हयासो अपरितंतो ॥ ५ ॥ एवमुपदेशो दीयमाने तेन सुरेण ललिताङ्गो न मनाग् मोहान्निवृत्तः ततो दृढधर्मा देवस्तस्या देव्याः प्राप्त्युपायं प्रोक्तवानिति धातकीखण्डे प्राग्विदेहे नन्दग्रामे नागिलस्य दरिद्रस्य श्रेष्ठिनः सप्तानां पुत्राणामुपरि तस्यां पत्न्यामष्टम्यां पुत्र्यां जातायां कुरूपायां भाग्यहीनायां पितरि प्रणष्टे, उद्वेगात् नामाकरणात् निर्नामिकेति नामाऽजनि, निर्नामिका क्रमाद्ववृधे, कचिद् निर्नामिका गगनतिलकपर्वते दारूण्यानेतुं गता, तत्र तत्कालोत्पन्नकेवल-ज्ञानं युगन्धराभिधं मुनिं सिंहासनस्थं धर्ममुपदिशन्तं शुश्रावेति । " आयुर्वायुचलं सुरेश्वरधनुर्लोलं बलं यौवनं

विद्युद्दंडतुलं धनं गिरिनदीकल्लोलवच्चञ्चलम् । स्नेहं कुञ्जरकर्णतालचपलं देहं च रोगोकुलं ज्ञात्वा भव्यजनाः सदा कुरुत भो धर्मं महानिश्चलम् ॥१॥ दारिद्र्नाशनं दानं, शीलं दुर्गतिनाशनम् । अज्ञाननाशिनी प्रज्ञा, भावना भवनाशिनी ॥ २ ॥ " एवं गुरुपार्श्वे धर्म्मं श्रुत्वा प्राप्तगृहिधर्मा कुमारिका निर्नामिका सा सम्प्रति वर्तते । साम्प्रतं चानशनं सा जग्राह, ततस्तत्र गत्वा स्वरूपं तस्या दर्शय कथय च, यथा सा निर्नामिका त्वदनुरागिणी भूत्वा मृत्वा च स्वयम्प्रभैव प्रिया उत्पद्यतेऽत्रैव स्वर्गे, तथा कृते तेन देवेन सा निर्नामिका तत्रैव स्वर्गे ललिताङ्गस्य प्रियाऽभवत् । ततः स देवस्तया प्रियया सह विलसन् सुखीजातः ॥ इति ललिताङ्गदेवभवः ॥ ततः क्रमादायुःक्षये ललिताङ्गसुरो जम्बूद्वीपे प्राग्विदेहे सीतासरिदुत्तरे तटे पुष्कलावतीविजये लोहार्गलपुरे स्वर्णजङ्घस्य राज्ञः लक्ष्मीदेवीकुक्षिजन्मा प्रद्युम्नप्रतिमो वज्रजङ्घोऽङ्गजोऽभवत् । पित्रा जन्मोत्सवः कृतः यौवनं प्राप क्रमाद्वज्रजङ्घकुमारः । इतः स्वयम्प्रभापि स्वर्गात् च्युत्वा तस्मिन्नेव विजये पुण्डरीकिण्यां नगर्यां वज्रसेनतीर्थकरचक्रवर्तिनः श्रीमती नाम्ना सुताऽभूत्, सा क्रमाद्यौवनालङ्कृतदेहाऽजनि । एकदा श्रीमती सन्निहितवने समुत्पन्नकेवलज्ञानं मुनिं प्रेक्ष्य जातिस्मृतिं प्राप । ततः पूर्वभवपतिं करिष्यामीति निर्बन्धपरा पितुर्निर्देशात् पूर्वभवं स्वं स्वरूपं चित्रपट्टे लेखया-

मास । प्राप्तवयो मम पूर्वभवं कथयिष्यति, तमहं वरिष्ये । ततः स्वयंवरमण्डपो मण्डितः । आहूता अनेके नृपराजकुमाराः ॥ तैर्भूपैस्तस्याः पूर्वभवो न कैरपि प्रोक्तः । तेषु तेषु सङ्केतेषु अपूरितेषु तत्रागाद्वज्रजङ्घकुमारः चित्रपट्टे लिखितं पूर्वभवं स्वं वीक्ष्याकस्माज्जातिस्मृतिं प्राप । ततः कुमार्या हृदयस्थान् पूर्वभवसङ्केतान् कुमारः कथयामास । ततस्तया स पूर्वभवसम्बन्धिनं पतिं मत्वा वरमालान्यासपूर्वमुपयेमे । ततो वज्रजङ्घस्तां परिणीय सन्महं स्वपुरमाययौ । ततः क्रमात् स्वर्णजङ्घः पुत्राय राज्यं दत्वा स्वयं दीक्षां जग्राह । प्राप्तराज्यो वज्रजङ्घो न्यायाध्वना भुवं शशास । यतः—"यो न्यायेन भुवं सर्वां, पैतृकीं पृथिवीपतिः । जुगोप स प्रयात्येव, वृन्दारकनिकेतनम् ॥१॥ राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः । राजानमनुवर्तन्ते, यथा राजा तथा प्रजाः ॥ २ ॥" क्रमेण तस्य राज्ञो नन्दनो जातः । तस्य वज्र इति नाम दत्तम् । अन्येद्युः श्रीमतीभ्रातुः पुष्कलपालस्य राज्ञः सीमालभूपालैराक्रान्तस्य साहाय्याय वज्रजङ्घश्चचाल । मार्गे वज्रजङ्घश्चलन् दृष्टिविषं सर्पं तस्मिन् मार्गे श्रुत्वा तत्र गत्वा सर्प्पं प्रबोधयामास तद(स्वद)र्शनात् । ततश्चलन् पुष्कलावतीं पुरीं ययौ । तत्रागतान् सर्वान् पुष्कलपालस्य रिपून् हत्वा स्वां पुरीं प्रति चचाल । इतस्तस्मिन् मार्गे मुनियुगस्य ध्यानं कुर्वतः सर्वकर्मक्षयात् केवलज्ञानं जातम् । वज्रजङ्घः पत्नीयुतो

मुनिसेनसागरसेनाख्यमुनियुगं प्रणनाम। तयोर्मुन्योः पृथग् पृथग् उपदेशं श्रुत्वा स्वपुरमाययौ। अन्येद्युर्वज्रजङ्घेनोक्तम्—प्रिये! व्रतमहं ग्रहीष्ये त्वं समाधिना गृहिधर्मं पालय। पत्नी जगौ। पुराऽहमपि व्रतं ग्रहीतुकामाऽस्मि, यदि त्वया व्रतं ग्रहीष्यते, तदाऽहमपि त्वया सह दीक्षाग्रहणं करिष्ये। अत्रान्तरे पुत्रो मातापित्रोः संयमग्रहणाभिप्रायमजानानो विषं दातुकामोऽभूत्। ततः पुत्रेण राज्यार्थिना विषदानात् मातापितरौ हतौ। इतिवज्रजङ्घभवः ॥ ६ ॥ शुभध्यानात् तौ मृत्वा उत्तरकुरुषु समुत्पन्नौ। युग्मधर्मेण तत्र दशविधकल्पवृक्षपूर्णमनोरथौ सुखिनौ बभूवतुः। इति युग्मिभवः सप्तमः ॥ ७ ॥ ततो मृत्वा तौ मिथः स्नेहलौ प्रथमस्वर्गे सुरावभूताम्, तत्रातीव सुखिनौ जातौ। इतिसुरभवोऽष्टमः ॥८॥ स्वर्गात् च्युत्वा जम्बूद्वीपे विदेहे क्षितिप्रतिष्ठितपुरे स्वर्गिपुरसोदरे, सुविधिवैद्यस्य जीवानन्दनामा पुत्रोऽभूत्। तत्रैवेशानचन्द्रस्य भूपस्य महीधरनामा पुत्रो बभूव १॥ मन्त्रिपुत्रः सुबुद्धिरासीत् २॥ सार्थवाहाङ्गजः पूर्णभद्रः ३॥ श्रेष्ठिसूनुर्गुणाकरोऽभूत् ४॥ श्रीमतीजीवः स्वर्गात् च्युत्वा तत्रैव श्रेष्ठिपुत्रः केशवनामाऽभवत् ५॥ एतेषां जीवानन्देन सह सौहार्दमभूत् अत्यन्तम्। कदाचिज्जीवानन्दवैद्यस्य सद्मनि तेषां वयस्यानां पञ्चानां तस्थुषां गुणाकराख्यो जैनमुनिः कुष्टगलद्देहः पारणार्थं समागात्। तस्य यतेस्तादृशं देहं कुष्टव्याधिग्रस्तं वीक्ष्य मिथश्चि-

न्तयामासुः । एष मुनिरतीव व्याधिना ग्रस्तो दृश्यते। ततः सानुकम्पो जीवानन्दो जगौ—अयं मुनिर्महता धनव्ययेन सज्जीक्रियते । लक्षपाकतैलं गोशीर्षचन्दनं रत्नकम्बलं च विलोक्यते । तैलं तु मम मन्दिरे समस्ति । शेषवस्तुद्वयोपायश्चिन्त्य एव । असौ यतिः सुमहाभागस्तपस्वी स्वशरीरनिरपेक्षोऽस्ति । यद्यस्योपकारः करिष्यते कुष्ठस्फेटनेन तदा मुक्तिगमनयोग्यं कर्मोपार्ज्यते । यतः—" ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानतः । अन्नदानात् सुखी नित्यं, निर्व्याधिर्भेषजाद्भवेत् ॥ १ ॥ " अथ तदौषधप्राप्तये महीधरपुत्राद्याः पञ्चापि जीवानन्देन समं कस्यापि सुहृदो महेभ्यस्याऽऽपणे मूल्येन यत्यर्थं गोशीषचन्दनरत्नकम्बले याचन्ते स्म । धर्मेण तेन तद्वस्तुद्वयं यत्यर्थं दत्तम् । प्रोक्तं ममापि पुण्यं भवति । पापिनामौषधे दत्ते पापमेव भवति । धर्मिणां तु दत्ते धर्म एव भवति । धर्मी तु धर्ममेवकरोति । तस्य पुण्यविभागो वैद्यस्यौषधदातुर्भवति । ततस्ते सर्वे सुहृदस्तानि औषधानि लात्वा वने ययुः तस्य मुनेस्तेन तैलेन प्रथमं देहेऽभ्यञ्जनं कृतम् । तत्तैलयोगात् अतीव तापिते साधुवपुषि रत्नकम्बलं निदधे । तापव्याकुलाः साधुदेहस्थाः कृमयो रत्नकम्बले लग्नाः । ततो वैद्येन दीर्घदर्शिना ते कृमयोऽतीवार्द्रगोशवमध्ये स्थापिताः । ततस्तद्देहे शीतनिमित्तं गोशीर्षचन्दनाङ्गरागः कारितः इति । एवं त्रिःकृत्वा प्रतीकारेण मुनिं पटूकृत्य ते क्षमयामासुरिति

भगवन्! युष्मच्छरीरे किमप्यपराधः कृतः स क्षम्यताम्। ततस्तं यतिं प्रणम्य तस्मै श्रेष्ठिने यतिर्नीरोगः कृतोऽस्ति भवत औषधाभ्यामिति निवेद्य च स्वस्थानं ययुः। स च श्रेष्ठी तदौषधदानपुण्यमनुमोदमानो गृहस्थ एव सर्वकर्मक्षयात् केवलज्ञानं प्राप। तेऽपि च सुहृदो गोशीर्षरत्नकम्बलौ विक्रीय तद्द्रव्येण निजकाञ्चनलक्षद्वयेन च जिनालयं कारयामासुः। इति नवमो भवः ॥ ९ ॥ ते सर्वे जीवानन्दादयः क्रमात् प्रव्रज्यां गृहीत्वा द्वाविंशतिसागरायुष्काच्युते स्वर्गे त्रिदशा बभूवुः ॥ इति दशमो भवः ॥ १ ॥

अथ जीवानन्दजीवस्ततश्च्युत्वा प्रथमं जम्बूद्वीपे प्राग्विदेहे पुष्कलावतीविजये पुण्डरीकिण्यां वज्रसेनस्य तीर्थकरभूपतेः धारिणीदेव्याः—कुक्षौ चतुर्दशस्वप्नसूचितोऽवततार क्रमात् पुत्रोऽभवत्। वज्रनाभनामा ज्येष्ठनन्दनः समभूत्। नृपामात्यश्रेष्ठिसार्थेशानां जीवास्ततश्च्युताः क्रमेण बाहुसुबाहुपीठमहापीठनामानः कनीयांसस्तस्य सोदराश्चत्वारो बभूवुः। केशवजीवस्तु स्वर्गाच्च्युतः सुयशा नामा भूपपुत्रो भूत्वा वज्रनाभं सिषेवे। वज्रसेनभूपो वज्रनाभाय पुत्राय राज्यं वितीर्य लोकान्तिकदेवैर्जय नन्देति जल्पिते सांवत्सरिकं दानं दत्त्वा दीक्षां जग्राह। क्रमेण केवलज्ञानं प्राप। वज्रनाभस्तु प्राप्तषट्खण्डराज्यः स्वयं समस्तचक्रवर्तिपदभागभूत्। अन्येद्युस्तस्मिन्नेव पुरे श्रीवज्रसेन-

स्तीर्थंकरः समवसृतः। तदा चक्री सपरिवारः पितुः तीर्थकृतो धर्मोपदेशं श्रोतुं गतः। जिनेन्द्रस्तत्रेति धर्म्मोपदेशं प्राह "न श्रीर्मे विपुला जने न च मतिर्जाता न वा सूनवो, जाता वा न गुणास्पदं न च मुदं धत्ते कुटुम्बं मम। द्विष्टो-भूमिपतिः खलाश्च कुदृशो देहं रुगार्तं सुतो–द्वाह्या भूरिऋणं ऋणन्ति गृहिणां चेतांसि चिन्ता इमाः॥१॥ प्राग् जन्मजाते सुकृते सति प्रभो!, विवेकिभिस्तत् पुनरर्ज्यते नवम्। नीवीधनाऽदस्य पुनः कुतोऽर्जनं, वापः क वा प्रोषितबीज-भोजिनः॥ २ ॥" एवं धर्मोपदेशं श्रुत्वा सञ्जातवैराग्यो वज्रनाभो बाहुसुबाहुपीठमहापीठभ्रातृभिः सुयशसा च सार्धं संयमश्रियं जग्राह। वज्रनाभो यतिः क्रमाद् गुरुपार्श्वे पठन् द्वादशाङ्गभृत् बभूव, शेषा एकादशाङ्गधारिणो-ऽभवन्। अर्हदादिभिर्विंशतिस्थानकैस्तीर्थंकरपदवीं बबन्ध वज्रनाभः। यतः—"वज्रनाभस्तु विंशतिस्थानैरेभिर्मनोरमैः। निर्ममे तीर्थकृन्नाम–कर्म भवाब्धितारकम्॥१॥" तथाहि—"अरिहंत १ सिद्ध २ पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसुं ७। वच्छल्लयाइ एसिं अभिक्खनाणोवओगे य ८॥ १॥ दंसण ९ विणए १० आवस्सए य ११ सीलव्वए निरइआरो १२। खणलव १३ तव १४ च्चियाए १५ वेयावच्चे १६ समाही १७ य॥ २॥ अपुव्व-नाणगहणे १८ सुअभत्ती १९ पवयणे पभावणया २०। एएहि कारणेहिं तित्थयरत्तं लहइ जीवो॥ ३॥"

शुद्धमन्नं समानीय, विभज्य बाहुसंयतः । ददानो यतिभ्यश्चाक्रि-कर्मोपार्जितवान् क्रमात् ॥ १ ॥ साधुपञ्चशतीनां सद्विश्रामणविधानतः । अतीवबलकर्मादि, सुबाहुरर्जयत् स्वयम् ॥ २ ॥ वज्रनाभगुरौ वैया-वृत्यं विश्रामणादिकम् । बाहुसुबाहू कुर्वाणौ, पुण्यमर्जयतां नवम् ॥ ३ ॥ यदा यदा तयोर्व्याख्यां, कुर्वते गुरवः स्फुटम् । तदा पीठमहापीठौ, सहेते न स्वचेतसि ॥ ४ ॥ मायामिथ्यात्वयोगेन, क्रोधादिकृत्यतत्परौ । स्त्रीत्वकर्म भृशं पीठ-महापीठौ बबन्धतुः ॥ ५ ॥ यतः—" जो चवलो सठभावो, मायाकवडेहिं वंचए सयणम् । न य कस्स य वीसत्थो, सो पुरिसो महिलया होइ ॥ १ ॥ " सुयशाः संयतस्तत्र, कुर्वन् धर्मं निरन्तरम् । अर्जयामास कल्याण-प्रातिकर्म निरव्ययम् ॥ २ ॥ इत्येकादशमो भवः ॥ ११ ॥ एते सर्वे चतुर्दशलक्षपूर्व्वीं यावत् निःकलङ्कं व्रतं प्रतिपाल्य आयुःप्रान्ते समाधिना मृत्वा सर्वार्थसिद्धिविमाने समुत्पन्नाः ॥ इति द्वादशो भवः ॥ १२ ॥ इतश्चावसर्पिण्यां सुषमदुःखमाभिधतृतीयारकप्रान्ते प्रान्तपल्योपमाष्टभागशेषे इहैव जम्बूद्वीपे दक्षिणभरतार्धे गङ्गासिन्ध्वोरन्तराले प्रथमः कुलकरो विमलवाहनाह्वोऽभूत् १ । तस्य पत्नी चन्द्रयशाः । तदा च क्रमात् समयहीनताभवनात् स्वल्पेषु कल्पवृक्षेषु जायमानेषु कलहकारिषु युगालिषु च हकारनीतिः प्रवर्तयामास । तयोः षण्मासशेषायुष्कयोश्चक्षुष्मान् चन्द्रकान्तेति

युगलमभत् २ । तयोश्च यशस्वी स्वरूपेति युगलं बभूव ३ । अस्य राज्ये मकारनीतिरभूत् । ततोऽभिचन्द्रः प्रियङ्गुरिति युगलं जातम् ४ । यतः—"नवधणुसयाइ पढमो, अट्ठसत्तद्धसत्तमाइं च । छच्चेव अद्धछट्ठा, पंचसया पणवीसं तु ॥ १ ॥ संघयणं संठाणं, उच्चत्तं चेव कुलगरेहि समं । वन्नेण एगवन्ना, सव्वाओ पियङ्गुवन्नाओ ॥ २ ॥" ततस्तदपत्यद्वयं प्रसेनजित् पूर्णकांता इति युगलं जातम् ५ । अस्य काले धिक्कारनीतिरजनिष्ट, तस्यापत्यद्वयं मरुदेवः श्रीकांता इति युगलं जज्ञे ६ । ततः सप्तमं श्रीनाभिर्मरुदेवीति युगलं बभूव ७ । नाभिस्तु सपादपञ्चशतधनुर्देहः मरुदेवी अपि सपादपञ्चशतधनुर्देहाऽभूत् । इतस्तृतीयारस्य चतुरशीतिपूर्वलक्षेष्वेकोननवतिपक्षाधिकेषु अवशिष्टेषु आषाढशुद्धचतुर्दश्यामुत्तराषाढानक्षत्रे सर्वार्थसिद्धिविमानात् त्रयस्त्रिंशत् सागरोपमप्रमितायुरनुभूय ततश्च्युत्वा श्रीवज्रनाभजीवः मतिश्रुतावधिज्ञानशाली गजादिचतुर्दशमहास्वप्नसूचिततीर्थंकरजन्मा मरुदेव्याः कुक्षाववातरत् । तदा च नारकाणामपि सुखमजनि । यतः—"नारका अपि मोदन्ते, यस्य कल्याणपर्वसु । पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः ॥ १ ॥" तस्मिन् काले स्वप्नपाठकादयो न सन्ति । तदा शक्रः प्रभुभक्त्या स्वामिरक्षार्थं आभियोगिकान् स्वसेवकान् मुमोच । नवमासे सार्द्धसप्तदिने व्यतिक्रान्ते चैत्रासि-

ताष्टम्यां उत्तराषाढानक्षत्रे गते चन्द्रे युगलधर्मिणं पञ्चशतधनुस्तनुमानं सुवर्णवर्णशरीरं वृषभध्वजं सर्वाद्भुतलक्षणं प्रथमं जिनं पुत्रं मरुदेवी स्वामिनी सुषुवे। जन्माभिषेककरणं शक्रश्चक्रे। अवतारितस्वाङ्गुष्ठामृतास्वादादुपचित-तनुर्लांछनवृषभस्य दर्शनात् स्वप्नेऽप्यादौ वृषभदर्शनात् वृषभ इति नाम दत्तम्। युगलजातायाः कन्यायाः सुमङ्गलेति नाम दत्तम्। वृषभस्य किञ्चिदूने हायने व्यतिक्रान्ते, शक्रः इक्षुदण्डं लात्वा प्रभुं नन्तुं वंशस्थापनाय चागात्। तदा वृषभेण बालस्वभावात् इक्षुदण्डं गृहीतुं हस्तः क्षिप्तो भक्षणेच्छया। ततः शक्रेण वृषभवंशस्य इक्ष्वाकुरिति नाम दत्तम्। ततः सदा सुरा उत्तरकुरुतः फलानि प्रभुकृते प्रत्यहं क्षीरोदजलानि चोपनयन्ति स्म। अथ दश (देशोन) वर्षदेश्ये प्रभौ अकाले तालफलपतनतो युगालिनः पुरुषस्य (जन्मदिने) मृतिरभवत्। स्त्री तु स्थिता सुनन्देति तस्या नाम। ततो युगलिभिः श्रीनाभिकुलकराय युगालिनो मृतिस्वरूपं प्रोक्तम्। अथ यौवनस्थस्य प्रभोः श्रीनाभिराज्ञा सुमङ्गलासुनन्दयोः पाणिग्रहे क्रियमाणेऽवधिना विज्ञाय वासवः सहाप्सरोभिस्तत्र समागात्। प्रभुरपि अवश्यभोग्यं कर्म जानन् सर्वमनुमेने। ततः प्रथममेव स्वामी सुमङ्गलासुनन्दाभ्यां सह दिव्यधात्रीभिः स्नापितोऽवलिप्तो भूषितश्चानीतो मण्डपद्वारे कृतं दधिदूर्वालवणादि मङ्गलकर्म प्रभोरिन्द्रेण ततः शक्रः स्वर्गं समागात्। नवपरिणीतस्य प्रभोर्म-

ङ्गलानीति मरुदेवाऽवग्—सूनो! जङ्गमकल्पवृक्षविततः शाखाशतेन क्रमात्, त्रैलोक्यं निखिलं समीहितफलैः संतर्प्य यैः सन्ततम्। सत्याशीरिति या वधूद्वयजुषः प्रोवाच तत्राङ्गिनां, प्रीत्यै श्रीमरुदेव्यसौ विजयतां तीर्थङ्करस्य प्रसूः ॥ १ ॥ इति मातुराशिषं प्रभुः पाप। किञ्चिदूनेषु षड्वर्षलक्षेषु व्यतिक्रान्तेषु सर्वार्थसिद्धिविमानाच्च्युत्वा बाहुपीठजीवौ सुमङ्गलादेव्याः कुक्षाववातरतुः। तदा सुमङ्गला चतुर्दश महास्वप्नानि गजादीनि ददर्श। क्रमात् तयोर्जातयोर्जन्मोत्सवे कृते पुत्रस्य भरत इति नामाऽभूत् पुत्र्याश्च ब्राह्मीति नामाऽजनि। सुबाहुमहापीठजीवौ सुनन्दायाः कुक्षौ युग्मत्वेन बभूवतुः। पुरुषस्य बाहुबलिरिति नामाऽभूत्, पुत्र्याश्च सुन्दरीति नाम दत्तम्। क्रमात् सुमङ्गला एकोनपञ्चाशत् युगलानि प्रासूत। एवं ऋषभदेवस्य पुत्रशतं पुत्र्यौ ब्राह्मीसुन्दर्यौ। क्रमात् कल्पवृक्षेषु हीनसत्त्वेषु फलदानशक्तिषु कषायबहुलानां नीतिमर्यादालङ्घनपराणां मिथः कलिपराणां युगलिनां श्रीनाभिकुलकरेण श्रीऋषभदेवः समर्पितो मर्यादायै। ततस्ते युगलिन एकीभूय परमेश्वरं महतः स्थलस्योपरि उपवेश्य नलिनीपत्राण्यादाय हस्तेषु भगवत्स्नानार्थं जलाशये गताः। इतः शक्रः स्वर्गादेत्य परमेश्वरं तादृशे रत्नसिंहासने निवेश्य द्वापञ्चाशच्चन्दनरसेनोपलेप्याभरणाम्बराणि परिधाप्य प्रच्छन्नः स्थितः। इतस्ते युगलिनो गृहीतपद्मिनी-

पत्रस्थजलाः प्रभुं तादृशं दृष्ट्वा प्रदक्षिणीकृत्य चिन्तयामासुः । यदि जलं मस्तकोपरि प्राक्षिप्यते । तदा सर्वाणि वस्त्राणि विनक्ष्यन्ते । ततस्ते प्रभोः पदयोरधस्तादभिषेकं चक्रुः । तद्विनयसन्तुष्टः शक्रः प्रकटीभूय प्रभुं भक्त्या प्रणम्य सुविनीता एते युगलिन इत्युक्त्वा तस्मिन् स्थाने द्वादशयोजनायामां नवयोजनविस्तृतां नवां पुरीं विनीतामिति चकार । प्रभोर्जन्मतो विंशतिपूर्वलक्षाणि व्यतिक्रान्तानि । ततः प्रभुणा केचिद्युगलिनः सचिवाः कृताः । केचिद् दूर्गाऽऽरक्षकाः कृताः केचिच्च भोगा–गुरवः कृताः केचिद्वयस्या–राजन्याः कृताः शेषाश्च युगलिनः क्षत्रियाः पत्तयश्च कृताः । ततः करितुरगगोमहिषादिसङ्ग्रहः कारितः प्रभुणा । अथ कल्पद्रुमेषु उच्छिन्नेषु गतेषु अपक्वौषधिभक्षणपराणां युगलिनामुदरेषु दुष्यत्सु प्रभुणोक्तम् । हस्ततले कुक्षौ (कक्षायां) च मुक्त्वौषधीः भक्षयत । यतः-"ओमपाहारंता, अजीरमाणंमि ते जिणमुविंति । हत्थेहिं घंसिउणं, आहारेह त्ति ते भणिआ ॥१॥ आसी अ पाणिघंसी तिम्मिअतंदुलपवालपुडभोई । हत्थतलपुडाहारा, जइआ किर कुलकरो उसहो ॥ २ ॥" ततस्तथा कुर्वत्सु तेषु अग्निरुत्पन्नस्तं दृष्ट्वा भीतास्ते प्रभुपार्श्वेऽभ्येत्य जगुः । भगवन्नस्माकमौषधीर्भक्षयन् राक्षस उत्पन्नोऽस्ति । प्रभुणा ज्ञानेनाग्निमुत्पन्नं ज्ञात्वोक्तम्–तस्य राक्षसस्याग्नेर्मध्ये मुक्त्वा यूयं भक्षयत । ततस्तथा कुर्वत्सु तेषु राक्षसरूपोऽग्निः सर्वं भक्षयति । ततस्ते प्रभुपार्श्वे गत्वा

तदपि प्रोचुः। ततो वृषभेण कुम्भिकुम्भस्थलस्थेन मृत्तिकामानाय्य प्रथमं कुम्भं घटयित्वाऽर्पयामास। प्राह च-एवंविधान् कुम्भान् कृत्वा वह्निना पाचयित्वा तेषु औषधीः स्थापयित्वा भक्षयत। ततः प्रभूक्तविधिना ते औषधीर्भक्षयन्तिस्म। ततस्ते सुखिनोऽभवन्। ततः प्रभुः शिल्पशतं प्रकाशयामास। ततः प्रजास्तथा चक्रुः। चतुर्धा सामदामादिनीतीः प्रकाशयामास। द्वासप्ततिं कला नराणां भरतं शिक्षयामास। स्त्रीणां चतुःषष्टिं कलाः बाहुबलिं शिक्षयामास। अश्वेभादीनां लक्षणानि प्रभुः प्रकाशयामास। दक्षिणहस्तेनाष्टादश लिपीर्ब्राह्म्यै, वामेन शयेन गणितानि सुन्दर्यै प्रकाशयामास सारस्वतादिदेवा अभ्येत्य प्रभुं प्रोचुः—धर्मं तीर्थं प्रवर्तय त्वम्। ततः संयमग्रहणावसरं प्रभुरवधिना विज्ञाय भरतायायोध्याराज्यं वितीर्य बाहुबलये बहलीदेशराज्यं च शेषेभ्योऽङ्गजेभ्यो यथायोग्यं पुरग्रामादि वितीर्य सांवत्सरिकं दानं ददौ॥ ततः प्रभुः त्रिषष्टिपूर्वलक्षाणि निष्कण्टकां राज्यश्रियमुपभुज्य वसन्तसमये अष्टादशभारवनस्पतिशोभाकारके चैत्रासिताष्टम्यां उत्तराषाढानक्षत्रगते चन्द्रे सुरासुरौघवाह्यां सुदर्शनाख्यां शिबिकामारुह्य सुरेन्द्रादिभूपपरिवृतो राजमार्गे चचाल। प्रभुः क्रमादेवदुदुम्भौ वाद्यमानायां सिद्धार्थोद्यानमाजगाम। प्रभुः शिबिकाया अवरुह्याशोकतरुतले वसनाभरणानि मुमोच। प्रभुः ततो जम्भारिन्यस्तं देवदूष्यमंसे दधानश्चतुर्मुष्टिलोचं चकार। तदा

शक्राग्रहादेका मुष्टिः स्थिता प्रभोर्मस्तके । वासवेन कोलाहले निषिध्यमाने प्रभुर्नमस्कारोच्चारणपूर्वं संयमं जग्राह । तदा नाभेयस्य चतुर्थं ज्ञानं समुत्पन्नम् । यतः "काऊण नमुक्कारं, सिद्धाणमभिग्गहं तु सो गिण्हे । सव्वं मेऽकरणिज्जं, पावं ति चारित्रमारुढो ॥ १ ॥ तिहि नाणेहि समग्गा, तित्थयरा जाव हुंति गिहवासे । पडिवन्नंमि चरित्ते, चउनाणी जाव छउमत्था ॥ २ ॥ तदा भरताद्यैर्बहुभिर्भूपैर्निषिध्यमाना अपि कच्छमहाकच्छादयश्चत्वारो नृपसहस्राः प्रभुणा समं संयमं ललुः । इन्द्रादिषु यथास्थानं गतेषु प्रभुरन्यत्र विजहार । प्रभुः पूर्वभवोपार्जिताशुभकर्मवशाद् भिक्षामलभानो वर्षं यावन्निराहारो विहृत्य गजपुरं समाजगाम । तत्र बाहुबलिपुत्रः सोमयशाः, तस्य पुत्रः श्रेयांसस्तत्साहाय्यात् शत्रुभिराक्रांतो महाभटो जयीजात इति स्वप्नमपश्यत् सोमयशा नृपः १। रविमण्डलतः भ्रस्तः करौघो घटितः पुनः श्रीश्रेयांसकुमारेण स्वप्नं श्रेष्ठीति लब्धवान् २। पुनः श्रेयांसकुमारेण स्वप्नो दृष्टः मेरुर्मलिनो जातः सो मया पायसेन उज्वलीकृतः ३। प्रातरतः शुभं भावि श्रेयांसस्योदयो महान् कोऽपीति मन्त्रयित्वा ते स्वस्ववेश्म त्रयोऽप्ययुः ॥३॥ लाति श्रीऋषभः किञ्चिन्नेति कोलाहलं नृणाम् । श्रुत्वा गवाक्षतोऽधाव–द्युवराजा प्रभुं प्रति ॥ ४ ॥ प्रभोर्दर्शनात्तदा जातिस्मृतिं प्राप्य पश्चान्नवभवं स्वं गृहीतसंयमं ज्ञात्वा प्रभुं चान्नग्रहणतत्परं ज्ञात्वा यावत् प्रासुकान्नं दातुकामः

श्रेयांसोऽभवत् तावल्लोकैर्ढौक्यमानानि गजाश्वकन्याभरणादीनि वस्तूनि त्यजन् श्रेयांसकुमारगृहे प्रभुः समागात्। इतोऽकस्मादिक्षुरसभृतं कुम्भशतं केनचिद्राज्ञा श्रेयांसकुमाराय ढौकनीचक्रे। ततो निरवद्याहारं तमिक्षुरसं विज्ञाय समुल्लसदतीवभावः संयोजितकरकमलः प्रभुं प्रति श्रेयांसः प्राह। प्रभो! प्रसारयाह्राय करौ निस्तारयात्र माम्। द्वाचत्वारिंशद्दोषरहितमाहारं लाहि साम्प्रतम्। अत्र कविघटना। दक्षिणकरं भिक्षामगृह्णानं दृष्ट्वा प्रभुः प्राह—भो दक्षिणकर कथं भिक्षां न गृह्णासि? दक्षिणहस्तोऽवग्—अहं दातृहस्तस्याधः कथं भिक्षां गृह्णामि। यतः—"पूजाभोजनदानशान्तिककलापाणिग्रहस्थापना—चौक्षप्रेक्षणहस्तकार्पणमुखव्यापारबद्धस्त्वहम्। ततो वामो हस्तो जगौ—वामोऽहं रणसम्मुखाङ्कगणनावामाङ्गशय्यादिकृत, द्यूतादिव्यसनी त्वसौ धनिगृहे गृह्णातु भिक्षामपि॥ १॥ राज्यश्रीर्भवतार्जिताऽर्थिनिवहस्त्यागैः कृतार्थीकृतः, सन्तुष्टोऽपि गृहाण दानमधुना तन्वन्दयां दानिपु। इत्यब्दं प्रतिबोध्य दक्षिणकरं श्रेयांसतः कारयन्, प्रत्यग्रेक्षुरसेन पूर्णमृपभः पायात् स वः श्रीजिनः॥२॥" तदा जिनस्य पारणे जाते श्रेयांसस्य यशसा भुवनं पूर्णम्। भवनाङ्गणं सार्द्धद्वादशरत्नकोटिभिः परिपूर्णम्। घुट्ठं च अहोदाणं, दिव्वाणि अ आहियाणि तूराणि। देवा वि य संनिहिया, वसुहारा चेव वुट्ठी य॥ २॥ भुवणं जसेण भयवं, रसेण भत्रणं धणेण पडिहत्थो। अप्पा निरु-

वमसुक्खे, सुपत्तदाणं महग्घविअं ॥ ३ ॥ रिसहेससमं पत्तं, निरवज्जं इक्षुरससमं दाणं । सेयंससमो भावो, हविज्ज जइ मग्गियं हुज्जा ॥ ४ ॥ इतः कच्छादयो भिक्षामलभमाना वनमध्ये तापसा जाताः, जटाधराभिधा अधुना निगद्यन्ते लोकैः । तत्पुत्रौ नमिविनमी दूरगतत्वात् प्रभुदीक्षाग्रहणादनु समायातौ । भरतं सेवितुमनीहमानौ श्रीऋषभदेव-पार्श्वे गत्वा प्रोचतुरिति—स्वामिन्नावां तव सेवकौ तेन भरतपार्श्वे किमपि राज्यादिकं न याचिष्यते आवाभ्याम् । यत्र यत्र स्वामी पादौ धत्ते तत्र तत्र कण्टकादीन्यपसारयतस्तौ, यत्र प्रभुः कार्योत्सर्गे तिष्ठति तत्र तौ खड्गधरौ उभयतः पार्श्व-योस्तिष्ठतः सेवार्थं, प्रातः कमलैः प्रभुं प्रपूज्य राज्यमावयोर्देहीति जल्पतः । ततो धरणेन्द्रस्तत्रागतोऽवक्—भो नमिवि-नमी भवन्तौ राज्यार्थिनौ दृश्येते, प्रभुस्तु निर्ममो निर्द्रव्यश्च तेन भरतं राज्यं याचेथाम्, तावूचतुर्यदि प्रभुः राज्यं दास्यति तदा ददातु नो चेदेवं तिष्ठावः आवाम्, ततस्तयोर्दृढां भक्तिं ज्ञात्वा धरणेन्द्रोऽतीव सन्तुष्टः सन् प्रभुमुखे-ऽवतीर्य प्राह—चलतं युवां वैताढ्ये राज्यं दास्यामि युवाभ्याम्, ततो द्वितीयं वृषभरूपं कृत्वा धरणेन्द्रो वैताढ्यं गत्वा तयोर्दक्षिणश्रेण्युत्तरश्रेण्योर्राज्यं ददौ, ४८ सहस्रं विद्याश्च वितीर्णवान् । उक्तं च—" सुणिणोऽवि तुह लीणा, नमिविनमी खेहराहिवा जाया । गुरुआण चलणसेवा, न निप्फला होइ कइयावि ॥१॥ नमिविनमीणं भायाण, नागिंदो

विज्जदाणवेयड्ढे। उत्तरदाहिणसेढी, सट्ठी पन्नास नयराइं ॥२॥" अन्येद्युर्भगवान् विहरमाणो बहुलीदेशविभूषणस्य तक्षशिलापुरस्य बहिरुद्याने सन्ध्यायां समेत्य कायोत्सर्गे स्थितः। तदा पितुरागमनं ज्ञात्वा बाहुबलिर्ध्यातवान्। अधुना रात्रौ प्रायो वन्दनं मम न शोभते, प्रातर्विस्तरात् प्रभुं प्रणंस्यामि एवं ध्यात्वा प्रातर्विस्तरं कृत्वा यावत् प्रभुं नन्तुं याति बाहुबलिः तावदितः पूर्वं प्रभुर्विहारं व्यधात्। बाहुबलिः प्रभुमदृष्ट्वा खिन्नः सन् रुरोदतमाम्। अलक्ष्यलक्ष्य! क्व गतस्त्वम्, एकशो दर्शनं देहि। ततो मन्त्रिवचसा स्वस्थीभूय तत्र प्रभुपादुकायुक्तं स्तूपं महान्तं रत्नमयं कारयामास बाहुबलिः। प्रभुरपि मौनावलम्बी वर्षसहस्रान्ते पुरिमतालपुरे शकटाह्वे वने कृताष्टमतपा वटवृक्षस्याधः स्थितः। फाल्गुनकृष्णैकादश्यां उत्तराषाढानक्षत्रे प्रातः प्रभुः केवलज्ञानं प्राप। तत्क्षणादेव सर्वे सुरेन्द्रास्तत्र समेत्य समवसरणं रचयामासुर्यथाधिकारम्, ततो 'नमो तित्थस्से'ति कृत्वा भगवान् सिंहासनमुपविष्टः। द्वादश पर्षदः उपविष्टाः, इतो भरतस्यायुधशालायां चक्ररत्नं समुत्पन्नम्, ततो द्वयोश्चक्ररत्नप्रभुकेवलज्ञानोत्पत्त्योः वर्धापनिका समकालं भरताग्रे समायाता। भरतो ध्यातवान्, प्रथमं चक्रपूजां करोमि अथवा युगादिदेवपूजां करोमि, एवं ध्यात्वा क्षणाद्भरतो दध्यौ धिग् मां यदेवं ध्यातं मया। यतः—"तायंमि पूइए चक्कं, पूइयं पूअणरिहो ताओ। इह लोइयंमि चक्कं, परलोअसुहावओ

ताओ ॥ १ ॥" ततो मरुदेवीं पितामहीं पुत्रवियोगाश्रुजातनेत्रपटलां हस्तिकुम्भस्थलमध्यारोप्य भरतः परमेश्वरं वन्दितुं प्रतिचचाल । समवसरणं दृष्ट्वा भरतोऽवग्—हे मातर्विलोकय स्वपुत्रस्याद्भुतां विभूतिं शृणु च देवदुन्दुभिनिनादांश्च । एका तावत् स्वल्पा मम ऋद्धिः द्वितीया प्रभुता तव पुत्रस्य विभूतिः, द्वयोरंतरं मेरुसर्षपयोरिव हंसकाकयोरिव चिन्तामणिकर्करयोरिव राजरङ्कयोरिव दृश्यते । ततो मरुदेवी देवदुन्दुभिशब्दं श्रुत्वा हर्षाश्रुपतनादुत्तरितनेत्रपटला समवसरणं ददर्श । तत्क्षणात् सर्वकर्मक्षयात् केवलज्ञानं प्राप्यायुषः क्षयान्मुक्तिं गता । "सूनुर्युगादीशसमो न विश्वे, भ्रान्त्वा क्षितौ येन शरत्सहस्रम् । यदर्जितं केवलरत्नमग्र्यं,स्नेहात्तदेवार्प्यत मातुराशु ॥ १ ॥ अतिमोहं जिने कुर्यात्, त्यक्तुं चेच्छक्यते न सः । यथा श्रीमरुदेव्याप, कुम्भिकुम्भस्थिता शिवम् ॥ २ ॥" तदा देवाः समेत्याग्निसंस्कारक्रियां व्यधुः । भरतः समवसरणे गत्वा प्रदक्षिणात्रयं दत्त्वा प्रभुं प्रणम्य धर्मं श्रोतुमुपविष्टः । प्रभुणेति धर्मोपदेशो ददे शोकच्छिदे । संसारंमि समुद्दे, अणोरपारंमि दुल्लहं एअं । मणुअत्तजाणवत्तं, विसालकुलजाइदलकलियं ॥ १ ॥ निव्वाणपुरी चिट्ठइ, भवपारावारतारणसमत्था । ते न पवडंति जीवा, मुत्तुं मणुअत्तबोहित्थं ॥ २ ॥ लोभमूलानि पापानि, रसमूलाश्च व्याधयः ॥ स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखीभव ॥ ३ ॥ संसारंमि असारे, नत्थि सुहं वाहिवे-

यणापज्झे । जाणंतो इह जीवो, न कुणइ जिणदेसियं धम्मं ॥ ४ ॥ अथिरं जीयं रिद्धी च, चंचला जुव्वणं च खणसरिसं । पच्चक्खं पिरकंतो, तहवि य वंचिज्जए जीवो ॥ ५ ॥ अत्र मधुबिन्दु कथा ज्ञातव्या । धर्मोपदेशं श्रुत्वा भरतपुत्रः पुण्डरिको दीक्षां जग्राह । स च गणधरपदव्यां स्थापितः प्रभुणा । 'उप्पन्नेइ वा, विगमेइ वा, 'धुवेइ वा' इति । अन्ये त्र्यशीतिः गणधराः स्थापिताः । तत्र भरतस्य पुत्रपञ्चशती दीक्षां जग्राह, नप्तृसप्तशती व्रतं जग्राह, मरीचिः ब्राह्मी च संयमं जग्राह । पुण्डरीकाद्याः साधवः ब्राह्मयाद्याः साध्व्यो भरताद्याः श्राद्धाः सुन्दर्याद्याः श्राद्ध्यः इति चतुर्विधः श्रीसङ्घः । ततो भरतः प्रभुं प्रणम्य स्वगृहे गत्वा प्रभुं पूजयित्वा भक्त्या चायुधशालायां गत्वा चक्ररत्नं पूजयामास भक्त्या । ततः शुभे दिने भूरिभिर्भूपैः सेव्यमानो भरतश्चक्रेणोपदेश्यमानं मागधतीर्थसन्निधिं प्राप्य तत्र स्कन्धावारं स्थापितवान्, कृताष्टमतपाः तत्पारणके तु रथाधिरूढो भरतो नाभिदघ्ने जले स्थित्वा स्वनामाङ्कितं बाणं मुमोच । भरतचक्रिनामाङ्कितं बाणं दृष्ट्वा मागधकुमारस्तत्राभ्येत्य किरीटकुण्डलादि प्राभृतं दत्तवान्, ततो जगौ—अहं तव सेवकोऽस्मि । ततस्तं स्वसेवकं मागधं कृत्वा स्वस्कन्धावारं प्राप्तवान् भरतः, अनेन विधिना दक्षिणवारिधौ वरदामं साधयामास भूपः । ततः पश्चिमपाथोनिधिस्वामिनं

पूर्ववत् प्रभासं सिन्धुदेवञ्च भरतः साधयामास, ततो वैताढ्यस्य दक्षिणनितम्बे शिबिरं स्थापयामास । तत्र पूर्वरूढ्या वैताढ्यदेवमप्याराध्य तमिस्रागुहासमीपमाससाद, तद्गुहारक्षकं कृतमालं देवमाराध्य दक्षिणसिन्धुनिष्कुटं साधयितुं सेनापतिं सुषेणाह्वं प्रेषयामास । ततः सकटकः स सुषेणो जलस्थलदुर्गनिवासिनः सिंहबर्बरादीन् म्लेच्छाधिपतीन् निजाज्ञावशंवदान् कृत्वा तेषामुपायनान्यादाय स्वस्वामिपार्श्वे समागात् । अथ तमिस्रागुहोद्घाटनाय सप्रसादं देवं भरत आराधयामास, तत्र गत्वा तमिस्रागुहाद्वारं दण्डरत्नेनोद्घाटयामास । चक्री करिरत्नमारुह्य तत्कुम्भे मणिरत्नं निधाय गुहांतः सञ्चरन् द्वादशाश्रिणा द्वादशयोजनप्रकाशमयेन काकिणीरत्नेन गोमूत्रिकाक्रमात् गुहाभित्त्योर्योजनान्ते योजनान्ते पञ्चधनुःशतायामानि एकोनपञ्चाशन्मण्डलानि तमश्छिदे भरतो व्यधात् । ततो यत्र शिलाऽपि क्षिप्ता तरति—तुम्बीफलवत् सा उन्मग्ना नदी, यत्र क्षिप्तं तुम्बीफलमपि शिलावन्मज्जति सा निमग्ना नदी, ते द्वे तटिन्यौ वार्द्धकिगणिविहितया पद्यया सकटको भरत उत्ततार । पञ्चाशत् योजनमानाया गुहाया बहिर्निर्गत्य तत्रस्थान् सर्वान् किरातादीन् रिपून् प्रबलानपि सेनापतिर्जिगाय। अथ तत्र केचित् किराताः स्वगोत्रदेवीमाराध्य द्वादशयोजनमितामतीव वृष्टिं कारयामासुः । तज्जलोपद्रवरक्षणाय द्वादशयोज-

नायामे चर्मरत्ने शिबिरं निवेश्य तदुपरि तत्प्रमाणं छत्रं संनिवेश्य प्रकाशाय छत्रदण्डमूले मणिं निधाय च सप्त दिनानि यावत् चक्रिणा स्थितम् । ततो यदा सप्तदिनान्ते चर्मरत्नात् चक्रं निर्गतं तदा लोकैरुक्तम् । ब्रह्मत इदं अण्डं निर्गतं, इति प्रघोषो जातः । ततः क्षुद्रहिमवद्गिरिनाथं संसाध्य पश्चात् भरतो चचाल । वैताढ्याद्रिदक्षिणोत्तरस्थौ नमिविनमी द्वादशवर्षयुद्धविधानेन जिगाय भरतः । विनमिः—स्वां पुत्रीं सुभद्राभिधां दण्डदानपुरस्सरं भरताय ददौ । उत्पन्नवैराग्येण स्वपुत्रौ स्वपदे निवेश्य नमिविनमी—श्रीऋषभपादान्ते प्रव्रज्यां ललतुः । ततो गङ्गातीरे आवासेषु दत्तेषु सुषेणेन सेनापतिना तदुत्तरतटे पूर्वरीत्या साधिते देव्याऽनुरक्तया समं चक्री वर्षसहस्रं रेमे । पश्चात् स्वपुरीं प्रत्यागच्छन् गङ्गातटे नवनिधानानि भरतः प्राप । तेषामेतानि नामानि—नैसर्प्प १ पाण्डुकश्चाथ २, पिङ्गलः ३ सर्वरत्नकः ४ । महापद्म ५ काल ६ महा—कालौ ७ माणवक ८ शङ्खकौ ९॥ १॥ ते प्रत्येकं दैर्घ्येण द्वादशयोजनानि विस्तरेण च, पल्योपमायुषः । ततश्चक्री महोत्सवपुरस्सरं स्वां राजधानीमयोध्यामाययौ । चक्ररत्नपूजापुरस्सरं भरतस्य च द्वादशवर्षाणि राज्याभिषेकः कृतः। एवंविधा विभूतिरभूद्भरतस्य—चतुःषष्टिसहस्रा अंतःपुर्यः, सपादलक्षपिण्डविलासाः, चतुरशीतिलक्षाः प्रत्येकं गजतुरङ्गमरथाः, ९६ कोटिपत्तयः ग्रामाश्चैतावन्तः, ७२ सहस्रपुरवराः,

३६३ सूपकाराः, १८ श्रेणयः अनेके व्यवहारिणः, इत्यादिऋद्धिः, षष्टिवर्षसहस्रैः सर्वा दिशश्चक्रिणा साधिताः। कदाचित् सुन्दरीं भगिनीं कृशाङ्गीं दृष्ट्वा तस्याः परिवारो भरतेन दुर्बलकारणं पृष्टोऽवग्—युष्माकं दिग्यात्राचलनादनु अनया आचाम्लान्येव क्रियमाणानि सन्ति, षष्टिवर्षसहस्राणि जातान्यस्यास्तपस्तपन्त्याः। प्रभुणा युगलधर्मे निषिद्धेऽपि स्वं सौन्दर्यं सोदरस्य मोहजनकं (च) विमृशन्ति तन्निग्रहाय सा सती सुन्दरी तपश्चकार। अहो नाभेयवंशेऽस्मिन्, धर्माधिक्यमनर्गलम्। यत्तद्विधेन तपसा, बाल्येऽरमत सुन्दरी ॥ १ ॥ समुद्रधाराशु तपःकृशाऽपि, मोहाम्बुराशौ भरतं निमग्नम्। महीभृतं शीलगुणेन तेन, बलीयसी बाहुबलेः स्वसाऽपि ॥ २ ॥ अथ भरतेन क्षमयित्वा, विसृष्टा सुन्दरी श्रीऋषभपार्श्वे दीक्षां जग्राह। अथ चक्ररत्ने आयुधशालायामप्रविशति मन्त्री भरतेन पृष्टश्चक्ररत्नस्यायुधशालाया-मप्रवेशहेतुं प्राह—भवतो बाहुबलिर्भ्राता सेवां कर्तुमागतो नास्ति, तेनेदं चक्ररत्नमायुधशालां न प्रविशति। ततो भरतेन प्रेषितो दूतो बाहुबलिपार्श्वे गत्वा जगाद—भवतो भ्राता भरतः षट्खण्डं साधयित्वा स्वपुरं प्राप्तोऽस्ति। अन्येषां राज्ञां गजतुरङ्गमादिदेशदानान्मनांसि तोषयामास भरतः। त्वं नागाः, भ्रातुर्मिलनार्थमपि। त्वमपि तत्रा-गच्छ भूरिदेशादि दास्यति भ्राता। बाहुबलिः प्राह—कः कस्य भ्राता। अहमपि यदि तस्य भ्रातुः सेवां करिष्ये तदा

मम सर्वस्वं गतम् । ममासौ देशस्तु तातेनार्पितोऽस्ति । अस्मिन् देशे भरतस्य का तृप्तिः ? दूतोऽवग्—एवं वक्तुं न युज्यते भवतोऽधुना गजाश्वरथपत्त्यादिभिः स तव भ्राता बलिष्ठो विद्यतेतराम् । यदि त्वं तत्र समेष्यसि तदा तुभ्यं बहून् देशान् दास्यति । यदि त्वं न तत्रैष्यसि सोऽत्र समेष्यति तदा त्वां हत्वा देशं ग्रहीष्यति अधुना तव तस्य सेवां कर्तुमवसरोऽस्ति, बलिष्ठो विद्यते । बाहुबलिर्जगौ—यदाहं भरतेन समं रममाणो गङ्गातीरे भरतमुत्पाट्य हस्तेन नभसि दूरं क्षिप्त्वा पुनस्तं पतन्तं स्वहस्तेनाधरिष्यं तत्तस्य किं विस्मृतम्। एवं मया तत्र पूर्वं भरतो बहुशो जितः। अधुना किं असौ आत्मीयं बलं ज्ञापयति । दूतोऽवग्—यस्य सेनया चलन्त्याऽधुना पृथ्वी कम्पते शेषोऽपि कम्पते तीव्रभारत्वात्, वैताढ्यपर्वतवासिनमिविनमिविद्याधरमागधादिबहून् बलिष्ठान् स साधयामास । ततो दूत एवं जल्पन् हक्कितो बाहुबलिना । ततो दूतो भरतपार्श्वे गत्वा सर्वं बाहुबल्युक्तं जगाद । ततो भरतः संनह्य चचाल यदा तदा बहवोऽपशकुना बभूवुः, पश्चाच्छकुना वर्या बभूवुः । भरतो बहुलीदेशे गत्वा तक्षशिलां वेष्टयित्वा स्थितः । इतो बाहुबलिः सभायामुपविष्टोऽन्यचक्रं समागतं श्रुत्वा मनसि किमपि भयं नानैषीत् । यदा बाहुबलिर्युद्धाय निर्गतः, तदा सुमतिसागरमन्त्री प्राह्—एवमकस्माद्रणं कर्तुं न युज्यते पश्चादपसार्य चमूं भुक्त्वा पश्चात् सङ्ग्रामः क्रियते । ततः

पश्चाच्चमूमपसार्य श्रीऋषभदेवस्य पूजां कृत्वा सर्वैः पत्तिभिः समं भुक्तवान् भरतः। ततो द्वादशवर्षाणि युद्धं भरत बाहुबल्योरभूत्। एकोऽपि द्वयोर्मध्ये न भनक्ति। यदा तदा बहुजीवसंहारं दृष्ट्वा शक्रोऽभ्येत्य द्वयोरग्रे प्राह एवं भवतोर्युद्धं बहुसंहारकारकं कर्तुं न युज्यते, मिथः युवां युद्धं कुरुत। प्रथमं दृष्टियुद्धे भरतेन हारितं बाहुबलिना जितम्, देवैः पुष्पवृष्टिर्बाहुबलेर्मस्तकस्योपरि कृता। इत्यादिदृष्टयादियुद्धे जायमाने भरतेन हारितम्। उक्तं च—"पढमं दिट्ठीयुद्धं वायायुद्धं तहेव बाहाहिं। मुट्ठीहि य दंडेहि य, सव्वत्थ विजिप्पए भरहो॥ १॥" ततो भरतेन चक्रं मुक्तं बाहुबलिं हन्तुम्, चक्रमपि बाहुबलिं प्रदक्षिणीकृत्य हस्ते उपविष्टम्। बाहुबलिरवग् भो भरत! इदं चक्रं चूर्णीकरोमि त्वया सह परं किं क्रियते त्वं तु भ्राता ज्येष्ठोऽसि। चक्रं मयेदं पश्चात् प्रेष्यमाणमस्ति। या तव शक्तिः स्यात् सा करिष्यताम्। ततो बाहुबलिना प्रेषितं चक्रं भरतपार्श्वे गतम्। मन्त्री जगौ एकस्मिन् गोत्रे चक्रं न प्रभवति, ततो भरतेन मुष्टिना बाहुबलिर्मस्तके आहतो जङ्घां यावद्भूमौ गतः, बाहुबलिना (ऽपि भरतस्य मारणाय मुष्टिरुत्पाटितस्ततो) ध्यातं मया मुष्टिरुत्पाटितो निष्फलो मा भवतु, तेन मे मस्तकस्योपरि मुच्यते लोचकरणेन। संसारश्चासारोऽसौ यदि भ्राता एवंविधमकृत्यं करोति, तदा कस्य दोषो दीयते, ततः स्वयमेव पञ्चमुष्ट्या लोचं कृत्वा आत्मानं व्युत्सृजामीत्युक्त्वा,

कायोत्सर्गे तस्थौ बाहुबलिः । दध्यौ च बाहुबालिः—मम पूर्वं अष्टानवतिर्भ्रातरो व्रतं ललुः । यदि केवलज्ञानं विना तत्र भगवतः समीपे गम्यते मया तदा ते लघवोऽपि भ्रातरो लब्धकेवलज्ञाना नम्यन्ते इति मत्वा मौनी बभूव । भरतस्तत्रैत्य, पदयोर्लगित्वा भो भ्रातर्मुञ्च मौनं राज्यमङ्गीकुरु बाहुबलिं क्षमयित्वा भरतः प्राह—अहं त्वभाग्यवानस्मि । यत्त्वं मया कटकवधकरणादिना खेदितोऽसि । ततो भरतः तस्य बाहुबलेः पुत्राय सोमाय राज्यं वितीर्य, स्वपार्श्वात् हितबुद्ध्याऽधिकराज्यग्रामदानात् प्रमोदयामास । ततो भरतः स्वपुरमभ्येत्य द्वादशवर्षीयराज्याभिषेकं स्वस्मिन् कारयामास । इतो बाहुबलेः कायोत्सर्गस्थस्य वर्षं जातं विनाऽशनादिना । इतः श्रीनाभेयेन ब्राह्मीसुन्दर्यौ बाहुबलिप्रतिबोधाय प्रेषिते । ताभ्यां तत्राभ्येत्योक्तम् । 'हत्थीउ उत्तर भाय' । इति श्रुत्वा बाहुबलिर्दध्यौ । वर्षं जातं ममात्र स्थितस्य हस्त्यारोहणं विना । ततो निजभगिन्योः शब्दमुपलक्ष्य बाहुबलिर्दध्यौ मानगजमहमारूढोऽस्मीति ज्ञापयितुमिहागते स्तो भगिन्यौ । ततो मानं मुक्त्वा यावच्चलितुं पादौ दत्ते तावत् सर्वकर्मक्षयात् केवलज्ञानं प्राप । ततो नाभेयपर्षदि गत्वा, परमेश्वरं प्रदक्षिणीकृत्य, केवलिपर्षदि उपविष्टो बाहुबलिः । उक्तञ्च "कियन्तो बहिरङ्गाश्चान्तराश्च षडपि द्विषः । तपसा तीव्रतीव्रेण, यत्नेनाशु विजिग्यिरे ॥ १ ॥ नासीरवीरभरतं समरेऽचिरेण, यो हेलयैव

जितवानपि मोहराजम् । ज्ञानश्रियः सपदि संघटनैकहेतु-र्वीरः स बाहुबलिरेव मुदं तनोतु ॥ २ ॥ भग्ने श्रीभरते स्वपत्तिसहस्रैराजन्मपुष्टैर्मदै-स्तद्दैरादिव निर्जितं विगणयन् स्वं श्रीसुनन्दाङ्गजः । हत्वा तान् जिनवाक्यशाणकषणात्तीक्ष्णेन बोधासिना, वीराणामथ पूर्वकेवलभृतां मुक्तिं गुणैर्लब्धवान् ॥३॥ हेतोः केवलसम्पदः किल तपस्यन्तं जिनोक्तेक्षणे, श्रीमद्बाहुबलिं समेत्य मुदिता ब्राह्मीयुता सुंदरी । वल्लीव्यूहविभूषितं मुनिवरं दर्पेभकुम्भस्थला-दुत्तार्याथ तपोवशंवदतमामुद्वाहयामास ताम् ॥ ४ ॥ अथ कदाचित् पञ्चभिः शकटशतैरन्नभृतैः ऋषभदेवपार्श्वे गत्वा भरतोऽवग्—स्वामिन्नद्यान्नदानग्रहणेन मामनुगृहाण । ऋषभोऽवग्—छत्रधरराज्ञामाहारः साधूनामधुना न कल्पते, तेन भवता साधर्मिकाणां धर्मतत्पराणामन्नं देयम् । ततो भरतेन ये ये धर्मिष्ठाः श्राद्धा ब्रह्मव्रतधारिणो भवन्ति, ते ते स्वगृहे भोज्यन्तेस्म । अथ सूपकारेण विज्ञप्तं स्वामिन्! बहवो ब्रह्मचारिणो भोक्तुमायान्ति तेनास्माभिरन्नं दातुं तेभ्यो न शक्यते । ततो भरतेन ये ये ज्ञानदर्शनचारित्रस्वरूपं जानन्ति, तेषां काकिणीरत्नेन कण्ठे रेखात्रयं कारितमभिज्ञानार्थम्, ये नवतत्त्वविदस्तेषां नव, क्रमाच्चेषां यज्ञोपवीतं जातम् । अन्येद्युर्भरतेनोक्तम्—भगवन्! भवत्तुल्याः कियन्तोऽर्हन्तो भविष्यन्ति ? प्रभुः प्राह—होही अजिओ संभव—अभिनंदणसुमइसुप्पभसुपासो । ससिपुप्फदंतसीयल—

सिज्जंसो वासुपुज्जो अ ॥ १ ॥ विमलमणंतयधम्मो, संती कुंथू अरो अ मल्ली य । मुणिसुव्वयनमिनेमी, पासो तह वद्धमाणो अ ॥ २ ॥ अस्यां पर्षदि कोऽप्यस्ति ? योऽग्रे भवत्तुल्यस्तीर्थकृद्भवति ? युगादिदेवो जगौ—यो भवतः पुत्रो मरीचिः, प्राप्तचारित्रोऽधुना परीषहानसहमानः जलस्नानं मस्तकोपरि छत्रधारणोपानत्परिधानादिप्रमादपरो विद्यते पर्षदो बहिस्तात् । सोऽग्रे अस्यां चतुर्विंशतौ प्रथमो वासुदेवस्त्रिपृष्ठनामा भविष्यति । महाविदेहे मूकायां पुरि चक्री, भरते चास्मिन्नेव चतुर्विंशतितमो वीरनामा जिनश्च भविष्यति । ततो भरतो हृष्टो झटिति उत्थाय तत्र गत्वा तं मरीचिं त्रिःप्रदक्षिणीकृत्य प्राह—भवान् त्रिपृष्ठो नाम वासुदेवो, मूकायां चक्री, अस्मिन्नेव भरते चतुर्विंशतितमो वीरो जिनो भविष्यति, तेनाहं तुभ्यं वन्दमानोऽस्मि, एवमुक्त्वा मरीचिं नत्वा स्तुत्वा च भरतः पुरीमध्ये गतः । तद्वचनं श्रुत्वा मरीचिः प्राह—अहो मदीयं कुलमुत्तमं, यतो मे पितामहो युगादीशः, पिता तु भरतः, अहं च क्रमात्सार्वभौमः, अत्र चान्तिमो वीरजिनेन्द्रो भविष्याम्यहमेव । एवं जल्पनेन तेन मरीचिना नीचगोत्रकर्मार्जितम् । यतः ॥ "जातिलाभकुलैश्वर्य-बलरूपतपःश्रुतैः । कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ॥ १ ॥" ऋषभदेवस्य प्रथमो गणधरः पुण्डरीकाभिधश्चैत्रशुद्धपूर्णिमायां पञ्चकोटियतियुतो विमलगिरौ मुक्तिमगात् । ततो भरतेन तत्राभ्येत्य श्री-

ऋषभदेवस्य पुण्डरीकस्य च शरीरमानप्रमाणाः काञ्चनबलानकस्थाः कारिताः। एकः प्रासादो महान् शत्रुञ्जयशिखरे च श्रीयुगादिदेवपुण्डरीकप्रतिमायुतः कारितश्च। श्रीऋषभदेवः श्रीशत्रुञ्जये बहुशो वारान् समागतः उक्तञ्च—

"नवनवई पुव्वाइं, विहरंतो आगओ सि सत्तुंजे। उसभो सुरेहि सहिओ, समोसढो पढमतित्थंमि ॥१॥" चतुर्विधं श्रीसंघं स्थापयित्वा विंशतिपूर्वलक्षाणि कौमारपदव्यां त्रिषष्ठिपूर्वलक्षाणि राज्यपदव्यां च स्थित्वा एकं पूर्वलक्षं श्रामण्यं पालयित्वा समस्तक्षीणायुष्कर्मा सर्वायुः प्रपाल्य निर्वाणकल्याणकं स्वं ज्ञात्वा दशसहस्रयतियुतोऽष्टापदगिरौ चतुर्दशभक्तेन गृहीतानशनः आसनकम्पात् समागतसौधर्मेन्द्रादिचतुःषष्टिशक्रः श्रीभरते तत्र समेते अवसर्पिण्यारतृतीयारकस्य एकोननवतौ पक्षेषु शेषेषु माघकृष्णत्रयोदश्यां अभिजिन्नक्षत्रे क्षीणभवोपग्राहिकर्मा पर्यङ्कासनसमासीनो लोकाग्रं मुक्तिमङ्गीचकार। तदानीमशेषाः साधवः क्षीणकर्माष्टका मुक्तिं ययुः। अथ देवैः प्राच्यां दिशि गोशीर्षचन्दनेन चिता चक्रे प्रभोः। ऐक्ष्वाकुमुनीनां दक्षिणस्यां दिशि त्र्यस्रा, शेषमुनिवराणां पश्चिमस्यां दिशि चतुरस्रा चक्रे। इत्थं संस्कारादनु तद्भस्म सुरैर्नरैश्च ववन्दे। ततोऽग्नित्रयं तत्र गृहीतं ब्रह्मचारिभिः तदद्यापि ब्राह्मणगृहेषु पूज्यमानमस्ति। देवेषु स्वस्थाने गतेषु क्रमाद् भरतः श्रीऋषभदेवनिर्वाणगमनस्थाने सिंहनिषद्याकारं प्रासादं कार-

यित्वा स्वस्वशरीरमानप्रमाणाश्चतुर्विंशतिर्जिनप्रतिमा दक्षिणस्यां ४, पश्चिमायां ८, उत्तरस्यां १०, पूर्वस्यां २, स्थापयामास। तीर्थरक्षानिमित्तं दण्डरत्नेन शिखराणि उच्छेद्य योजनप्रमाणानि सोपानानि चक्रे। तत्र पूजामहिमादिकृत्यं निर्माय श्रीभरतोऽयोध्यां प्राविशत्। तस्य राज्ञोऽन्येद्युरन्तःपुरस्थस्य सर्वाभरणभूषितशरीरस्य पुरुषप्रमाणात्मादर्शमुपनीतवान् सेवकः, तदानीमादर्शमध्ये स्वदेहं विभूषणभूषितं पश्यतोऽकस्मान् मुद्रिकाऽङ्गुलीतः पपात। तदा मुद्रिकां विना कृतं हस्तं वीक्ष्य निःश्रीकं देहात् मुकुटकुण्डलादीन्याभरणान्युत्तारयामास। ततो देहं समग्रं निःशोभमङ्गारसदृशं दृष्ट्वा भावनां भावयामास, ततोऽनित्यादिभावना भावयन् केवलज्ञानं प्राप। देहं समग्रमभवद्भरतेश्वरस्य, रूपावलोकनविधौ मणिदर्पणस्य। आत्मानमात्मनि मनीषितया दिदृक्षो-स्तत्त्वप्रकाशविमलं परमात्मरूपम् ॥ १ ॥ राज्ञां दशभिः सहस्रैः गृहीतव्रतैरनुगम्यमानः पूर्वलक्षं यावत् भुवि विहृत्य भव्यजीवान् प्रबोध्य अष्टापदगिरौ मासं यावदनशनीभूय मुक्तिमाससाद भरतेश्वरः। भरतसूनुः सूर्ययशाः स्वयं शक्रेणाभ्यसिच्यत। बाहुबलिः क्षीणकर्मा मुक्तिं गतः। ब्राह्मीसुन्दर्यौ मुक्तिं गते। एतेषां निर्वाणगमनमहिमा देवैरभ्येत्य कृतः। इति श्री भरतबाहुबलिकथा समाप्ता ॥

औत्पत्यादिधियां योगा—दभयो मन्त्रिनायकः। मुक्तिं ययौ पुरा प्राप्य, विशुद्धां संयमश्रियम् ॥१॥

अतोऽभयकुमारस्योत्पत्तिस्वरूपं मुक्तिपर्यन्तं व्याख्यायते। तथाहि—जम्बूद्वीपे लक्षयोजनप्रमाणे दक्षिणस्यां दिशि भरतखण्डमध्यस्थमगधदेशो विराजते। तत्र राजगृहं नाम पुरं नवद्वादशयोजनप्रमाणनानाप्रकार-मणिमुक्ताफलप्रवालादिवस्तुपूरितं विभासतेतराम्। तत्रासन्नप्रदेशे दक्षिणभागे गङ्गानदी वहते। तत्र वैभारगिरि-नामा पर्वतो विद्यते। राजगृहे पुरेऽनेकमहेभ्योच्चतरगृहजिनप्रासादान् वीक्ष्य केषां न मुद् प्रजायते? अपि च सर्वेषाम्। तत्र क्रमात् प्रबलवैरिकुञ्जरकेसरी न्यायसागरसमुल्लासनचन्द्रमाः प्रसेनजितमहीपालो राज्यं करोतिस्म। वप्र उच्चैस्तरो नगरं परितः कुण्डलीव निधानपरितः शोभते। तत्र तस्य राज्ञो राज्ञीनां शतमभूत्। तासां मुख्या कलावती। श्रेणिककुमारप्रभृतिपुत्राणां शतमासीत्। सर्वेऽपि पुत्राः शस्त्रशास्त्रकलाः पाठिताः पित्रा। यतः-“प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम्। तृतीये नार्जितो धर्म—श्चतुर्थे किं करिष्यति ॥ १ ॥ जायंमि जीव-लोए, दो चेव नरेण सिक्खिअव्वाइं। कम्मेण जेण जीवइ, जेण मुओ सुहगइं जाइ ॥ २ ॥ अन्येद्युर्भूपतिश्चिते, चिन्त-

यामासिवानिति । सर्वे पुत्रा अमी तुल्य–बला विद्याविशारदाः ॥ ३ ॥ न परीक्षां विना राज्य–योग्यो हि ज्ञायते सुतः । प्रजाया वल्लभो बुद्धि–युक्तो विनीतमानसः ॥ ४ ॥ राज्ययोग्यो भवेत् पुत्रस्तेन कार्यं परीक्षणम् । ” यतः–“ताते जीवति यदि तातः परीक्षां कृत्वा मर्यादया पुत्रान् न स्थापयामास तदा पितरि मृते बलोत्कटाः पुत्रा मिथो युद्ध्वा युद्ध्वा म्रियन्ते, राज्यं चान्यत्र याति । यतः—“देहे नष्टे कुतो बुद्धि-र्बुद्धिहीने कुतः स्मृतिः । स्मृतिहीने कुतो ज्ञानं, ज्ञानहीने कुतो गतिः ॥ १ ॥” विमृश्येति राज्ञा वर्यं पक्वान्नं कारयित्वा चोल्लका वंशमया भरिताः अपवरकमध्ये ते मोचिताः, कोरकाः कुम्भा जलभृतास्तत्र मोचिताः भूपेन, ततः सर्वान् पुत्रान् गर्भगृहे मुक्त्वा भूपः प्राह–भो पुत्राः भवद्भिश्चोल्लकानां [करण्डकानां च] जलकुम्भानां च मुखं नोद्घाटनीयं तृप्तैर्भवितव्यम्, बुद्ध्या स्वकीयया करण्डकमध्यगं पक्वान्नादि भोज्यं, उद्घाटनं विना जलकुम्भेषु नीरं च पेयम् । श्रेणिकादयः कुमाराः स्वस्वबुद्ध्या चिन्तयन्ति स्म जल्पन्तिस्म च कथं भोक्ष्यते कथं पितुराज्ञा अखण्डा स्यात् कस्यापि बुद्धिर्नोपपद्यते, तदा सर्वान् सहोदरान् बुभुक्षया पीडितान् वीक्ष्य श्रेणिककुमार आचष्ट–मम बुद्धिं यदि कुरुत यूयं, तदा तृप्ता भविष्यथ । सर्वे सहोदरा जगुः–यदि नस्तृप्तिर्भवति तदा वरम् । श्रेणिकः सर्वेषां स्वच्छानि स्वच्छानि-

वस्त्राणि गृहीत्वा जलकुम्भानां परितो वेष्टयन्, ततः करण्डकान् धूनयित्वा धूनयित्वा पक्वान्नचूर्णं पतितं पतितं खादं खादं कोरकघटवेष्टितवस्त्राणि मर्दयित्वा मर्दयित्वा तद्गलितं जलं पायं पायं तृप्ताः सर्वे कुमारा बभूवुः। ततोऽखिलाः कुमारा राज्ञः पार्श्वे समेताः। पृष्टं च भूपेन कथं सर्वे तृप्ता जाताः। एकेन पुत्रेणोक्तम्, श्रेणिकबुद्ध्या। ततो राजाऽवग्, यस्यैवंविधा धीरुत्पन्ना, स रङ्क एव खज्जकचूर्णकरणात्, ततः प्रसेनजितभूपः पायसं कारयित्वा सर्वेषां पुत्राणामग्रे अमत्राणि मण्डयित्वा क्षैरेयीं परिवेष्य च तत्कालं सारमेयान् बुभुक्षितान् मोचयामास। कुमाराः तां यावद्भक्षयन्ति तावत् सारमेया घुर्घुरशब्दं कुर्वन्तः क्षैरेयीं भक्षयितुं कुमारभाजनेषु आगताः, ततः सर्वे कुमाराः खरण्टितहस्ता भयभीताः श्रेणिकं विना भाजनानि मुक्त्वा नष्टा दिशोदिशं। श्रेणिकस्तु निर्भयीभूय कुमाराणां सहोदराणां भाजनानि सारमेयसंमुखं चिक्षेप। सारमेयास्तु खरण्टितेषु खरण्टितेषु भाजनेषु स्थिताः पुच्छानि चालयन्तः कुमारस्य दासा इव जाताः। ततः श्रेणिकः समाधिना स्वभाजनस्थां क्षैरेयीं भुक्त्वा, तृप्तीभूय चाचमनं गृहीत्वा राज्ञः समीपे गतः। परेऽप्यायाताः कुमाराः। राजा श्रेणिकं तृप्तीभूतमपरान् बुभुक्षाशुष्काननान् दृष्ट्वा तृप्तं श्रेणिकं [जगौ। ततः] कृत्रिमां भृकुटीं कृत्वा [राजा] प्राह—श्रेणिकोऽयं सारमेय-

पङ्क्तिषु जिजेम येन, तेनायं तत्कल्पो जातः । ग्रामीणजनगोपालतुल्योऽसौ येनानेन एवंविधं भोजनं कृतम् । यस्य पङ्क्तिषु यो जेमति स तादृश एवोच्यते जनैः । एते कुमारा वर्याः शुचयः पवित्राः, ततस्ते हृष्टाः । श्रेणिकस्य मनसि खेदो नाभून् मनागपि । प्रसेनाजितभूपः प्राह–धवलगृहे ज्वलति त्वं मयाऽग्रे परीक्षितः इति, हीरान् मणीन् मुक्ताफलानि मुक्त्वा भम्भाह्वां वादित्रं च गृहीत्वा निर्ययौ तस्माद् गृहात्, तेन त्वं इमां भम्भां गृहीत्वा गच्छ गृहे गृहे वादय उदरम्भरिरसि । अथ राजकुमारा यद्यन्मुञ्चन्ति, तत्तत्त्वं भक्षयाग्रे । यदि त्वमेतदपि जानीहि, तदा त्वं दक्षस्तवाज्ञा । इति शब्दच्छलेन तस्य राज्यं ज्ञापितं पित्रा । सर्वेषां पुत्राणां यथा-योग्यं ग्रामान् विभज्य राजार्पयामास । अपरे पुत्रा हस्तिघोटकरथपत्त्यादिसङ्ग्रहं कुर्वते, एषः श्रेणिककुमारः केषाञ्चित् घोटकादीनामपि सङ्ग्रहं न करोति, अनेन सारमेयैः समं भक्षितं परमान्नं, पकान्नं चूर्णीकृतं, प्रदीपने ज्वलति भम्भा एव गृहीताऽस्ति, तेनासावधुना राज्ययोग्यो नास्ति । वणिगिव बद्धमुष्टिः किमपि न व्ययति, इत्युक्ते पित्रा श्रेणिकः कुमारः एकाकी रात्रौ विदेशं प्रतिचचाल स्कन्धे खड्गं दधानः । श्रेणिक औषध-मन्त्रतन्त्रादिप्रयोगं जानाति । षट्त्रिंशद्दण्डायुधश्रमकरणकुशलः उदयमानाद्भुतकर्मा निर्भयः सन् सिंह इव वने

चचार श्रेणिकः । भ्रामं भ्रामं भुवं बह्वीं, कुमारः श्रेणिकः क्रमात् । वज्राकरं महाशैलं, ददर्श मुदिताशयः ॥ १ ॥

श्रेणिकस्य कुमारस्य तत्रस्थस्य वज्राकरगिरिसमधिष्ठायकदेवो भाग्यं महत्तमं वीक्ष्य रात्रौ स्वप्नछलेनेदं प्राह—हे कुमार! पिप्पलयुगलं हस्तमेलापकाकारं बृहच्छाखं सुरनदीतीरे समस्ति । इतो गव्यूतान्ते तयोर्मध्ये शाखायामेको महान् धवलप्रस्तरोऽस्ति । तस्य प्रस्तरस्य गुणा मेरुतुल्याः सन्ति । तस्य मध्ये अष्टादश महाप्रभावाणि रत्नानि एकैकोपरि सन्ति । तथाहि—एकेन अष्टादश वर्णा वशीभवन्ति १ एकेन रत्नेन सर्वाणि विषाणि उत्तरन्ति २ एकेन राजामात्य-महेभ्यादयो मानं ददते ३ एकेन ऋद्धियुक्तं सन्तानं भवति ४ एकेन दिव्यभोगाः स्युः ५ एकेन जलपूरस्तीर्यते ६ एकेन विवेक उत्पद्यते ७ एकेन क्षुद्रोपद्रवा न भवन्ति ८ एकेन शरीरे घातो न लगति ९ एकेन पठितं विना विद्या समेति १० एकेन अनीकबन्धो भवति ११ एकेन जात्यन्धा अपि जनाः पश्यन्ति पुरस्थितम् । १२ एकेन पावकोऽङ्गं न दहति १३ एकेन वस्तुपरीक्षा ज्ञायते १४ एकेन बुभुक्षातृषे न लगतः १५ एकेन मार्गे गच्छतां नृणां-व्याघ्रसिंहादयो दुष्टा जीवा न मीलन्ति १६ एकेन रूपपरावर्तो भवति १७ एकेन देहाद्रोगा गच्छन्ति लोका नमन्ति सर्वे १८ त्वमसि दक्षः, एष पाषाणस्त्वया विलोकनीयः । अष्टादश रत्नानि गृहीत्वा अक्षराणि लिखित्वा आत्मनः पार्श्वे

स्थापनीयानि च। पूजा कर्तव्या तेषां मदीयं नाम चित्ते धरणीयम्। त्वं तत्र यावद् गच्छसि छायायां विश्रामं यावन्न करिष्यसि, तावत् पाषाणोऽपि विकाशं गमिष्यति। यस्य यः प्रभावो मया प्रोक्तोऽस्ति स सत्यस्त्वया ज्ञातव्यः। तव भाग्यं वर्द्धमानं वीक्ष्योक्तं मयैतत्। एतेषां रत्नानां विंशतिवर्षाणि यावन्महान् प्रभावो भविष्यति। ततः परं महत्तमोत्तमः प्रभावो भविष्यति। एवंविधं स्वप्नं वीक्ष्य यावज्जागर्ति कुमारः, तावत् प्रातर्जातम्। पञ्चपरमेष्ठि-नमस्कारशतत्रयं गणयित्वा स्वप्नस्वरूपं हृदि चिन्तयन् चचाल कुमारः। देवोक्तानुसारेणाचलत् कुमारः श्रेणिकः। नदीतीरे हस्तमेलापकाकारौ महीरुहौ ददर्श। तयोर्मध्ये महान् धवलप्रस्तरो दृष्टः पूजितः श्रेणिकेन। ततः एकतः पार्श्वे यावदुपविष्टः, तावत्तयोर्वृक्षयोर्मध्यात् प्रस्तरः पतन् सन् श्रेणिकेन गृहीतो हस्ते। सर्वेषां रत्नानां प्रभावाचिन्हानि कृत्वा शनैः शनैरग्रतश्चचाल। यतः—"सुराज्यं सम्पदो भोगाः, कुले जन्म सुरूपता। पाण्डित्य-मायुरारोग्यं, धर्मस्यैतत्फलं विदुः॥१॥" पथि गच्छन् श्रेणिकोऽन्येद्युः नद्या उपकण्ठे चम्पकाशोकपुन्नागमाकन्दराजाद-नप्रभृतितरून् पुष्पफलशालिनो ददर्श। ये ये वर्या वृक्षा उपलक्षिता भवन्ति, तेषां तेषां वृक्षाणां मृष्टानि फलान्यास्वा-दमानो मृगादिभिः सह क्रीडां कुर्वाणो नद्यादिस्वच्छप्रवाहेषु जलं पिबन् चचाल। मृदुपत्रनिष्पादितशय्यासु रात्रौ स्वपिति

श्रीश्रेणिककुमारस्य विदेशगमनम्

श्रेणिकः । पर्वतशिखरतः प्रवाहानुत्तरतः प्रेक्ष्य मयूरान् नृत्यतश्च जहर्ष श्रेणिकः। पल्लीमध्ये चलन् राज्यगृहनिवासादधिकं सुखं मन्यतेस्म । गच्छत एकाकिनो वने अकस्माद् भिल्लपुत्री कुमारिका दृष्टिपथमवतीर्णा । भिल्लिका श्रेणिकं देवकुमारतुल्यमागच्छन्तमालोक्य नूपुरनिनादपूरितदिगन्तराला मयूरपिच्छनिर्मापितचरणसालंकृतगात्रा हर्षोत्कर्षपूर्णस्वान्ता चलन्ती क्रममाणा गजगत्या शनैः भिल्लिका कुमारी मुमुदे चन्द्रमिव चकोरीका । पर्वतशिखरादुत्तरन्ती श्रेणिकसमीपमागता भिल्लिका जगाविति । अथ मम जन्म कृतार्थमजनि । यत् त्वमेवंविधस्तरुणो रूपवान् वरो लब्धः । तव शरणमागतास्मि । तिष्ठ तिष्ठ स्वामिन् प्रसादं कृत्वा ममोपारि । पल्ल्यामस्यां मदीयः पिता राजास्ति । मां यदि त्वं पारिणेष्यासि तदा मत्पिता त्वां देशाधिपं कृत्वा स्थापयिष्यति । यदि मदीयं कथितं नैव करिष्यासि तदा त्वमकाले मृतिं गमिष्यसि। यानि यानि औषधानि मणिमन्त्रतन्त्रप्रभावाश्च वर्तन्ते तानि सर्वाणि जानाम्यहम् । एकमौषधमस्ति ममेदृशं येन मनुष्योऽपि पशुर्भवति पशुरपि मनुष्यः स्यात् । एकेन मनुष्यो मर्कटो भूत्वा पदे पदे लगन् चलति। एकेन मर्कटोऽपि मनुष्यो भवति । अहं वृक्षान् प्रति पादौ मुञ्चन्ती अन्येषां जनानां मदनभीष्टानां हस्तपादं भिनझि । अहं व्याघ्रसिंहेभ्योऽपि न बिभेमि। वनमध्ये चलन्ती न बिभेमि, भूतप्रेतपिशाचेभ्योऽपि न बिभेति । अहं चौरसर्पादिभ्योऽपि न बिभेमि । ममोपान्ते सन्ति

सङ्केताः। अहं पानीयपूरेभ्योऽपि न बिभेमि । कुञ्जरं कर्णे धृत्वा रक्षामि । एकस्माद्वैश्वानराद्दूरे नश्यामि । मत्वेति त्वं वरो मां परिणेतुं मन्यस्व । मम पितुर्देशसीमा योजनशतं यावद्विद्यते । तेन ममाग्रतः कथं त्वं गमिष्यासि ममाङ्गीकरणं विना । हसतामहसतामपि प्राघूर्णो भवति यथा तथा मां परिणेतुं हस्तं धर । श्रेणिकः कुमारो दध्याविति । इमां शाकिनीं कथमहं परिणेष्यामि । एकं तावदियं मलिना । नीचा जात्या कामुका वदन्ती च बलिष्ठा धूर्तिका च अहमग्रे सारमेयादिभिः जेमनादिक्रियां कुर्वाणस्तातेन निष्कासितः स्वदेशात् । यद्यस्याः स्यां भर्ता तदा मम ज्ञातृत्वस्य मस्तके क्षारः पतिष्यति । अगमनगमनेन कुलं क्षिप्यते तथाऽधमैः । यदि मयेयं परिणेष्यते तदा क्षत्रियकुलं भिल्लकुलसमानं मया गण्यते । यदीयं परिणेष्यते मया तदा अस्या हस्ते गृहीतव्य आहारः । अस्याः पितुश्च मया नमस्कारः करणीयः । यदि मया पाणिग्रहोऽस्याः क्रियते तदा मम मातापित्रादयो लज्जन्ते । कथमपि नारीमिमां न वरिष्ये । किमस्याः पार्श्वात् नश्यामि अथवा मृतिं करिष्ये श्रेणिक इति दध्यौ । यतः—

" अर्जयित्वा कुलं वर्य-तमं ये मनुजाः खलु । अधमैः सह कुर्वन्ति, मैत्रीं ते ह्यधमाः स्मृताः॥ १ ॥ संसारे हयविहिणा, महिलारूवेण मंडियं पासं । बज्झन्ति जाणमाणा, अयाणमाणा न बज्झन्ति ॥२॥ अनृतं साहसं माया, मूर्ख-

श्रीश्रेणिक-कुमारस्य विदेशगमनम्

त्वमतिलोभता । निःस्नेहो निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥ ३ ॥ दर्शने हरते चित्तं, स्पर्शने हरते बलम् । सङ्गमे हरते वीर्यं, नारी प्रत्यक्षराक्षसी ॥ ४ ॥" कृत्वा मौनं क्षणं तस्मात्, स्थानकाच्च शनैः शनैः । चचाल श्रेणिको यावत्, तावत् पृष्ठे चचाल सा ॥ ५ ॥ अग्रतो गच्छन् श्रेणिको दावं ज्वलन्तमालोक्य अग्निस्तम्भनमणिं हृदि स्मरन् अग्निमध्ये प्रविवेश । अग्निमध्ये ऊर्ध्वीभूतः श्रेणिकस्तां प्रति प्राह । रे भिल्लिके यदि मां परिणेष्यसि तदाऽत्र मम समीपं समागच्छ । आकर्ण्यैतद् भिल्लिका हस्तौ घर्षयन्ती बभाण—अहं त्वरितगतिकाऽभूवं यद्यहं स्थिराऽभविष्यं तदाऽसौ शनैः शनैर्मां पर्यणेष्यत । अनेन धूर्तेन संमुखाऽहं छलिताऽस्मि । अकरिष्यमहं बाढं, विनयमस्य सन्ततम् । अजल्पिष्यं वचो भीति-दायकं न मनागपि ॥ १ ॥ अभविष्यमहं दासी, यद्यस्य मृदुजल्पनात् । अपातिष्यत्तदा-पाशे, मदीयेऽसौ सुनिश्चितम् ॥ २ ॥ यन्मया जल्पितं तन्मे, मस्तके पतितं खलु । मन्त्रतन्त्रादिकोटीना-मेष जानाति निश्चितम् ॥ ३ ॥ रङ्कस्य चटितं रत्नं, हस्ते किं तिष्ठति स्फुटम् । मया मौग्ध्यात् स्वमन्त्रादि-ज्ञातृत्वं जल्पितं खलु ॥ ४ ॥ अनेन येन दावाग्निर्गृहीतो मां वञ्चयित्वा । अहं किं करिष्ये क गच्छामि कस्याग्रे वदामि ऊर्ध्वस्थिता भिल्लिका कुमारं गच्छन्तं दर्शं दर्शं मनसि खेदं दधती हृदयं कुट्टयामास । क्षणेनैकेन तया चिन्तितं गच्छन् म्रियमाणो वा

केनापि रक्षितुं न शक्यते। अहं तु मुधैव विषादं करोमि, भाग्यं विना चिन्तामणिर्गृहे न तिष्ठतीति ध्यायन्ती सा तत्र तस्थौ। कुमारो मुष्टिं बध्वा चचाल। ततो बलेन क्रमात् श्रेणिको गङ्गाप्रवाहं प्राप। जलं भूरि पश्यन् कुमारस्तरंश्चतस्रो दिशः पुनः पुनर्विलोकयामास। तस्या उपकण्ठे महाचन्दनतरुं शुष्कमालोक्य हर्षितः श्रेणिककुमार आरुरोह। यावदुपरि चटितस्तावत् कडकडशब्दं कुर्वन् वृक्षो गजेन्द्र इव पानीयमध्ये पपात। रत्नं जलतारकं मनसिकृत्य शुष्कवृक्षारूढः कुमारः विमानस्थ इव चलन् शुशोभ। चन्दनपादपाधारेण रत्नप्रभावेण च विंशतिदिनप्रान्ते वेन्नातटपुरसमीपे प्राप्तः। कुमारः यावत् विमानतरुं तत्र स्थापयामास तावत् पुरमध्ये सर्वतः तस्य तरोः परिमलः प्रससार। परिमलानुसारेण तत्र बहवो महेभ्या आगता भ्रमरा इव जातिपुष्पपार्श्वे। महेभ्या जगुः। भो सार्थवाह अस्य चन्दनस्य किं मूल्यम्, कुमारेणोक्तम्—अस्य मूल्यं वक्तुं न शक्यते। मणिमाणिक्यतुलया विक्रीयते। एवंविधं चन्दनं कस्यापि राज्ञो भाण्डागारे नास्ति। सुवर्णेन समं तोलयित्वा अर्पयिष्यामि चन्दनं शुष्कमपि। यूयमप्यर्पयिष्यथ क्रयाणकं वर्यं सर्वमपि क्षमते। अत्रान्तरे बहुषु लोकेषु मीलितेषु महेभ्यैरुक्तम् भो लोका दूरीभवन्तु, मा जानीथ एवं एककोऽस्ति, वयं सर्वे अस्य साधर्मिकाः स्मः, यदस्य स्वल्पमपि चन्दनं गच्छति तदस्माकमेव गतं, तेन न केनापि

श्रीश्रेणिकस्य वेन्नातट गमनम्

अस्य क्रयाणके हस्तः क्षेप्यः, योऽस्य क्रयाणकमध्ये हस्तं स्थापयिष्यति तस्य चौरदण्डो भविष्यति, राजा अन्यायिनां निग्रहं करोति न्यायिनां रक्षां करोति च। ततो दिशो दिशो वंशिकाः कुठाराः कुद्दालादयोऽप्यागच्छन्ति खंडीकर्तुं, शाखामूलादि सर्वं स्वर्णतोल्यं विक्रीयते। कुमारेण कंपाणके चटापयित्वा हेममूल्येन सर्वं चन्दनं विक्रीतम्। ततस्तेन हेम्ना जात्यरत्नानि गृहीतानि। क्षणमध्ये सर्वं चन्दनं गृहीत्वा स्वर्णदानेन महेभ्याः स्वस्वगृहे ययुः हर्षिताः। रत्नानि ग्रन्थौ बध्वा वेषपरावृत्तिं कृत्वा श्रेणिककुमारो वेन्नातटपुरमध्ये प्रविवेश। कुमारः प्रविशन् हट्टश्रेणिमध्ये प्रथमं धनावहहट्टे जगाम। यावत् क्षणमुपविष्टः कुमारस्तत्र तावच्छ्रेष्ठिनो बहुलाभो जायमानोऽजनि। श्रेष्ठी कुमारं प्रति प्राहेति—एकस्मिन् भाजने मदनफलानि सन्ति, द्वितीये रोहिणित्वचा, तृतीये सुण्डलके यवाः सन्ति, एतानि मया कल्ये आनीतानि सन्ति। गडूचीकच्चूरकपाटलादि चतुर्थे सुण्डलके, त्रिगडू त्रिफला सैन्धवगिरिमालकादि अस्ति, यच्च वस्तु सुण्ठीमुख्यं तव विलोक्यते तद् गृहाण। एतदाकर्ण्य कुमारोऽवग्—श्रेष्ठिन् हस्ते बहुमुत्कलोऽसि त्वं किमर्थं, त्वं ममोपरि एवं कुर्वन्नसि, अथवा तवैवंविधः स्वभावोऽस्ति। ततो हट्टाधिपो हसन्नाह—आत्मनोऽर्थे एव वल्लभो विद्यते नृणाम् नतु कस्यापि परकार्यं वल्लभम्। श्रेणिकः प्राह—

कः आत्मनः स्वार्थः ? श्रेष्ठी प्राह–अद्य रात्रौ केनचित् सुरेण स्वप्नछलान्ममाग्रे प्रोक्तमेवम्, यः प्रभाते विंशतिवर्षप्रमाणो धवलवस्त्रधारी पूर्वदिशायाः कश्चित् समेष्यति सप्तसु घटीषु गतासु अष्टम्यां घट्यां भवद्हट्टाग्रे स तवापदां सर्वां भेत्स्यति । एवंविधं स्वप्नं दत्त्वा कोऽपि देवो विद्युदिव तिरोदधे । ततः प्रातरुत्थाय मया चिन्तितं वर्यं स्वप्नमिदम् । यतः स्वप्नशास्त्रे-"देवताश्च द्विजा गावः, पितरौ लिङ्गिनो नृपाः । यद्वदन्ति नृणां स्वप्ने, तत्तथैव भविष्यति ॥ १ ॥ कृष्णं कृत्स्नमशस्तं, मुक्त्वा गोवाजिराजगजदेवान् । सकलं शुक्लं शस्तं, मुक्त्वा कर्पासलवणानि ॥ २ ॥ गायने रोदनं ब्रूयान्, नर्तने वधबन्धनम् । हसने शोचनं ब्रूयात् पठने कलहं तथा ॥ ३ ॥" ततोऽहं हट्टे समेत्य यावदुपविष्टः तावत्त्वं तादृग्लक्षणलक्षितो मया दृष्टः । कुमारो दध्यौ । एष श्रेष्ठी मुग्धः किमपि गुह्यं न स्थगयति । यथा यथा श्रेष्ठी स्वप्नस्वरूपं कथयति तथा तथा कुमारः कौतुकं चित्ते धत्ते । अपवरकमध्ये वस्तु दृष्ट्वा कुमारः प्राह–गर्भगृहमध्ये यद्वस्तु मुक्तं तत् किमर्थं ? श्रेष्ठी प्राह–परद्वीपसम्बन्धिवाहनं समुद्रमध्ये वहमानं चौरैर्गृहीतम्, तैः स्तेनैस्त्वरितमत्रानीय मम भूरिद्रव्येण भरितं समर्पितम् । गतेषु स्तेनेषु राज्ञा तद्वृत्तान्तं ज्ञात्वा प्रथमं धनकणकर्पटकाञ्चनरूप्यादि सर्वं मदीयं दण्डे गृहीतम्, श्रेष्ठिपदव्यपि उद्दालिता, वाहनमध्यस्थं क्रयाणकमपि

गृहीतम् । तन्मध्ये या धूलिर्दृष्टा राज्ञा उक्तं च एषा धूलिरस्य गले बन्धनीया । यतः । अद्यप्रभृति एवंविधं स्तैन्यं न करोति श्रेष्ठी । ततोऽहमेवंविधो भूपेन कृतोऽखिलधनापहारात् । यदि दूरं त्यज्यते, तदा लोका हसन्ति माम्, ततो मया चिन्तितम् । वर्षाकाले कर्दमो हट्टश्रेणौ भवति तेन कियती धुलिर्हट्टाग्रे स्थापिता, कियती हट्टमध्ये स्थापिता मया, यद्वाहनं मया गृहीतं तदपि दिनपञ्चसप्तमध्ये गङ्गापूरेण दृष्टिपथमागमिष्यति । धननामाप्यहं निर्धनोऽभूवम् । श्रेणिकः प्राह—अहो वस्तुस्वरूपं यो न जानाति स कथं क्रयविक्रयौ करोति । श्रेष्ठी जगौ—अग्रे लोका मां हसन्ति यदि त्वमप्येवं मां हससि तदा का गतिर्मम । लोका जानन्ति एषोऽत्र ।किं वसति । वर्यं गृहं वर्यं हट्टं मदीयं लातुं सर्वे जनाश्चिन्तयन्ति स्म । गृहं मया विक्रीष्यते नगरमिदं त्यक्ष्यते । यस्मिन् पुरे मयानेक-नानाविधमधुराहारदिव्यवस्त्रपरिधानादि कृतम् । तस्मिन्नधुना यत्तदाहारवस्त्रादिना निर्वाहो मया क्रियते । अहं जानामि किं कूपे पतित्वा मरणं साधयामि, अथवा वन्हौ प्रविशामि । लक्ष्मीं विना नरो न शोभते । यतः—" वरं वनं व्याघ्रगणैर्निषेवितं, जनेन हीनं बहुकण्टकावृतम् । तृणानि शय्या वसनं च वल्कलं, न बन्धुमध्ये निर्धनस्य जीवितम् ॥ १ ॥ " करुणासागरः कुमारः श्रेष्ठिनं दुःखिनं दृष्ट्वा दुःखितोऽजानि । यतः—चेतः सार्द्रतरं वचः समधुरं

दृष्टिः प्रसन्नोज्ज्वला, शक्तिः क्षान्तियुता मतिः श्रितनया श्रीर्दीनदैन्यापहा। रूपं शीलयुतं श्रुतं गतमदं स्वामित्व-मुत्सेकता–निर्मुक्तं प्रकटान्यहो नवसुधाकुण्डान्यमून्युत्तमे ॥ १ ॥ कुमारोऽवग्–श्रेष्ठिन् कथं सत्यां श्रियि त्वया म्रियते ? श्रेष्ठी जगौ–मम गृहे तन्नास्ति यद्भुज्यते, एवं त्वं कथं जल्पसि ? कुमारः प्राह–यद्विलोक्यते तद्गृहाण त्वं वाहनं गङ्गातटस्थं यत्नेन रक्षितुं। या धूलिः समागता सा सर्वा यत्नेन रक्षणीया भूरि धनं भविष्यति । तत्र गृहे यावद् धूल्येव धनं भवति तावन्मदीयै रत्नैर्व्यवसायं कुरु त्वम् । वेन्नातटपुराधिपमावर्जय । ये ये तत्र सेवका-स्तान् तान् अङ्गीकुरु । यावदहं देशान्तरं विलोक्य पश्चादागमिष्यामि तावदेतैः रत्नैस्त्वं व्यवसायं कुरु । धनपति-र्भणति–त्वयेदमेवं कथं जल्पितम् ? अनेन वचनेन मम हृदयेऽतीवोच्चाटोऽजनि । यत्त्वया चलितुं वार्ता कृता सा मच्चित्ते शल्यमिवाजनि । यत्त्वया वचनयानं मम मज्जत आपदम्भोधौ तरितुं दत्तं तत्कथमधुनैवोद्दाल्यते । उत्तमा-नामेवं जल्पितुं न युज्यते । यद्वचनं त्वया जल्पितं तत् क्रियताम् । पश्चाद्यथारुचि देशान्तरं विलोकय । त्वं यदि मामवगणय्य यास्यसि, तदा देवतोक्तं वचनमपि निष्फलं भविष्यति । तत्र बुद्धिप्रपंचं विना धूल्या धूलिमेवाहं लप्स्ये । त्वमथकल्पतरुरिवात्रागत्य किं गच्छसि । इमां धूलिं त्वं विक्रीणीहि । यद्द्रविणमुत्पद्यते तदर्धेन गृहीष्यते आवा-

श्याम् । एवं चेन्नक्रियते भवता तदा गङ्गाप्रवाहे प्रक्षिप । यथा सन्तापो न भवति । कुमार आचष्ट । यदि मम पितृनामकुलवसनग्रामादि न पृच्छ्यते, तदाऽहं दिनानि कतिचित् स्थास्यामि धनो बभाण—अहं तव पार्श्वे किमपि नामादि न पृच्छामि । त्वमात्मीयेन नाम्ना सह राज्यं कुरुष्व । मम सम्बन्धि वस्तु इदं त्वदीया बुद्धिः । तव बुद्धया विक्रीयेदं वस्तु आवाभ्यामर्धेन विभज्य गृहीष्यते धनेनावर्जितः श्रेणिकः । ततो दन्तधावनार्थं नीरमानीतम् । एकं दातनकं द्विस्फटिकां कृत्वा द्वाभ्यां धनश्रेणिकाभ्यां मुखशोधनं कृतम् । द्वाभ्यां परस्परं प्रीतिः कृता । कुमारस्य रत्नानि गृहीतानि श्रेष्ठिना । दातनकजले ययाऽऽनीते सा धनपुत्री बालकुमारी विद्यते । दातनकं कृत्वा कुमारो यावद् हट्टे उपविष्टः । तावत्तया कन्यकया सुलक्षणवान् कुमार उपलक्षितः । दध्यौ च कुमारी । यद्ययं मम भर्ता भवति तदा सुकृतस्यानन्तस्योदयोऽजनि मम, एवं ध्यात्वा कुमारी पितुः पुरः प्राह—यदि तात त्वं मां परिणायिष्यासि एनं तदासौ वरो मे भवतु, नो चेत् चारित्रं भवतु मम । ततो धनः श्रेष्ठी प्राह—भो वत्से एवं वक्तुं तव न युज्यते गृहे गच्छ, गृहं प्रमार्जय । दूरत आत्मनः प्राघूर्णक आगतोऽस्ति । ततो धनपुत्री गृहे गत्वा जननीपार्श्वे प्राहेति—एक आगतोऽस्ति पुमान् दूरतः आत्मीयहट्टे, तं दृष्ट्वा मदीयं मानसमुल्लसितम् । मम सुखभक्षिकायै योऽर्थो विधीयते विद्यते वा

तेनार्थेन प्राघूर्णकार्थे वर्या रसवतीं कुरु त्वं मातरस्य प्राघूर्णकस्यार्थे आलस्यं त्यक्त्वा । स्नानान्नदानादिना तं प्राघूर्णकं सत्कृत्य त्वं मां तेन सह परिणायय । माता प्राह—रे निर्लज्जे वत्से किमर्थं कथितं विना हट्टे गता, यान् यान् द्रक्ष्यसि तांस्तान् यदि त्वं वरिष्यसि तदा त्वं अस्माकं हस्तादुच्चरिताऽसि । एवंविधानि स्वेच्छाजल्पकानि यद्यपत्यानि यानि भवन्ति तानि दुःखीनि भवन्ति । त्वं महाकुले उत्पन्ना सती कथमेवं जल्पसि । तवाधुना लज्जाऽपि कुत्राऽगात् । पुत्री बभाण—मातरेवं मा जल्प, मम शीलं मेरुसमं निश्चलं जानीहि, त्वया विकारः कोऽपि नानेयो मनसि, अहं तु तव पुत्र्यस्मि यो मया पतिर्वाञ्छितः स एवास्मिन् जन्मनि मम भर्ता भवतु नो चेत् संयम एव शरणम् । मातृपुत्र्योरेवं जल्पत्यो रसवतीं कुर्वत्योः सत्योः स एव प्राघूर्णकः प्राङ्गणे आगतः अत्रान्तरे धनश्रेष्ठी भार्यापुत्रीजल्पनोदन्तं श्रुत्वा गृहमध्येऽभ्येत्य पत्न्याः पुरः प्राह—एष वरोवर्योऽत्रागतोऽस्ति, एषा पुत्री विवाहयोग्याऽस्ति यदि अनयोर्विवाहेन संयोगो भवति तदा चन्द्ररोहिण्योरिव सूर्यरत्नादेव्योरिव कन्दर्परत्योरिव कृष्णरमयोरिव शक्रेन्द्राण्योरिव शोभा भवति । अन्तरायो यदि नैव भवति तदाऽनयोर्योगो वर्यो भविष्यति । जीवानां लक्ष्म्यर्जने पुण्यकृत्यकरणे (च) विघ्नानि भूरिशो जायन्ते

यतः—“ पुण्यं वितन्वतां नृणां, विघ्नानि भूरिशः स्फुटम् । उत्पद्यन्ते ततः सद्भिः, कर्तव्यं साहसं सदा ॥ १ ॥” एतस्य पार्श्वे भवता ग्रामनामकुलगोत्रादि न पृष्टव्यम्, एतदर्थं साम्प्रतमहं नियमः कारितोऽस्मि, तत एष अत्रात्मीयगृहे आगतोऽस्ति । तदानीं सुनन्दा जगौ—हे तात त्वया नामस्थानककुलगोत्रादिकस्य वार्तापि न पृष्टव्या । यदि एष कुमारो मामङ्गीकरोति तदा विवाहं कुरुष्व मया सहास्य नो चेन्मम दीक्षां दापय । पुत्र्या निश्चयं मत्वा पिता जहर्ष । ततो द्वयोः स्नानदानदेवपूजावर्यरसवतीपरिवेषणादिपर्यन्तं धनपुत्री भक्तिं चकार । ततश्चित्रशालायामुपविष्टौ द्वौ । धनेन प्रोक्तम्—यदि भवता विरूपं न मन्यते तदा किमपि प्रोच्यते श्रेणिकोऽवग्—यन्मम रोच्यमानमस्ति तज्जल्पनीयं त्वया, धनश्रेष्ठ्यवग्—एषा मम पुत्री तां त्वं परिणय पथिक ! अर्थलोभो मनसि न कर्तव्यः । विंशमर्द्धविंशं वा जामातुर्न रक्षामि । कन्याविक्रयं ये जनाः कुर्वन्ति तेषां बहुपापं लगति । यतः—“ ये कन्यानां जना एवं, विक्रयं कुर्वते स्फुटम् । ते लभन्ते इहामुत्र, दुःखश्रेणिमनुत्तराम् ॥ १ ॥” या एव पुत्री त्वया परिणेतव्याऽस्ति । नो चेच्चारित्रं गृहीष्यति । सान्यं नरं नेहते, ततः कुमारो धर्मिष्ठां तां विज्ञाय मनो गुप्तं कृत्वा च प्रोचे एषा पुत्री ग्रथिलाऽस्ति यं यं वरं पश्यति तं तं वरिष्यति यदि तदा एषा मूर्खाणां मध्ये रेखां

धन श्रेष्ठिनः सुनन्दायाः पाणिग्रहणाय श्रीश्रेणिकस्य अभ्यर्थना.

लप्स्यते । नामस्थानककुलगोत्रादि ज्ञातं विना यद्येषा वरं वरति तदासौ ग्रथिला निश्चितम् । कुमारी प्राह—यद्येष कथयति, तत् कथयतु अहं अमुमेव वरिष्यामि, राजहंसानां कुलं कः पृच्छति । यथा तेषामुत्तमं भवति । उत्तमानां कुलमाकारं जल्पनेन ज्ञायते । राजहंसी मानससरोवरे एव रुचिं करोति नान्यत्र तथा एषापि । प्रकटं प्राह च कुमारः । मयि अङ्गीकृते तव को लाभः अहं तु वैदेशिकः । घटीमध्येऽत्र स्थितोऽपि यामि । अभ्रच्छायेव मम मेलापको भविष्यति तव । ततः सुनन्दाऽवग्—सत्यं वचस्तव, अभ्रस्याधारे चन्द्रसूर्यौ, अभ्रस्याधारे जलधरपूरः, अभ्रस्याधारे ताराः सर्वाः स्युः, अभ्रस्याधारे लोकाः सर्वे, तथाहं तवाधारेऽस्मि । कृपां कृत्वा मम पाणिग्रहं कुरु । अभ्रमिव भवान् पुत्रपौत्रादिना विस्तरतु । कुमारः प्राह—पाणिग्रहः स्वप्नतुल्यो मम तव भविष्यति । विवाहानन्तरं यावद् दिनानि पञ्चदश भविष्यन्ति तावदहं वैदेशिको विदेशं प्रति चलिष्यामि । देशान्तरितोऽथवा अवधूतः उत्थाय चलितः, लग्नं भूतं यस्य रा यथा उत्थाय याति तदा तस्याः का गतिः । पुनरपि सुनन्दा जगौ—अहं व्रतं ग्रहीतुकामाऽभूवम् । अधुना त्वां दृष्ट्वा मनः एवंविधमभूत् । तव करो हस्ते लगति अथवा संयमश्रियः करः । यदि त्वं मां परिणीय गमिष्यसि तदाऽहं शीलव्रतं पालयिष्यामि । अथवा संयमं—निष्कलङ्कं । मां परिणीय त्वं देशान्त-

राणि विलोक्यात्मीयराज्यं कुरु । श्रुत्वैतत् कुमारो ग्रन्थिं बध्वा प्राह—एषैव वेला वर्या वर्तते । यत् रोचते भवतः तत् कुरु । ततः श्रेष्ठी स्वां पुत्रीं समहोत्सवं श्रेणिकाय पर्यणाययत् । अन्येद्युः श्रेणिको हट्टे उपविष्टः । अत्रान्तरे पुरे- पटहो वाद्यमानः कुमारेण श्रुतः । पृष्टं च तेन । श्रेष्ठिन् किमर्थं पटहो वाद्यते ? श्रेष्ठी प्राह सपादलक्षबलीवर्दभृत- नानावस्तुसमुच्चयो देवनन्दिसार्थवाहोऽत्रागात् । तस्यास्ति एकः शुकः । षण्मासान्ते जल्पति पृष्टः सत्सत्यं । देव- नन्दिसार्थपेनैकदाऽऽत्मपुरस्थेन स शुकः पृष्टः । तेजनतूरिका कुत्रास्ति ? शुको जगाद वेन्नातटपुरेऽधुना समस्ति सा तेजनतूरिका । ततः स सार्थवाहो भूरिक्रियाणकपूर्णसपादलक्षपृष्ठवाहयुतो गतदिनेऽत्रागात् । राज्ञो मीलितः प्राभृतं वर्थं कृतं । राज्ञोक्तं किं विलोक्यते ? तेन प्रोक्तं तेजनतूरिका । राज्ञाऽऽकारिता मन्त्रिणः पृष्टाश्च कस्यास्ति तेजनतूरिका ? मन्त्रिभिरुक्तम्—न ज्ञायते कस्यास्ति । राजा प्राह—तन्नगरं वर्थं । यत्र पुरे सर्वाणि वस्तूनि लभ्यन्ते । आयान्ति च यत्र भूरिधनिनो व्यवहारिणो वसन्ति । यत्रागता वस्तु न लान्ति जनाः । यत्र सर्वाणि क्रयाणकानि न सन्ति । तदपि पुरं पुरमध्ये कथं गण्यते । इत्यादि प्रोक्त्या राजानं खेदं दधानं दृष्ट्वा मन्त्रिणो जगुः पटहो वाद्यते । आत्मीयं पुरं महाद्धियते । कस्यापि गृहे कदाचिद्भविष्यति । एतद्विचार्य राज्ञाऽऽदिष्टा मन्त्रिणः पटहं वादयन्ति ।

श्रेष्ठिनो वचनमाकर्ण्य, श्रेणिको जगौ श्रेष्ठिनं प्रति त्वं पटहं स्पृश । ततस्तस्य वचसा पटहे स्पृष्टे भूपसेवकैर्भूपोपान्तेऽभ्येत्योक्तं धनश्रेष्ठिना पटहः स्पृष्टः । तदा राजादयोऽखिला जना जहसुः, धनगृहे धूलिरेवागतास्ति, अपरं धनं तु सर्वं गतं तेन ग्रथिलो जातोऽथवा वातेसुतोऽथवा श्रेष्ठी । येनाधुना पटहः स्पृष्टोऽनेन । अथवा अनेन धूलिर्यदा दर्शयिष्यते सार्थवाहस्य । तदात्मीयपुरस्य माहात्म्यं यास्यति । ततो राज्ञा धनमाकारयितुं स्वसेवकाः प्रेषिताः धनपार्श्वे । धनस्तान् भूपानुगानाकारयितुमागतान् दृष्ट्वा श्रेणिकाग्रे जगौ—किं करिष्यते । राज्ञो भृत्या आगताः । श्रेणिको जगौ—भवता खेदो नानेयः । राजवशीकरणरत्नं ग्रन्थौ बध्वा मनसि स्मृत्वा च राज्ञो मीलितव्यं । मणिप्रभावेण यदा राजा तुष्टो भवति तदा त्वया माण्डविका भूरिधनेन दृढीकृत्य गृहीतव्या । तेजनतूरिकाप्यर्पयिष्यते ततो धनो रत्नसहितो राज्ञो यावन् मीलितः नृपं प्रणणाम च, तावद्राजा प्रसन्नीभूय रत्नं गृहीत्वा प्राह—मन्त्रिणं प्रति भवता माण्डविका अस्यार्पणीया । अस्य हस्ताद् धनं चटाप्यापि लोकैरन्यैर्माण्डविका न ग्राह्या । ततो मण्डपिका गृहीता । ततो राज्ञोक्तं—श्रेष्ठिन्नस्य सार्थवाहस्य रोच्यमानं वस्तु दाप्यतां त्वया । श्रेष्ठिनोक्तं । जीर्णा तेजनतूरिका विलोक्यते नवा वा एतस्य

सुनन्दायाः पाणिग्रहणं तेजनतूरिकार्थे देवनन्दिसार्थवाहस्यागमनम्

सार्थपस्य एतच्छ्रुत्वा राजा हृष्टः। दिव्यवस्त्रादिना सन्मान्य घनः श्रेष्ठी सार्थपयुग् प्रेषितः। श्रेष्ठिनोऽग्रे स्वर्णबीजपूराणि यावत् सार्थपो मुञ्चति तावत् श्रेष्ठी जगौ—अस्य श्रेणिककुमारस्याग्रे मुञ्च असावेव जानाति सर्वम्। द्वयोः प्राभृतं कृत्वा सार्थपः प्राह—अहो घनो धन्योऽस्ति यस्य ईदृक्षे विभवे सति एवंविधो विनयः। यस्मिन् देशे ईदृक्षा व्यवहारिणो भवन्ति स देशो धन्यः। श्रेणिकं दृष्ट्वा तदा सार्थपः प्राह—अहो कुमार ! त्वं राजगृहे दृष्टोऽभूर्मया। कुमारोऽवग्—राजगृहो वैरिणामपि मा भवतु, यद्येवंविधमशुभं वचनं जल्प्यते भवता, तदा अन्येषां गृहे गत्वा वस्तु गृहाण, अस्मदीयं वस्तु गृहितारो बहवो भविष्यन्ति। ततो रुष्टं श्रेणिकं मत्वा सार्थप उत्थाय तस्य पादयोः पतित्वा प्राह—अहं मुग्धोऽभूवं यदेवंविधं वचोऽत्र जल्पितं मया क्षम्यताम्। ततो कुमारोऽवग्—एकं तेजनतूरिकाया गद्यानकं वन्हिमध्ये क्षिप्त्वा तन्मध्ये भारप्रमाणं ताम्रं क्षिप्यते, ततः सर्वं सुवर्णं भवति, ततो नायको हृष्टो न्युंछनकं चकार तस्य। ततः स प्राह—तेजनतूरिकायाः वर्णिकां, दर्शय, ततो घनेन वर्णिका दर्शिता। तेजनतूरिकां दृष्ट्वा सार्थपो दध्यौ। अहो धन्योऽसौ यस्य गृहे एवंविधे वैभवे सत्यपि एवंविधो दाक्षिण्यादिगुणः। धन्यमिदं पुरं धन्योऽसौ भूपः यस्य राज्ये एवंविधा व्यवहारिणः सन्ति।

ततः सार्थपः सपादलक्षपृष्ठवाहिकान् रत्नसुवर्णरूप्यपट्टकुलपञ्चवर्णमयकर्पटकचन्दनकर्पूरकस्तूरिकाजवादिप्रभृतिबहुमूल्यैकयाणकपूर्णान् धनश्रेष्ठिगृहप्राङ्गणे आनिनाय ॥ धनश्रेणिकौ तान् पृष्ठवाहकांस्तादृग्वस्तुभरितान् वीक्ष्य चमत्कृतौ । ततः परस्परं वस्तु विलोक्य मिथः प्रोच्यमानधनसार्थपौ ललतुः । मिथो हृष्टौ बभूवतुः । ततः सार्थवाहधनश्रेणिका जिनप्रासादे जिनस्य शतपत्रसहस्रपत्रजातियूथिकादिभिः पूजां रचयित्वा नर्तनगीतगानादिभावपूजां च कारयामासुः । व्यवहारिणो जाता मिथः प्रीतिश्च । ततो वस्तु गृहीत्वा राजपार्श्वे गत्वा सार्थपः प्राह—राजन् धन्योऽसि पुण्यवानसि त्वम् ? । यस्य पुरे एवंविधो धनो व्यवहारी वसति पुण्यवान् जिनधर्मवासितसप्तधातुः नवनिधिचतुर्दशरत्नानि तव पुरे प्राप्तानि सन्ति मया । ततो धनोऽसौ व्यवहारी अन्यव्यवहारितुल्यो मा गणितव्यो भवता । एवंविधो व्यवहारी बहुपुरेषु कुत्रापि न दृष्टो मया । राजा तस्य सार्थपस्य वर्यदुकूलाद्याभरणदानेन सन्मानं चकार । ततः सार्थपः पुनर्धनपार्श्वेऽभ्येत्य नानाप्रकारभक्तिपुरस्सरं श्रेणिकधनौ प्रणम्याह—अहं पुनः पुनः स्मरणीयश्चित्ते न विस्मार्यः, इति जल्पन् चचाल सार्थपः । यतः—"सत्प्रीतिवल्ली हृदयालवाले, निवेशिता शैशवतोऽपि यत्र । सा वर्धनीया सततप्रवृत्ति-पत्रादिसम्प्रेषणनीरपूरैः ॥ १ ॥ तव वर्त्मनि वर्ततां शिवं, पुनरस्तु त्वरितं

समागमः । अयि साधय साधयेप्सितं, स्मरणीया समये वयं वयम् ॥२॥" ततश्चतसृभ्यो दिग्भ्यो नवीनानि पात्राणि धनस्य तस्य गृहे नर्तितुमागच्छन्ति स्म याचका धनं याचितुं च । अयं श्रेष्ठी अभाग्यवान् मूर्ख इत्यादि ये ये जजल्पुरिभ्यास्ते ते अस्य धनसाधोर्वणिजोऽभूवन् पदयोस्तलेऽस्य लुठन्ति च । श्रेणिकेनात्मनो नाम्नि गोपाल इति नाम स्थापितम् । श्रेष्ठी धनधान्यादिपूर्णोऽजनि । सुनन्दानाथको देवगृहे जिनपूजादि सप्तक्षेत्रे धनव्ययं करोति स्म । यद्यत् क्रयाणकं धनो गृह्णाति तत्र तत्रानर्गलो लाभो भवति । अनेके घोटका गृहीता धनेन आवासः कैलाससोदरोऽङ्गीकृतः । घोटकशालायां घोटका बद्धास्तेषां रक्षणार्थं पाण्डवाः स्थापिताः । बहवः व्यवहारिणोऽपि तस्य किङ्करीभूय सेवां कुर्वन्ति । यस्य गृहे लक्ष्मीर्भवति तस्य सर्वे जनाः सेवां कुर्वन्ति । यतः—" एहि गच्छ पुरे तिष्ठ, वद मौनं समाचर । एवमाशाग्रहग्रस्तैः, क्रीडन्ति धनिनोऽर्थिभिः ॥ १ ॥" श्रेणिकस्य सुनन्दया सह प्रीतिरजनि बाढम् । सुनन्दा भर्तुर्मनसा चलति । क्रमाद्वर्षद्वयातिक्रमे सुनंन्दा गर्भं दधार । यथा यथा गर्भो वर्धते तथा तथा तस्या बुभुक्षा न लगति । कदाचित् कवलद्वयं कवलत्रयं जेमते न वा सा । यद्भुक्तं तया तद् द्वितीयदिवसे वमति । क्रमादतीव दुर्बलाऽभूत् सुनन्दा । चलन्त्याः सुनन्दाया मुखे श्वासो न माति । सोजकः पदयोर्लग्न-

स्तस्या जीवन्तीमृतायाः क्षणं न ज्ञायते । पुनः पुनः बभाणेति सा पानीयमानीयतां तृषा लग्नाऽस्ति । श्रेणिक एवंविधां प्रियामालोक्य अन्येद्युः श्वश्रूं प्रति प्राह–तव पुत्रीयं कि दुर्बला दृश्यते । कोऽपि दोहलोऽस्या जातोऽस्ति नवेति पृच्छ्यतां स्वपुत्री । यो दोहलो भवति अस्याः स पूर्यते नोचेन्मृतैवेयम् । ततः सुनन्दोपान्ते गत्वा माता जगाद । पुत्रि ! किं तवाङ्गं दुर्बलं दृश्यते ? तव कस्य विषये वाञ्छा विद्यते ? । सुनन्दा जगौ–दोहलोत्पत्तिस्वरूपं यदि कथ्यते तदा मनसि न माति कस्यापि, दुःशक्योऽस्ति दोहलः तेन मे मरणं, माता जगौ–पुत्रि ! मातुः कथ्यते । ततः सुनन्दावग्–अहमेवं जानामि कुञ्जरारूढा राजपथे दानं ददाना गच्छामि, राजा तदा सपरिवारोऽग्रे चलति, स्वहस्तेन जिनालये गत्वा वर्यपुष्पैः द्रव्यपूजां करोमि संस्तवनेन भावपूजां च, जानेऽहं राज्ञो वादित्राणि ममाग्रे वाद्यन्ते, ममाग्रे च पात्राणि नृत्यन्ति, जानेऽहं पञ्चपरमेष्ठिमन्त्रं स्मरामि, जानेऽहं मस्तके छत्रं धारयामि, जानेऽहं मनोऽभिमतं दानं ददामि । जानेऽहं सधार्मिकान् भोजयित्वा दुकूलादिभिः परिधापयामि, जानेऽहं देशमध्ये अमारिं प्रवर्तयामि, जानेऽहं शीलं पालयामि, जानेऽहं चैत्यपरिपाटीं कृत्वा गृहे आगच्छामि, जानेऽहं घृतादिशुद्धाहारं यतिभ्यो ददामि । एषा वार्ता मयोक्ता तवाग्रे अभयदानं विना मम जीवितं नास्ति, श्रुत्वेति जननी पुत्रीप्रोक्तं–

जामातुरग्रे जगाद। श्रेणिकः पत्नीमनोरथं श्रुत्वा हृष्टः। यस्या एवंविधो दोहलो जायते, तस्या गर्भे कोऽपि पुण्यवान् नरः। गर्भानुभावादेवंविधो दोहलो भवति। यतः—"भवन्ति भूरिभिर्भाग्यै–र्धर्मकर्ममनोरथाः। फलन्ति यत्पुनस्ते तु, तत् सुवर्णस्य सौरभम् ॥ १ ॥ प्रतिपन्नं यदभ्यस्तं, जीवैः कर्म शुभाशुभम्। तेनैवाभ्यासयोगेन, तदेवाभ्यस्यते पुनः ॥ २ ॥" ततः कुमारेणोक्तं, राज्ञोऽस्य या पुत्री जात्यन्धाऽभवत्। साऽधुना जीवन्त्यस्ति अथवा मृताऽस्ति ?। धनोऽवग्--अद्य यावत् जात्यन्धा विद्यते। वेन्नातटपुरस्वामी तस्या एव आज्ञां कारयति वल्लभत्वात्। बाल्येऽपि चारित्रं गृहीतुकामा प्रचण्डं तपः करोति। तस्याः प्रसृतिप्रमाणलोचने दृष्ट्वा लोका जानंत्येषा इति पश्यन्त्यस्ति, स्वभावेनापश्यन्त्यपि, सुलोचनेति प्रोच्यते। यस्तां राजपुत्रीमन्धां वदति। तस्य राजा शिक्षां ददाति। राज्ञोऽतीव वल्लभाऽस्ति। भूपपुत्रीमन्धां मत्वा श्रेणिकोऽवग्--तव पुत्र्या यो दुःशको दोहद उत्पन्नोऽस्ति, तस्य पूरणे उपायोऽस्ति। श्रेष्ठिनोक्तं कः उपायः ? श्रेणिकः प्राह—इदं रत्नं गृहीत्वा राजोपान्ते गत्वेदं कुरु। अनेन रत्नजलेन राज्ञः पुत्रीनेत्रे छण्टय, ततो दिव्ये चक्षुषी भविष्यतः। राजा यदा तुष्टो भवति तदा त्वत्पुत्रीदोहदपूरणं मार्गय। ततो धनो रत्नमादाय यावन्नृपोपान्ते गतस्तावद्राजा समुत्तस्थौ। मिथः प्रीतिवृद्धिं चक्रतुः श्रेष्ठी रहसि जगौ। तवाग्रे

कथितुं न शक्यते, तथापि किमप्यनुच्यमानमपि मयोच्यते । भवत्पुत्रीं अत्रानय त्वम् । तत्रानीता नृपेण । रत्नाम्बुछटया सुलोचनानेत्रे प्रक्षालिते, ततः सुलोचना दिनेऽपि ताराः पश्यन्त्यभूत् । ततो राजा जगौ—अर्धराज्यं गृहाण । धनोऽवक् मम राज्येन किमपि कार्यं नास्ति, परं मम पुत्र्या यो दोहदो जातोऽस्ति तं पूरय । ततो राज्ञा स्वपुत्रीयुता सुनन्दा कुञ्जरारूढा कृता । राजाग्रे चचाल, नृत्यादि कारयन् छत्रचामरवादित्रादिपुरस्सरं नरपतिर्भूपमार्गे चचाल । सर्वप्रासादेषु जिनान् पूजयामास सुनन्दा । ततः स्वगृहेऽभ्येत्य यतीनाकारयित्वा प्राशुकान्नपानैः प्रतिलाभयामास । ततोऽखिलदेशेषु अमारिः कारिता । ततो भूपधनयोः सुलोचनासुनन्दयोर्बाढं मैत्री जाता । गृहे गृहे घृतलभनादि कृतम्, हट्टश्रेणिमध्ये तलिकातोरणानि च कारयामास भूपः । अन्येद्युः श्रेणिकेनोक्तं प्रियां प्रति यद्यात्मनः पुत्रो भविष्यति तस्याभयकुमारेति नाम दास्यते, यतोऽमारिप्रवर्तनादिदोहलोत्पत्तेः । इतः स सार्थपः पृथिवीपीठे भ्रमन्नुपार्जितभूरिधनो राजगृहे नगरे जगाम । प्रसेनजितराजा नवनवतिं पुत्रान् परस्परं विरोधं कुर्वतो वीक्ष्य श्रेणिकं कुमारं तादृशं विनीतं स्मरन् पुनःपुनरेवं तस्थौ प्रियाग्रे एवं जजल्प च । मयाऽपमानितो राज्यं मुक्त्वा श्रेणिकः कुमारो दूरं गतः, स कथं भविता । मम

तेन पुत्रेण विना रात्रिन्दिवं निद्रा नायाति स निःश्वासो मुखे न माति च । यदा तस्य सूनोर्मम वियोगोऽभूत्, ततः प्रभृति सुखं गतम् । मया अविमृश्य कार्यं कृतम् । न ज्ञायते स मम कुमारो जीवन् मृतो वाऽथवा क्वापि श्वापदैर्भक्षितः । कस्यापि गृहेऽथवा दासीभूय स्थितोऽस्ति । जलदे वर्षति गृहे गृहे भिक्षां मार्गमाणोऽस्ति । बुभुक्षितस्तृषितो दुःखीजातो भावी । वर्षाकाले स्थानकाभावात् पशूनामिव मस्तकोपरि सर्वं जलं पतिष्यति । शीतकाले भृशं शीतेन ताड्यमानोऽतीव दुःखितो भावी । श्रेणिकः उष्णकाले तृषातापादि कथं सहिष्यति । एवं स्मारं स्मारं श्रेणिकं भूपो दुःखितोऽभूत् । कदाचिदेवं ध्यायतिस्म राजा । कस्य पुत्राः केषां पिता कस्य माता कस्य सुहृद् कस्य प्रिया इत्यादि सर्वं स्वप्नजालतुल्यं दृश्यते । मिथोऽनन्तेषु भवेषु जीवाः सर्वे सर्वसम्बन्धिनोऽभूवन् भवन्ति भविष्यन्ति च । एवं स्वं चित्तं स्थिरीकृत्य यावद् राजा तिष्ठति स्म, तावत् सार्थपोऽभ्येत्य जगौ—देव ! युष्माकं पुत्राणां शतं श्रुतं । अधुना नवनवतिः कथं दृश्यते ? राज्ञोक्तं श्रेणिकगमनस्वरूपं ततोऽवग् सार्थपः भवत्पुत्रतुल्यो वेन्नातटपुरे धनश्रेष्ठिगृहे महाबुद्धिमान् दृष्टः । तत्र यदा मयोक्तं—भवान् राजगृहे दृष्टः, तदा तेन 'राजगृहो वैरिणामपि मा भवतु' तस्य मुखादित्यादि श्रुत्वा प्रसेनजितभूपस्य हृदि पुनः शल्यं प्रकटीजातम् । प्रसेनजितो जगौ च । अहो तेन पुत्रेणैकशोऽपि आत्मनः

स्थितिर्न ज्ञापिता । तथास्य स्थितिः साम्प्रतमेतेषां पुत्राणामग्रे न प्रोच्यते । इति राजा मानसं गूढं कृत्वा सार्थपाग्रे जगाद—मुधैवं कथं जल्प्यते त्वया । स पुत्रोऽलसो मर्खोऽधम इतो निस्सरणादनु रुलित्वा मृतो भावी । य एवं स्वेच्छया गृहान्निसरति । स म्रियते एव । रङ्क इव गृहे गृहे भ्रमति च । कर्म प्रकटीभूय किमपि न दर्शयति । किन्तु कामपि तां बुद्धिं ददाति यया रंक इव रुलति लोकः । यतः—" विरंचिर्न नरं हन्ति, प्रादुर्भूय चपेटया । किन्तु तां ददते बुद्धिं, यया रुलति रङ्कवत् ॥ १ ॥ स्थापनिकामन्यस्य योऽपलपति विश्वस्थं नरं च यो वञ्चयति तयोस्तृतीयस्त्वं यदि एवं कूटं जल्पसि । ततो नायको रहसि समेत्यावग् । स्थापनिकापलापविश्वस्थघातन-कन्याविक्रय-कूटकक्रयविक्रय—स्त्रीहत्या-गोहत्या-बालहत्या-यतिहत्यादि-पापानि मम लगन्ति, यदि स श्रेणिको न भवति । नायकोऽवग्--मया वेन्नातटपुरे धनहट्टे राजहंस इव कुमार उपविष्टो दृष्टः । तस्य श्रेष्ठी देवशेषामिवाज्ञां सर्वकार्येषु मन्यते । तस्य कुमारस्य प्रसादवचनेन अहं धनश्रेष्ठिहट्टाच्चेजनतूरिकामगृह्णम । तयां ममगृहे भूरिशः काञ्चनकोटयोऽभवन् । एवमेव जाने धनस्य पुत्री भवत्पुत्रेण परिणीताऽस्ति । नायकवचनेन राजा हृष्टो नन्दनमानेतुमुत्सुकोऽभूत । ततो राज्ञोक्तं । यदि तत्रास्ति तदा तत्रात्मीयः कोऽपि विचक्षणः पुरुषः

स्वनिर्मितसमस्यायुक्तः प्रेष्यते । ततो यदि मदीयः पुत्रो भविष्यति तदा मत्कृतां समस्यां श्रुत्वा त्वरितमागामिष्यति । ततः आत्मीयो विज्ञः पुरुषः प्रसेनजितराज्ञा प्रेषितः सन् वेन्नातटपुरे धनश्रेष्ठिगृहे गत्वा समस्यामेवंविधां गोपाल-कुमारहस्ते प्रसेनजितप्रेषितः पुरुषो ददौ । गोपालस्तां समस्यामेवं वाचयामास । येन कुमारेण स्वबुद्ध्या पक्वान्न-भृतपूर्णकरण्डकेभ्यो मुखकृतचिन्हेभ्योऽम्बुघटेभ्यश्च स्वसोदरा भोजिताः । येन सारमेयान् खरण्टितक्षीरभाजनानि क्षेपं क्षेपं कुकुरान् वाहयित्वा स्वयम्बुभुजे । इत्यादि यस्यावदातः स कथं वेन्नातटपुरे जीवन् धनेभ्यपुत्रीं परिणीय तिष्ठति ! यः आत्मीयमातापितरौ सहोदरान् मुक्त्वा दूरदेशे गत्वाऽन्यस्य गृहे गृहजामातृकीभूय तिष्ठति, स जनः कथं जीवंस्तिष्ठति । यस्य मातापितरावधुना दुःखिनौ बभूवतुः, स कथं वराक इव दूरे तिष्ठति-कुकर कहतां कोपि चाडिओ, घरजमाई थाई । हईया हईयालीको कहइ, कवण भणंउ चित्तमाहि ॥ १ ॥ एवंविधां समस्यां वाचयित्वा तस्या अर्थं विज्ञाय पुनः पुनश्चक्षुःक्षरज्जलबिन्दुको गोपालः स्वमनसि दध्याविति । मारण ताडण जे करइं, येवी केवी लहंति अह्मसरीखा बेटडा, ते बोले न रहंति ॥ १ ॥ अमीयरसायणआगली मायतायगुरु सिस । जे नवि मन्नइ बप्पडा, ते रुलीया सविदीस ॥ २ ॥ एवं चिन्तयित्वा स एव

भृत्यो लेखसहितः प्रेषितः । प्रसेनजितभूपपार्श्वे श्रेणिकेन । ततो राजा तं लेखं वाचयामासेति । मम ऊपहरा बोलडा, लहसिइं रायकुआरा । हुं तुह्मि भणिओ वाणिओ, नहि वयण फलाऽऽसाइं ॥ १ ॥ जीणि अवसरि जोईइ, स्वामी तणउ पसाउ । तीणि नीचउतारणओ, किम सेवीजइ राउ ॥ २ ॥ घरजमाई घरसुणह ते कुण हुंस धरंति । पण अपमान्यां छोरडां मरइं कि दुरि फिरंति ॥ ३ ॥ एवं लेखं वाचयित्वार्थं ज्ञात्वा च पुनरपि प्रसेनजितो लेखं श्रेणिकपार्श्वे प्रेषयामास । छन्नं श्रेणिकेन रहसि तातलेखो वाचित इति । जे मइ सभामांहि बोलिउं, ते अपमान किं मानसो । जि संभारि विचारकरि, तो आरोगो धान ॥ १ ॥ मोर भणइ अह्म पीछडां, मइं मेल्यीयां वणमाहिं । हुं अ जिअगासउ, तीह विण ते सिरिराय वहेइ ॥२॥ यद्यत्तातवचनं तत्तत्तस्यामृतमिव परिणमति । श्रेणिकेन प्रेषितं पत्रं राजा वाचयामासेति । जातइ एकजि पिछडइ, मोर दोहिल्लउ काई । ते नवाणू पीछडा भरी पूरी रहिआइं ॥ १ ॥ प्रसेनजितेन प्रेपितं लेखं पुत्रो वाचयामासेति । बेडी केरां पाटीयां, बांधाबहु अ गुणेहिं । पइठाणुं छांडइ, रहण तु तारिज्जइ केण ॥ १ ॥ कल्पतरू केरुं पानडुं, ऊडिउ वायवसेण । तु तिहा सीली छांहडी, जे सीअला ते सील ॥ २ ॥ अत्र जीवन्नहं यावदस्मि तावत्तत्र भवता । प्रेषितव्यः पुनर्लेखो ममोपान्ते निरन्तरम् ॥

॥ ३ ॥ ततः श्रेणिकेन नवनवतिभ्रातृनिमित्तं आभरणादीनि कारितानि । मातृभगिनीकृते कनकरत्नादीनां शृङ्गारः कारितश्च । पितृबान्धवार्थं जात्यतुरङ्गमान् अङ्गीचकार । इत्यादीनि वर्याणि प्राभृतानि नामाङ्कितानि रहसि श्रेणिकः पितृपार्श्वे प्रेषयामास । पित्रा च हर्षितेन भम्भानाम भेरी सूनवे तस्मै प्रेषिता ज्ञापितं चेति हि तं तथा हि–
या भिल्ली सुंदरी त्यक्ता, त्वया पुत्र वनान्तरे । तद्वर्यं विहित चक्रे, कुलोद्योतश्चसर्वतः ॥ १ ॥ या पल्ली लङ्घीता पूर्वं, गच्छताऽतः पुरात्सुत ! । तस्यां ये सन्ति भिल्लास्ते, रुष्टाः सन्ति तवोपरि ॥ २ ॥ इति तातवचो निशम्य श्रेणिको रहसि शनैः शनैः तुरङ्गमान् द्रविणं सेवकान् पुराद् बहिः कर्षयामास । ततश्च प्रियाग्रे प्राह--अहं स्वपितुः पार्श्वे यास्यामि । ततः सुनन्दा जगौ--अहं भवता सार्धमागमिष्यामि त्वां विना क्षणं स्थातुं न शक्नोमि । श्रेणिकोऽवग्--त्वयाऽधुना सार्धमागन्तुं न वक्तव्यं मनागपि । पुनः सुनन्दा प्राहावग्योर्नन्दनो भविष्यति तस्य किं नाम दास्यते ? श्रेणिकोऽवग्-यादृशस्तव दोहदोऽभूत्तादृशनामाऽभयेति दातव्यं त्वया । सुनन्दाऽवक्-यदा पुत्रोऽष्टनववर्षीयो भूत्वा पृच्छति, मत्पिता कुत्राऽस्ति तदा किं मया तस्य कथ्यते ? ततः कुमारः खटीं लात्वा हस्तेन चित्रशालाभारपट्टे अक्षराण्येवं लिलेख राजगृहि पालिगाम गोवालि धवले टोडे घर कहीइ । ततोऽन्यदा रहोवृत्त्या श्रेणिको बहिर्निर्गत्य पूर्वप्रेषित-

सैन्यमध्ये जगाम। ततः ससैन्यश्चलन् कुमारो भिल्लराजधानीसमीपे भम्भां वादयामास तथा। यथा तस्या रवं श्रुत्वा भिल्लपतिः संनह्य सर्वबलेन दधावे। यावद्भिल्लपतिना शिङ्गिका वादिता। तावल्लक्षशो भिल्लाः किलकिलारवं विकुर्वाणाः स्वभल्लीरुच्छालयन्तः क्रोधोत्पाटितभ्रुकुटयो वयमरीन् हन्मो हन्म इति जल्पन्तो मीलिताः। श्रेणिकेन शरीररक्षणरत्नस्मरणेन युद्धं कर्तुमारब्धम्। भिल्लाः शरनाराचकुन्ताद्यायुधानि मुमुचुः, परमेकस्य श्रेणिकानुगस्य एकमपि शस्त्रं न लगति। ततो भिल्ला बाणादीन्यायुधानि क्षेपं क्षेपं भग्नाः सन्तः श्रेणिकाय नमस्कारं चक्रुः। नश्यन् भिल्लपतिर्बद्धः, श्रेणिकेन रणाङ्गणे। गृहीतं विषमं स्थानं, तदीयं च धनान्वितम् ॥ १ ॥ यतः—"न श्रीः कुलक्रमायाता, शासने लिखिताऽपि वा। खड्गेनाक्रम्य भुञ्जीत, वीरभोज्या वसुन्धरा ॥ २ ॥ नाभिषेको न संस्कारः, सिंहस्य क्रियते मृगैः। विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥ ३ ॥ श्रेणिको जगौ—रे भिल्लपते अग्रे भव राजगृहपुरवर्त्म दर्शय 'यद्घट्ट' समेति तदुत्तारय नोचेन्मद्धस्तेन मृत एव। ततो भिल्लेन सेवकीभूय राजगृहवर्त्म दर्शितम्। क्रमेण सर्वान् घट्टानुल्लंघ्य सपादलक्षभिल्लपरिवारयुतो भूरितुरङ्गमादियुक्तश्च श्रेणिको भक्त्या पितुः मातुश्च पादयोरपतत्। श्रेणिकसमागमं श्रुत्वा सर्वे बान्धवास्तत्रैत्य ज्येष्ठभ्रातरं विनयेन नेमुः। ततः प्रसेन-

॥ ३६ ॥

जितराज्ञा सर्वपुत्रयुतेन श्रेणिकाय राज्यं दत्तं स्वयं च तपोऽङ्गीचक्रे। स भिल्लो लज्जितस्तापसो भूत्वा कोष्ठ्यां प्रविश्योत्तमार्थमङ्गीचकार। ततस्तस्य पुत्रमाकार्य स्वसेवकं कृत्वा च तस्यैव तद्देशं समर्पयामास श्रेणिकः। सर्वान् सहोदरानाकार्य यैर्वैरिभिः पितुराज्ञा नाङ्गीकृता तानरीन् स्वपदोस्तले लोठयामास श्रेणिकः। अन्येद्युः श्रेणिकेन परीक्ष्य परीक्ष्यैकोना पञ्चशती मन्त्रिणां स्थापिता। एकमतीव वर्यं मन्त्रिणं कर्तुकामो दध्यौ श्रेणिकः। वर्यतमं मन्त्रिणं विना राज्यसूत्रं न तिष्ठति। ये ये मन्त्रिणः कृताः सन्ति, ते ते सर्वे गर्वोद्धताः ईर्ष्यालवः। यावद्वर्यतमो निरहंकारी विनयी धर्मिष्ठो विशुद्धमतिमान् मन्त्री मम न भवति तावदहं प्रधान एव न राजा। यतो विशिष्टं मन्त्रिणं विना राज्यं न स्थिरतामेति। यतः—"कुलशीलगुणोपेतं, सत्यधर्मपरायणम्। रूपिणं सुप्रसन्नं च, राजाऽध्यक्षं तु कारयेत् ॥ १ ॥ शीलवृद्धिकरो धीरः, सर्वरत्नपरीक्षकः। शुचिरव्यभिचारी च, भाण्डाध्यक्षोऽभिधीयते ॥ २ ॥ इङ्गीताकारतत्त्वज्ञः, प्रियवाक् प्रियदर्शनः। सकृदुक्तगृही दक्षो, मन्त्रिनाथः प्रशस्यते ॥३॥" एवं हृदये विचार्य श्रेणिकः शुष्ककूपे आत्मीयां मुद्रां क्षिप्त्वा प्राह—यः कश्चिन्नरः अस्य कूपस्य कण्ठोपविष्टो निजबुद्ध्या इमां मुद्रां परिदधाति तस्याहं राज्यार्धदानपूर्वं मन्त्रिमुख्यमुद्रां दास्यामि। एवंविधां बुद्धिं कृत्वा कूपसमीपे निजसेवकान् मुक्त्वा प्राह श्रेणिकः।

यः कूपकण्ठस्थो मुद्रां परिदधाति स कथनीयो मम, अपरो यो नरो मन्त्री वा परिधत्ते तदपि ममाग्रे कथनीयम् ।
सर्वे मन्त्रिणो दर्शं दर्शं मुद्रां कूपकण्ठस्थाः खिन्ना जजल्पुश्चेति । कोऽपि कौहतिको मण्डितोऽस्ति राज्ञा आत्मना-
मपाये पातयितुम् । ततोऽन्येऽपि पौरा लोका आगताश्च, तत्रैत्य मुद्रां कर्षयितुमुपक्रमं चक्रुः तेऽपि खिन्नास्तदा ।
इतः सुनन्दा पुत्रमसूत । तस्याभयकुमार इति नाम ददौ । वर्द्धितः क्रमाल्लेखशालायां मुक्तः, क्रमात् पण्डितोपान्ते पठन्
शास्त्राण्यन्येद्युरपरैर्लेखशालकैः कलहं कुर्वद्भिरुक्तम्, निःपितृकोऽयम्, ततोऽभयः खिन्नो गेहेऽभ्येत्य पितृस्वरूपं पप्रच्छ
मातरम् । मात्रा प्रोक्तं न ज्ञायते अत्र पूर्वं परिणीय मद्गर्भे त्वामुत्पाद्याकस्माद्विदेशं गतः । खिन्नोऽभयोऽवग्—मम पित्रा
गच्छता किमपि जल्पितं किमपि दर्शितम् अक्षराणि वा दत्तानि तुभ्यम्? माता प्राह—तेनातो गच्छता अस्मिंश्च चित्रशा-
लाभारपट्टके अक्षराणि लिखितानि सन्ति । ततो भारपट्टस्थानि अक्षराणि वाचयित्वा कुमारः पितृस्वरूपं जज्ञे । कुमारो
हृष्टो मातृसमीपमभ्येत्यावग् च । ज्ञातं मया पितृस्वरूपम्, यत्र मम पिताऽस्ति तत्र गमिष्यामि । मात्रा प्रोक्तमहं सार्थे
समेष्यामि । ततो वृद्धपितरं मातरमुत्कलाप्य राजगृहं प्रति चचाल कुमारः । कियन्तीं भूमिमतिक्रम्य राजगृहे पुरोद्यानेऽ-
भ्येत्य मातरं तत्र मुक्त्वा कूपकण्ठे समागात् । लोकैरुक्तम्—यो मुद्रामिमां कूपोपकण्ठस्थः परिदधाति, तस्य सर्वमन्त्रि-

श्रीश्रेणिकस्य मुख्यमन्त्रिगवेषण श्रीअभय कुमार जन्मम्

मुख्यपदवीं ददाति राजा । कुमारेणोक्तम्--यस्य शक्तिः स्यात् स मन्त्रिमुद्रां परिदधाति। पश्चादेवं न वक्तव्यम् । अहमेव पर्यदधाम्। सर्वैरप्युक्तम्--त्वमेव परिधेहि। ततः कुमारेणादौ आर्द्रगोमयमानीय मुद्रिकाया उपरि क्षिप्तम्। ततस्तस्योपरि अग्निर्बहुः क्षिप्तः । घटीचतुष्टयेन तदेव गोमयं शुष्कम्, ततश्चासन्नकूपान्नीकाप्रयोगात् पानीयं कर्षयित्वा तमेवकूपमाकण्ठं पानीयेन पूर्णीचकार कुमारः । तदा कूपे आकण्ठेऽम्बुना पूरिते मुद्राप्युपरि समायाता । ततः कूपमध्यान्मुद्रिकां गृहीत्वाऽङ्गुल्यां पर्यदधात् कुमारः । इयं वार्ता राज्ञा श्रुता तत्क्षणं हृष्टो राजा तत्रागत्य तं कुमारं तादृशाकारं वीक्ष्य मुमुदे । राज्ञा पृष्टं च कुतस्त्वमागतः ? तेनोक्तमहं वेन्नातटनगरात् । राज्ञोक्तं त्वं कस्य पुत्रः ? तेनोक्तमहं प्रजापालस्य पुत्रः । राज्ञोक्तं तत्र धनश्रेष्ठिनः सुतायाः सुनन्दायाः स्वरूपं ज्ञातम् ? तेनोक्तं तया पुत्रो जनितोऽभयकुमारेति नाम दत्तं मात्रा । स कियद्वर्षप्रमाणोऽस्ति ? स प्राह—यति वर्षाणि ममाभवन् ताति तस्यापि रूपेण मत्तुल्योऽस्ति । राज्ञोक्तं भवतः एवंविधः परिचयः कथं जातः ? कुमारोऽवग्—मम तेन क्रमादतीव मैत्री जाता, क्षणमपि तेन विना स्थातुं न शक्नोमि । तत्र तं मुक्त्वाऽत्र कथमायातः ? कुमारोऽवक्—अहं तेन सममत्रागतोऽस्मि । कुत्रास्ति स इत्युक्ते भूपेन कुमारोऽवक् स च तन्माताऽधुनात्रोद्याने आगताऽस्ति । ततस्तमग्रे कृत्वा राजा उद्यानं प्रति

चचाल यदा तदा लोका जगुः । राजाऽनेन लघुनाऽपि वाहितः । तत्र वने राजा गतः, प्रियाया मीलितः । प्रोक्तं च राज्ञा यो गर्भोऽभूत् तदा स क्वास्ति ? तयोक्तमयमेव पुत्रः । राज्ञोक्तम्--पुत्र एवं कूटं किं जल्पितं ? अभयकुमारः प्राह—अहं तु मातृहृदये सदा वसामि तेनैवं प्रोक्तम् । ततो राज्ञा कुमार उत्सङ्गे धृतः, आनायितः पट्टहस्ती । भार्यापुत्रौ तस्योपरि कृत्वा महामहोत्सवपुरस्सरं स्वावासे आनिनाय । ततः पुत्रस्य तस्य सर्वबुद्धिनिधानस्य मन्त्रिमुख्यपदवी दत्ता राज्ञा । ततो राजा अभयकुमारं बुद्धिनिधानमग्रे कृत्वा भूरिशो देशान् साधयामास । अथैकदा श्रीवीरसंसदि भूरिदेवदेवीसाधुसाध्वीसङ्कुलायां महर्षिमेकं शान्तं दान्तं कृशगात्रं वीक्ष्य प्राहेत्यभयः । भगवन् कोऽयं यतिरेष साक्षात् दृश्यते ? वीरः प्राह—प्रतीच्यां दिशि वीतभयाख्यपत्तनमस्ति स्वर्गपुरसोदरम् । तस्मिन् उदायनो राजा प्रजां प्रशशास न्यायाध्वना । अन्यदाऽहं तत्र समवासार्षम् । देवैः समवसरणं कृतम् । तस्मिन् समवसरणे वीतभयपत्तनस्वामी उदायनो राजा समागात् धर्मं श्रोतुम् । धर्मः सनातनो येषां दर्शनप्रतिभूरभूत् । परित्यजति च नैव, तेषां मन्दिरमिन्दिरा ॥ १ ॥ धर्मस्य विश्वाधिपतेः प्रसादात्, पुमान् प्रपेदे सुखमुत्तरोत्तरम् । अहो कृतघ्नः स तु मोहमोहितो, धर्मस्य नामापि कदापि नास्मरत् ॥२॥ धर्मः श्रुतो वा दृष्टो वा, कृतो वा

श्रीअभयकुमारस्य पित्रासह मिलनं मन्त्रिपदप्राप्तिश्च

कारितोऽपि वा । अनुमोदितो वा राजेन्द्र !, पुनात्यासप्तमं कुलम् ॥३॥ बुधैर्विधीयतामेको, धर्मः परमबान्धवः । ददिरे मदिरावत्यो, येन वाञ्छितसिद्धयः ॥ ४ ॥ दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवेत् गर्भवासे नराणां, बालत्वे चापि दुःखं मलमालिनवपुःस्त्रीपयःपानमिश्रम् । तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः, संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥ ५ ॥ संझरागजलबुब्बुउवमे, जीविएवि जलबिंदुचंचले । जुव्वणे य नइवेगसंनिभे, पाव जीव ! किमयं न बुज्झसि ॥ ६ ॥ श्रुत्वेत्यादि वचो धर्म-नायकस्य मुखात् पुरा । वैराग्यवासितस्वान्तोऽभवदुदायिनो नृपः ॥ ७ ॥ प्रभावतीप्रियाकुक्षिभव (मभीचिनामकम् । राज्ये मग्नो हि दुर्गतिं, माऽगात् दुःखप्रदामिति ॥८॥ प्रियं पुत्रं स्वकं मुक्त्वा । जाम्याः) केश्याख्यनन्दनम् । राज्ये निवेशयामासोदायनो धर्मतत्परः ॥ ९ ॥ ततोऽस्मात्कारणादयमुदायनो राजा दीक्षां जग्राह । अस्मिन्नेव भवे कर्मक्षयं कृत्वा मोक्षं गमिष्यत्येषः । ततः प्राञ्जलिरभयः प्राह । भगवन् कोऽन्यो राजर्षिर्मुक्तिं गतो भविष्यति । प्रभुराचष्टायमेवान्त्यो राजर्षिः केवली उदायिनः । ततोऽभयः प्रभुं नत्वा गृहे गत्वैवं श्रेणिकपार्श्वे प्राह । मम दीक्षाग्रहणकृते प्रसन्नीभव । यथाऽहं सर्वकर्मक्षयान्मुक्तिं गमिष्यामि । ततः श्रेणिकोऽवक्-दीक्षाग्रहणविषये ममावसरोऽस्ति, भवतो राज्यकरणेऽवसरो विद्यते । एवं कथं जल्प्यते त्वया । त्वमेव मम राज्यवर्द्धने समर्थोऽसि । अभयकुमारः प्राह ।

त्वत्पुत्रो भूत्वा यदि व्रतमार्गं न साधयिष्यामि तदाऽहं दुर्भाग्योऽभूवम् । त्वं कृपां कृत्वा दीक्षां दापय । अथ भूपतिः प्राह्–यदाऽहं क्रोधेन त्वां प्रत्येवं जल्पामि दूरे व्रज मुखं मा दर्शय, तदा त्वं वत्स ! व्रतमाददीथाः। अभयोऽवक्–तात त्वदीयं वचः प्रमाणमेव । ततो जनकं नत्वा स्थानकेऽभ्येत्यैवमभयो दध्यौ । वज्रेण वज्रं तु यथा तथाऽरित, वेध्या स्वबुद्धया नृपबुद्धिरेषा । ध्यात्वेति धीमानभयोऽथ भूपं निषेवते प्रत्यहं मुग्धभक्त्या ॥ १ ॥ अथैकदाऽतीव शीते स्फीते पतति लोका अतीव जाड्यपीडिता बभूवुः। यथा–निशासु सन्ध्यासु दिनेषु यस्मिन्, पुरःपुरःपृष्ठिनिवेशितेन । रोरैर्नरैर्जानुकृशानुभानु–त्रयेण शीतं क्रमतो विनीतम् ॥२॥ गाढं वल्लभतामवाप दहनो जाड्यं जने जल्पति, मान्यत्वं बत बालकस्य शिरसा दोषाः प्रवृद्धिं गताः॥ दृश्यन्तेऽपि च पञ्चषाः सुमनसोऽवन्यां सदा मोदिनः, इत्थं सम्प्रति शीतकालतुलनामालम्बतेऽसौ कलिः ॥३॥ इतः श्रीवीरजिनो राजगृहपुरासन्नवने समवासार्षीत् । श्रेणिकस्तत्र गत्वा परमेश्वरं नत्वा धर्मं श्रुत्वा चिल्लणादेवीयुतः पश्चाद्वले । वर्त्मनि नद्युपकण्ठे साधुमेकं कायोत्सर्गस्थितं शान्तं दान्तं नत्वाऽपराह्णे स्वगृहमाजगाम । राजा जिनपूजां कृत्वा भोजनं चकार । रात्रौ श्रेणिकः सुप्तः, चिल्लणा राज्ञी जागरिता तं यतीश्वरं स्मृत्वा प्राह । 'अहो एवंविधे शीते पतति जीवप्राणान्तकरेऽधुना स कथं भावी.' इति प्रियावचः श्रुत्वा

श्रेणिकोऽकस्माज्जागरितः श्रुत्वेदं दध्यौ इयं मे प्रिया व्यभिचारिणी विद्यते अस्या मत्तोऽप्यपरः कोऽपि पुरुषो वल्लभः विद्यते विचारोऽत्र न कार्यः ततो नूनं दुःशीला एवं ध्यायति राज्ञि सूर्य उदियाय । प्रातराहूयाभयं प्रति पृथिवीशो जगौ । इदं मदीयमंतःपुरं दुराचारं विद्यते, तेन प्रज्वाल्यतां द्रुतमिदमन्तःपुरं त्वया विलम्बो न कार्यः । ततोऽभयो दध्यौ । राजाभिप्रायो न ज्ञायते सम्यग् । किमर्थं राजैवं जल्पतीति विमृश्याभयः प्राह–प्रमाणं तात ! ते वचः । ततः श्रेणिकः प्रातर्जिनपार्श्वे जगाम श्रुत्वा धर्मं वीरं पप्रच्छ भगवन् ! मदीयाः पत्न्यः सर्वाः सत्यो न वा ? भगवन्नाह–चिल्लणाद्याः सर्वाः सत्य एव । श्रुत्वेति प्रभुपार्श्वे त्वरितं पश्चाद्वले श्रेणिकः । इतोऽभयो दध्यौ मम तातेन यदादिष्टं तत् केनापि कारणेन भविष्यति, सहसा कृतं कार्यं विषादाय भवतीति विमृश्य कियन्ति गृहाणि उद्वसानि कृत्वा ज्वालितानि अभयकुमारेण । ततः समवसरणसंमुखं निस्ससाराभयः । वर्त्मनि श्रेणिकोऽभयस्य मीलितः । जगाद किं कृतं त्वया ? अभयोऽवक् । त्वदुक्तं कृतं मया । श्रेणिको जगाद–गच्छ परो मद्दृशोः, मुखं मा दर्शय । एवं कोऽपि अविमृश्य कार्यं करोति । तातवचः प्रमाणमिति प्रोक्त्वाऽग्रतो गत्वा–वीरपार्श्वे दीक्षां जग्राह । इतः श्रेणिको गृहेऽभ्येत्य उद्वसकुटिराणि ज्वालितानि दृष्ट्वा दध्यौ । अहं वाहितस्तेन छलेन दीक्षा गृहीता भाविनी अभयेन । ततो मुष्टिं बद्ध्वा यावत्समवसरणे याति

श्रेणिकः तावदभयं गृहीतव्रतं दृष्ट्वा प्राह श्रेणिकः। अहं वाहितस्त्वया इति प्रोच्य पादौ प्रणिपत्य क्षमयित्वा श्रेणिकः पश्चाद् गृहे जगाम। ततः श्रीवीरसमीपे बहु तपस्तप्त्वा कर्माणि छित्त्वा प्रापानुत्तरां गतिम् ॥

इति श्रीअभयकुमारकथा पारिणामिकीबुद्धिविषये ॥

कर्मान्तरायं नो कुर्यात् पर्यालोच्यायतौ हितम्। ग्रासमात्रमपि प्रायो, यथा न प्राप ढण्ढणः ॥ १ ॥

द्वारिकायां मुकुन्दस्य, ढण्ढणागेहिनीभवः। ढण्ढणाह्वः कुमारोऽभूत, वरालक्षणरूपभृत् ॥२॥ अन्येद्युर्ढण्ढणो नेमिनाथपार्श्वे समागतः। धर्मं श्रीजिननाथोक्तं, शुश्रावेति सुखप्रदम् ॥३॥ कुले जन्मापरोगत्वं, सौभाग्यं सौख्यमद्भुतम्। लक्ष्मीरायुर्यशो विद्या, रम्या रामा तुरङ्गमाः ॥४॥ मातङ्गा जनलक्षैश्च, परिचर्यायुतास्तथा। चक्रिशक्रेश्वरत्वं च, धर्मादेव हि देहिनाम् ॥५॥ तत्रापि यो विशुद्धात्मा, संयमं शुद्धमात्मना। पालयति स्फुटं स स्या-न्नरः कल्याणशर्मभाग् ॥६॥ यतः "दो चेव जिणवरेहिं, जाइजरामरणविप्पमुक्केहिं। लोगंमि पहा भणिया, सुसमण सुसावओ वावि ॥ ७ ॥" प्रभोः पार्श्वे तदा प्राप्त-वैराग्यो ढण्ढणः स्फुटम्। जग्राह संयमं भावा-त्संसाराम्भोधितारकम् ॥ ८ ॥ लभिष्येऽहं यदा

भिक्षा—मात्मलब्ध्यैव कर्हिचित् । करिष्यामि तदा नाथ ! पारणं ढण्ढणो जगौ ॥ ९ ॥ इति कृताभिग्रहो ढण्ढणस्तस्यां पुर्य्यां भिक्षार्थं भ्रमन्नपि ग्रासमात्रमपि न प्राप । ततोऽन्यदा प्रभुपार्श्वे ढण्ढणेनोक्तं, भगवन् कथं न मे शुद्धाभिक्षाप्राप्तिर्भवति । नेमिनाथोऽवग्—पुरा मगधदेशे धान्यपूरकग्रामे परासराह्वः कुलपुत्रकोऽभूत् राजकृषिचिन्तकश्च, क्षेत्रेषु खेटनं कारयन् भक्ते समागते पञ्चशतहलसक्तवृषभान् हालकांश्च वृषभछोटनवेलायां जातायामपि नामुञ्चत् । वृषभहालिकामुञ्चनार्जितनिकाचितान्तरायकर्मा मृत्वा, परासरो भवं भ्रान्त्वा क्रमादिह कृष्णपुत्रो ढण्ढणनामाऽभवस्त्वम् । इति प्रभुवचो निशम्य तदैव कर्म्मनिर्मूलयितुं यतते ढण्ढणः । कदाचित् भिक्षायां लब्धमोदकः प्रभोः पार्श्वे पप्रच्छ मम प्राग्भवकर्म क्षीणं न वेति? भगवानभिदधे । 'कन्हस्स लद्धी नहु ढण्ढणस्स ।' ततः कृष्णलब्धिं श्रुत्वा मोदकान् परिष्ठापयितुमिच्छुरिष्टिकापाके गत्वा मोदकांश्चूर्णयन् शुक्लध्यानात् केवलज्ञानमाससाद ।

॥ इति ढण्ढणकुमारकथा ॥

वलेन कार्यमाणोऽपि, तपःकर्म पुमान् स्फुटम् । लभते स्वर्गसौख्यानि, द्रुतं श्रीयकवत्स्फुटम् ॥ १ ॥

पाटलीपुरे अनेकजिनेन्द्रमन्दिरसुन्दरे नवमनन्दभूपते राज्यं कुर्वतः कल्पकवंशावतंसः शकडालनामा महामात्योऽभूत् । तस्य लक्ष्मीवती पत्नी च । तौ जिनधर्म्मकर्म्माणि कर्म्मठौ भवतः स्म । यतः—"कुलेजन्मापरोगत्वं सौभाग्यं सौख्यमद्भुतम् । लक्ष्मीरायुर्यशो विद्या, हृद्या रामास्तुरङ्गमाः ॥ १ ॥ मातङ्गा जनलक्षैश्च, परिचर्यायुतास्तथा । चक्रिशक्रेश्वरत्वं च, धर्मादेव हि देहिनाम् ॥२॥" क्रमात्तयोः पुष्पदन्ततुल्यौ स्थूलभद्रश्रीयकाभिधौ सुतौ बभूवतुः । यक्षा १ यक्षदत्ता २ भूता ३ भूतदत्ता ४ सेना ५ वेणा ६ रेणा ७ भिधाः सप्त पुत्र्यः महाप्रज्ञावंत्योऽभूवन् । प्रथमायाः पुत्र्या एकवारश्रुतं समेति । द्वितीयाया द्विवारं एवं सप्तम्याः सप्तवारं श्रुतं शास्त्रं समेति । यतः—"विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः । विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं, विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ १ ॥" तस्य नृपतेर्वाराङ्गना कोशानाम्न्यभूत्, अतीव रूपश्रिया सुराङ्गनां जिगाय । तस्यां सक्तः स्थूलभद्रस्तद्गृहे द्वादशवर्षाणि तस्थौ । तत्र बहु धनं भुक्तं तेन । यतः—"क्षत्राणां हयशस्त्रबन्दिषु भवेद् द्रव्यव्ययः प्रायशो, भूमध्ये कृपणात्मनां व्यसनिनां स्त्रीद्यूत-

श्रीढण्ढणमुनिकथा शकडालमन्त्रिणः श्रीस्थूलभद्रश्रीयकौ पुत्रौ यक्षाद्याः सप्त पुत्र्यश्च

चौर्योद्यमे । शृङ्गारे पणयोषितां च वणिजां पण्ये कृषौ क्षेत्रिणां, पापानां मधुमांसयोः सुकृतिनां धर्मोपकारोत्सवे ॥१॥" तस्य विशेषतो भूपतेः श्रीयको विश्वासभाजनमजनि । अङ्गरक्षाकारी श्रीभारत्या लब्धवरोऽभूच्च । प्रतिदिनं वररुचिर्द्विजो नूतनं कृतमष्टोत्तरं शतं काव्यानि नन्दाय प्राभृतीकुरुते । मिथ्यात्वमयानि काव्यानि मत्वा शकडालो न प्रशशंस नन्दाग्रे । ततो भूपो द्विजन्मने किमपि न दत्ते । पारितोषिकमलभमानो द्विजो विषादं प्रपेदे । मन्त्रिणा महीपतेर्मिथ्यादृक्संसर्गपरिहारायैकदा प्रोक्तम्—यानि काव्यानि द्विजो जल्पति भवतोऽग्रे तानि मत्पुत्रीणां समायान्ति । जीर्णानि आनयति काव्यानि नवीनानि कथयति द्विजः राज्ञोक्तमेकदा श्रूयन्ते काव्यानि । ततः शकडालपुत्र्यस्तत्र सभायामैयुः । द्विजोऽपि प्रातः पञ्चशतकाव्यानि कृत्वाऽगात् । एकवारं तेन जल्पितानि यदा । ततः एकसंस्थिकया पुत्र्या तानि सर्वाणि प्रोक्तानि । ततो द्वितीयया ततस्तृतीयया ततश्चतुर्थ्या एवं सप्तम्या । ततो राजा चमत्कृतो जगौ । मन्त्रिन्नेता पुत्र्यस्ते साक्षाद्भारत्यो बह्व्योऽवतीर्णाः । ततो राजा वररुचेर्द्वारप्रवेशनिरोधमकरोत् । अथ स द्विजोऽष्टोत्तरेण काव्यशतेन प्रत्यहं प्रातर्गङ्गां स्तुवन् दीनाराणामष्टोत्तरं शतं लभते । इति प्रसिद्धिः सर्वत्र लोके प्रससार । तं द्विजं लोकाः स्तुवन्ति । अहो असौ द्विजो भाग्यवान् प्रज्ञावान् पूर्वमनेन ज्ञानमाराधितम् । यतः—

“ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानतः । अन्नदानात् सुखी नित्यं, निर्व्याधिर्भेषजाद्भवेत् ॥१॥” इति नद्यां प्रसिद्धिं कूटामवधार्य चतुरचक्रवर्ती गूढपुरुषैस्तन्मुक्तां दीनारग्रन्थिं गङ्गामध्यगुप्तीकृतां मन्त्री आनिनाय। प्रातर्यावत्तां ग्रन्थिं गृहीतुं गत्वा द्विजो गङ्गां स्तौतिस्म, तावद्राजा मन्त्रियुतस्तत्रागात्। पुनः पुनर्द्विजो गङ्गां स्तुवन् यावन्नाप्नोति ग्रन्थिं तावत् शकडालः प्राह अहो किं गङ्गा नार्पयति भवदीप्सितं? ततो द्विजोऽवक्–न ज्ञायते अद्य गङ्गा किमर्थं नार्पयति, अग्रे मम मार्गितं दत्तेऽधुना न दत्ते गङ्गा, ममाभाग्यमधुना यातं किं क्रियते। यतः-“अभाग्येऽभ्युदिते पुंसां, दारिद्र्यमेति लीलया। भाग्योदये तु गीर्वाणा, भवन्ति वशगाः स्फुटम् ॥ १ ॥” ततो मन्त्रिणा ग्रन्थिरानाय्य दर्शिता राज्ञः द्विजस्य कथितं च। इयं ग्रन्थिः कस्य सत्का तदा द्विजो दध्यौ। मम नेयं यद्यहं जल्पामि तदा तु ग्रन्थिर्याति। प्रथममेव नीवी याति। ममेयमिति जल्पामि तदाहं कूटमिति प्रोक्तवान् द्विजः। ततो राज्ञा लोकेन धिक्कृतो मन्त्रिणि वैरं वहति, छलं विलोकयति। अन्यदोत्पन्नकूटबुद्धिः श्रीयकस्यवि वाहसामग्र्यां जायमानायां द्विजो लेखकशालकानेकां गाथामेवं पाठयामास। राउलो उ नवि जाणइ एह, जं सगडाल करेसिइ। नंदराय मारेवि णु, सिरीओ राजि ठवेसिइ ॥ १ ॥ एवं बालान् बहून् जल्पतः श्रुत्वा राजा दध्यौ। बालवाचाऽन्यथा न भवति। यतः “अमोघा वासरे विद्युत्, अमोघं निशि

गर्जितम्। नारीबालवचोऽमोघं, अमोघं देवदर्शनम् ॥१॥ इति बालवचः सत्यमवगत्य मन्त्रिगृहे सिंहासनछत्रचामरादिकं निष्पद्यमानं निशम्य सचिवाय चुकोप, मन्त्रिणं हन्तुं सकुटुम्बं (राजा तत्परोऽभूत्) तं वृत्तान्तं निशम्य मन्त्री एकदिनमारकाविषमश्नातिस्म । ततः कृताराधनको मन्त्री श्रीयकमाकार्य प्राह—मया तु विषं भक्षितं सन्ध्यायां मरणं भविष्यति । राजा तु आत्मनः कुटुम्बस्योपरि रुष्टोऽस्ति । तेन त्वं मारय माम्, ततः सर्वकुटुम्बस्य कुशलं भविष्यति ततो यावच्छकडालो राजानं नन्तुं गतस्तावद्राजा पराङ्मुखो बभूव । इतः श्रीयकोऽभ्येत्यावग्—यो राज्ञि द्रोही भविष्यति तस्यानेनासिना शिरः छेत्स्यते मयेत्युक्त्वा पितुः शिरः कमलनालवत् चिच्छेद । ततो द्रुतं राजा सन्मुखीभूयावग्—भो श्रीयक ! कथं मुधा त्वया पिता हतः । श्रीयकोऽवग् यो राज्ञि मम स्वामिनि द्वेषी भविष्यति तस्यैवंविधा शिक्षा दास्यते । ततो राजा प्रसन्नीभूयावग्—त्वया मुधा किं पिता मारितः । ततः श्रीयकेन विप्रस्वरूपं प्रोक्तम्—ततो राजा विप्रस्य देशत्यागं प्रोक्तवान् । ततः शकडालस्याग्निसंस्कारे कृते श्रीयकं प्रति राजावग्—त्वमेव धन्यः सेवकशिरोमणिरसि । यादृग् शास्त्रे वर्ण्यते सेवकस्तादृग् त्वमेव दृश्यसे । यतः "युद्धकालेऽग्रगो यः स्यात्, सदा पृष्ठानुगः पुरे । प्रभोर्द्वाराश्रितो हर्म्ये, स भवेद्राजवल्लभः ॥ १ ॥ जीवेति प्रब्रुवन् प्रोक्तः, कृत्याकृत्यविचक्षणः ।

करोति निर्विकल्पं यः, स भवेद्राजवल्लभः ॥२॥ भृत्यैर्विरहितो राजा, लोकानुग्रहकारिभिः। मयूखैरिव दीप्तांशुस्तेजस्व्यपि न शोभते॥३॥ भो श्रीयक ! मन्त्रिमुद्रां त्वमङ्गीकुरु । श्रीयको जगौ—मम ज्यायान् सहोदरोऽस्ति स्थूलभद्रः कोशागृहे निवसति च । ततो राजा दध्यौ । अहो ईदृशो निर्लोभी कोऽपि न दृष्टः । यतः—"दृश्यन्ते लोभिनो लोकाः, प्रायो बहुतरा भुवि । लोभादब्धौ विदेशे वा, गच्छन्तिस्म जना घनाः ॥१॥ दन्तैरुच्चलितं धिया तरलितं पाण्यंघ्रिणा कम्पितं, दृग्भ्यां कुड्मलितं बलेन गलितं रूपश्रिया प्रोषितम् । प्राप्तायां यमभूपतेरिह महाधाट्यां जरायामियं, तृष्णा केवलमेकका च सुभटी हृत्पत्तने नृत्यति ॥ २ ॥" ततो राजा स्थूलभद्रमाकारयितुं स्वसेवकं प्रेषयामास । वेश्यागृहे गतो नृपानुगश्चन्द्रशालायां देवाङ्गनया पण्यस्त्रिया सह सारद्यूतखेलनपरं स्थूलभद्रं प्रणम्य विज्ञपयामास शकडालमन्त्रिमरणस्वरूपं प्रोक्तं, तेन त्वां राजा मन्त्रिमुद्राङ्गीकारायाकारयतिस्म । ततो वज्राहत इव क्षणं भूत्वाऽश्रुपातपातनपूर्वं त्यक्तताम्बूलो नृपमन्दिरगमनाय कोशां प्रति प्राह—ततः कोशया व्यज्ञपि । तथाच—पावसउ मिलियाव तिणि कमलिनी वढीया घटीइ नही । पसरतउ वीयालि इत्तीवार कुण पडिखिसिइ ॥ १ ॥ अन्नाइ जाइ मिहुणाइं, जाइ अखंडसुरकविहवाइं । पिच्छंति न विरहदुहं, मरणाउवि जं अणंतगुणं ॥ २ ॥ तं रुद्दं चिय एगं, पसंसिमो जो त्रियोय-

वररुचेः प्रयोगात् शकडालमन्त्रिमृत्युः श्रीस्थूलभद्रस्य नन्दराजाह्वानम्

दुहभीओ । उज्झियतिलोयलज्जो, किरद्धनारीसरो जाओ ॥ ३ ॥ संखसि उपरि दंड काहि निग्गहु परई सिरस्स । अज्जि अछइ अग्गलओ, जं विछोह पियस्स ॥ ४ ॥ इत्यादि विज्ञाय गणिकाऽवग्-यावद्भवानभ्युपैति तावत्कोऽप्यत्र मुच्यताम् ततः स्वं सेवकं तत्र मुक्त्वा स्थूलभद्रो भूपोपान्ते गत्वा प्रणणाम । ततो राज्ञोक्तं मन्त्रिमुद्रां परिधेहि । स्थूलभद्रो जगौ-किञ्चिद्विमृश्य विज्ञपयिष्यामि इति प्रोच्य धवलगृहासन्नाशोकवर्तीं प्रविश्येति दध्यौ । जानाम्य-मात्यमुद्रेयं पितुर्मारणवैरिणी । तत्त्यागादधुना नाहं पश्याम्यस्या विडम्बनाम् ॥ १ ॥ हं हो शौचसखे विवेक भगवन् वैराग्य भो मार्दव त्वं मातः करुणे क्षमे भगवति व्रीडे सखि श्रयताम् । यूयं तावदनुक्रमागततया सर्वाणि बन्धून्यपि त्यक्त्वा मामिह यौवनेऽतिगहने क प्रोषितानि ध्रुवम् ॥ २ ॥ इहानुभूयते दक्षै-रध्यक्षं च निरीक्ष्यते । राजा न मित्रतां याति, याति चेत् प्रलयस्तदा ॥३॥ नादास्ये नृपतेर्मुद्रां, प्रान्ते परिभवप्रदाम् । जिनेन्द्रस्य गृहीष्यामि, महोदय-निबन्धनाम् ॥ ४ ॥ स्थानं विविधबुद्धीनां, रुद्धो मौलिर्मलीमसैः । एभिः कचैरतः सर्वान्, उच्चखान स तान् क्रुधा ॥ ५ ॥ पुरा रागाधिकवस्त्रा-ण्यनुरूपाणि यो दधौ । विरागाणि तदा तानि, संजग्राह विरागभाक् ॥ ६ ॥ रजांस्युपनयं निन्ये, यः स्वयं व्यसनोदये । प्रतीकारकृते तेषां, रजोहरणमात्तवान् ॥ ७ ॥ इत्थमालोच्योपात्तव्रतः

स्थूलभद्रो नृपोपान्ते गत्वा धर्मलाभाशिषं ददौ । राजा जगौ किमिदं कृतम् । तेनोक्तं आलोचितम् । आसमन्ताल्लोचितं लोचः कृतः केशोत्पाटनात् यतो मन्त्रिमुद्रा दुःखदायिनी भवति ततो मयैवं कृतम् । यतः—" हस्ते मुद्रा मुखे मुद्रा, मुद्रा स्यात्पादयोर्द्वयोः । ततः पश्चाद्गृहे मुद्रा, व्यापारः पञ्चमौद्रिकः ॥ १ ॥ " ततो राजा तादृक्षं त्यक्तसर्वगणिकादिसुखं प्रशशंसेति धन्यस्त्वं सहसा त्यक्त्वा, गणिकादि सुखं द्रुतम् । अलाः संयमसाम्राज्य-मनन्तसुखदायकम्॥१॥यतः—" धन्यास्ते व्रतदानतत्परधियो नित्यं जिनेन्द्रार्चकाः, धर्मध्याननिरस्तकल्मषविषाश्चैत्यालयोद्धारकाः । सद्बिम्बान्यपि कारयन्ति निपुणास्तेषां प्रतिष्ठां पुनः, सच्छास्त्रश्रवणैककर्मकुशला ये श्रावकाः स्युः क्षितौ ॥ १ ॥ ततो धर्माशिषं भूपाय वितीर्य स्थूलभद्रो वनं गतः । तत्र श्रीसंभूतिविजयगुरुपादान्ते विधिवत् प्रव्रज्यां जग्राह । अथ राजा श्रीयकस्य महामात्यमुद्रां प्रसादीचकार । श्रीयको राज्यव्यापारं कुर्वन् वारत्रयं जिनार्चोभयकालप्रतिक्रान्त्यादि धर्मकृत्यं करोति । सप्तक्षेत्र्यां स्वधनं व्ययतिस्म च । जिनेन्द्रप्रासादशतं धर्मशालाशतत्रयं कारयामास च । यतः—" जिणभवणबिंबपुत्थयसंघसरूवेसु सत्तखित्तेसु । ववियं धणंपि जायइ शिवफलइ अहो अणंतगुणं ॥ १ ॥ " क्रमाच्छ्रीयकः क्षितिपपार्श्वात् स्वपुत्रस्य मन्त्रिमुद्रां दापयित्वा श्रीगुरुपार्श्वे दीक्षां जग्राह । एकदा यक्षया महासत्या स्वभगिन्या श्रीपर्युप-

णापर्वणि समायाते श्रीयकस्याग्रे प्रोक्तम् । अद्य वार्षिकपर्व विद्यते । अत्र यत् पुण्यं क्रियते, तस्य फलमनन्तं भवति । यतः—"एगग्गचित्ता जिणसासणंमि, पभावणापूयपरायणा जे । तिसत्तखुत्तो निसुणंति कप्पं, भवण्णवं ते लहु संतरंति॥१॥ संवच्छरचाउमासीएसु, अट्ठाहीआसु य तिहीसु । सव्वायरेण लग्गइ, जिणवरपूयातवगुणेसु ॥ २ ॥" इत्युक्त्वा प्रथमं श्रीयको नमस्कारसहितं प्रत्याख्यानं कारितस्तया । ततः पौरुषी ततः सार्द्धपौरुषी । ततः पुरिमार्द्धं ततः एकासनादि तावद्यावत् सन्ध्यायामुपवासो यक्षया कारितः श्रीयकस्य । रात्रौ अकस्मान्मृतः श्रीयकः । ततो यक्षाऽतीवदुःखिता श्रीयकगतिज्ञानार्थं श्रीसङ्घसहिता कायोत्सर्गं चकार । ततः शासनदेव्या उत्पाट्य यक्षा महाविदेहक्षेत्रे श्रीसीमन्धरपार्श्वे मुक्ता । श्रीसीमन्धरस्वामिपार्श्वे तया स्वचित्तचिन्तितस्वरूपं पृष्टम् । ततः श्रीसीमन्धरस्वामी जगौ—श्रीयको मृतः स्वायुषः क्षयादेव न पुनस्तपसा । शोको न कर्तव्यः । न केनापि जीवितव्यं बहुक्रियते । यतः—"नो विद्या न च भेषजं न च पिता नो बान्धवा नो सुताः, नाभीष्टा कुलदेवता न जननी स्नेहानुबन्धान्विता । नार्थो नो स्वजनो न वा परिजनः शारीरकं नो बलं, नो शक्तास्त्रुटितं सुराः सुरवराः संधातुमायुर्ध्रुवम् ॥ १ ॥" ततस्तया यक्षयोक्तं क्वोत्पन्नो मम भ्राता ? श्रीसीमन्धरस्वामी जगौ—प्रथमे सौधर्मे स्वर्गे भासुरद्युतिभाग् सुरोऽभूत् श्रीयकः,

धर्मप्रभावान्मुक्तिं गमिष्यति । ततो मुदितमानसा यावच्चलति यक्षा तावत्परमेश्वरेण चूलिकाचतुष्टयं व्याख्यातम् । तया तच्छ्रुतं समायातं च तस्याम् । ततः शासनदेव्या उत्पाट्य श्रीसङ्घमध्ये मुक्ता यक्षा । ततः श्रीगुरूणां श्रीसङ्घस्याग्रे श्रीयकसद्गतिप्राप्तिस्वरूपं प्रोक्तं तया चूलिकाचतुष्टयं श्रीगुरूणामर्पितम् । श्रीगुरुभिश्चूलिकाद्वयं दशवैकालिकप्रान्ते क्षिप्तम्, चूलिकाद्वयं च आचाराङ्गप्रान्ते क्षिप्तम् । ततो यक्षा साध्वी स्वयं विशेषतस्तपः कर्तुं लग्ना । तदा श्रीगुरुभिरुक्तम् । ये जना अष्टम्यादिपर्वसु तपः कुर्वन्ति ते क्रमात् क्षीणकर्माणो मुक्तिं गच्छन्ति । यतस्तप एव निकाचितकर्मच्छेदकमुच्यते । यतः—"पोरसि चउत्थ छट्ठे, काउं कम्मं खवंति जं मुणिणो । तं नो नारइ जीवा, वाससयसहस्सलरकेहिं ॥ १ ॥ जं नारया ण कम्मं, खवंति एगेहि वरिससहस्सेहिं । तं खलु चउत्थभोई, जीवो निज्जरइ सुहभावो ॥ २ ॥ यद्दूरं यद्दुराराध्यं, यच्च दूरे व्यवस्थितम् । तत् सर्वं तपसा साध्यं, तपो हि दुरतिक्रमम् ॥ ३ ॥ यक्षा तपस्तप्त्वा क्रमात् स्वर्गं गता ।

॥ इति श्रीयककथा समाप्ता ॥

श्रीमत्याः यक्षार्यायाः श्रीसीमन्धरपार्श्वे गमनं श्रीयकस्य यक्षायाश्च स्वर्गगमनम्

भत्सु वैरिषु योऽत्यन्तं, क्षमां कुर्यात्सुभावतः । अन्निकापुत्रसूरीश, इवाप्नोति शिवश्रियम् ॥ १ ॥

तथाहि—पूर्वं राजगृहे नगरे श्रीश्रेणिको राजा राज्यं कुर्वन् श्रीवीरजिनपादाम्बुजसेवया बद्धतीर्थङ्करगोत्रो न्यायमार्गात् पृथिवीं प्रशशास। यतः "राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः।राजानमनुवर्तन्ते, यथा राजा तथा प्रजा॥१॥" तस्य चिल्लणाद्या बह्वयो राज्योऽभूवन्। कोणिकाभयकुमारमेघकुमारादयो बहवः पुत्रा आसन्। कोणिकः श्रेणिकं काष्टपञ्जरे क्षिप्त्वा राज्ये उपविष्टः। ५०० नाडीभिर्घातयति। मृते श्रेणिके चम्पा वासिता कोणिकेन। चक्रिरत्नानि कृत्वा खण्डत्रयं साधयित्वा वैताढ्याग्रेतनखण्डत्रयं साधयितुं गुहायां गतः। तन्निर्गतज्वालया दग्धः षष्ठनरकं गतः तत्पुत्र उदायीनामा राजाऽभूत् सोऽपि स्वपित्रा कारितानि सभाक्रीडाशयनादिस्थानानि दर्शं दर्शमतीव खिन्नः शोकसागरे पपात। शून्यचित्तस्य राज्ञः सर्वं राज्यकार्यं विसस्मार। ततोऽमात्यैः प्रोक्तम्—स्वामिन्! नवीनं पुरं स्थाप्यते। ततो नव्यं पुरं निवेशयितुं नैमित्तिकवरान् वर्यस्थानगवेषणकृते आदिक्षत राजा। तेऽप्यमात्या वर्यं पुरस्थानं पश्यन्तो गङ्गातटं प्रापुः। तत्र कुसुमपाटलं पाटलिपादपं सच्छायं वीक्ष्य चमत्कृताः। पाटलितरुशाखायां चाषं व्यात्तास्यं स्वयं निपतत्कीटकपेटकं समीक्ष्य चेतस्येवं व्यचिन्तयंस्ते। अहो यथाऽस्य चाषविहङ्गमस्य मुखे स्वयमेव कीटाः पतन्तो विलोक्यन्ते तथाऽत्र स्थाने नगरे स्था-

गिते सति अस्य राज्ञः स्वयं सम्पदो बह्व्यः समेष्यन्ति । एतदालोक्यामात्या राजपार्श्वेऽभ्येत्य जगुस्तत्स्थानस्वरूपम् । सोऽपि राजाऽतीव हृष्टः कमपि वृद्धं नैमित्तिकं विचक्षणं पप्रच्छ । अयं पाटलतरुः कीदृग्माहात्म्योऽस्ति ? ततो नैमित्तिकोऽवग्—अयं पाटलानोकहो न सामान्योऽस्ति, इति ज्ञानिना ममाग्रे प्रोक्तम् । पाटलद्रुः पवित्रोऽयं महामुनिकरोटिजन्मा । एकावतारी स मूलजीवश्चेति विशेषतो मन्ये । राज्ञोक्तम् ॥ कतमः स महामुनिः ? तदनुजगाद नैमित्तिकः । तथाहि—देव ! उत्तरमथुरायां देवदत्ताह्वो वणिक्पुत्रो वसतिस्म । सोऽन्यदा द्रव्यार्जनहेतवे, दक्षिणमथुरायामगमत्, तत्र तस्य जयसिंहनाम्ना वणिक्पुत्रेण सह मैत्री जाता । तत्रान्येद्युर्जयसिंहवणिग्गृहे भोक्तुं निमन्त्रितो देवदत्तोऽगमत् । तदा देवदत्तो भुञ्जानोऽन्निकाह्वां तज्जामिं परिवेषयन्तीं वीक्ष्य तस्याः सद्रूपालोकनादनुरक्तोऽजनि । यतः—"अरकाणऽसणी कम्माण, मोहणी तह वयाण बंभवयं । गुत्ताण य मणगुत्ती, चउरो दुक्खेण जिप्पंति ॥ १ ॥" द्वितीयेऽहनि मित्रपार्श्वात्तां परिणेतुमयाचिष्ट देवदत्तः । जयसिंहोऽवग्—तस्मै स्वसारमिमां दास्ये यो मद्गृहाद्दूरे न भवति । इयं स्वसाऽतीव प्राणेभ्योऽपि वल्लभाऽस्ति, ततो देवदत्तेनोक्तम् भवद्वचः प्रमाणमेव । ततो वर्येऽहनि तामन्निकां देवदत्तः पर्यणैषीत् । तया सह भुञ्जानस्य भोगान् देवदत्तस्यान्यदा पितृभ्यां लेखः प्रेषितः । तथाहि—

त्वं दूरे वर्तसे पुत्र ! वृद्धावावां बभूविव । त्वमेव चेदिहायासि, तदा नौ जीवितं भवेत् ॥ १ ॥ तं लेखं वाचयतस्तस्य नेत्रे वर्षितुमश्रूणि लग्ने । ततस्तस्य प्रियया रोदनहेतुं पृष्टोऽपि यावन्न ब्रवीति देवदत्तः तावत्तया स्वयं लेखमादायेति अवाचि सः । तत्र चेदं लिखितमासीत् गुरुभ्याम् । यद्वत्सावां वृद्धौ निकटनिधनौ स्वः यदि त्वं जीवितं नौ वीक्ष्यसे तदा शीघ्रमत्रागन्तव्यं त्वया विचारो न कार्यः । ततस्तया प्रियया प्रोक्तं–स्वामिन् ! भवतो मातापितरौ वृद्धौस्तः तेन तत्र गन्तुं विलोक्यते एव । देवदत्तो जगौ । मया पूर्वमुक्तमत्राहं स्थास्यामि । साम्प्रतं यास्यामीति कथं जल्प्यते मया । प्रतिज्ञाया भङ्गो भवति, प्रतिज्ञाभङ्गः केनापि न क्रियते । यतः–"अर्थो विनश्यतु विरज्यतु बन्धुवर्गो, राज्यं क्षयं व्रजतु बन्धनमस्तु बाढम् । प्राणाः प्रयान्तु निधनं न तथापि सन्तो, धीरा निजानि वचनानि विलोपयन्ति ॥१॥ तत्तियमित्तं जंपह, जत्तियमित्तं तु होइ निव्वाहो । वाया मुआण नासइ, जीवंता मा मुआ होंति ॥ २ ॥" तदनुप्रिया प्राह-स्वामिन् मातापित्रोः समं तीर्थं नास्ति तेन तदर्थे कदाचित् प्रतिज्ञाभङ्गः क्रियते तदा न दोषः । यतः–"माता गङ्गासमं तीर्थं, पिता पुष्करमेव च । गुरुः केदारसमं तीर्थं, माता तीर्थं पुनः पुनः ॥ ॥१॥ " एवं पतिमाश्वास्य स्वभ्रातरं सुकुमालवचनेन पर्यवसाय्याऽन्तःस्नेहलाऽन्निका पतिं प्राह–स्वामिन्

चल्यतां मया भ्राता पर्यवसायितोऽस्ति । ततो देवदत्तो दध्यौ एवंविधा पत्नी स्नेहला पतिहितकारिणी कापि न दृष्टा । यतः—" श्वश्रूश्वशुरननान्दृ-पतिदेवरभक्तिका । धर्मकर्मरता पत्नी, सुभाग्यादेव लभ्यते ॥१॥ " ततो देवदत्तः सप्रियः उत्तरमथुरां प्रति प्रतस्थे । क्रमात्साधानाऽम्बिका मार्गे सुतमसूत । जन्मोत्सवे कृते अम्बिकाऽवग्—अस्य सुनोर्नाम श्वश्रूश्वशुरौ दास्यतः । तदा वर्त्मनि सर्वपरिवारोऽम्बिकापुत्र इति उल्ललाप । क्रमाद्देवदत्तः स्वपुरं जगाम । मातापित्रोर्मिलितो विनयपूर्वकमम्बिका श्वश्रूश्वशुरयोः क्रमयोः पपात । मातापितृभ्यां संधीरणेति नाम्नि दत्तेऽपि अम्बिकापुत्र इति नाम पप्रथे । ततः सर्वेषामपि हर्षोत्कर्षं चकार वर्द्धमानः कुमारः । क्रमात् प्राप्ततारुण्योऽम्बिकापुत्रो गुरूणां समीपे धर्मं शृण्वानो धर्मपरो बभूवेति । " जन्तूनामवनं जिनेशनमनं भक्त्याऽऽगमाकर्णनं, साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम् । मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनं, चेतः शोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥१॥ ' इत्यादि धर्मोपदेशाकर्णनात् भोगांस्तृणवन्मन्यमानो जयसिंहाचार्यपार्श्वे दीक्षामग्रहीत् । अम्बिकापुत्रो विनयपूर्वकं शास्त्राणि पठन् गुरुपार्श्वे आचार्यपदं प्राप । बहुपरिवारसहितो भव्यजीवान् प्रबोधयन् वार्द्धके पुष्पभद्रपुरं गङ्गातटस्थं प्राप । तत्र पुष्पकेतुर्नृपो राजा राज्यं करोतिस्म न्यायात् । यतः " राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।

राजानमनुवर्तन्ते, यथा राजा तथा प्रजाः ॥ १ ॥ ” ततः क्रमात् तस्यासीत् पुष्पवती पत्नी । तयोर्युग्मजौ पुष्पचूलः पुष्पचूला चेति पुत्रः पुत्री जातौ । तौ सह वर्द्धमानौ क्रीडन्तौ च परस्परं प्रीतिमन्तौ जातौ । राजा दध्यौ यद्येतौ दारकौ पृथग् विवाहकरणाद्वियुज्येते तदा नूनमेतौ मृतावेव । अहमप्यनयोर्विरहं सोढुमनीशोऽस्मि तस्मादनयोरेव विवाहं कारयिष्यामीति ध्यात्वा मन्त्रिपौरानाकार्य प्राह—यद्रत्नमन्तःपुरे समुत्पद्यते तस्य कः स्वामी ? तैर्विज्ञप्तं स्वाम्येव स्वामिनः तवान्तःपुरोत्पन्नं वस्तु त्वदीयाभिप्रेतस्थाने त्वया योज्यते । ततो राज्ञोक्तम् । मम पुत्रपुत्र्योर्यदि वियोगो भविष्यति तदा मरणमपि भावि इत्यादि विमृश्य पुत्रपुत्र्योरेव विवाहः कारितो देव्यां वारयन्त्यामपि मेदिनीभुजा । तौ दम्पती भोगान् भुङ्क्तः । सा राज्ञी तु प्राह—स्वामिंस्त्वया किमेवंविधमकर्तव्यं कृतं पुत्रपुत्रीविवाहकरणान्मिथः । ततो राज्ञा हक्किता राज्ञी त्वयैवं किमुच्यते रे पत्नि यदि पुनः प्रजल्पसे तदा त्वां हनिष्यामि इति धिक्कृता राज्ञी समुत्पन्नवैराग्या श्रीगुरूणां पार्श्वे व्रतं जग्राह । तीव्रतरं तपस्तप्त्वा पुष्पवती स्वर्गे देवोऽभूत् । अन्येद्युः पुष्पकेतौ कथाशेषे पुष्पचूलो राजाऽभूत् । पुष्पवतीजीवो देवोऽवधिज्ञानात् पुत्रपुत्र्योरकृत्यं ज्ञात्वा तद्वारणायागत्य पुष्पचूलाया नरकानदर्शयत् तद्दुःखानि ज्ञात्वा सा च प्रबुद्धा भीता च पत्युः पुरः सर्वं निवेदयामास । राजा च

भीतः शान्तिकपौष्टिकादिकर्म कारयामास । स च देवः प्रतिदिनं तस्या नरकावासानदर्शयत् । राजा तु सर्वास्तीर्थिकान् बौद्धादीनाकार्य पप्रच्छ कीदृशा नरकाः कथ्यन्ते । केचिदाहुर्गर्भवासः, केचिदाहुर्गुप्तिवासः, केचिद्दारिद्र्यं, केचित् पारतन्त्र्यं प्रोचुः, राज्ञी तु बौद्धादिप्रोक्तं श्रुत्वा मुखं मोटयन्ती प्राह--एवंविधा नरका न विद्यन्ते । अथ भूपोऽन्निकापुत्राचार्योपान्ते गत्वाऽवग्--कीदृशा नरका भवन्ति ? ततो गुरुभिः प्रोक्तमिति । "इग तिन्नि सत्त दस सत्तर-ऽयर बावीस तित्तीसा । सत्तसु पुढवीसु ठिई, जिट्ठोवरिमाइ हिट्ठपुढवीए । होइ कमेण कणिट्ठा, दस वास सहस्स पढमाए ॥ ॥ १ ॥ सत्तसु खित्तजविअणा, अन्नुन्नकयावि पहरणेहि विणा । पहरणकयावि पञ्चसु, तिसु परमाहम्मियकयावि ॥ २ ॥ राज्यपि गुरूक्तं श्रुत्वा प्राह--भगवन् ! भवद्भिरपि स्वप्नो दृष्टः ? सूरिराह जिनागमात् सर्वं नरकादिस्वरूपं ज्ञायते । पुष्पचूलाचष्ट--भगवन् केन कर्मणा नरकाः प्राप्यन्ते ? गुरुराचष्ट--महारम्भपरिग्रहैर्गुरुप्रत्यनीकतया पञ्चेन्द्रियवधात् मांसाहाराच्च तेषु नरकेषु पतन्ति जीवाः । पुष्पवतीजीवसुरस्तस्यै स्वर्गानदर्शयत् स्वप्ने । राज्ञा तथैव स्वर्गस्वरूपं पृष्टाः पाखण्डिनः प्रोचुः । यद्वर्यपक्वान्नादि भक्ष्यते यत्पट्टकूलादि परिधीयते यद्वर्ययानासनादिषु उपविश्यते तदेव स्वर्गः कथ्यते । ततो गुरुभिर्भूपभूपपत्नीपृष्टैरुक्तम्--सम्यक्त्वाराधनगृहियतिधर्मसेवनेन द्वादशदेवलोकेषु सुखानि प्राप्यन्ते । बत्तीसट्ठावी-

सा, वारस अडचउ विमाणलक्खाइं । पन्नासचत्तछसहस कमेण सोहम्ममाईसु ॥ १ ॥ वरमउड-किरीडधरो, चिंचइओ चवलकुंडलाहरणो । सक्को हियउवएसा, ऐरावणवाहणो जाओ ॥ २ ॥ ततः सा राज्ञी प्रतिबुद्धा प्राह—भो कान्त ! प्रव्रज्यायै मामनुजानीष्व । राजाऽवग्—त्वद्वियोगक्षणमपि न क्षमे । यदि प्रव्रज्यां गृहीष्यसि, तदा मद्गृहस्था गृहीतव्रता एव शुद्धमाहारं गृहाण । तयोररीकृते नृपवचसि राजा तस्याः प्रव्रज्यां दापयामास । पतिगृहे स्थिता राज्ञी पुष्पचूला द्विचत्वारिंशद्दोषविशुद्धमाहारं गृह्णातिस्म । अन्यदा भावि दुर्भिक्षं श्रुतोपयोगात् ज्ञात्वा अन्निकापुत्रसूरिर्गच्छं देशान्तरे प्रैषीत् । प्रक्षीणजङ्घाबलाः सूरयस्तत्र तस्थुरन्निकापुत्राह्वाः । भक्तपानं च शुद्धं श्रीगुरुभ्यः पुष्पचूलाऽन्तःपुरादानीय दत्ते । क्रमाद्गुरुसुश्रूषाप्रकर्षात् क्षपकश्रेण्यारोहात् केवलज्ञानमुत्पेदे महासत्याः । उत्पन्ने केवलज्ञानेऽपि गुरुवैयावृत्त्यान्न विरराम सा । यावन्न ज्ञातं छद्मस्थेन केवलज्ञानोत्पत्तिस्वरूपं—तावत्केवल्यपि शुद्धाहारदानादिं विनयं करोतीति । केवलयुताऽपि सा साध्वी शुद्धमाहारमानीय गुरुभ्यो ददौ । अन्यदा वर्षति जलदे पुष्पचूला साध्वी केवलज्ञानवत्यपि यावद्गुरुपार्श्वे आहारं आनीतवती तावद्गुरुभिरुक्तम्—वत्से ! पुण्यवति ! श्रुतज्ञाऽसि, किमेवंविधे वर्षति जलदे त्वयाऽऽहार आनीतः । तयोक्तम् । यत्र यत्र प्रदेशेषु अप्कायो-

ऽचित्तोऽस्ति, तेषु यत्नादहमत्रायामि। गुरुराह—कुतस्त्वयाऽचित्तप्रदेशो ज्ञायते। तयोक्तं त्वत्पदप्रसादादेव ज्ञायते। गुरुभिरुक्तम्—प्रतिपातिज्ञानं विद्यतेऽथवाऽप्रतिपाति ? तयोक्तमप्रतिपातिज्ञानमस्ति। ततो गुरव उत्थाय मिथ्यादुष्कृतं भवतु, मया हा खेदे केवल्याशातना कृता इति पुनः पुनः स्वं निन्दन्तः पप्रच्छुस्तां साध्वीं प्रति। अहं किं सेत्स्यामि न वेति ? केवली प्राह—माकुध्वमधृतिं गङ्गां नदीमुत्तरतां युष्माकं केवलज्ञानं भविष्यति। ततो गङ्गामुत्तरीतुं भूरिलोकैः सह नावमारुरोह सूरिः। यत्र यत्र सूरिर्न्यपीदत्तत्र तत्र नौर्नमत्यधः। तदनु मध्यासीने मुनौ सर्वापि नौर्मङ्क्तुं लग्ना। ततः सूरिर्लोकैर्जले क्षिप्तः। दुर्भगीकरणविराधया प्राग्भवपत्न्या व्यन्तरीभूतयाऽन्तर्जलं शूले निहितः। शूलप्रोतोऽपि हा मदीयरुधिरेणाप्कायविराधना भाविन्यस्तीति क्षपकश्रेण्यारूढः सर्वकर्मक्षयोत्पन्नकेवलज्ञानः सद्यः समाप्तायुष्कोऽन्तकृतकेवली सिद्धोऽन्निकापुत्र आचार्यशिरोमणिः। तदा तत्र समेत्यासन्नैः सुरैस्तस्यान्तकृतकेवलिनः केवलिमहश्चक्रे। अतस्तत्तीर्थं जातं जगति विख्यातं प्रयाग इति लोके। शूलप्रोतत्वाद् गतानुगतिकतयाऽद्यापि परसमये माहेश्वराः स्वाङ्गे क्रकचं दापयन्ति। सूरेः करोटिर्यादोभिस्त्रोट्यमानाऽपि जलोर्मिभिर्नदीतीरं प्राप्ता, इतस्ततो गच्छन्ती शुक्तिवन्नदीतटे क्वापि गुप्तविषमे प्रदेशे विलग्य तस्थौ। तस्य च करोटिकर्परस्यान्तः कदाचित् पाटलाया बीजं पपात। क्रमात्तं करोटिकर्परं

भित्त्वा दक्षिणहनोः पाटलातरुरुद्गतो विशालश्च क्रमादजनि। तदत्र पाटलिद्रोः प्रभावोऽभूत् । तं तादृशं पाटलितरुं प्रेक्ष्य नवीनपुरस्थापनाय राजा स्वसेवकानादिदेश । विचक्षणास्ते पाटलायाः स्थानाच्चतसृषु दिक्षु पूर्वादिषु शिवायाः शब्दं जायमानं श्रुत्वा तावन्तमवधीकृत्य पुरस्य चतुरस्रं संनिवेशं चक्रुः । पाटलायाश्चतसृषु दिक्षु स्थापनत्वात् पाटलातरोः समीपे पुरनिवेशनात् पाटलिपुत्रं पत्तनं बभूव । राजा तत्रागत्य तन्नगरं स्थापयामास । महादानं ददौ च । तस्य पाटलातरोरसमकुसुमबहुलतया च कुसुमपुरमित्यपि रूढं पुरम् । तस्य पुरस्य मध्ये कैलासशैलसोदरं स्फटिकरश्मिमयं श्रीजिनप्रासादं राजा कारयामास । तन्मध्ये अरिष्टरत्नमयीं नेमिप्रतिमां भूरिद्रव्यव्ययान्महोत्सवपूर्वं स्थापयामास उदायी राजा । तत्र प्राकारानेकजिनप्रासादमहेभ्यालयवापीकूपतडागावाससत्रागारादिरम्यं पुरं स्वश्रिया स्वर्गपुरीं जिगाय । तत्रोदायी राजा जिनधर्म्मवासितसप्तधातुश्चिरं राज्यं चकार । अन्येद्युरुदायी भूपः श्रीगुरुपार्श्वे धर्म्मं श्रोतुं गतः । तत्रेति धर्म्मः श्रीगुरुभिरुक्तः । प्राज्यानि राज्यानि सुभोजनानि, सौभाग्यनैरोग्यसुयोग्यवर्याः । रामा रमा रम्ययशोविलासाः, स्वर्गापवर्गौ प्रभवन्ति धर्मात् ॥१॥ दारिद्र्यमुद्रा परकर्मकृच्च दुष्टस्वभावोऽसुखसङ्गतानि । एकत्वरङ्कत्वकदन्नभोज्यकुरूपमुख्यानि भवन्त्यधर्मात् ॥२॥ यः शत्रुञ्जये गत्वा श्रीयुगादिजिनं प्रणमति स स्वर्गा-

पवर्गौ लभते । "शत्रुञ्जये जिने दृष्टे, दुर्गतिद्वितयं क्षिपेत् । सागराणां सहस्रं तु, ध्यानाल्लक्षमभिग्रहात् ॥ १ ॥ नमस्कार-समो मन्त्रः, शत्रुञ्जयसमो गिरिः । गजेन्द्रपदजं नीरं, निर्द्वन्द्वं भुवनत्रये ॥ २ ॥ स्पृष्ट्वा शत्रुञ्जयं तीर्थं, नत्वा रैवतकाचलम् । स्नात्वा गजपदे कुण्डे, पुनर्जन्म न विद्यते ॥ ३ ॥" श्रुत्वेति शत्रुञ्जयमाहात्म्यं राजा भूरिदेशेभ्यः श्रीसङ्घमाकार्य शुभे मुहूर्ते श्रीशत्रुञ्जयं प्रति देवान्नन्तुं चचाल । मार्गे स्थाने स्थाने जिनप्रासादेषु पूजास्नात्रमहोत्सव-ध्वजावारिकादि कुर्वाणो राजा शत्रुञ्जये ययौ । तत्रापि श्रीयुगादिदेवस्य स्नात्रपूजाध्वजावारिकादिमहोत्सवं भूपश्चकार । ततः श्रीगिरनारगिरावपि गत्वा श्रीनेमिजिनं प्रपूज्य स्वं जन्म कृतार्थं चकार राजा । यतः " शत्रुञ्जयाद्रिरयमादि-युगे गरीयान्, आसीदसीमसुकृतोदयराशिरेव । आदीयमानसुकृतः किल भव्यलोकैः, काले कलौ भजति सम्प्रति दुर्बलत्वम् ॥ १ ॥" ततो द्वयोरपि तीर्थयोर्यात्रां कृत्वा श्रीउदायी महीपतिः स्वपुरमाजगाम । स्वपुरेऽपि जिनप्रासादे स्नात्रमहोत्सवं कारयामास । अनेके जिनप्रासादा राज्ञा कारिताः । श्रीदेवगुरुभक्तिं करोतिस्म, उभयकालं प्रतिक्रमणं करोति, त्रिसन्ध्यं जिनपूजां करोति राजा । एवं धर्मं कुर्वाणः क्रमाद्वृद्धभावं प्राप्तः सन् [स्वं पुत्रं राज्ये निवेश्य] स्वयं कृता-राधनापताकः स्वर्गं जगामोदायी राजा । ततश्च्युतो मुक्तिमपि यास्यति ॥ इति अम्बिकापुत्राचार्योदायिभूपकथा समाप्ता ॥

कृतानेकतमस्कोऽपि, निजं निन्दन् सुभावतः । ईर्यापथिकया सिद्धो–ऽतिमुक्त इव देहभाग् ॥ १ ॥

पेढालपुरे महानगरे श्रीविजयराजा राज्यं चकार । तस्य राज्ञी श्रीमती सच्छीलशालिनी । द्वावपि जिनधर्मकुशलौ । दानशीलतपोभावनापूजाप्रभावनाऽमारिघोषणासप्तक्षेत्रीस्वधनवपनादि पुण्यं कुरुतः स्मः । यतः–" स्वल्पश्रीसंयुता येऽपि, दानं कुर्वन्त्यनेकधा । स्वशक्तिं प्रकटीकृत्य, ते धन्या दानिनां मताः ॥ १ ॥ रोगक्लेशमदोन्मादैः, सर्वदुःखपरीषहैः । स्वीकृतं ये न मुञ्चन्ति, व्रतं स्युस्ते बुधैः स्तुताः ॥ २ ॥" क्रमात्तयोर्धर्म्मं कुर्वाणयोः सुतोऽभूत । तस्य पुत्रस्य जन्मोत्सवं कृत्वा राजा अतिमुक्तक इति नाम ददौ । स च कुमारः षट् वार्षिको बालत्वे रममाणो गोचरचर्यामागतं श्रीगौतमस्वामिनं दृष्ट्वा हृष्टः सन् प्रणम्य प्राह–भगवन्नहं भवादृशो भविष्यामि । गौतमेनोक्तं त्वं बालोऽसि दीक्षा दुःकराऽस्ति अत्र दुःशक्यं चारित्रमिति । तथाहि–"तपःक्रियामनोगुप्ति–विनयादिसुकर्मभिः । चारित्रं दुष्करं पुंसां, जायते नात्र संशयः ॥ १ ॥" तेनोक्तं शिशुरप्यहं भवादृशो भविष्यामि । श्रीगौतमे विशुद्धान्नादि विहृत्य गते बालको मातापित्रोः पुरोऽभ्येत्यावग्–मम व्रतं ददतं । श्रीगौतमस्वामिसदृशो भविष्यामि । मातापितृभ्यां प्रोक्तं एवं कथमुच्यते, त्वमेवैकः पुत्र आवयोरसि । राज्यं कस्याधारे भविष्यति ? त्वम-

स्माकं वृद्धत्वे चाधारो भविष्यासि । दीक्षाग्रहणावसरोऽधुना आवयोर्विद्यते । पुत्रः प्राह—मातः किं ज्ञायते को वृद्धः को लघुरनित्यत्वात् ज्ञानाभावाच्च । कः कस्य पुत्रोऽस्ति । संसारे भ्रमतां जीवानां बहवः सम्बन्धा जाताः सन्ति । यतः "माया पियरो भाया, भज्जा पुत्ता य मित्तधणनिवहो । न य सरणं संसारे, जीवाणं मुत्तु जिणवयणं ॥ १ ॥
यः पिता स पुत्रः स्यात्, यः पुत्रः स पिता भवेत् । यः पुत्रः स भवेन्माता, या माता सा सुतो भवेत् ॥ २ ॥
एवं भवे भवेऽनेके, सम्बन्धाः कर्मयोगतः । जायन्ते देहिनां तेन, कः पुत्रः कः पितोच्यते ॥ ३ ॥" एवं मातापितरावनुज्ञाप्यातिमुक्तकः कुमारो महामहोत्सवपूर्वकं श्रीगौतमस्वामिहस्ते प्रव्रज्यां जग्राह । श्रीगौतमस्वाम्यादिष्टां क्रियां कुर्वन् हृष्टचित्तः शुद्धं संयममतिमुक्तकर्षिः प्रपालयन् एकदा क्षुधातुरः प्रत्यूषकाले एव कस्यापि श्रेष्ठिनो गृहे भिक्षार्थं गतो, धर्मलाभमतिमुक्तकः क्षुल्लको यावज्जगौ तावच्छ्रेष्ठिपुत्रवध्वा हसन्त्योक्तम् क्षुल्लकमुने ! किं सकाल एव उत्सूरः ? तस्या अपूर्ववाण्याऽतीव चमत्कृतः क्षुल्लकः प्राह—यज्जानामि तन्न जानामि । ततः तयोक्तं क्षुल्लक ! किमुक्तं भवता ? क्षुल्लको निजोक्तस्यार्थं जगौ—सकाले बालानां क उत्सूरः को व्रतहेतुः । यज्जानामि मरणं तत् क्वापि वयसि भविष्यतीति तन्न जानामि । उत्सूरः सकालस्तदा ज्ञायते । यदा ज्ञानं भवति तदत्र मे

नास्ति । इति साभिप्रायमुत्तरं ददौ मुनिः । ततस्तया चिन्तितं, अहो क्षुल्लकेन सत्यमुक्तम् । ततस्तया श्राविकया शुद्धधर्मं सम्यक्त्वमूलं द्वादशव्रतं गृहीतं । क्षुल्लकश्च शुद्धान्नपानं विहृत्य धर्मशालायां गतः । अथ क्षुल्लकः कदाचित् वर्षाकाले कल्पिततडागिकायां सवयोभिः शिशुभिः समं नौवत् निजजलपात्रं तारयन् श्रीगौतमस्वामिनं प्रेक्ष्य लज्जितः । ततः सापत्रपः क्षुल्लकः श्रीवीरसमवसरणे जगद्गुरोः पुरो वासनायाः प्रायश्चित्तरूपां ईर्यापथिकीं प्रतिक्रमन् ' दगमट्टी दगमट्टी ' इतिशब्दमुच्चरन् पृथ्वीकायकानप्कायकान् जीवान् क्षामयन् सर्वकर्मक्षयात् केवलज्ञानं प्राप । ततस्तत्राभ्येत्य देवाः केवलिमहोत्सवं चक्रुः । यतः " प्रणिहन्ति क्षणार्द्धेन, साम्यमालम्ब्य कर्म तत् । यन्न हन्यान्नरस्तीव्र-तपसा जन्मकोटिभिः ॥ १ ॥ मन एव मनुष्याणां, कारणं बन्धमोक्षयोः । बन्धाय विषयासङ्गि, मुक्त्यै निर्विषयं मनः ॥ २ ॥ " ततोऽतिमुक्तककेवली भव्यजीवान् प्रतिबोधयन् प्रतिदेशं प्रतिनगरं प्रतिग्रामं सूर्यपुरीबहिरुद्याने समवासार्षीत् । तत्र जितशत्रुनृपतिरनेकजनयुतो वन्दितुं ययौ । त्रिःप्रदक्षिणां दत्त्वा धर्मं श्रोतुमग्रत उपविष्टः । अतिमुक्तककेवली धर्मोपदेशनां ददाविति । तथाहि—आयुर्वायुचलं सुरेश्वरधनुर्लोलं बलं यौवनं, विद्युद्दण्डतुलं धनं गिरिनदीकल्लोलवच्चञ्चलम् । स्नेहं कुञ्जरकर्णतालचपलं देहं च रोगाकुलं, ज्ञात्वा भव्यजनाः सदा कुरुत भो धर्मं महानिश्चलम् ॥ १ ॥

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा, यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः । आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्, संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ २ ॥ जन्तूनामवनं जिनेशनमनं शक्त्यागमाकर्णनं, साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम् । मायाया हननं क्रुधश्चशमनं लोभद्रुमोन्मूलनं, चेतःशोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥ ३ ॥ ततस्तत्र भूपतिरनेकसुश्राद्धसंयुतः सम्यक्त्वमूलद्वादशव्रतयुतं धर्मं जग्राह । बहुदेशेषु भव्यजीवान् प्रतिबोध्यायुषः क्षयादतिमुक्तकः क्षुल्लको मुक्तिं जगाम ।

॥ इति अतिमुक्तककेवलिकथानकं समाप्तम् ॥ ६ ॥

अदत्तं यो न गृह्णाति, परस्य दुःखितोऽपि सन् । नागदत्त इवाप्नोति, स मुक्तिकमलां क्रमात् ॥ १ ॥

वाणारस्यां जितशत्रुनृपो राज्यं करोति स्म । तत्र यज्ञदत्तः श्रेष्ठी, तस्य प्रिया धनश्रीः । तयोर्जिनोक्तं धर्म्मं कुर्वाणयोः क्रमात् पुत्रोऽभूत् । जन्मोत्सवं कृत्वा तस्य सुनोर्नागदत्त इति नाम दत्तं मातापितृभ्याम् । लेखशालायां पाठशालायां च कर्मधर्मशास्त्रे पपाठ नागदत्तः । पितरि मृते द्रव्यार्थं कस्यचिद्यानमारुह्य लक्ष्मीकृते पर-

द्वीपे गतो नागदत्तः । ततो बहुधनमर्जयित्वा पश्चाद्यानारूढो महेभ्येन समं चचाल जलधिमार्गेण । अकस्माद्यानपात्रं नीचस्थानस्थितजले पतितं न निर्गच्छति । तदा सर्वेऽपि लोका व्याकुला बभूवुः । शान्तिकपौष्टिकानि कुर्वन्ति लोकाः । तदा नागदत्तोऽवग्-यानस्वामिनं प्रति आसन्नशैले भारण्डाः पक्षिणो बहव उपविष्टा दृश्यन्ते । यदि तत्र गत्वा कोऽपि साहसी पुमांस्तानुड्डापयति तदा तेषां पक्षेभ्यो बहुर्वायुरुत्पत्स्यते, तेन यानं निस्सरिष्यति । ततः प्रोक्तं यानस्वामिना कस्याप्यस्ति तत्र गन्तुं शक्तिः । कोऽपि नोत्सहते भयात् तदानीं यानेशेनोक्तं यो गच्छति तत्र तस्य दीनारशतं दास्यते । ततो नागदत्तस्तत्र गत्वा साहसी नमस्कारोच्चारपूर्वं यानपात्रकर्षणाय भारण्डानुड्डापयामास । तत्पक्षोत्पन्नवातेनाब्धिजलं मूर्च्छितम् । ततश्चोर्मिभिरुत्पाद्य यानं बहिः कर्षितम् । यानेशः स्वमन्दिरे गतः । नागदत्तः तत्र स्थितः क्षुधया पीडितो निर्गमनोपायं चिन्तयति । ततश्चिन्तितं क्षुधया पीडित आर्त्या यदि मरिष्यामि तदा दुर्गतिर्भविष्यति मे, ततोऽधुनैव जले पतित्वा मरिष्ये । एवं विचिन्त्य झम्पा दत्ता । पतितो नागदत्तो मत्स्यमुखे । मत्स्यो गच्छंस्तटं प्राप्तः । यावन्मत्स्येन मुखं विकासितं तावन्नागदत्तो बहिर्निस्ससार । कस्मिंश्चिज्जलाशये गत्वा जलं पीत्वा स्वस्थीभूय फलास्वादं चकार । नागदत्तो भ्रमंश्च क्रमात्

स्वपुरं प्राप। धनदत्तश्रेष्ठिपार्श्वे दीनारशतं याचतेस्म । ततो धनदत्तो नार्पयति लोभात् कथयति च। त्वं कः केन दृष्टः कूटं न जल्प्यते, नागदत्तोऽवग्—यदि मम दीनारशतं नार्पयिष्यसि तदा राजपार्श्वे त्वां दण्डयिष्यामि। धनदत्तोऽवग्—यदि तव शक्तिर्भवति तदा स्वचिन्तितं कुरु। नागदत्तः परधनपराङ्मुखो न कस्यापि पतितं धनं गृह्णाति। इतस्तत्र प्रियमित्रसार्थपतेः सुता नागवसुरभूत्। अत्यंतरूपवती वर्द्धमाना क्रमात् प्राप्तसर्वकलाकुशला नागदत्तं वरीतुकामाऽभूत्। इत आरक्षकवसुदेवेन याचिता नागवसुः। प्रियमित्रसार्थपतिस्तां तस्मै न ददौ। ततो नागदत्तेन नागवसुः परिणीता। ततो वसुदेवो जातमत्सरो नागदत्तमनर्थे पातयितुं छलं विलोकयामास। एकदा राजवाहनिकाया व्यावर्तमानस्य नृपतेरनाभोगात् कुंडलं भमण्डले पतितम्। ततस्तत्रागतो नागदत्तोऽदत्तपरिहारव्रती तं कुण्डलं वीक्ष्य मार्गान्तरेण गत्वाष्टमीदिने कार्योत्सर्गे वने स्थितः। तदा स तलारक्षस्तं कुण्डलं दृष्ट्वा गृहीत्वा प्रतिमास्थस्य नागदत्तस्य पार्श्वे वस्त्रेणाच्छाद्य मुमोच विघ्ने पातयितुं तम्। राजा तद्रत्नमयं कुण्डलं विलोकयति यावत्तावद्वसुदेवोऽभ्येत्य जगौ। स्वामिन् राजमार्गेऽहमुपविष्टोऽभूवं यदा तदा नागदत्तेन नीचैर्भूत्वा किं गृहीतं न ज्ञायते। ततो राज्ञ आदेशात् नागदत्तं विलोकयितुं सेवका गताः। अमन्तरस्ते प्रतिमास्थं नागदत्तं दृष्ट्वा तत्पार्श्वे गताः। वस्त्रेणाच्छादितं कुण्डलं

नागदत्तपार्श्वे दृष्ट्वा तैः राज्ञः कथितं नागदत्तस्वरूपम् । राजा जगौ । एवंविधो यो दंभं कुर्वन्नीदृशं कर्म करोति, तस्य शूलारोप एव क्रियते । ततोऽवनीपतेरादेशाद्विडम्बनाकृते खरारूढं विधाय नागदत्तं राजसेवकाः शूलारोपकृते वध्यभूमिं नीतवन्तः । तैः वध्यवादित्रेषु वाद्यमानेषु नागदत्तः शूलिकायां यावत् प्रक्षिप्तस्तावच्छूला सिंहासनमभूत् । प्रहारा आभरणानि । एवं द्वित्रिवारे कृते सति राजा तत्रागाद्यावत्तावच्छासनदेव्या तत्पुण्याकृष्टया तत्रागतया व्योमस्थितया प्रोक्तम्—भाग्यवान् विद्यते नागदत्त एष नरोत्तमः । यतोऽसौ परकीयं स्वं न लाति प्राणात्ययेऽपि । अस्य पुरा धनदत्तेन दीनारशतं रक्षितम् । अधुना तु वसुदेवेनेदं छलं कृतम् । असौ परद्रव्यपराङ्मुखो विद्यते । एवमुक्त्वा गतायां शासनदेव्यां, राजा तं सन्मान्य पट्टकुञ्जरारूढं कृत्वा महोत्सवपुरस्सरं स्वगृहे आनीय बहुद्रव्यदानेन सन्मानयामास । यतः—“धम्मो मंगलमूलं, ओसहमूलं च सव्वदुरकाणं । धम्मो बलं च विउलं, धम्मो ताणं च सरणं च ॥ १ ॥ धम्मो मंगलमुक्किट्ठं, अहिंसा संजमो तवो । देवावि तं नमंसंति, जस्स धम्मे सया मणो ॥ २ ॥” ततो राज्ञा धनदत्तपार्श्वाद्दीनारशतं दापितं तस्मै । वसुदेवो देशत्यागं कारितो दुर्जनत्वात् । यतः “अधर्माल्लभते जन्तु–र्दुःखरोगादिसन्ततिम् । अल्पायुस्त्वमसन्मानं, दौर्भाग्यं निःस्वतां पुनः ॥ १ ॥” ततश्चिरं

जैनधर्म्ममाराध्य प्रान्ते प्रव्रज्यां गृहीत्वा सर्वकर्म्मक्षयात् केवलज्ञानं नागदत्तः प्राप। ततो महीमण्डले भूरिभव्यजन-कुमुदवनं वचनगोभिः प्रबोध्य नागदत्तकेवलिचन्द्रमा मुक्तिं जगाम।

इति अदत्ताग्रहणे नागदत्तकथा समाप्ता ॥ ७ ॥

क्रोधमानादिदर्प्पाणां, यो न याति वशं मनाग्। स एव लभते मुक्तिं, नागदत्तकुमारवत् ॥ १ ॥

तथाहि—पूर्वं द्वौ कुमारौ साधू भूत्वा तपः कुर्वाणौ स्वर्गं गतौ। तत्रस्थाभ्यां ताभ्यां मिथः एवं प्रोक्तम्—यः प्रथमं देवलोकान्मर्त्यलोकं प्राप्नोति स देवेन स्वर्गादागत्य प्रतिबोध्यः। लक्ष्मीपुरे पुरे धनदत्तः श्रेष्ठी वसतिस्म। देवदत्ता पत्नी। अन्येद्युः पुत्रार्थं नागदेवतामारराध श्रेष्ठी। प्रसन्नीभूय देवोऽवग्--तव पुत्रो भविष्यति। इतः क्रमात् स्वर्गादेकः साधुजीवदेवो दत्तपुत्रोऽभूत्। जन्मोत्सवं कृत्वा पिता नागदत्तेति नामादात्सूनोः। क्रमाद्द्वासप्ततिकलाकुशलोऽजनि। गन्धर्वनागदत्तोऽसौ ख्यातो गन्धर्वकौशलात्। भुजङ्गमकेलिव्यसनी जातः। इतोऽवधिज्ञानेन स्वमित्रं नागदत्तं व्यसनिनं मत्वा देवः प्रबोधयति। नागदत्तो मनागपि व्यसनं न मुञ्चति। सर्प्पान् खेलयति। अन्येद्युः सर्प्पैः करंडकं भृत्वा मित्रैः

सहोद्याने गन्धर्वनागदत्तः क्रीडां कर्तुं ययौ । तत्र यावत् सर्प्पान् खेलयति तावद्देवस्तं तत्र ज्ञात्वा गारुडिकरूपधरः सर्प्पभृतकरण्डकं गृहीत्वा तत्रागात् । ततो मित्रैरुक्तं देवायं सर्प्पखेलको नरो विद्यते । ततस्तं गन्धर्वनागदत्तो जगौ—किमत्र करण्डकेऽस्ति ? स सुरो गारुडिकवेषभृत् प्राह—सर्प्पाः सन्त्यत्र । ततो नागदत्तो जगौ—रमस्व मम सर्पैस्त्वं, तव सर्पैरहमपि रेमे । ततो गारुडिकदेवो नागदत्तसर्प्पैः चिक्रीड । तदा तैः सर्प्पैर्दष्टोऽपि गारुडिको न म्रियतेस्म । गन्धर्वनागदत्तस्तदाऽऽमर्षाज्जगौ—अहं तव सर्पै रेमे । देवोऽवग्—भो महानुभाग ! मम सर्पैर्दष्टस्त्वं मरिष्यसि । नागदत्तो जगौ—मुञ्च त्वं स्वसर्प्पान् । ततस्तत्र मण्डलमालिख्य सर्प्पकरण्डकान् मुक्त्वा चतुर्दिशं गारुडिकः सुर आकार्य लोकान् जगौ गंधव्वनागदत्तो—इच्छइ सप्पेहि खिल्लियं इहयं । सो जइ कहंवि खज्जइ, ममावि दोसो न दायव्वो ॥ १ ॥ ममायमहिरीदृशोऽस्ति । तरुणदिवायरनयणो, विज्जुलयाचंचलग्गजीहालो । घोरमहाविसदाढो, उक्का इव पज्जलियरोसो ॥ २ ॥ एवंविधोऽहिर्विद्यते क्रूरः । डक्को जेण मणुस्सो, कयमकयं वा न याणइ बहुंपि । अदिस्समाणमच्चू, कहमिच्छसि तं महानागं ॥ ३ ॥ मेरुगिरितुंगसिहरो, अट्ठफणो जमलजुअलजीहालो । दाहिणपासंमि ठिओ, माणेण वियट्टई नागो ॥ ४ ॥ डक्को जेण मणूसो, थद्धो न गणेइ देवरायमवि । तं मेरुपव्वयनिहं, कहमिच्छसि तं महानागं

॥ ५ ॥ अस्मिन् करण्डके मायानागी समस्ति सा कीदृशी । सललियविल्लहलगई, सत्थियलंछणंकियपडागा । माया-
मई या नागी, नियडिकवडवंचणाकुसला ॥ ६ ॥ तं च सि वालग्गाही, अणोसहिबलो अ अपडिहत्थो अ । सा य
चिर संचियविसा, गहणंमि वणे वसइ नागी ॥७॥ हुज्ज हु ते विणु वाऊ, तीसे दाढंतरं उवगयस्स । अप्पोसहिमंत-
बलो, नहु अप्पाणं विगिच्छिहिसि ॥ ८ ॥ इत उत्तरस्यामीदृग् नागोऽस्ति । उत्तरमाणो सव्वं, महालओ पुन्नमेह-
निग्घोसो । उत्तरभागंमि ठिओ, लोहेण वियट्टई नागो ॥ ९ ॥ डक्को जेण मणूसो, होइ महासागरव्व दुप्पूरो । तं
सव्वविससमुदयं, कहमिच्छसि तं महानागं ॥ १० ॥ ए एते पावाही, चत्तारिवि कोहमाणमायलोहा । जेहिं मया संततं,
जरियमिव जगं कलकलइ ॥ ११ ॥ एएहि जो अ खज्जइ, चउहिवि आसीविसेहि पावेहिं । अवसस्स नरयपडणं, नत्थि
सिआलंबणं किंचि ॥१२॥ एवं प्रोच्य तेन सुरेण गारुडिकेन ते सर्पा मुक्ताः । स गन्धर्वनागदत्तस्तैः सर्पैर्दष्टो मृतस्तदा-
नीम् । गन्धर्वनागदत्तसेवका जगुरहो किं कृतं भवद्भिः सुरो जगौ मयाऽसौ वारितोऽपि न तिष्ठति तदा किं क्रियते । तस्य
सुहृद्भिर्भेषजादि कृतं बहु परं गुणो नाभूत् तस्य । ततस्तद्भृत्याः पादयोः पतित्वा जगुरमुं जीवय प्रसद्य । देवोऽवोचत् दष्टोऽ-
हमभूवं पुरा पुनः ईदृक्षया क्रियया जीवितः । मदुक्तां क्रियां करोत्येष यदि तदासौ जीवति । यदि तां क्रियामङ्गीकृत्य

अग्रतोऽसौ न पालयिष्यति तदा पुनर्मृत एव । एतच्चरित्रं शास्त्रकृद् गाथाभिराह—" एऐहि अहं खइओ, चउहि वि आसीविसेहि पावेहिं । विसानिग्घायणहेतुं, चरामि विविहं तवो कम्मं ॥१॥ सेवामि सेलकाणण-सुसाणसुन्नघररुक्खमूलाइं । पावाहीणं तेसिं, खणमवि न उवेमि विसंभं ॥ २ ॥ अच्चाहारो न सहइ, अइनिद्धेणवि सया उइज्जंति । जायामायाहारो, तं पि य गामं न भुंजामि ॥ ३ ॥ ओसन्नकयाहारो, अहवा विगइविवज्जिआहारो । जं किंचि कयाहारो, अवउज्झिय थोवआहारो ॥ ४ ॥ अह जो थोवाहारो, थोवयभणिओ अ थोवनिद्दो अ । थोवोवहिउवगरणो, तस्स हु देवा वि पणमंति ॥ ५ ॥ सिद्धे नमंसिऊणं, संसारत्था य जे महाविज्जा । वुच्छामि दंडकिरियं, सव्वविसनिवारणं विज्जं ॥ ६ ॥ सा चेयं विद्या । सव्वं पाणाइवायं, पच्चक्खाइत्ति अलियवयणं वा सव्वं अदत्तदाणं, अबंभं च परिग्गहं स्वाहा ॥७॥ एतच्छ्रुत्वोत्तस्थौ स मातापितृभिरुक्तं । अयमस्मत्पुत्रः स्वयमुत्थितः । ततस्तथैव पतितः । मातापितृभिरुक्तम् अमुं—जीवय यत्करोतु तत्करोतु । ततः पुनरपि उत्थापितः । ततो देवः प्राग्भवं तस्याचख्यौ । ततो जातिस्मृतिं प्राप्य दीक्षां ललौ । जगौ लोकाग्रे—चतुःसर्पतुल्याः क्रोधमानमायालोभाः, एतैः क्रोधाद्यहिभिर्यो न दष्टः स परमं पदं याति । अहं तु पूर्वमेतैः क्रोधाद्यहिभिर्ग्रस्तोऽभूवम् । अधुना त्वनेन देवेन प्राग्भवमित्रेणैतेभ्यः क्रोधाद्यहिभ्यो मोचितोऽहम् ।

तत एतेषां क्रोधाद्यहीनां वशो न गन्तव्यम् । ततो देवः स्वस्थाने गतः । मातापितरावपि स्वस्थाने गतौ । नागदत्तश्च क्रोधाद्यहीन् चतुरो निर्जित्य सर्वकर्मक्षयान्मुक्तिं ययौ ॥ इति नागदत्तकथा समाप्ता ॥ ८ ॥

मेअज्ज थूलिभद्दो, वयररिसी नंदिसेण सीहगिरी ।
कयवन्नो अ सुकोसल, पुंडरिओ केसि करकंडू ॥ २ ॥

वाग्मी स्वाङ्गैः समं प्राणि-रक्षां कुर्वन् भवेत् भुवि । मेतार्यर्षिरिवाप्नोति, कल्याणकमलां द्रुतम् ॥ १ ॥

तथाहि । निजर्द्धिपराभूतपुरुहूतपुरे साकेतपत्तने चन्द्रावतंसभूपो न्यायेन राज्यं करोतिस्म । तस्य प्रिया सुदर्शना । सागरचन्द्रमुनिचन्द्रौ सुतौ । सागरचन्द्रस्य युवराजपदवी राज्ञा दत्ता । मुनिचन्द्रायोज्जयिनीराज्यं दत्तम् । क्रमात् तस्य चंन्द्रावतंसस्य प्रियदर्शना पत्न्यभूत् । सा गुणचन्द्रबालचन्द्रौ सुतौ सूतेस्म । चन्द्रावतंस इह लोके परत्र हितं धर्मं करोति । अन्येद्यू राज्यकार्यं सर्वं समाप्य सन्ध्यायां प्रतिक्रमणादि कार्यं कृत्वा कायोत्सर्गं ललौ राजा । यावदयं दीपको ज्वलिष्यति तावन्मया कायोत्सर्गः कर्तव्यः इति । तदा दास्या ध्यातमयं दीपो यदि विधास्यति तदा राज्ञो दुःशकः कायोत्सर्गो भविष्यति । ततस्तदा तया तैलं पुनः पुनस्तावत् प्रक्षिप्तं यावत् प्रातरभूत् । प्रातर्दीपे क्षयं गते

राज्ञा कायोत्सर्गः पारितः । ततोऽकस्मादायुषः क्षये राजा स्वर्गं गतः । तत्पट्टे सागरचन्द्रो राजा न्यायात् राज्यं चकार । स राजाऽन्यदा मातुः सपत्नीं प्रियदर्शनां प्रति प्राह–राज्यश्रीरियं लोकोऽपि तातं विना मां प्रीणाति नो तेन गुणचन्द्रायानुजन्मने राज्यश्रियं वितीर्याहं दीक्षां जिघृक्षामि यदि तवानुमतिर्भवेत् । तयोचे–वत्स धन्यस्त्वं यस्यासारे संसारे मनो न रज्यते । राज्यभारो महान् अस्य त्वदनुजस्य लघोर्दुःशकः तेनाधुना त्वया राज्यत्यजने न वक्तव्यम् । तया प्रियदर्शनया प्रबोधितो निर्विकल्पमना राजा प्रजाः पालयामास । क्रमात् प्रवर्द्धमानमहर्द्धिराजानमवलोक्य स्वीयस्वभावसुलभामीर्ष्यामुदवहत् प्रियदर्शना । यतः "अन्यस्यापि कलेर्मूलान्, पोपिका एव योषितः । सापत्नकस्य किं वाच्यं, यस्य ता जन्मभूमयः ॥ १ ॥ यो ब्रह्मा विष्टपस्यास्य, स्रष्टेति श्रूयते जनैः । सोऽपि जानाति न स्त्रीणां, चित्तानि चरितानि च ॥ २ ॥" तस्मिन् निर्दोषेऽपि भूपतौ सा द्वेषं दधाति । बाह्यालीलीलयाऽन्येद्युर्वने राजा गतः । तत्रस्थस्य राज्ञो मोदकान् दास्या हस्तेन प्रातराशार्थं सुदर्शना प्रैषीत् । वर्त्मनि प्रियदर्शना सपत्नीजातत्वात् भूपं हन्तुकामा तान् मोदकान् हस्ते गृहीत्वा विषमिश्रितान् कृत्वा प्रीतिपुरस्सरं दास्यै ददौ । वने क्रीडां कृत्वा राजा यावद् बन्धुद्वययुक्तः सिंहासनेऽस्थात् तावद्दासी मोदकानानीय ददौ । राजा तु

करुणापरत्वात् क्षुधार्तयोर्बान्धवयोर्द्विधा कृत्वा ददौ । एतौ बान्धवौ लघू अहं तु वृद्धः । वृद्धस्य यथातथा खादनं न वरम् । ततो यावत्तौ मोदकं खादतः स्म तावदचेतनीभूतौ तौ बान्धवौ दृष्ट्वा दध्यौ राजा । न माता तु विषं ददाति पुत्राय तेनात्र केन कारणेन भाव्यं । ततस्तत्क्षणात् कुमारौ स्वर्णमानीय तत्पानीयं पायितौ राज्ञा । ततस्तौ प्रगुणौ कृतौ । दासीं पृष्ट्वा विषप्रक्षेपस्वरूपं ज्ञात्वा राजांतःपुरमध्येऽभ्येत्य विमातरं प्रति जगौ--धिग् त्वां या त्वमेवंविधं कूटं मम मृत्यवेऽकार्षीः । मयि कूटं रचितं त्वया तत् तव पुत्रयोरुपरि पतितमभूत् । मया तु प्रगुणीकृतौ । मम तु पुराऽपि राज्येच्छा नास्ति । त्वदुपरोधात् राज्यं कृतं—राज्येन किं क्रियते । येनात्रैवंविधा पापनिबन्धिनी श्वभ्रदायिनी बुद्धिर्जायते । ततो वात्सल्यात् प्रियदर्शनापुत्राय गुणचन्द्राय वृद्धायावनीराज्यं दत्त्वा स्वयं संयमं सागरचन्द्रो जग्राह । क्रमादेकादशाङ्गपारीणः सागरचन्द्रर्षिरभूत् । अन्येद्युः साधुसंघाटकोऽवंतीतः समागतः सागरचन्द्रर्षिणाऽवंतीस्वरूपं पृष्टो जगौ—तत्र मुनिचन्द्रराजपुत्रः सौवस्तिकनामपुरोहितपुत्रयुक्तः पाखण्डिनः साधूंश्च बाधते । तन्निशम्य गुरुमापृच्छ्य सागरचन्द्रर्षिः स्वयमवन्त्यामगात् । साधूनामुपाश्रये विश्रान्तो मुनिः । प्रातः स्वागमनस्वरूपं भ्रातृसुतप्रबोधनादियुतं प्रकाश्य मध्यान्हे निर्ययौ मुनिः । सागरचन्द्रराजर्षिं राजगृहमध्ये गच्छन्तं दृष्ट्वा

लोका जगुः । महानुभाग ! माऽत्रराजगृहे गच्छ राजपुत्रो दुष्टोऽस्ति । पुरोहितपुत्रश्च मुनीनुपद्रवति तेनान्यगृहे गच्छ । मुनिं राजभुवने प्रविशन्तं दृष्ट्वा तावागत्य जल्पतःस्म । भो मुने आवाभ्यां समं त्वया रम्यते? मुनिर्जगौ रम्यते मया । ततो रहसि गत्वा चतुःशालायां कुमारौ मुनिना समं क्रीडां कर्तुं प्रवृत्तौ । यथातथा जल्पन्तौ धर्मावहीलनं कुर्वाणौ युद्धप्रपञ्चेन मर्माभिघातेन मुखोद्वान्तफेनौ कृत्वा तद्देहात् सन्धीरुत्तार्य ततो निःसृत्य शनैर्बहिरुद्याने प्रतिमया तस्थौ मुनिः । इतो राजा तौ तथा क्रन्दन्तौ ज्ञात्वा मुनिकृतं पराभवं च रुष्टो जगौ—भो भटा येन मुनिना एतौ कुमारावीदृशीं दशां प्रापितौ तं विलोकयत । ततो राजपुरुषैर्मुनिं प्रतिमास्थं वीक्ष्य राजाग्रे निवेदितम् । आगत्य वने राजा महामुनिं वीक्ष्य प्राह भो यते ! किमीदृक् पापं कृतम्? यतिराह—राजन् महाकुले जातावावां किं यतीनां मारणाद्यन्यायः क्रियते । इति श्रुत्वा राजा लज्जया नत्वाऽधोमुखोऽभवत् ! धर्मलाभाशिषं दत्त्वा राजर्षिराचष्ट । भो चन्द्रावतंसपुत्र ! तव यत्यवगणनावहीलनादि न युज्यते ॥ यतः—"हीलिताः साधवोऽत्यन्तं, ददते नरके गतिम् । आराधिताः शिवं पुंसां, विश्राणयन्ति सन्ततम् ॥ १ ॥" तव पुत्रो वाचंयमादीनामवहीलनां करोति । त्वं तु सहसे स्वं भ्रातरं यतिं ज्ञात्वा राजा जगौ—एतौ कुमारौ मुग्धौ । अतः परं केषाञ्चित् साधूनामवहीलनां

न करिष्यतः। मुनिर्जगौ यद्येतौ संयममङ्गीकुरुतः तदाऽहं मुञ्चामि नो चेत् स्वकृतपापफलमनुभवताम्। ततो राजा तं भ्रातरं भक्त्या प्रणम्य स्वपुत्रपार्श्वे आनिनाय। राज्ञोक्तं भो पुत्र! अयं यतिस्तव पितृव्यः त्वं तु यतीनामपराधं कुरुषे। यदि युवां दीक्षां गृहीष्यथः, तदाऽसौ युवयोः शरीरं स्वस्थं करोति नो चेदनया पीडया स्वयमेव मरिष्यथः। ततोऽतीव जातवेदनौ तौ जगदतुः—ऋषिप्रोक्तमावां करिष्यावः। ततो मुनिना बन्धनात् मुक्तौ दीक्षां ललतुः। राजाऽपि सागरचन्द्रर्षिमुखात् धर्मं श्रुत्वा सविशेषं पुण्यं कुर्वन् सप्तक्षेत्र्यां स्वां श्रियं व्ययति। द्वावपि राजपुरोहितपुत्रौ शुद्धं चारित्रं पालयतःस्म। द्विजजातित्वात् पुरोहितपुत्रोऽथ किमपि मलादि वीक्ष्यावग्—साधुधर्मे न शुद्धतेति जुगुप्सां करोति। द्वावपि पालितसंयमौ क्रमान्मृत्वा सुरावभताम्। स्वर्गसुखमनुभवन्तौ द्वावपि पूर्वभवस्नेहान्मिथः प्रोचतुः यः पूर्वं स्वर्गाच्च्युत्वा नरो भवेत् स नरः स्वर्गस्थेन देवेन समेत्य धर्मे बोधनीयः। पूर्वं विप्रजीवः स्वर्गाच्च्युतो राजगृहे पुरे चाण्डालकस्य कुटुम्बिन्याः कुक्षाववततार। सा चाण्डालप्रिया कस्यापि श्रेष्ठिनो गृहे कर्म कुर्वती श्रेष्ठिपत्न्या मांसभक्षणदोहदपूरणार्थं मांसादि ददाना श्रेष्ठिप्रियायाः प्रीतिभाजनं जाता। अन्यदा कृष्णास्या श्रेष्ठिपत्नी चाण्डालप्रियया जल्पितेति। सखि स्वामिनि किं तव मनो दूयते किं

तत्र भर्त्राऽपराधश्चक्रे अथवाऽन्येन केनचित्?। श्रेष्ठिपत्नी जगौ–किं कस्याग्रे मनोदुःखं कथ्यते। यदपत्यं मम भवति तन्न जीवति कर्मवशात् किं करोमि। चाण्डालिकाऽवग्–मम तव च गर्भोऽधुना समस्ति। मम पुत्रा एव जायन्ते। ततः प्रच्छन्नवृत्त्या आत्मनोर्गर्भयोर्व्यत्ययः क्रियते। ततस्ताभ्यां स्त्रीभ्यामपत्ययोर्जातयोर्व्यत्ययः कृतः। यदा मेतपत्नी श्रेष्ठिन्याः पार्श्वे समेति तदा श्रेष्ठिन्या प्रोच्यते–त्वदीयोऽयं पुत्रो वर्धते। ततो मेतार्य इति नाम पुत्रस्य जन्ममहपूर्वं श्रेष्ठिना दत्तम्। श्रेष्ठिन्या लाल्यमानः क्रमान्मेतार्यो नन्दनः पाठ्यमानः शास्त्राणि षोडशाब्दोऽभूत्। इतः स्वर्गस्थेन पूर्वभवमित्रेण सुरेणाभ्येत्य मेतार्याग्रे प्रोक्तं स्वं स्वरूपम्। आवाभ्यां स्वर्गस्थाभ्यां या प्रतिज्ञा कृताऽभूत् सा स्मरति न वा। संसारोऽयमसारो विद्यते दीक्षां गृहाण। अत्रोपदेशः–"पुरन्दरसहस्राणि, चक्रवर्तिशतान्यपि। कवलीकृतानि कालेन, प्रदीपा इव वायुना॥ १॥ कायः संनिहितापायः, सम्पदः पदमापदाम्। समागमाः स्वप्नसमाः, सर्वमुत्पादितं चलम् ॥२॥" तेन देवेन सदा मेतार्यो बोध्यमानोऽपि वैराग्यं न गतः। इतो महेभ्यानामष्टभिः पुत्रीभिः समं मेतार्यस्य पित्रा विवाहो मेलितः। ततः शुभेऽहनि पिता महेभ्यानामष्टौ पुत्रिका मेतार्यं पर्यणाययत्। ततः स्वगेहं प्रति शिबिकारूढो नवोढप्रियासहितो मेतार्यः सदुत्सवपुरस्सरं राजमार्गे चचाल। इतः स मेतो मेतार्यप्राग्भवमित्रसुराधिष्ठितदेहो मेतां

प्रियां प्रति जगौ। यद्यात्मनः सा पुत्री मृता नाभविष्यत् तदा तस्या अधुना विवाहमहोत्सवमीदृशमहमपि व्यधास्यम्। तस्याः पुत्र्या विवाहेन मनोरथं सफलमकरिष्ये। मेता स्वपुत्रस्वरूपं जगौ–ततः स मेतो रुष्टः सन् राजमार्गे रामेत्य तं मेतार्यं शिबिकाया उत्तार्य लोकसाक्षिकं जगौ–रे पुत्र त्वं कथमसदृशकुलोत्पन्नाः कन्या एताः पर्यणैषीः। आत्मनः कुलस्य सदृशा एव कन्या परिणीयते। ततः एताः कन्या विहायात्मनो गृहमलङ्कुरु। आत्मनः कुलस्य सदृशां कन्यामङ्गीकुरु। पश्यतां सर्वलोकानां स मेतः तं मेतार्यं स्वगृहं नीतवान्। ताः सर्वाः कन्या मातापितृभिः स्वस्वगृहे नीताः। ततः प्रत्यक्षीभूय देवो रहसि जगौ। त्वया पूर्वं स्वर्गे मया सहोक्तमभूत्। यः पूर्वं स्वर्गाच्च्युत्वा नरो भवेत् स सुरेण प्रतिबोध्यः। त्वं तु प्रथमं च्युतः स्वर्गात्। मनुष्यत्वं च प्राप्तं त्वया। मया प्रतिबोधितोऽपि न प्रबुद्धः तेनेदं कृतम्। मनुष्यजन्म दीक्षाग्रहणेन सफलीकुरु। सोऽपि मेतार्यः प्राह। त्वयाऽहं विषयासक्तो यः प्रतिबोधितस्तद्वरं कृतम्। यत्तु लोकमध्येऽहं विगोपितस्तन्मेऽतीव दुनोति। देवोऽवग्–संसारस्तु विरसोऽस्ति। यतः–

"प्राणेभ्योऽपीह येऽभीष्टा, यैर्विना न क्षणं रतिः। वियोगः सह्यते तेषा–महो कष्टा भवस्थितिः॥१॥नान्तकस्य प्रियः कश्चि-न्न लक्ष्म्याः कोऽपि वल्लभः। नासौ जरायाः कोऽप्यस्ति, यूयं तदपि सुस्थिताः॥२॥" मेतार्यः प्राह–त्वत्कथितं करिष्ये। यदि

स गलङ्क उत्तरति मम । तदा द्वादशाब्दीं भोगान् भुक्त्वा त्वदुक्तं निश्चयात् करिष्ये । त्वं तु कृपापरोऽसि। ततः प्राग्भवदेवः प्रीतः सन् रत्नौघोत्सर्गिणं छागं दत्त्वा कांचिद्विद्यां प्रोक्त्वा स स्वर्गेऽगमत् । ततो यानि रत्नानि स छाग उत्ससर्ज । ते रत्नैः स्थालं भृत्वा मेतः पुत्रवचसा भूपपार्श्वे तं प्राभृतीकृत्य स्वसुतार्थं कन्यां याचते । ततो मन्त्रिभिर्हक्कितो मेतः प्रतिदिनं तथा करोति । तानि रत्नानि सर्वदिक्प्रसरतेजांसि वीक्ष्य राजा हृष्टोऽपि निजाङ्गजां न दत्ते । अन्यदाऽभयेनाभयं दत्त्वा रत्नप्राप्तिवृत्तान्तं पृष्टो मेतस्तं च्छागस्वरूपं प्राह । ततोऽभयेन तं छागं रत्नौघोत्सर्गिणं दृष्ट्वा राज्ञोऽग्रे प्रोक्तम् । ततः स्वगृहे आनीतोऽभयेन छागो दुर्गन्धोत्सर्गी (जातः)। पश्चान्मेतायार्पितः । उचे चाभयः स्वामिन् मेतस्य गृहे छागो रत्नौघं देदीप्यमानं यद् व्युत्सृजति । तत्कस्यापि देवस्य चेष्टितं तेनायं न मेतश्चाण्डालः किन्तु कोऽपि सत्तमः पुमान् । तेन परीक्षा क्रियते । ततोऽभयकुमारस्तं मेतमाकार्य तातवचोद्वारेण प्राह—श्रीमहावीरो वैभारगिरौ समायातोऽस्ति । तत्रान्तरा यो विषमो मार्गोऽस्ति । स च त्वया विशिष्टपद्यानिष्पादनात् सुगमः कर्तव्यः । ततस्तेन मेतेन देवतासानिध्यतः क्षणादभयोक्तं कृतम् । तथाऽद्यापि राजगृहे दृश्यते । भूपतिनिर्देशात् प्राकारो हिरण्यमय उत्तुङ्गशृङ्गशृङ्गारोऽभयकुमारेण मेतपार्श्वात् कारितः । अभयोऽवग् भो मेत यदि ते सुतं समुद्र-

प्रवाहे स्नपयासि तदाऽहं तव पुत्राय भूपसुतां दास्यामि । ततो मेतेन देवपार्श्वात् समुद्रप्रवाहमानीय सर्वलोकसाक्षिकं मेतार्यः स्नापितः । तथाऽपि राजा न दित्सति तदाभयोऽवग् पूर्वं किमुत्तममध्यमविवाहो नाभूत् । यतः—"एकवर्णमिदं सर्वं पूर्वं० आसीत् ॥१॥" इति अभयोक्तं श्रुत्वा श्रेणिकः पुत्रीं ददौ । अन्या अपि अष्टौ पूर्वं वरिताः कन्या मेतार्यमङ्गीचक्रुः । राज्ञा धवलगृहमर्पितम् । नवभिः प्रियाभिः सुखमनुभवन् मेतार्यो द्वादशाब्दीमतिचक्राम । ततः पुनरपि देवेन बोधितः । ततः प्राप्तवैराग्यो मेतार्यः स्वपुत्रेभ्यः स्वां श्रियं वितीर्य सदारो गुरुपार्श्वे व्रतं जग्राह । क्रमेण मेतार्यो जिनकल्पविहारं प्रपेदे । अन्यदा पुरमध्ये गोचर्यायां भ्रमन् मेतार्यः स्वर्णकारगृहे जगाम । तदा श्रेणिको जिनपूजां कुर्वन् त्रिसन्ध्यं अष्टोत्तरशतेन स्वर्णमययवसमूहेन स्वस्तिकं करोति देवाग्रे नित्यम् । तदानीं स्वर्णकारस्तान् यवांस्तत्र हट्टे मुक्त्वा कार्यार्थं गृहमध्ये गतः ततोऽकस्मात्तत्रागतः क्रौञ्चो यवभ्रान्त्या तान् स्वर्णयवान् मुनेः पश्यतो जगाल । ततो बहिरागतो हेमकारो यवानपश्यन् मुनिं पृष्टवान् । क्व गता मे यवाः ? । त्वया गृहीता अथवा अन्येन केनचिद्गृहीताः । स मेतार्यः पापभीरुर्दध्यौ । यदि यवगमनस्वरूपं कथ्यते तदाऽसौ क्रौञ्चं हन्ति । ततो मौनमाश्रितो मुनिः । कृतमौनं मुनिं चोरस्त्वमिति जल्पन् स्वर्णकृदार्द्रवध्रेण तस्य मस्तकं वेष्टयामास दृढम् । ततस्तस्य जीवदयां

ध्यायतो निर्गतचक्षुषस्तदोत्पन्नकेवलज्ञानस्य मुनेरायुषः समाप्ते तत्क्षणमेव मुक्तिगमनमभूत् । स क्रौञ्चः कुञ्चितग्रीवो विचिन्वन्नङ्गणे गतो दास्या भापितोऽकस्माद्यवांच्छकृद्द्वारेण मुमोच । ततस्तं यतिं मृतं यवान् क्रौञ्चगलितमुक्तान् वीक्ष्य लोकाः प्रोचुः । अयं यतिर्भूपतिजामाताऽनेन स्वर्णकारेण मुधा हतः । तेन राजा एनं सकुटुम्बं हनिष्यति शूलाप्रक्षेपादिना । ततो राजा हतं यतिं ज्ञात्वा तं सकुटुम्बं हन्तुं स्वसेवकान् प्रेषयामास । यावत्ते राजप्रेषितास्तत्र सौवर्णिकगृहे समायातास्तावत् स्वर्णकृत् समुत्पन्नौत्पातिकबुद्धिर्भीतश्च यतिवेषं गृहीत्वाऽस्थात् । यतः—" लज्जातो भयतो वितर्कविधितो मात्सर्यतः स्नेहतो, लोभादेव हठाभिमानविनयशृङ्गारकीर्त्यादितः । दुःखात् कौतुकविस्मय-व्यवहृतेर्भावात् कुलाचारतो, वैराग्याच्च भजन्ति धर्ममलं तेषाममेयं फलम् ॥ १ ॥ " ततस्तैः सुभटै राज्ञः पार्श्वे गत्वोक्तम् । स्वामिन् स्वर्णकृत् सकुटुम्बो व्रतं गृहीत्वा भीतोऽस्थात् । ततो राजा तत्रैत्यावग्—भो स्वर्णकृत् त्वया यतिर्हतो महत्पापं लग्नं चारित्रग्रहणात् मया मुक्तोऽसि । सांप्रतं यदि त्वयाऽन्येन केनचित् कुटुम्बमध्येन संयमो मोक्ष्यते तदा सकुटुम्बं त्वां हनिष्यामि । ततः स सौवर्णिकः श्रीवीरपादान्ते गत्वा दीक्षां लात्वा क्रमात् स्वर्गसौख्यमागमूत् ।

॥ इति श्रीमेतार्यवाचंयमकथानकं समाप्तम् ॥ ९ ॥

सन्तोषैश्वर्यलिप्सूनां, न राज्ये रमते मतिः । त्यक्त्वा मन्त्रिपदं स्थूल–भद्रो भेजे यथा व्रतम् ॥ १ ॥

तत्कथाचेयं । पाटलीपुरे नवमनन्दराज्ञः कल्पवंशावतंसः शकडालमन्त्री बभूव । तस्य लक्ष्मीवती पत्नी । तयोः पुत्रौ स्थूलभद्रश्रीयकाभिधौ जातौ । सप्त पुत्र्यश्च ता इमाः इत्यादिसम्बन्धः श्रीयककथाया ज्ञातव्यः । शकडालाभिधे मन्त्रि–नायके त्रिदिवं गते । नन्दभूपो जगादेति, श्रीयकं तत्सुतं प्रति ॥ १ ॥ मन्त्रिपदं क्रमागतं त्वं गृहाण । श्रीयको जगौ–मम भ्राता वृद्धः स्थूलभद्रः कोशावेश्यागृहे समस्ति । तस्य तत्र तिष्ठतो द्वादशाब्दी जाता । ततो राज्ञा स्थूलभद्रो वेश्यागृहादाकारितः क्षितिपसमीपे गतः । राजानं नत्वा यावत्स्थूलभद्रोऽग्रे ऊर्ध्वे स्थितः तावद्राज्ञा सबहुमानं प्रोक्तम्–तव पिता दिवं गतः तेन क्रमादागतमपि पदं त्वं गृहाण । स्थूलभद्रोऽवक्–स्वामिन्नादेशः प्रमाणं परं विमृश्यैव गृह्यते मन्त्रिपदं मया । राज्ञोक्तं विचारय, ततोऽशोकवनमध्ये गत्वा स्थूलभद्रो विमृशति । हस्ते व्यापारे गृहीते पारवश्यं भवति । यदि राज्ञश्चित्तानुवर्तने न चल्यते । तदा क्षणमध्ये राजा रुष्टः प्राणान्नयति । यतः "जीवन्तोऽपि मृताः पञ्च, श्रूयन्ते किल भारते । दरिद्रो व्याधितो मूर्खः, प्रवासी नित्यसेवकः ॥ १ ॥ ते धन्याः सुधियस्ते च, ये तद्भोगसुखं तदा । विमुच्य संयमं मुक्ति–सुखदं लान्ति हेलया ॥ २ ॥" एवं विमृश्य लोचं

कृत्वा रजोहरणमुखवस्त्रिके गृहीत्वा राजपार्श्वे गत्वा धर्म्मलाभं ददौ । राज्ञोक्तं किमालोचितं स्थूलभद्रोऽवग्—आसमन्तात्लोचितं लोचकृतो मया व्यापारेण सृतं ममेत्युक्त्वाऽवग् —"हस्ते मुद्रा मुखे मुद्रा, मुद्रा स्यात् पादयोर्द्वयोः । ततः पश्चाद्गृहे मुद्रा, व्यापारः पञ्चमौद्रिकः ॥ १ ॥" इत्युक्त्वा श्रीधर्मलाभाशिषं दत्त्वा श्रीसम्भूतिविजयाचार्यपार्श्वे गत्वा सर्वसामायिकोच्चारपूर्वकं व्रतमादित श्रीस्थूलभद्रः । इतो राज्ञा नन्देन श्रीयकस्य मन्त्रिपदं दत्तम् । स्थूलभद्रवियोगार्तां वेश्यां श्रीयकः प्रबोधयामास शोकमुत्तारयामास तस्याः । स्थूलभद्रस्तु सम्भूतिविजयाचार्यांघ्रिसेवया तपः कुर्वन् सूत्रसूत्रार्थे पपाठ । अन्यदा तपात्यये शिष्यत्रयं सम्भूतिविजयपार्श्वे एवमभिग्रहं ललौ । एकेनोक्तं सिंहगुहायां मया कायोत्सर्गेण चतुर्मासी स्थातव्या १ द्वितीयेनोक्तं मया दृग्विषाहिबिलद्वारे चतुर्मासी कायोत्सर्गेण स्थातव्या २ तृतीयेनोक्तं मया कायोत्सर्गेण कूपभारपट्टे चतुर्मासी स्थातव्या ३ स्थूलभद्रश्चतुर्थोऽवग्—भगवन् कोशावेश्यागृहे चित्रशालायां मया षड्रसान्नपरेण स्थातव्या चतुर्मासी ४ सम्भूतिविजयेनोक्तं, गच्छत यूयं स्वेहितस्थानेषु । यत्नतः स्थेयं भवद्भिः धर्मपरैः । आद्या ऋषयस्त्रयोऽपि सिंहगुहाद्वारदृग्विषाहिबिलद्वारकूपभारपट्टेषु ययुः । स्थूलभद्रस्तु गुरुं नत्वा कोशावेश्याशालायां गतो यावत्तावत् कोशा वेश्या दृष्टा कृताञ्जलिरभ्युत्थाय

तं ऋषिं प्रति स्वागतं प्राह–आगच्छात्र तिष्ठ त्वं स्वामिन्नादेशं देहि यत्तव रोचते तदहं करोमि। स्थूलभद्रोऽभ्यधाद्भद्रे! धर्मलाभोऽस्तु ते। चित्रशालां चतुर्मासस्थित्यै त्वं ममार्पय। तया वेश्यया सज्जितायां चित्रशालायां तयाऽनुज्ञातो जितेन्द्रियः स्थूलभद्रः स्थितः। ततो वेश्यया ध्यातं सुकुमारदेहोऽयं व्रतभाराक्षम इहायातो लज्जया न किञ्चिद्वक्ति स्थितः। क्रमाद्वक्ष्यति श्रियं दास्यति च मह्यम्। अस्य कलां शृङ्गाररससागरे मज्जयिष्याम्यहं क्षणात्। ततः षड्रसाहारैर्वेश्या तमभोजयत्। अशनकाले च तदुद्धरितानि स्वयं सा भुनक्ति, संस्कृतानि शम्बाकणशवानेया धान्यभेदास्त्रयो, दुग्धघृतदधिआरनालतक्रमयानि इति षट् रसा–मूलकन्दइक्षुलतापत्रपुष्पफलानि इति षट् व्यञ्जनानि भोज्यानि मुनये वेश्या ददौ। मनोरथाढ्या भ्रूचाप–दुःसहा चलदृग्हया। मुनिं गजगतिः साऽऽप, धर्म्मं कामचमूरिव ॥ १ ॥ बहिर्द्दशा बहिश्चारु-तां वीक्ष्य न स रक्तवान्। अन्तर्द्दशाऽन्तर्मलिनां, दृष्ट्वा तां च विरक्तवान् ॥ २ ॥ वेश्या यद्यत्तं मोहयितुमुपक्रमं चक्रे तत्तन्निष्फलमभूत्तस्मिन्। यतः–"व्योम्नीव चित्ररचनं, पयसा वाऽग्निदीपनम्। तस्या विलसितं सर्वं, तत्र तस्मिन् मुधाऽभवत् ॥ १ ॥ नित्यं नित्योदयच्छोभा, तत्क्षोभाय दिने दिने। एवं चकार सा ध्यान–रसान्न च चचाल सः ॥ २ ॥ तस्मिन् तदुपसर्गौघै-र्ध्यानं प्रत्युत दिद्युते।

सत्त्वं वीरवरवैरि-प्रहारनिवहैरिव ॥ ३ ॥" अथ प्रागिव मोहं दिदर्शयिषती वेश्या तस्यर्षेः पादयोः पपात मानयितुं भोगेच्छया । तदा स्थूलभद्रो जगौ—भो महाभाग्ये भोगा जीवैर्बहुशो भुक्ताः परं न तृप्तः यतः—" सल्लं कामा विसं कामा, कामा आसीविसोपमा । कामे य पत्थयमाणा, अकामा जंति दुग्गइं ॥ १ ॥ रागोऽयं दोषपोषाय, चेतनारहितेष्वपि । मञ्जिष्ठाकुट्टनस्थानं, भृशं तापसहा(हम)निशम् ॥ २ ॥ मुखे पुरीषप्रक्षेपं, तथा पाषाणप्रेषणम् । एकेन्द्रियाऽपि सहन्ते, मृत्तिका रागदोषतः ॥ ३ ॥ विषयगणः कापुरुषं, करोति वशवर्त्तिनं न सत्पुरुषम् । बध्नाति मशकमेव हि, लुतातन्तुर्न मातङ्गम् ॥ ४ ॥ (इत्थीण जोणिमज्झे गब्भगया चेव हुंति नव लक्खा । इक्को व दो व तिन्नि व, लक्खपुहुत्तं च नुक्कोसं ॥ १ ॥ इत्थिण जोणिमज्झे, हवन्ति बेइंदिया असंखा य । नुप्पज्जंति चयंति य, समुच्छिमा तह असंखा ॥ २ ॥) मेहुणसन्नारूढो, नवलक्ख हणेइ सुहुमजीवाणं । इय आगमवयणाओ, हिंसा जीवाणमिह पढमा ॥ ५ ॥ " इत्यादि धर्मोपदेशेन स्थूलभद्रोक्तेन वेश्या स्वं कुलक्रमागतं धर्म्मं त्यक्त्वा श्रावकधर्म्मं जग्राह । न भाग्यं विना कुमार्गत्यजनं भवति । यतः " ये भवन्ति नरा नार्यः, सन्मार्गगामिनः स्फुटम् । ते च योग्याः प्रजायन्ते, मुक्तिश्रीपतयः क्रमात् ॥ १ ॥ " तस्य स्थूलभद्र-

स्यर्षेरिन्द्रियजयादिजयोत्कर्षदर्शनादेवमभिग्रहं वेश्या ललौ। राजा प्रसन्नः सन् यं भोगाय मत्पार्श्वे प्रेषयति तं विना ममान्ये पुरुषाः सहोदरा भवन्ति अद्यप्रभृति। इतश्चतुर्मासान्ते व्यूढाभिग्रहास्त्रयो यतयो गुरुपार्श्वे प्रतिचेलुः। त्रयोऽप्यागत्य गुरुपादान् नेमुः। ततः श्रीसम्भूतिविजयसूरयो जगुर्यूयं अहो दुष्करकारकाः। ततः स्थूलभद्रमायातं वीक्ष्य स्वयमुत्थाय दुष्करकारक दुष्करकारकेति श्रीगुरुर्जगौ। त्रयोऽपि यतयः पूर्वायाता दध्युरिति। वयं सामान्यकुलोद्भवाः। अयं तु स्थूलभद्रः शकडालमन्त्रिपुत्रः। तेन गुरुभिरस्मास्वेवं प्रोक्तम्। स्थूलभद्रे षड्रसाहारादि भोक्तरि। यतः–" कोशावर्ष्माणि सज्जितेऽङ्कखलके नेपथ्यवृत्त्यावृते, द्वात्रिंशन्मितलक्षणैर्वलयिते तच्छुक्लशङ्कासुरैः। बोधास्त्रेण निहत्य विश्वजयिनं श्रीस्थूलभद्रः स्मरं, लेभे दुष्करकारकेति मुदिताद्दिप्साप्रसादं गुरोः॥ १ ॥" दुष्करकारक दुष्करकारक इति जगदे। गुरूणामपि एकेऽधिकाः एके स्वल्पा न्यूनाः। अग्रेतनचतुर्मास्यां वयं दुष्करदुष्करकारका भविष्यास इति निश्चित्य कष्टेनाष्टौ मासान् नीत्वा सिंहगुहास्थो मुनिः श्रीस्थूलभद्रव्यूढमभिग्रहं ययाचे। गुरुभिरुक्तं-स्थूलभद्रस्य स्पर्द्धा का तवेयं महानुभाग स्थूलभद्रेण यत् कृतं तदन्यो न कोऽपि कर्तुं शक्नोति। अर्कादन्यो दिनं कः करोति, चन्द्रादन्यः कः सुधां क्षरति, जलदादन्यः कः शस्यं निष्पादयति, चक्रवर्तिनोऽन्यः कः षट्खंडं साध-

यति । अयमभिग्रहो गृहीतस्त्वया तव प्राक्कृततपसो नाशाय भविष्यति । भारसहस्रमितस्य गुडस्य नाशाय तुम्बिकाकलिकेव । एवं श्रीगुरुभिर्निषिद्धोऽपि गृहीतस्थूलभद्रव्यूढाभिग्रहः सिंहगुहामुनिः कोशागृहं प्राप स्थूलभद्र इव चित्रशालायां स्थितश्च । स्थूलभद्रस्पर्द्धयाऽत्रैष समागादिति ध्यात्वा वेश्यया षड्रसाहारैरभोजि सः । ततः कृताद्भुतशृङ्गारा भृङ्गाराभ्युन्नतस्तनी हावभावादिविलासपरा कोशा मुनिपार्श्वेऽभ्येत्यास्थात् । तां तादृशीं वीक्ष्य स मुनिश्चुक्षोभ चेतसि । यतः—"चार्वङ्ग्या को न पात्येत, कीलया को न दह्यते । को न मुह्येत लक्ष्मीभिः, को न याति विधेर्वशम् ॥ १ ॥" स्मरातुरं भोगं याचमानं तं मुनिं वीक्ष्य वेश्याऽऽचष्ट । अर्थो विलोक्यते अर्थं विना कोऽपि ईदृग्भोगं भोक्तुं न शक्नोति । स्मरातुरः साधुः प्राह—अधुना मम पार्श्वे नास्ति धनं सुन्दरि ? मया तुभ्यं दास्यते । ततो वेश्या तं प्रतिबोधयितुं प्राह—यदि भोगेच्छाऽस्ति तदा नेपालदेशे व्रज । तत्रापूर्वस्य साधो रत्नकम्बलं लक्षमूल्यं राजा दत्ते । तत्र गत्वा तमत्रानय ततश्चेहितं कुरु । ततः कामातुरो मुनिश्चतुर्मासमध्येऽपि नेपालदेशे गतः । नृपाद्रत्नकम्बलं लब्ध्वा चलितः । वर्त्मनि तस्य गच्छतः पल्ल्यां कीरोऽवग् । लक्षं याति याति । चौरैस्तत्रागत्य रत्नकम्बलं गृहीतम् । ततः पश्चाद् गत्वा रूपपरावृत्तिं कृत्वा पुना रत्नकम्बलं भूपात् प्राप मुनिः । वंशयष्टिमध्ये क्षिप्त्वा पुनश्चलितो मुनिस्तस्मिन्

पूर्ववच्चौरैर्विलोकितो द्वित्रिवारं कीरवचनात्। न लब्धं रत्नकम्बलं, कष्टेनानीय कोशावेश्यायै ददौ मुनिः। वेश्या तं रत्नकम्बलं गृहप्रणालिकापङ्के निःशङ्कं न्यधात्। ततो मुनिःप्राह—भो वेश्ये महामूल्यमिदं रत्नकम्बलं मुधा त्वया कथं खाले क्षिप्तम्। वेश्ययोक्तं किमिदं शोचसि मूढ बहुकष्टोपार्जितं मानुषं जन्म शुद्धचारित्रयुतं स्वं—मद्देहाशुचिमलपङ्के क्षिपन् किं न शोचसि। ततस्तस्य स्मरातुरस्य कामरागो विषोपमोऽभूत्। वेश्यासमुत्पादितसंवेगः स मुनिर्जगौ——"पतितोऽहं महामोह–जालेऽनंतासुखप्रदे। उद्धरितस्त्वया वेश्ये, सत्प्रपञ्चविधानतः॥ १॥ अघानि निरघे! हन्तु, मे तिचारभवान्यहम्। गुरुप्राये गुरुं यामि, धर्मलाभोऽस्तु तेऽन्वहम्॥२॥ कोशाप्युवाच युष्माकं, मया ब्रह्मव्रतस्थया। आशातना कृता बोध—कृते सा क्षम्यतां प्रभो॥ ३॥ गिरौ गुहायां विजने वनान्तरे, वासं श्रयन्तो वशिनः सहस्रशः। हर्म्येऽतिरम्ये युवतीजनान्तिके, वशी स एकः शकडालनन्दनः॥ ४॥ योऽग्नौ प्रविष्टोऽपि हि नैव दग्धः, छिन्नो न खड्गाग्रगतः प्रवीरः। कृष्णाहिरन्ध्रेऽप्युषितो न दष्टो, नाक्तोऽञ्जनागारनिवास्यहो यः॥ ५॥ वेश्या रागवती सदा तदनुगा षड्भी रसैर्भोजनं, शुभ्रं धाम मनोहरं वपुरहो नव्यं वयः सङ्गमः। कालोऽयं जलदाविलस्तदपि यः कामं जिगायादरात्, तं वन्दे युवतिप्रबोधकुशलं श्री स्थूलभद्रं मुनिम्॥ ६॥" वेश्यामेवं वदन्तीममोघधर्माशिषा

प्रमोद्य सिंहगुहामुनिर्गुरुपार्श्वे जगाम । गुरुभिरुक्तं महानुभाग ! मया त्वं निषिद्धस्तत्र गच्छन् । तत्र यत् स्थूलभद्रेण कृतं तत् कोऽपि कर्तुं न शक्नोति । स्थूलभद्रसमः कोऽपि नास्ति । यतः एवं स्तुतिं कुर्वन्ति कवयः । "रे काम वामनयना तव मुख्यमस्त्रं, वीरा वसन्तपिकपञ्चमचन्द्रमुख्याः । त्वत्सेवका हरिविरंचिमहेश्वराद्या, हाहा हताश मुनिनाऽपि कथं हतोऽसि ॥ १ ॥ श्रीनन्दिषेणरथनेमिमुनीश्वरार्द्र-बुद्ध्या त्वया मदन रे मुनिरेष दृष्टः । ज्ञातं न नेमिजिनजम्बुसुदर्शनानां, तुर्यो भाविष्यति निहत्य रणाङ्गणे माम् ॥ २ ॥ श्रीनेमितोऽपि शकडालसुतं विचार्य, मन्यामहे वयममुं भटमेकमेव । देवोऽद्रिदुर्गमधिरुह्य जिगाय मोहं, यन्मोहनालयमयन्तु वशी प्रविश्य ॥ ३ ॥ स्त्रीविभ्रमैश्चलति लोलमना न धीरः, श्रीस्थूलभद्र इव तादृशसङ्कटेऽपि । चूर्णीयते दृषदयोऽपि जलायते वा, वैडूर्यमेति विकृतिं ज्वलनात् पुनर्न ॥ ४ ॥"

अन्यदा राज्ञा वेश्यायाश्चरित्रस्वरूपं ज्ञातम् । ततो भूपेन कोऽपि रथकारः कुशलो वेश्यायै दत्तः । ततो रथकृद्वेश्यायाः पार्श्वे गतः । अकामा वेश्या तं बोधयितुं जगौ । स्थूलभद्रमृते पुमानन्यो धर्मवान् कुशलः कोऽपि न दृश्यते । स्थूलभद्रवर्णनं क्रियमाणं वेश्यया तदानीमसहमानो रथकृत् स्वां कलां दर्शयितुं, शयनस्थ एवासन्नाम्रवनाम्रलुम्बीः पुङ्खमुखपुङ्खाग्रे वेधं वेधं ततोऽर्धचन्द्रबाणेन वृन्तं छित्त्वाम्रलुम्बीं करे गृहीत्वा वेश्यायै ददौ जगौ च । पश्य मम

विज्ञानमिति । ततो वेश्यया सर्षपराशेरुपरि शूचिकां न्यस्य, तदुपरि पुष्पं स्थापयित्वा तदुपरि च नृत्यं कृतम् । तदा मनाक् सर्षपैककणं शूचिका पुष्पाणि (च) न चालितानि । वेश्याकलातुष्टो रथी सादरं जगाद । किन्त्वं वद तुभ्यं दास्याम्यहम् । वेश्ययोक्तम्--मया कापि कला न दर्शिता । जातिसिद्धमिदं जीवानां पूर्वभवाभ्यासात् । यतः--"तरन्ति तिमयोऽम्भोधिं, व्योम्नि चलन्ति पक्षिणः । देवा जगत्सु यान्तीति, जातिसिद्धं न चित्रकृत् ॥ १ ॥ अभ्यासिसिद्धं ते लुम्बि--कर्तनं मम नर्तनम् । न किञ्चिद्दुष्करं ह्येतत्, कृतं तुष्टया तदावयोः ॥ २ ॥ भोगोज्वलवपुः स्थूल-भद्रो भोगैकलालितः । अजात्युत्थमनभ्यस्तं, यच्चक्रे दुष्करं हि तत् ॥ ३ ॥" भोगा मया समं येन द्वादशसंवत्सरीं भुक्ताः । येन च मम चित्रशालायां तिष्ठता षड्रसाहारभोजिता स्थूलभद्रेण यन्न मनाग् व्रतं खण्डितं तच्चित्रकृत् । उक्तं च तया--"न दुक्करं अंबयलुंबतोडनं, न दुक्करं सरिरावनच्चियाए । तं दुक्करं तं च महाणुभावो, जं सो मुणी पमयवणंमि वुछो ॥ १ ॥ रथी तां प्रति जगौ--भद्रे कः स्थूलभद्रः यस्त्वयैवं वर्ण्यते ? तयोचे शकडालमन्त्रिपुत्रः स्थूलभद्रः । रथी जगौ--य एवंविधोऽस्ति तस्य दासानुदासोऽस्मि । तस्याः पार्श्वे स्थूलभद्रस्वरूपं श्रुत्वा धर्ममाकर्ण्य प्राप्तवैराग्यो रथी स्थूलभद्रं च वीक्ष्य राजानमुत्कलाप्य गुरोः पार्श्वे दीक्षां ललौ । क्रमा-

दुष्काले पतिते द्वादशाब्दीमिते साधुसङ्घस्तोयधितीरस्थः श्रीगुरुपार्श्वे समाजगाम । तस्मिन् विषमसमये जायमाने क्रमादगुण्यमानत्वाद् बुभुक्षया पीडितत्वाच्च मुनीनां सिद्धान्तो बहुविस्मृतः, ततः साधूनां पाटीलपुरपत्तने श्रीसङ्घो मिलितः। यो यस्याध्ययनस्योद्देश आयातोऽभूत् स स एकत्र कृत्वा एकादशाङ्गी पूर्णीकृता श्रीसङ्घेन। ततो दृष्टि-वादकृते श्रीसङ्घो मुनिद्वयं श्रीभद्रबाहुपार्श्वे प्रैषीत्। ताभ्यां प्रणम्योक्तम् पाटलीपुरे गुरवस्त्वामाकारयन्ति। भद्रबाहु-गुरुराह—मया महाप्राणाभिधं ध्यानमारब्धमस्ति । तेनाधुना मम तत्रागमनं न भविष्यति। तन्मुनिद्वन्द्वं पश्चादेत्य श्रीभद्रबाहुना प्रोक्तं जगौ—ततो गुरुणा सङ्घेन चानुशिष्य मुनी द्वौ प्रेषितौ तत्र गत्वोचतुर्भद्रबाहुगुरुपार्श्वे। सङ्घादेशं न यः कुर्या—द्दण्डः कार्योऽस्य कीदृशः। अथाचार्यो जगादैवं, सङ्घबाह्यः क्रियते सः॥१॥ तौ यती प्रोचतुः, भगवद्वचनेन वचनेन भवन्त एव सङ्घबाह्याः । ततः श्रीभद्रबाहुर्जगौ। सङ्घादेशः प्रमाणं ममाधुना महाप्राणध्यानक-रणात् वेला नास्ति। तथापि श्रीसङ्घाग्रहात्तेभ्यो यतिभ्यः सप्त वाचना मया दास्यन्ते। यतः—“ एकां भिक्षात आयाते, तत्र दाताऽस्मि वाचनाम्। द्वितीयां कालवेलायां, तृतीयां च बहिर्भुवि ॥ १ ॥ तुर्यां विकालवेलायां, तिस्र-श्चावश्यकक्षणे । एवं सङ्घस्य कार्यं च, मम कार्यं भविष्यति ॥ २ ॥ ” इत्याकर्ण्य श्रीगुरुं नत्वा तौ यती पश्चादेत्य

तव सङ्घाग्रे जगदतुः । ततः सङ्घो हृष्टो दृष्टिवादभणनाय स्थूलभद्रादिमुनीन्द्रशतपञ्चकं न्ययुंक्त । ते यतयो दृष्टिवादं भणन्तोऽल्पवाचनतयोद्विग्नाः स्थूलभद्रं विना निजं निजं स्थानं ययुः । उद्रूज्यमानं स्थूलभद्रं प्रति गुरुर्जगौ किं त्वमुद्रूज्यसे । स्थूलभद्रोऽवक् किन्तु वाचनाल्पत्वं मम तृष्णां न हन्ति । ततो—गुरुणोक्तं भद्र ! त्वया खेदो न कार्यः ध्यानं मम पूर्णमिवास्ति । ततो ध्यानसमाप्तेरनु मया तृप्तिपर्यन्तं तव वाचना दास्यन्ते । ततो ध्यानसमाप्तौ तथा श्रीसूरिणा स्थूलभद्रः पाठितः प्रज्ञाप्रपन्नत्वात् । यथा द्विवस्तूनानि दशपूर्वाणि स जज्ञौ । इतः श्रीयकः श्रीसम्भूतिविजयसूरिधर्मोपदेशं श्रुत्वा प्राप्तवैराग्यो दीक्षां जिघृक्षुरभूद्यावत् सप्तापि भगिन्यो यक्षाद्या जगुः यदि त्वया दीक्षा ग्रहीष्यते तदाऽस्माभिरपि संयमश्रीर्ग्रहीष्यते । संयमश्रियं विना संसारान्निस्तारो न भवति । यतोऽत्र दीक्षासूक्तानि । ततः श्रीयकः स्वं पुत्रं श्रीधरं मन्त्रिपदे स्थापयित्वा राजानमनुज्ञाप्य ताभिर्भगिनीभिः समं संयमं ललौ । श्रीसम्भूतिविजयपार्श्वे यक्षाद्याः साध्व्यः पठनगणनतपस्करणपरा गुरुभिः समं विहारं कुर्वन्ति स्म । अन्येद्युः पर्युषणापर्वणि समायाते यक्षा श्रीयकं भ्रातरं प्रति जगौ—भो सहोदर ! अद्य वार्षिकपर्वदिनं विद्यते तेन प्रत्याख्यानं कुरु । अत्र पर्वणि दानतपस्करणादिपुण्यं अनन्तफलं प्रोक्तम् । यतः—" एगग्गचित्ता जिणसासणंमि, पभावणापूअपरायणा जे ।

तिसत्तखुत्तो निसुणंति कप्पं, भवण्णवं ते लहु संतरंति ॥ १ ॥" इत्यादि । गुरुपार्श्वस्थेन श्रीयकेन भगिनीवचनात् पौरुषी कृता । ततः सार्द्धपौरुषी ततः पुरिमार्द्धः, ततोऽपार्द्धपौरुषी । तत उपवासः कृतः । दिनं महोत्सवेन जायमानं व्युत्क्रांतं श्रीयकेन समाधिना रात्रिस्तु दुःशक्या जाता । मध्यरात्रौ आकुलव्याकुलः श्रीयकः स्मारितपञ्चनमस्कारः परलोकं ययौ । मृते सहोदरेऽग्निसंस्कारे कृते यक्षा दुःखिता श्रीसङ्घाग्रे जगौ—मयाऽतीवाविमृष्टं कृतं यतो भ्राता एव मारितः । ततः प्रायश्चित्तात् कथं छुटिष्यामि । ऋषिघातो मया विदधे । तेन मम श्वभ्रपातो भविष्यति । अहमात्मघातेन मरिष्ये । श्रीसङ्घः प्राह—तव दूषणं न, त्वया तु हितबुद्ध्या भ्रातोपवासं कारितः । तव पुण्यमेव भविष्यति । स तव भ्राता स्वर्गभागभूत् । तयोचे—जिनवचो विना न मन्येऽहम् । यदि जिनेन्द्रः साक्षादाख्याति, तदा मम सन्देहो याति क्षयम् । ततः श्रीसङ्घे कायोत्सर्गे स्थिते शासनदेव्या यक्षा शनैरुत्पाट्य व्योममार्गेण श्रीसीमन्धरपार्श्वे मुक्ता । ततस्तया श्रीजिनो नतः । स्वसन्देहे पृष्टे तया श्रीसीमन्धरो जगौ । तव दोषो न । श्रीयकस्तु तेनोपवासेन बहु कर्म क्षिप्त्वा प्रथमदिवि गतः । मुक्तिं यास्यति च । ततः श्रीसीमन्धरस्वामी धर्मोपदेशद्वारा चूलिकाचतुष्टयं ददौ । तया यक्षयैकचित्तत्वेन चूलिकाचतुष्टयमङ्गीकृतम् । ततो भग्नसन्देहा यक्षा श्रीसीमन्धरस्वामिनं नत्वा शासनदेवी-

सांनिध्यात् स्वस्थानमाययौ। चूलिकाः श्रीसङ्घाय ददौ यक्षा। "चूलियं तु पवक्खामीति०॥" ततो यक्षा श्रीसङ्घयुता धर्मं चकार। अन्येद्युः सप्तापि यक्षाद्या भगिन्यः स्वं भ्रातरं वन्दितुं ययुः। वनमध्ये श्रीगुरुपादान् प्रणम्य प्रोचुः। भगवन् ! क्वास्ति अस्माकं भ्राता। गुरुणोक्तम्—अग्रतो गच्छत यूयं अशोकवृक्षाधः स्थितः स्थूलभद्र एकान्ते स्वाध्यायं कुर्वन्नस्ति। ततस्ताः स्थूलभद्रं नन्तुं यावदग्रतो गच्छन्ति तावत् स्वभ्रातृस्थाने सिंहं वीक्ष्य भीताः पश्चाद्गुरुपार्श्वेऽभ्येत्य खिन्ना जगुः—अस्माकं भ्राता स्थूलभद्रः सिंहेन भक्षितः। तत्र सिंह एव दृष्टो न भ्राताऽस्माभिः। गुरुभिरुक्तं खेदं माकुरुत यूयम्। भवतीनां भ्राता कुशली समस्ति। गच्छत यूयं पुनर्वन्दिष्यते भ्राता भवतीभिः। ततः पुनस्तत्र गता यक्षाद्या भगिन्यः वन्दितो गुरुः स्थूलभद्रस्ताभिः चमत्कृता भगिन्यः, स्थूलभद्रेण पृष्टेन सिंहविकुर्वाणादिस्वरूपं प्रोक्तम्। स्थूलभद्रं नत्वा गुरुपार्श्वे सिंहवृत्तान्तं कथयित्वा गुरुं नत्वा स्वस्थाने गताः। ततः स्थूलभद्रस्तत्र स्वाध्यायं कृत्वा गुरुपार्श्वेऽभ्येत्य वाचनां ययाचे। गुरुराचष्ट अतः परं वाचना न दातव्या अयोग्योऽसि त्वम्। त्वया यदि सिंहरूपं कृतं तर्हि अन्येषां का कथा। कालस्वभावादग्रतो विद्या न जरिष्यति। विद्या सत्पात्रे दातव्या न कुपात्रे। यतः " आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ। इय सिद्धंत रहस्सं, अप्पाहारं विणासेइ ॥ १ ॥" ततः स्थूल-

भद्रो गुरूणां पादयोः पतित्वा स्वापराधं क्षमयन् जगौ—अहमतः परमीदृगपराधं न करिष्यामि । ततो यदा गुरुर्वाचनां न दत्ते । तदा श्रीसङ्घेन प्रोक्तम् । वाचनामग्रतः पूर्वाणां दत्त यूयं गुरुभिरुक्तम्—यदस्य विकार एवंविधो जातोऽन्येषां कथं जरिष्यति । कालो दुषमारूपः समायातः । श्रीसङ्घेनोक्तम्--एवं सर्वेषां पूर्वाणां छेदो भविष्यति । पूर्वच्छेदपातकं तव लगिष्यति । ततो गुरुभिः प्रोक्तम् । यदि स्थूलभद्रोऽतः परमन्येषां साधूनामग्रेतनीं चतुःपूर्वीं न ददाति तदास्माभिरस्मै वाचना दीयते । श्रीसङ्घः प्राह--श्रीपूज्यपादप्रोक्तं भवतु । ततः स्थूलभद्रायाग्रेतनी चतुःपूर्वी सूत्रतो दत्ता न त्वर्थतः स्थूलभद्रोऽखिलपूर्वधरो विजहार धरित्र्याम । ततश्चिरं तपस्तप्त्वाऽनेकभव्यजीवान् प्रतिबोध्य स्थूलभद्रः प्रथमस्वर्गं जगाम ।

॥ इति श्रीस्थूलभद्रकथा समाप्ता ॥ १० ॥

बालत्वेऽपि विधातव्यो, धर्म्मो जैनः शिवप्रदः । भव्यजीवेन श्रीवज्र–कुमारेणेव सन्ततम् ॥ १ ॥
एकां प्रभावनां कुर्यात्, पर्याप्तमपरैर्गुणैः । वज्रस्वामी व्यधादेतां, लब्धिमानमितां यथा ॥ २ ॥
सुहस्तिनोऽन्वये वज्र–स्वामी च क्रमयोगतः । अभूत् प्रवचनोद्धर्ता, तत्कथा प्रोच्यते मया ॥ ३ ॥

तथाहि—जम्बूद्वीपविभूषणोऽवन्तिदेशोऽस्ति, तत्र तुम्बवनाभिधसन्निवेशो विद्यते। तत्रैव धनगिरिनामा व्यवहारी धर्मी धनेन धनदोपमो वसतिस्म। लघुत्वेऽपि धनगिरिः शमरसं वहन् बभूव। तस्य च पितरौ विवाहं कर्तुकामौ कन्यां विलोकयामासतुः। यदा धनगिरेर्दातुं सुतां महेभ्या आयान्ति तदा धनगिरिर्जगौ। मह्यं स्वां कन्यां दातुं वाञ्छत यूयम्। परमहं दीक्षां गृहीष्यामि परिणीतां कन्यां त्यजतो मम दूषणं न देयम्। तदा धनपालमहेभ्यपुत्री सुनन्दा जगौ। अस्मिन् भवे धनगिरिं मुक्त्वा नान्यं नरं परिणेष्यामि। धनगिरिस्तां कन्यामनिच्छन्नपि दीक्षां जिघृक्षन्नपि बलात् सा कन्या सुनन्दा तं धनगिरिमङ्गीचकार विवाहमहोत्सवपुरस्सरम्। अन्यदा विरागवानपि कर्मयोगतः ऋतुस्नातां तां कन्यां धनगिरिर्बुभुजे। इतः पूर्वं श्रीअष्टापदतीर्थे यो देवो जृम्भकः श्रीगौतमपार्श्वे पुण्डरीकाध्ययनं शुश्राव श्रद्दधे च स देवः स्वर्गाच्च्युत्वा सुनन्दाया ऋतुस्नातायाः गर्भेऽवततार। ततो धीमान् धनगिरिरापन्नसत्त्वां प्रियां मत्वा जगौ—भद्रे! तवायं गर्भो भद्राय भवतु, यत्र तव भ्राताऽऽर्यशमिताभिधः संयमं ललौ तत्राहं सिंहगिरेर्गुरोः पुरः प्रव्राजिष्यामि। ततः पत्नीं तादृशीं मुक्त्वा संयमं गृहीत्वा धनगिरिस्तपांसि तप्यमानो गुरोर्मुखात् सिद्धान्तामृतरसं पीतवान्। इतः शुभेऽहनि उच्चेषु ग्रहेषु सुनन्दा नन्दनं प्रासूत वज्रं, वज्राकरोर्वीव वज्रं पूर्वेव रविं, सख्यस्तदा समागतास्तं बालमित्थमालपन्,

यतः—" अयि तात ! न ते तातः, प्राव्रजिष्यत् पुरा यदि । अभविष्यत्तदोद्दामो, जातकर्मोत्सवस्तव ॥ १ ॥ विना पुमांसं न स्त्रीभिः, स्याद्विश्वानन्दकृन्महः । असति द्युमणौ दीप्र—दीपिकाभिरिवामितः ॥२॥ " इत्याद्यालापान् सखिप्रोक्तान् श्रुत्वा दत्तावधानः कुमार ऊहापोहपरो जातिस्मृतिं प्राप्य पूर्वभवं स्मृत्वा प्रव्रज्यां जिघृक्षुर्भृशं रोदनमेव करोति यतो रोदनं विना मां माता न त्यक्ष्यति । ततो मात्रा सखीजनैश्च सुधामधुरैर्वचोभिश्चारूक्तिभिश्च चूलाचुम्बनैश्चान्दोलनादिभिश्च क्रियमाणैर्न रोदनान्निवृत्तः कुमारः । एवं तस्य सुनो रुदतोऽर्द्धसंवत्सरं जातम् । ततः सुनन्दाऽपि रुदन्ती भृशं जगौ—किमस्माच्छिशोश्छुटिष्यते ? देहजातत्वाद्धन्तुं न शक्यते, यद्यस्य पिताऽऽयाति तदा तस्मै दत्त्वाऽहं सुखिनी भवामि, तेन पुत्रेण किं क्रियते येन क्षणमपि सुखं न भवति । अधुना एवं करोति पुत्रः वृद्धः सन् न ज्ञायते किं करिष्यति । एवं विलपन्ती सुनन्दा विलक्षाऽभूत् । इतो धनगिर्यार्यशमितादिसाधुयुतः श्रीसिंहगिरिसूरिरन्यतो विहृत्य तत्रागात् । श्राद्धैः पुरप्रवेशमहोत्सवः कृतः । गुरुभिरुपदेशो दत्तः । मध्यान्हे आर्यशमितान्वितो धनगिरिर्गुरुं प्रति प्राह—भगवन्नादेशं देहि । आवां विहृत्यर्थं पुरमध्ये गच्छावः । गुरुभिरतिशयज्ञानवद्भिः प्रोक्तं भवतोरद्य महान् लाभो भविष्यति । तत्र सचित्ताचित्तविमर्शो न कार्यः । गुरुप्रोक्तं श्रुत्वा तथेत्युक्त्वा

धनगिरिः शमितसाधुयुतो विहरन् श्राद्धगृहे क्रमात् सुनन्दाया गृहेऽगमत्। तं मुनिं तत्रागतं दृष्ट्वा सुनन्दा दुःखिता पतिं प्रति जगाद। अहमनेन सूनुना विलक्षीकृताऽतीव दुःखिनीकृता। त्वदीयोऽयं सूनुः त्वमेव गृहाण ममानेन न किमपि कार्यं। मयि कालसमो विद्यतेऽयम्। तेनानुग्रहं कृत्वा त्वं लाहि। धुर्योऽपि निस्पृहाणां त्वं, गृहाणाङ्गज-मात्मनः। ममोपरि कृपामत्र, कुरु कारुण्यसागर॥ १॥ स्मृत्वा गुरूक्तं धनगिरिः प्राह—यथा तव रोचते चित्ते तथा कुरु। उक्तं च यतिना। पश्चात्तापवती पश्चात्, पुनर्भद्रे भविष्यसि। अमुं विश्राणितं पुत्रं, लभसे न कथञ्चन॥ २॥ ततः सुनन्दयोक्तं एताः सख्यस्तेऽत्र साक्षिण्यः। अहं पश्चान्न मार्गयिष्याभि। इत्युक्त्वा तं बालं पात्रबन्धे विस्तारिते सुसाधुना सुनन्दा मुमोच। तं बालं गृहीत्वा धनगिरिर्धर्मलाभं पूर्वं दत्त्वा च क्रमाद् गुरुपार्श्वे जगाम। बालभारेण नमद्भुजं धनगिरिमागच्छन्तमालोक्य श्रीगुरुराचष्ट 'अयं बालो वज्र इव भारकृद्विद्यते' इति वज्रकुमारनामास्य भवतु। ततो गुरुभिः सचित्तमपि तं बालमुत्सङ्गे लात्वा यावत्संमुखं विलोकितं तावद् बालेन तेन हर्षितम्। ततः सूरिभिः पालनार्थं साध्वीनामर्पितम्। साध्वीभिश्च शय्यातरीणां पालनाय विश्राणितः। ततो रोदनान्निवृत्तो बालः। शालामध्ये पालनस्थः स्तन्यपानादिभिः पाल्यमानः शिशुः साध्वीभिर्गण्यमानामेकादशाङ्गीं पपाठ।

वर्षत्रयमात्रवयस्को वज्रकुमारः समानवयोभिः शिशुभिः समं धर्मोपकरणै रेमे । उक्तं च । "शय्यातरपुरन्ध्रीणां, स सौभाग्यनिधानभूः । अङ्कादङ्कं जगामैव, पद्मात् पद्मं मरालवत् ॥ १ ॥ उल्लापयन्त्यस्तं बालं, मन्मयोल्लापपूर्वकम् । स्त्रियो गीतानि गायन्ति, कर्णामृतकिरागिरा ॥ २ ॥ वज्रेण तासां यद्वज्रो–पमानि हृदयान्यपि । गुणैर्विद्धानि तद्युक्तं, वज्रं वज्रेण विध्यते ॥ ३ ॥ सुनन्दा वन्दनछलात्तत्रैत्य सुनं स्तन्यपानदानात्पुपोष । इतश्च कन्यापूर्णाख्यं विख्यातं तटिनीद्वयम् । अचलपटोपेतं महीमण्डनं विद्यते । एतयोर्नद्योरन्तरे भुवि भूतिधवलास्तापसा आहारलीलां ललुः । तेषु तापसेष्वेकस्तापसः पादुके परिधाय लेपवित् सलिलेऽप्यतलस्पर्शी नदीमुत्ततार । कौतुकं पश्यन्तो लोकास्तस्य तापसस्यान्येषां तापसानां कीर्तनं कुर्वन्ति वदन्ति चैवं भो जैना वो मते ईदृशाः केऽपि विद्यन्ते ? यतः प्रभावोऽस्ति कस्य मध्ये इति वदन्ति । ततस्तापसभक्ता जना हसन्ति जैनान् प्रति । अस्मिन्नवसरे श्रीआर्यशमिताचार्यो वज्रमातुलो विहारक्रमयोगेन योगसिद्धस्तपोनिधिस्तत्राजगाम । ततस्तं गुरुं नत्वा वृद्धाः श्राद्धा जगुः–भगवन् ! एते तापसा जिनमतावहीलनं कुर्वन्तः सन्ति, आत्मीयं चमत्कारं दर्शयन्ति च ततोऽवधिज्ञानयुक् श्रीआर्यशमिताचार्योऽवग् श्राद्धान् प्रति । तस्य तापसस्य तपःशक्तिर्न किन्तु केनापि लेपेन पादौ लिप्त्वा नद्युपरि गच्छति

रम। तत एकस्य महर्द्धिकस्य श्राद्धस्याग्रे रहः प्रोक्तं त्वमेवं कुरु। तस्य तापसस्य पार्श्वे गच्छ। तत्र त्वया तत् करणीयम्। ततः श्राद्धस्तस्य तापसस्य पार्श्वे गतोऽवग्। त्वत्तुल्यः कोपि तपस्वी न दृष्टः। यस्येदृशी जलोपरि चलनशक्तिः। मया जैनं मतं विलोकितम्। तत्र कोऽपि तपःप्रभावो न दृश्यते। अतःपरं त्वमेव मम गुरुर्भवतु। तापसेनोक्तम्--त्वं विघटयिष्यसि श्रेष्ठी जगौ--मदीयोक्तं मेरुरिव स्थिरं जानीहि। एकदा. मदीये गृहे कल्ये पारणकदिने त्वया भोजनायागन्तव्यम्। तापसोऽवग्—यदि तवेच्छा भवति तदाऽऽगमिष्यते मया। द्वितीयदिने तापसः श्राद्धगृहे भोजनं कर्तुमागात्। तदा श्रेष्ठिनातीव भक्तिं दर्शयता तापसस्य पादौ प्रक्षालितौ। प्रच्छन्नं पादुके अपि प्रक्षालिते। ततः सरसरसवत्या भोजयित्वा तापसं, तापसं प्रेषयितुं मनुष्यसहस्रयुतश्चचाल। नदीसमीपे समागात् तापसो यावत्तावत् आर्यशमिताचार्योऽपि तत्रागात। तापसो यावन्नदीमध्ये प्रविष्टस्तावन्मज्जन्नभूत्। ततो लोका हसन्त्यहो तापसस्य क्व गतं तपोऽधुना। तत आचार्येणोक्तं भो भो तापसा! भो भो जना! विलोकयत सावधानीभूय जिनमतप्रभावम्। गुरुणोक्तं भो नदि! यदि मम तपो निस्तुषं भवति तदा त्वं द्विधाभूय मार्गं देहि। ततो नद्या दत्ते मार्गे आर्यशमिताचार्यः सपरिवारो नद्या अपरं तटं गतः। तं चमत्कारं श्रीआर्यशमिताचार्यकृतं वीक्ष्य सर्वे तापसा मुक्तगर्वा दीक्षां

जगृहुः । यतः—“ यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते, कामः शाम्यति दाम्यतींद्रियगणः कल्याणमुत्सर्पति । उन्मीलन्ति महर्द्धयः कलयति ध्वंसं चयः कर्मणां, स्वाधीनं त्रिदिवं शिवं च भवति श्लाघ्यं तपस्तत्र किम् ॥ १ ॥ ” अन्ये बह्वरतापसभक्तजनाः श्राद्धा जाताः । ते तापसा ब्रह्मद्वीपिकनामानोऽभूवन् ब्रह्मद्वीपाधिवासात् इतस्तत्र श्रीवज्रास्त्रिहायनोऽभूत् । साधवो धनगिर्याद्या विहारं कुर्वाणास्तत्र समाजग्मुः । तत्रायातं धनगिरिं मत्वा स्वपुत्रं तस्मात् पश्चाद् गृहीष्यामीति हृष्टाऽजनि सुनन्दा । महर्षिभ्यः स्वनन्दनमयाचत । तेऽपि यतयस्तमददाना एवं जगुः । त्वया सर्वसाक्षिकं पुत्रो विश्राणितो धनगिरये । अधुना कथं याचसे । लज्जसेऽपि न । विक्रीतस्य दत्तस्य च कापि मार्गणं न भवति । सुनन्दाऽवग्—मया विमर्शं विनाऽर्पितः पुत्रः । सहसा कृतं कार्यं न कार्यसंपत्तिघटामाटीकते । श्रीसङ्घो जगाद—सुनन्दे ! त्वया दृढीकृत्य पुत्रः पुरा गुरुभ्योऽर्पितः । अधुना कथं गुरवोऽङ्गीकृतं पुत्रमर्पयन्ति । साधुभिर्यद्विहरितं तत् सर्वथा पश्चान्नार्प्यते । ततः श्रीसङ्घः सुनन्दा च विवदमानौ भूपपार्श्वे ययतुः । साधवोऽपि तत्र गताश्च । राज्ञोक्तं यस्य पार्श्वे स बालो गच्छति तस्याऽयं ज्ञेयः । सुनन्दयोक्तम्—अयं बालः पूर्वमेषां साधूनां चिरपरिचितो जातोऽस्ति । तेनाहं—प्रथमं सुखभक्षिकादिदानेनाऽऽकारयिष्यामि ।

राजाऽवग्--एवं भवतु । ततस्तया सिंहकेसरमोदकमत्संडीद्राक्षावरसोलकादि सुखभक्षिकादि स्वर्णमयकन्दुकभ्रमरकरथगनकवर्त्तुलकहारार्द्धहारकटकादि रमणकयोग्याभरणादि समानीय एकतः सुनन्दया प्रोक्तम् । भो पुत्र! वत्स एतानि वस्तूनि अङ्गीकुरु । त्वं मम त्राणकृद्देवो, गुरुस्त्वं मोददायकः । आधारोऽसि स्फुटं वज्र!, मदुत्सङ्गं समाश्रय ॥ १ ॥ त्वदीयो जनको दीक्षां, ललौ विमुच्य मां द्रुतम् । तेन त्वमेव मे प्राणा--धारोऽसि नन्दनाऽधुना ॥ २ ॥ लोकस्यास्य पुरस्तेजो, दीनाया पुत्र! पुष्य मे । एह्यालिङ्गनदानेन, गर्भवासानृणो भव ॥ ३ ॥ नृपाज्ञया सुनन्दाऽपि, बालक्रीडनकानि च । विविधानि च भक्ष्याणि, दर्शयन्त्येतमभ्यधात् ॥ ४ ॥ हस्तिनोऽमी अमी अश्वाः, पत्तयोऽमी अमी रथाः । तव क्रीडार्थमानीता--स्तद्गृहाणेह बालक! ॥ ५ ॥ मोदका मण्डकाख्या वा, शर्करा मधुधूलिकाः । यदिच्छसि तदस्तीह, गृह्यतामेहि नन्दन! ॥ ६ ॥ जनन्या वचांसि एवंविधान्याकर्ण्य दध्यौ वज्रः । माता तीर्थं निगद्यते लोकैस्तदपि सत्यं परं माता इह लोके सत्यामेव सम्पदि सुखदा भवति । स्वार्थमेव पुत्रमुत्पादयति, न पुत्रस्यार्थम् । श्रीसङ्घः श्रीगुरवश्च इहलोके परलोके च सुखदा भवन्ति । श्रीसङ्घश्च तीर्थङ्करस्यापि मान्योऽस्ति । श्रीसङ्घे आराधिते माताऽऽराधितैव, माता अनन्तेषु भवेषु जाताऽस्ति । यतः "पीयं थण-

यच्छीरं, सागरसलिलाउ हुज्ज बहुययरं । संसारंमि अणंते, माऊणं मन्नमाणाणं ॥ १ ॥ " इति वचनात् । श्रीसङ्घश्चतुर्विधो मुक्त्यादिसुखदाता स्तोकेषु भवेषु प्राप्यते । प्राप्तेऽपि श्रीसङ्घे तस्य वचनाराधनं स्तोकेष्वेव भवेषु कृतमस्ति । यद्यधुना मातुर्वचो मन्यते, तदाऽवश्यं मम श्वभ्रे पातो भवति । इतो धनगिरिसाधू रजोहरणं दर्शयन्निति प्राह—जइ सि कयज्झवसाओ, धम्मज्झयभूसियं इमं वयरं । गिन्ह लहुं रयहरणं, कम्मरयपमज्जणं वीरं ॥ १ ॥ जीवानां कर्मबद्धानां, सुलभाऽम्बा भवे भवे । धर्म्मश्च दुर्लभश्चैकः, कर्मनिर्मूलनक्षमः ॥ २ ॥ इत्यादि श्रीसङ्घधनगिरिप्रोक्तं श्रुत्वा कुमारो हृष्टः । ततः श्रीसङ्घेन श्रीगुरुयुक्तेन रजोहरणमुखवस्त्रिके मुक्त्वोक्तं भो वज्र ! यदि तव संयमग्रहणेच्छा भवति तदा रजोहरणादि गृहाण । नो चेन्मातृमुक्तं वस्तु गृहाण । श्रीसंघो मान्य एवेति ध्यात्वा रजोहरणं मुखवस्त्रिकायुक्तं कृत्वा मस्तके धृत्वा च ननर्त वज्रः । रजोहरणहस्तोऽयं, पितुरुत्सङ्गसङ्गतः । शमामृतसरोऽम्भोजे, हंस इवाशुभत् शिशुः ॥ १ ॥ सुनन्दा दुःखिनी भूता व्यचिन्तयदेवम् । पुत्रः प्रव्रजितो भ्रातृ-पती प्रव्रजितौ मम । प्रव्रजाम्यहमप्याशु, भामि नैकाकिनी गृहे ॥ १ ॥ विचिन्त्यैवं सुनन्दा स्वगृहे गता । यतयश्च वज्रमादाय स्वस्थाने गताः । वज्रस्तु व्रतिनीभ्योऽर्पितः । स च तत्रस्थो यतिनीभिर्गण्यमानामेकादशाङ्गमिपाठीत् । श्रुता-

न्येकादशाङ्गानि, मेधयैवाधिगम्य यः । बालत्वस्याज्ञतादोष-मासंसारमपाहरत ॥ १ ॥ सुनन्दाऽपि संसारासारतां मत्वा श्रीसिंहगिरिगुरुपार्श्वे व्रतमाददे । षड्वर्षप्रान्ते श्रीसिंहगिरिसूरिभिर्वज्रस्य दीक्षा दत्ता । क्रमादष्टवर्षप्रमाणोऽभूद्वज्रः । वज्रेणसममन्येद्युः श्रीगुरवोऽवन्तीं प्रति चेलुः । मार्गे गच्छतां गुरूणां पर्जन्ये वर्षति यक्षमण्डपे च स्थानमभूत् । इतः प्राग्जन्ममित्राणि जृम्भकाः सुरा वज्रस्य सत्त्वं परीक्षितुं तत्र वने समेत्य सार्थवाहनाम दधाना वसनपटकुटीं विस्तार्य स्थिताः नीरवाहे वर्षति तत्रागत्य गुरुं वन्दित्वा प्रोचुः सुरा वणिग्रूपधराः । भगवन् प्रसादं कृत्वा शुद्धमाहारं लातुमस्माकं पटकुटीषु साधू प्रेष्येतां त्वया । ततो गुरुभिर्जलदमवर्षन्तं दृष्ट्वा प्रोक्तं भो वज्र ! गच्छैषां श्राद्धानां स्थाने विहृत्यर्थम् । सूक्ष्मान् बिन्दून् परीक्षार्थं देवविकुर्वितान् वीक्ष्य यावत्तस्थौ तावद् देवैर्बिन्दुषु संहृतेषु वनमध्ये तृणकुटीरेषु गतः । सार्थपतिना दीयमानमन्नं वीक्ष्य वज्रो दध्यौ । अस्य पादौ पृथ्वीं न स्पृशतः, नेत्रे मेषोन्मेषौ न कुरुतः, अस्मिन् काले इदमन्नं न भवति, इत्यादि वज्रो ध्यात्वाऽवग्--देवानां पिण्डो यतीनां न कल्पते । ततो वज्रर्षिचातुर्यं सत्त्वं चावलोक्य प्रकटीभूय देवास्तस्मै वैक्रियलब्ध्यर्थां विद्यां ददुः । ततोऽन्यदा वणिग्रूपैस्तैरेव देवैरयं वज्रो विहरन् पुरीं बहिर्ज्येष्ठे मासि घृतं दातुं घृतपूरान् निमन्त्रितः । देवान् ज्ञात्वा वज्रोऽवग् यतीनां

देवपिण्डो न कल्पते, ततो देवास्तं वज्रं ज्ञानवन्तं मत्वा व्योमगामिनीं विद्यां तस्मै ददुः । स्थविरैरुक्तं वज्र त्वं पठ । वज्रस्तु स्वां शक्तिं गम्भीरत्वाददर्शयन् तस्थौ । अन्येद्युर्भिक्षार्थं साधुषु गतेषु सूरिषु च बहिर्भूमिं गतेषु वज्र एकाकी वसतौ स्थितः । साधुमण्डलिकाकारेण सर्वामुपधिं स्थापयित्वा, स्वयं मध्ये गुरुरिवोपविश्योच्चैःस्वरेण एकादशाङ्गवाचनां वज्रो ददौ । इतो गुरवो द्वारमागता मध्ये एकादशाङ्ग्या वाचनां ददानं वज्रं श्रुत्वा क्षणं तस्थुर्दध्युश्च । किं साधवो विहृत्यागतास्तेषां वाचनां ददानोऽस्ति वज्रः । द्वारकपाटकाणके एकाकिनं वज्रमालोक्य गुरवो दध्युः । अहो अस्य शिशोरेवंविधं गाम्भीर्यमेवंविधायां विद्यायामागतायां सत्यां स्वमेकादशाङ्गीज्ञातृत्वं कस्याप्यग्रे न प्रकटीचक्रे वज्रः । एष मुनिरेवंविधां चेष्टां कुर्वन् मास्मलज्जिष्ट । इति ध्यात्वा गुरुभिरुच्चैर्नैषेधकोच्चारो विहितः । वज्रो गुरुशब्दमुपलक्ष्य तत्क्षणमुपधिं स्वस्थानके विमुच्य संमुखमागत्य द्वारमुद्घाट्य च गुरोः क्रमरेणुं ममार्ज । तेनाद्य मुक्तिवामाक्षी—

वशीकरणकारणम् । गुर्वंघ्रिरजसा भाले, बालेन तिलकं कृतम् ॥ १ ॥ प्रागुविष्टरनिविष्टस्य, गुरोः प्रासुकवारिणा । पादौ प्रक्षालयामास, वासनाभासुरोपमः ॥ २ ॥ श्रीगुरवस्तमेकादशाङ्गीविदुरं विनयिनं मत्वाऽन्येद्युः कस्मिंश्चिद्ग्रामे यियासवो यतीन् प्रोचुः । वयं विहारं परिसरे करिष्यामः । दिनचतुष्टयं लगिष्यति तत्र । ततो यतयो जगुः व्यजि-

ज्ञपंश्चेति वयं सार्द्धमेष्यामः । गुरुभिरुक्तम्—वहुस्थानकैः परिसरे गन्तुं न शक्यते । आधाकर्मादिनिष्पत्तिः तत्र दोषोत्पत्तेः । यतः " आहाकम्मुद्देसिय—पूइयकम्मे य मीसजाए य । ठवणा पाहुडियाए, पाउअरकियपामिच्चे ॥ १ ॥ परियट्टिअब्भुहडु, भिन्ने मालोहडे य अच्छिज्जे । अणिसिट्ठज्झोयरए, सोलस पिंडुग्गमे दोसा ॥२॥" यतयो व्यजिज्ञपन्—कोऽस्माकं वाचनां दास्यति । गुरुभिरुक्तम्—वज्रो वो वाचनां दास्यति । ततस्ते साधवोऽवितथमिदं गुरुवचो मन्यमानाः प्रतिपेदिरे । प्रातर्गुरुषु ग्रामं गतेषु साधुप्रार्थितो वज्रस्तेभ्यः साधुभ्यो वाचनां ददौ । साधवस्ते सुखबोधां वाचनां गृह्णन्तो दध्युः । एषः किं साक्षात् सरस्वत्यवतीर्णा अथवा बृहस्पतिः । अथ विहृत्य गुरव आगताः । पृष्टं च गुरुभिः । भो साधवो युष्माकं वाचना सुखेन जाता । तैरुक्तमद्यप्रभृति वाचनाचार्यो वज्रोऽस्माकं भवतु । अयं बालोऽप्यबालभावः साक्षात् सरस्वती मूर्तीभूय समागताऽस्माकं वाचनां दातुम् । ततो वज्रमुज्जृम्भितोदयं गुरवस्तमशेषशास्त्रादिरहस्यमपाठयन् । यावन्मात्रः श्रीदृष्टिवादोऽभूत् तावद्वज्रोऽपाठीद्गुरोः पार्श्वे । अथ विहरन्तो गुरवो जन्तुपापापहारका वज्रसहिताः पुरं दशपुरं जग्मुः । एकदा श्रीगुरुपादा जगुः श्रीवज्रं प्रति । अवन्त्यां श्रीभद्रगुप्तसुरिर्दशपूर्वी विद्यते । दशपूर्वीमध्येतुं तस्यान्तिके गच्छ । त्वां विनाऽन्यो मच्छिष्यः कोऽपि तच्छिष्यो कोऽपि दशपूर्वी-

मध्येता नास्ति । ततस्त्वं वत्स गच्छहितकृद्गच्छोज्जयिनीं प्रति दशपूर्वीमधीत्य दशादिगृस्थभव्यजनान् प्रबोधय वज्र । दशपूर्वीसुधापुर–पानध्यानस्य तेऽनिशम् । सांनिधानं विधास्यन्ति प्रीताः शासनदेवताः ॥ १ ॥ इति प्रोक्तं गुरुवचो दृढीकृत्य चित्ते मुदं वितन्वानो वज्रोऽचलदुज्जयिनीं प्रति । वज्रः साधुभ्यां द्वाभ्यां युक्तो मार्गे गच्छन् गगने मार्तण्डो बुधशुक्राभ्यामिव शुशोभ । यतः–" युक्तो गुरुनियुक्ताभ्या–मृषिभ्यां स बभौ पथि । सञ्चलन् गगने शुक्र-बुधाभ्यामिव भानुमान् ॥१॥ दिदृक्षुर्भद्रगुप्ताख्यं, दशपूर्वीसुधावधिम् । उज्जयिन्यामयं यातो, रजन्यामवसद् बहिः ॥ २ ॥ इतः सुप्तोत्थितो भद्र–गुप्तः शिष्यान् प्रगे जगौ । प्रातःक्षणे मया स्वप्न, ईदृशोऽद्य निरीक्षितः ॥ ३ ॥ जानामि कश्चिदा-गन्तु–र्दुग्धपूर्णं पतद्ग्रहम् । गृहीत्वाऽस्मत्करात्पीत्वा, तृप्तश्च मुमुदेतराम् ॥ ४ ॥ तेनाद्य कोऽपि साधुर्मेधावतां धुर्यः स समेष्यति । यो मे पार्श्वे दशपूर्वी गृहीष्यति । अद्य मे सफलः सैष, दशपूर्वीपरिग्रहः । भविष्यति द्रुतं तादृग्–वाचंयम-समागमात् ॥ १ ॥ दिष्ट्या न यास्यति मयि, व्युच्छित्तिं दशपूर्व्यसौ । यतोऽद्यात्र वरं पात्रं, समेष्यति न संशयः ॥ २ ॥ एवं जल्पति सूरीशे, हर्षपूरितमानसे । जल्पन्नैषेधिकीं वज्रो, वसत्या द्वारमागमत् ॥ ३ ॥ आकृतिं प्रकृतिं चास्य, दध्यौ पश्यन्निदं गुरुः । अयं साक्षात् समायातो, योऽद्य दृष्टो मया निशि ॥ ४ ॥ वज्रो हर्षोत्कर्षवशंवदो गुरुं प्रदक्षिणी-

कृत्य विनयपूर्वं पुनः पुनः प्रणमञ्छिरा गुरुपादौ ववन्दे । गुरुणाऽपि कराभ्यां सबहुमानमालिङ्गितो वज्रः । प्रसिद्धसदृशाकृत्या तं वज्रं निश्चित्य गुरुरुवाच । कच्चित् सुखविहारस्ते, कच्चितेऽङ्गमनामयम् । कच्चित्तपस्ते निर्विघ्नं, क्वच्चित्ते कुशली गुरुः ॥ १ ॥ किमर्थं तेऽत्रावन्त्यां विहारोऽधुनाऽभूत । व्यक्तभक्तिभराभागो गुरून् वन्दित्वा कृताञ्जलिर्वज्रो जगाद आदौ सुखविहारादि, यत्पूज्यैः समपृच्छ्यत । तदस्त्येवाखिलं देव—गुरुपादप्रसादतः ॥ १ ॥ गुरोरादेशाच्छ्रीपूज्यपादानां पार्श्वे दशपूर्वीमध्येतुमिहागमम् । तेन तत्प्रदानेन प्रसीद मे । ततो भद्रगुप्तो गुरुस्तं योग्यपात्रं मत्वा दशपूर्वी दातुं प्रवृत्तः । विनयपूर्वं पठन् वज्रः स्तोकेन कालेन दशपूर्वी जातः । यतः—जले तैलं खले गुह्यं, पात्रे दानं मनागपि । प्राज्ञे शास्त्रं समायाति, विस्तारं वस्तुशक्तितः॥१॥" ततः श्रीभद्रगुप्तं गुरुमापृच्छ्य दशपुरं प्रति वज्रश्चचाल । वज्रः प्रीतो ज्ञातदशपूर्वीकः सिंहगिरिं प्रदक्षिणीकृत्य प्रणनाम । जृम्भकैः सुरैः पूर्वसुहृद्भिरभ्येत्य तदा दशपूर्वधरस्य वज्रस्य महोत्सवश्चक्रे।ततः श्रीगुरुभिः वज्राय सूरिपदं दत्त्वा गच्छभारो दत्तः।ततः सिंहगिरिसूरिर्गृहीतानशनः स्वर्गमारुरोह। श्रीवज्रसूरिर्यतिपञ्चशतीपरिवृतो विजहार महीतलेयत्र यत्र वज्रस्वामी गच्छति स्म तत्रानेके जनाः सम्यक्त्वमूलां द्वादशव्रतीं प्रपेदिरे। इतश्च पाटलीपुत्रे पुरे धनाढ्योऽभूद्वणिक् । तस्य पुत्री रुक्मिणी देवकन्येवाभवत्, तस्य श्रेष्ठिनः

शालायां श्रीवज्रस्वामिनः साध्व्योऽवसन् । तासां श्राद्धीनामग्रे साध्व्यो धर्मोपदेशं ददानाः श्रीवज्रस्वामिसौभाग्यलावण्यादिगुणस्तवं वितेनुः । श्रावं श्रावं गुणश्रेणीं साध्वीवक्त्राच्च तादृशीम् । श्रीवज्रे गतरागेऽपि रुक्मिणी रागवत्यभूत् ॥ १ ॥ रुक्मिणी साध्वीपुरोऽवग्—श्रीवज्रस्वामी ममास्मिन् भवे स्वामी भवतु । साध्व्यः प्रोचुः—मुग्धे ! सुवादिनि ! मैवं वादीः । भवत्या चिन्तितः कदाग्रहोऽयं निष्फलोऽस्मद्गुरोः पुरो भविष्यति । रुक्मिणी जगौ—मच्चिन्तितं यदि सफलं न भविष्यति तदा संयम एव श्रेयान् । इतः श्रीवज्रस्वामी विहरन् पाटलीपुराद् बहिराजगाम । तत्र महीभर्तृकृतप्रवेशमहोत्सवपुरस्सरं पुरमध्ये समागात् वज्रस्वामी । राजा दध्यौ एतेषां मध्ये वज्रः कः । तदा साधुभिर्वज्रतुल्यरूपैरुक्तमयं वज्रस्वामी । ततो राज्ञा नतो वज्रो भक्त्या । ततो गुरूक्तं धर्मं श्रुत्वा राजादिलोकः स्वं स्वं स्थानं जगाम । राज्ञा वर्ण्यमानसौभाग्यादिगुणं श्रीवज्रस्वामिनं राज्यः श्रुत्वा महोत्सवपूर्वं श्रीवज्रं गुरूत्तमं ववन्दिरे । धर्मोपदेशस्तत्रेति दत्तो गुरुभिः । आसन्ने परमपए, पावेयव्वंमि सयलकल्लाणे । जीवो जिणिंदभणियं, पडिवज्जइ भावओ धम्मं ॥ १ ॥ द्वितीये दिने तं गुरुमागतं श्रुत्वा ह्रियं मुक्त्वा रुक्मिणी जनकं प्रति जगौ—वज्रस्वामी स समेतोऽस्ति । यत्र मे वरणस्पृहा विद्यते । अयं मम वरो भवतु—नो चेन्मृत्युरेव शरणम् । ततो धनो दिव्याभरणभूषितां पुत्रीं कृत्वा श्रीवज्र-

स्वामिने दातुमनाश्चचाल। इतो लोकैः श्रीवज्रस्वामिनो रूपसौभाग्यौदार्यक्षान्तिप्रभृतिगुणान् वर्ण्यमानान् श्रुत्वा धनो दध्यौ। अहो धन्या मदीया पुत्री। या वरस्यैवंविधस्येच्छां करोति वरीतुम्। धनो वज्रस्वामिनं नत्वा धर्मोपदेशमाकर्ण्य कृताञ्जलिर्व्यजिज्ञपत् । इमां मत्सुतां त्वदासक्तां त्वमुद्वह । वज्रस्वामी मम पति-र्मृतिर्वा शरणं मम॥ इत्यस्यां सप्रतिज्ञायां, कृपां कुरु कृपामय ! ॥ १ ॥ अमूः स्वर्णकोटीरनया कन्यया समं तुभ्यं पाणिमोचनकर्मणि दास्यामीति धनवचः श्रुत्वा वज्रो भाषतेस्म । नदीकल्लोलकुम्भीन्द्र-कर्णध्वजादिचञ्चलाः । भोगाः पुण्यश्रियां रोगा-स्तद्योगानीहतेऽत्र कः ॥ १ ॥ स्त्रियः श्रियश्च निश्चित्य तन्निदानमनादितः । तद्दानमुचितं भाति किं महाभाग! मां प्रति ॥ २ ॥ किमियं मयि मांसासृग-स्थिकूटेऽनुरागिणी । दिशामस्याः पतितं(तो) यो, देवानामपि दुर्लभः ॥ ३ ॥ यस्य प्रेष्या गुणाः सर्वे, रूपश्रीर्यस्य किङ्करी । यस्य दास्यः श्रियः सर्वा, यस्य किञ्चिन्न दूषणम् ॥ ४ ॥ यत्प्रसादकणाद्भान्ति, सुरासुरनरेश्वराः । कोशो यस्यातिभक्त्यैकप्रदेयपदमव्ययम् ॥ ५ ॥ कृतिन् स तवकन्यायाः, संयमोऽस्तु मनःश्रियः । यदि त्वमनुजानासि तत्करोमीह मेलनम् ॥ ६ ॥ आघ्रातं मरणेन जन्मजरया० ॥ ७ ॥ व्याघ्रीव तिष्ठति जरा परितर्जयन्ती० ॥ ८ ॥ क्षणं बालो भूत्वा० ॥ ९ ॥ रुप्पिणिअहिगरणीए, लोहघणेणं घणं

पि संघडिओ। ईसिं पि जो न भिन्नो, सच्चो सो चेव वयरमणी ॥ १० ॥ इति श्रीवज्रसूरीणां, सुधाभक्तिभिरुक्तिभिः। शान्तमोहज्वरा पथ्यं, व्रतमादित रुक्मिणी ॥ ११ ॥ तदाऽनेके जना वज्र–स्वामिवाणीं मनोहराम्। आकर्ण्य श्रीजिनप्रोक्त–धर्मेऽभूवन् कृतादराः ॥ १२ ॥ महापरिज्ञाऽध्ययनात् श्रीवज्रोऽन्यदा सङ्घार्थं पदानुसारिलब्ध्या चोद्दध्रे विद्यां गगनगामिनीम्। अतः परमल्पसत्त्वा जीवा भवन्तीत्यभिधाय संघाग्रे श्रीवज्रेण कस्मैचित्साधवे मनुष्यक्षेत्रभ्रान्तिमिता खगामिनी विद्या न ददे। अन्येद्युर्वज्रस्वामी विहरन् पूर्वदिग्भागादुदग्दिशं प्रतिप्रावर्तत। तत्रोच्चैर्दुर्भिक्षं दारुणं जातम्। ततोऽतीवक्षुधापीडितः श्रीसङ्घोऽभ्येत्य नत्वा श्रीवज्रयतीशं व्यजिज्ञपत्। इह दुर्भिक्षसाम्राज्ये, भुञ्जानानां मुहुर्मुहुः। अपि भूयोभिरिभ्यानां, प्रभो! तृप्तिर्न जायते ॥ १ ॥ इभ्यौकसां भिक्षुभया–न्नोद्घाटयन्ते कपाटकाः। पक्ष्माणि विषयत्रासा–दिव योगीन्द्रचक्षुषाम् ॥ २ ॥ राद्धमप्यन्नं कोऽपि भोक्तुं न शक्नोति। क्रयविक्रयादिव्यवहारो दुर्लभोऽभूदधुना। भिक्षुजनो दण्डैस्ताड्यमानोऽपि बलाच्छ्रयस्थमप्यन्नमाच्छिद्य खादति। आगतेषु साधुषु विहृत्यर्थं किमपि शुद्धमन्नं दातुं न शक्यते। द्वारमप्युद्घाटयितुं न शक्यते भिक्षुभयाद्, ग्रहीतमप्यन्नं तपोधनानां हस्ताद् भिक्षवो गृह्णन्ति। धर्मध्यानमपि कर्तुं न शक्यते। यतः–" तदीदृग्दुःख-

संघट्टा—त्सङ्घमुद्धर्तुमर्हसि । प्रभूताद्भुतलब्धीना—मब्धीभूतोऽसि यत्प्रभो ॥ १ ॥ एवंविधं सङ्घं व्याकुलं दृष्ट्वा वज्रो दध्यौ । सति सामर्थ्ये यः सङ्घार्थे स्वां शक्तिं गोपयति स दुर्गतिभाग् भवति ॥ यतः—सङ्घस्तीर्थकृतामपि मान्यः । एवं ध्यात्वा द्रुतं वज्रस्वामी भुवनवत्सलः । विचक्रे चक्रभृच्चर्म-रत्नवद्विकटं पटम् ॥१॥ सङ्घं निवेश्य निःशेषं, तस्मिन्नन्तर्निविश्य च । विद्यां विद्योतयामास, वज्रो गगनगामिनीम् ॥ २ ॥ श्रीवज्रस्वामिना व्योमविद्यया नीयमानः पटो द्युसदां विमानं यातीन्ति भ्रान्तिं चकार। इतस्तदैव शय्यातरः कस्मैचित् कार्यार्थं गतः । तत्रागतश्च व्योमचालिनं वज्रं वीक्ष्य जगौ । पुराशय्यातरोऽहं वः, स्वामिन् साधर्मिकोऽधुना । तत् किं मामीदृशि स्थाने, मुक्त्वा यासि जगद्गुरो ! ॥१ ॥ एतच्छय्यातरवचः श्रुत्वा सूत्रार्थमिममस्मरत् वज्रः । यतः—“ये साधर्म्मिकवात्सल्ये, स्वाध्याये चरणेऽपि वा । दीर्घप्रभावनायां चो—द्युक्तास्तांस्तारयेन्मुनिः ॥ १ ॥” इत्यागमार्थं स्मृत्वा सुनन्दासूनुस्तस्मिन् विद्यापटे पर्यारोपयामास तम् । ततः सङ्घतनूतेजः—स्तोमैराशाः रविरिव प्रकाशयन् । पटश्चचाल विश्वस्य, सारोद्धार इवाम्बरे ॥ १ ॥ सर्वैर्गन्धर्वसिद्धाद्यै—र्वन्द्यमानः पदे पदे । भक्तिनम्राननं सङ्घं, मोदयामास वज्रराट् ॥ २ ॥ ततः श्रीवज्रस्वामी तं श्रीसङ्घं पटोपरिस्थं महापुरे आनयामास । तत्र सुभिक्षे जायमाने श्रीसङ्घः सुख्यभूत् । परस्परस्फुरद्वादा जैना जनाश्च

बौद्धाश्च मिथो विवदन्ते । जैनैर्नित्यं बौद्धास्तत्राजीयन्त । इतो वार्षिकपर्वणि समायाते बौद्धा जना बौद्धनृपोपान्ते गत्वा प्रोचुः । स्वामिन्नेषां जैनानामद्य वार्षिकं पर्व समायातमस्ति । तेन पुष्पाणि मालिकानां पार्श्वादात्मीयेषु प्रासादेषु आनीयन्ते । तत एतेषां गर्वोद्धतानां जैनानां गर्व उत्तरति । ततो राज्ञा तथा कृते श्राद्धाः श्रीवज्रस्वामिपार्श्वे गत्वा जगदुः । आत्मनो वार्षिकं पर्व समायातम् । तत्र पुष्पार्चां विना शोभा न भवति । राज्ञा तानि पुष्पाणि निषिद्धानि सन्ति । श्रीपूज्यपादा एव पुष्पानयने समर्था दुष्टनिग्रहे च । तीर्थावहेलना सत्यां शक्तौ न सहितव्या । यतः—"तीर्थोन्नतिकृते नित्यं, यतन्ते साधवोऽपि हि । तेनेह भवता स्वामिन्, कार्या तीर्थप्रभावना ॥ १ ॥" निशम्यैतद्वज्रस्वामी तीर्थोन्नतिकृते खगामिन्या विद्यया कृत्वा माहेश्वरीसमीपवने विस्मयावहे ययौ । धनगिरिपितुर्मित्रं मालिकस्ताडिताह्वो वज्रमागतं दृष्ट्वा मुदाऽवदत् । अद्यास्मि कृतकृत्योऽहं, वज्र त्वन्मुखवीक्षणात् । तथाप्यादिश कृत्यं मे, किमपि स्वमुखोक्तिभिः ॥१॥ वज्रस्वामी ततः प्राह—अस्माकं वार्षिकं पर्वदिनं कल्येऽस्ति । तेन पुष्पाणि महापुरपुरे विलोक्यन्ते जिनपूजार्थै । ततः स मालिकः एकविंशतिकोटिपुष्पाणि ददौ । ततः क्षुल्लहिमवन्तं ययौ, तत्र शाश्वतजिनान्नत्वा तत्रस्थदेवपार्श्वात्पुष्पाणि महापुरं प्रति चालयामास । ततो हुताशनयक्षवनादपि देवपार्श्वात् पुष्पाणि चालयामास । एवं वज्रस्वामी बहुभ्यो

वनेभ्यः पुष्पभृतानि करण्डकान्यानयामास । तदा तस्मिन् पर्वणि बहूनि पुष्पाणि देवैरानीतानि वीक्ष्य जिनालये महोत्सवं जायमानं चानेके बौद्धा मानं मुक्त्वा श्रीवज्रस्वामिपादान् नेमुः । राजापि बौद्धो जिनधर्म्मभक्तोऽभूत् । इतश्च दशपुरे पुरे सोमदेवो द्विजोऽभूत् । रुद्रसोमा जिनधर्मभाग् तस्य पत्न्यभूत् । तयोरुभौ सुतौ आर्यरक्षित-फल्गुरक्षितौ अभूताम् । अधीयानः सुधीर्मौञ्जी—बन्धादेवार्यरक्षितः । यावत्यभूत् पितुः पार्श्वे विद्यामादत्त तावतीम्
॥ १ ॥ ततोऽधिकविद्यार्थी पाटलीपुत्रं आर्यरक्षितो ययौ । तत्र सर्वविद्याविशारदो भूत्वा स्वपुरसमीपे समागात् । सर्वविद्यापारगं मत्वा संमुखमेत्य राजा तं गजारूढं कृत्वा महामहोत्सवपुरस्सरं नृपः पुरमध्ये आनिनाय । राज्ञा सन्मानितश्च धनदानात् । ततोऽनेकलोका उपायनपाणयस्तं सेवन्ते स्म । गृहस्य बहिःशालायां बन्दिभिः स्तूयमानोऽस्थात् । स्वजनास्तोरणस्वास्तिकादिकं चक्रुः । अन्येद्युरार्यरक्षितो दध्यौ मां धिक् । एवं पदवीं प्राप्तेनापि मया मातृपदौ न नतौ । आर्यरक्षितो दध्याविति । अस्मत्सुखैकसुखिनी—मस्मद्दुःखैकदुःखिनीम् । प्रवासद्रुफलैर्विद्या-वित्तैरानन्दयामि ताम्
॥१॥ एवं ध्यात्वा मध्येगृहं गत्वा मातृपदौ आर्यरक्षितो ननाम । माता जगौ-भो वत्स ! दीर्घायुर्भव । परं मातुस्तादृग् हर्षो न दृष्टः । पुत्रप्रेमान्वितां मातृवाणीमप्राप्यार्यरक्षितो दध्यौ । मयि माता किं प्रसन्नीभूय न वक्ति । कोऽपराधो मया कृतः । प्रणम्य

पप्रच्छ मातरम्। मातरहं भूरिशास्त्राणि अधीत्याऽऽगां तव किं हर्षों न दृश्यते। माताऽऽह-वत्स ! किमनया कुविद्यया नरकहेतुना। किं ताए विज्जाए, पयकोडीए पलालभूआए। जत्थ इत्तियं न नायं, परस्स पीडा न कायव्वा ॥ १ ॥ पुत्रः प्राह। मातः केन शास्त्रेण पठितेन ते हर्षः स्यान्माताऽऽह—वत्स ! यदि मातुर्भक्तोऽसि, तदा दृष्टिवादं मुक्तिसुखदमधीष्व। प्रवणो दृष्टिवादोक्तौ, श्रमणोपासको भव। विना दिनाधिपोपास्तिं, न दृश्यं हि महन्महः ॥ १ ॥ सूरिस्तोसलिपुत्रोऽस्ति, सदिक्षुवणसंश्रितः। भज तं दृष्टिवादाय, यष्टिमादाय भूयसीम् ॥ २ ॥ प्रातर्मातः करोमीद-मित्युदित्वाऽर्यरक्षितः। दृष्टिवादं कदाऽधीये ध्यायन्निति निशि स्थितः ॥ ३ ॥ प्रातर्मातापितरावा(वना)पृच्छय चचाल सः। पुरान्निर्गच्छन्नार्यरक्षितः केनचित् पृष्टः कोऽसि त्वं, सोऽवग्-अहमार्यरक्षितः। ततस्तेन पुरुषेणालिङ्ग्येदमुक्तम्। शाखापुराश्रयोऽहं त्वत्पितृमित्रं महाद्विजः गृहचिन्ताभरमग्नोऽस्मि। त्वमुत्सुकोऽपि प्रातरिमा इक्षुयष्टीः सार्द्धा नव गृहाण। ततस्ता इक्षुयष्टी गृहीत्वा जगौ। अहमग्रतः कार्यार्थी याताऽस्मि। त्वया इक्षुयष्ट्यर्पणवृतान्तो मम मातुरग्रे प्रोक्तव्यः। आर्यरक्षितोऽग्रतश्चचाल। विप्रेणार्यरक्षितस्वरूपे प्रोक्ते रुद्रसोमा दध्यौ। नव पूर्वाणि सार्द्धाणि मत्सुतो लप्स्यते। आर्यरक्षितोऽपि ध्यातवान् अहं सार्द्धनवपूर्वी भविष्यामि सार्द्धनवेक्षुप्राप्तेः गुरूनहं वन्दिष्ये इति ध्यायन्

यावच्छालाद्वारमगात् तावच्छ्रीगुरुभिः पाठ्यमानानां साधूनां मालवकीप्रमुखमन्द्ररवमाकर्ण्यार्यरक्षितो मुमुदे, वसतौ कथं केन विधिना प्रविश्यते इति च दध्यौ। तदा धार्मिको ढड्ढरो नैषेधकीं कुर्वन् वसतिद्वारं प्रविवेश। उच्चगीः ढड्ढरः प्रत्येकं गुरून् वन्दित्वाऽपरान् साधून् वन्दित्वा प्रमार्ज्य भूमिं स्थितः। ढड्ढरकृतं सर्वं वीक्ष्यार्यरक्षितस्तथैव सर्वान् वन्दित्वाऽस्थात्। सूरिणा ध्यातं को नूतनोऽयं श्राद्धः। यतो ढड्ढरमवन्दित्वोपविष्टः। पृष्टं च गुरुणा तव को गुरुः सोऽवग् ममायमेव श्राद्धो गुरुः। येनास्य पार्श्वात् मया ज्ञाता विधा। ततः पृष्टं गुरुणा कुत आयातो भवान्! कृती विनयपूर्वमार्यरक्षितः स्वं वृत्तान्तं सर्वं सोमदेवभूगुरुभ्य आचष्ट। भद्रभावं तं च मत्वा गौरवाद् गुरवो जगुः। दृष्टिवादं च परिव्रज्यां विनाऽध्येतुं न बुध्यते। सोमदेवसूनुः प्राह-तर्हि संयमं मह्यं देहि। ततो गुरुस्तं योग्यं पात्रं मत्वा दीक्षां दत्त्वाऽग्रतो विजहार। आर्यरक्षितो गुरुपार्श्वे पठन् स्तोकैरेव दिनैरेकादशाङ्गीमङ्गीचकार। आसीद्यावान् दृष्टिवादो गुरुपार्श्वे तावान् एष गुरुभिः पाठितः। ततः प्रोक्तं वत्स! यद्यधिकदृष्टिवादभणने वाञ्छाऽस्ति तदा वज्रस्वामिपार्श्वे गत्वा दृष्टिवादमधीष्व। तत आर्यरक्षितो महापुरीं प्रत्यचालीत्। उज्जयिन्यां भद्रगुप्ताचार्यसन्निधौ गतः। गुरवो वन्दिताः। गुरुभिरुपलक्ष्योक्तम्। वत्स! वर्यं कृतं यद ब्राह्मण्यमुन्मुच्य श्रामण्यं गृहीतम्। गुरुभिरुक्तं च अहं वृद्धोऽभूवम्।

तेनानशनं गृहीष्येऽद्य । गृहीतानशनः श्रीभद्रगुप्तसूरिरवादीत् । वज्रपार्श्वे गच्छ, तत्र दृष्टिवादं पठेः । वज्रपार्श्वे विद्यां गृह्णता त्वया पृथगुपाश्रये स्थेयं भोक्तव्यं च कारणमस्ति । तत्र यः श्रीवज्रमण्डल्यां बुभुजे स तेन सार्द्धमनशनं ग्रहीता भविष्यति । तथेति गुरुवचः प्रतिपद्य निर्यामणां गुरोः कारयित्वाऽऽर्यरक्षितो वज्रस्वामि-पार्श्वे दृष्टिवादं पठितुमचालीत् । वज्रः स्वप्नमितोऽद्राक्षीत्, कोऽप्यागत्य मदन्तिकात् । पपौ भूरितरं क्षीर–मवशिष्टं किमप्यभूत् ॥ १ ॥ स्वप्नस्यार्थं प्रगे वज्रः शिष्याणामग्रे प्राह-कोऽप्यपूर्वस्तादृशः शिष्यः समेष्यति । यो न्यूनां दश-पूर्वीमस्मत्पार्श्वात् गृहीष्यति । अस्मिन्नवसरेऽकस्मादार्यरक्षितो नैषेधिकीकरणपूर्वं वसतिमध्ये प्रविश्य श्रीवज्रस्वामिनं ववन्दे । स पृष्टः श्रीवज्रेणागमनकारणं सर्वं जगौ । श्रीभद्रगुप्तवाचानुज्ञाप्य भिन्नं प्रतिश्रुत्य दृष्टिवादमधीयायार्य-रक्षितः । नवपूर्वी पठित्वा दशमस्य विषमं यमकव्रजं पठत्यार्यरक्षिते पितुः संदेशा आययुः । वत्स त्वां विना वयं दुःखिता जाताः । तेनात्रागमनेन नः सुखिनः कुरु । ततस्तत्पूर्वं त्वरितमध्येतुं प्रवृत्तः । इतः फल्गुरक्षितोऽनुजोऽभ्ये-त्यार्यरक्षितं प्रति जगौ । यदि मातृपितृविषये वात्सल्यमस्ति ते तदा तत्रागत्य मातापित्रादिबन्धून् प्रमोदय । केचित् प्रव्रज्यार्थिनः सन्ति बान्धवाः । अथार्यरक्षितोऽवग्–वत्स गमिष्यते तत्र, दीक्षा रोचते तव तदा गृहाण । ततः फल्गु-

रक्षितोऽपि दीक्षां जग्राह । पुनर्भ्रात्रा गन्तुं तत्रोत्साहितो जगौ । श्रीवज्रपार्श्वे कियद्दशमतः पूर्वादधीतं मया कियदुद्धरितं गुरुभिरुक्तम् । एको बिन्दुरधीतोऽस्ति दशमपूर्वाम्बुधेः । ततः सविशेषं पठन् दशमपूर्वार्द्धं पपाठाधिकं नायाति । ततश्चिन्तितं पूर्वं पुरान्निर्गच्छतो मम सार्द्धा नव इक्षुयष्टयो दत्ता जनकमित्रेण । तेनाधिकं नायास्यति मम । ततः प्राप्तसूरिपद आर्यरक्षितो भ्रातृयुतो गुरुं प्रणम्य चलितः क्रमाद्दशपुरं पुरं समागात्।पुरीप्रवेशकरणपूर्वं पुरमध्ये आगत आर्यरक्षितः। नृपादिसर्वलोकैर्धर्मोपदेशः श्रुतः । तैश्चिन्तितं च एवंविधो धर्मोपदेशः कुत्रापि .न श्रुतः । राजा श्राद्धोऽभूत् । सोमदेवः प्रबुद्धो दीक्षां जग्राह । यथा च सम्यक्चारित्रं प्रपेदे स सम्बन्ध आर्यरक्षितचरित्राद् ज्ञेयः । इतः श्रीवज्रोऽन्यदा विहरन् दक्षिणां दिशं ययौ । तत्रस्थोऽन्यदा श्लेष्माऽऽकुलो यतिभिराग्रहात् द्विविधं प्रत्याख्यानं कारितो वज्रस्वामी सुंठीं वारां कुर्वन् कर्णपुटस्थितां चकार । पश्चाद् ग्रहणार्थं स्वाध्यायरसेन तां विसस्मार । प्रतिक्रमणक्षणे मुखवस्त्रिकानुन्नां सुंठीमग्रे पतितां वीक्ष्य दध्यौ । धिग् मां यत ईदृशः प्रमादोऽभूत् । अतः परं ममाल्पायुर्विद्यते ईदृग्प्रमाददर्शनात् । तत्तनोमि देहत्यागमनशनग्रहणात् । तदा द्वादशाब्दे दुर्भिक्षे जायमाने स्वशिष्यमन्यतो वज्रो व्यहारयत् वज्रसेनम् । तादृशे दुर्भिक्षे जायमाने भिक्षामलभमानांस्तपोधनान् वीक्ष्य विद्याबलाहृतेनान्नेन युष्मान् पोषयामीत्यादिशत्

वज्रसेनः । तथा च—" सव्वत्थ संयमं संजमाउ, अप्पाणमेवरक्खिज्जा । मुच्चइ अववायाओ, पुणो विसोही न से विरई ॥१॥" अथ मुनयो गुरून् विज्ञपयामासुः । "पिंडं असोहयंतो, अचरित्ती इत्थ संसओ नत्थि । चारित्तंमि असंते, सव्वा किरिया निरत्थया ॥ १ ॥" तथा च—"भुक्तोज्झिता मुहुर्मोहा—दमी सर्वेऽपि पुद्गलाः । उच्छिष्टेष्विव तेष्वद्य, विज्ञानां का स्पृहा पुनः ॥२॥" ततो वयममुमन्नमपहातुमीहामहे । एवं वज्रसेनं परिज्ञाप्य श्रीवज्रपार्श्वे पञ्चशतशिष्याः समागता इति तदनुमतो निःसीमसौभाग्यनिधिर्भगवान् वज्रस्वामी वज्रसेनवर्जं पञ्चशत्या तपोधनैः समं कृपया कापि ग्रामे क्षुल्लकमेकं विप्रतार्य स्वयं गिरिमारुरोह । स शिष्यो गुरोरप्रीतिपरिहाराय गिरेरधः स्थितोऽपि व्युत्सृष्टचतुर्विधाहारः कापि शिलातले तदा नवनीतपिण्डवद्विलीनः सुरलोकमाप । तत्र तद्वपुःपूजार्थं सुरानापततो वीक्ष्य परिवारेण विज्ञता गुरवः क्षुल्लकवृत्तान्तं श्रुतोपयोगात् आख्यातवन्तः । तत्र गिरौ कापि देवता मिथ्यादृग् चालयितुं वज्रं यतियुतं समागात् । चालितोऽपि वज्रस्तया न चलितः । ततो वज्रस्तस्या देव्या अप्रीतिं मत्वाऽन्यत्र गत्वा कृतक्षेत्रदेवीकायोत्सर्गः स्वर्गं प्राप ! ते शिष्या अपि स्वर्गं प्रापुः ततस्तत्रागत्येन्द्रस्तं तीर्थमित्युक्त्वाऽनंसीत् । अथ वज्रसेनस्ताच्छिष्यः सोपारकपत्तने गतो जिनदत्तगृहे । तेन श्रेष्ठिना ईश्वरीपत्न्या च स गुरुर्नमस्कृतः । पिप्य-

माणं विषं दृष्ट्वा गुरुणा प्रोक्तं किं क्रियतेऽधुना ? श्रेष्ठी जगौ—द्वादशवर्षमितो दुर्भिक्षोऽभूत् । धनमस्ति धान्यं स्तोकमपि न लभ्यते । लक्षद्रव्येण इयत् धान्यमानीतमस्ति । अस्य मध्ये विषप्रक्षेपं कृत्वा भुक्त्वा च प्राणत्यागः कुटुम्बेन सह मया करिष्यते । गुरुणोक्तं—कल्ये बहूनि धान्यपूर्णानि यानानि समेष्यन्ति तेनेदं न कर्तव्यम् । श्रेष्ठिनोक्तम्—श्रीपूज्यपादोक्तं यदि भविष्यति सत्यं तदाऽमी चत्वारः सुता दीक्षां गृहीष्यन्ति श्रीपूज्यपादान्ते । ततः प्रातः सुभिक्षेऽन्नागमनाज्जाते सकुटुम्बः श्रेष्ठी वज्रसेनमुनेः पार्श्वे प्रवव्राज । ते चामी—नागेन्द्र १ चन्द्र २ विद्याधर ३ निर्वृत्ति ४ नामानः सुताः चत्वारः क्रमादाचार्या जाताः । यतः—" गुर्वाज्ञां मस्तके धृत्वा, सर्वज्ञाज्ञानुपालनम् । तज्जायते ततस्तत्र, यथास्यादपुनर्भवः ॥ १ ॥ ततो नागेन्द्रादिभ्य आचार्येभ्यश्चत्वारः शाखा अभूवन् । सोपारकपत्तनेऽद्यापि श्रीवृषभप्रासादे एतेषां मूर्तयो दृश्यन्ते । ॥ इति श्रीवज्रस्वामिचरित्रं समाप्तम् ॥ ११ ॥

कुर्वाणोऽग्रं तपो नित्यं, दुष्टं कर्मापि निर्मितम् । जीवो भिनत्ति तत्कालं, नन्दिषेणमुनीशवत् ॥ १ ॥

तथाहि । आसीच्छ्रीपुरं पुरं स्वर्गसंनिभम् । तत्र मखप्रियाह्वो विप्रो वसति स्म । अन्यदा भीमाह्वं दासमासन्नकार्याय

न्ययुङ्क्त मखप्रियः स दासस्तं प्रत्यवग्—मखशेषं मह्यं यदि ददासि तदोत्तिष्ठामि नान्यथा। विप्रोऽपि प्रतिपेदे तदीयं वचः। लब्धं लब्धं भीमः साधवे ददाति। तैः पुण्यैः स दिवं गत्वा, च्युत्वा राजगृहे पुरे। श्रेणिकक्षोणिभुग्पुत्रो, नन्दिषेणाभिधोऽभवत् ॥ १ ॥ मखप्रियस्तु भूरिषु भवेषु भ्रान्त्वा वने करिण्या उदरेऽवततार। अस्य यूथस्याधिपोऽन्यो माभूदिति धिया ध्यायन् यूथाधिपतिर्जातं जातमपत्यं हन्ति स्म। स्वान्यपत्यानि यूथपतिना हन्यमानानि दृष्ट्वा दन्तिनी दध्यौ। तनूजरक्षणोत्साहो विद्यते मम। तेन ज्ञायते यः पुत्रोऽधुना भविष्यति स नमितारिर्भावी। तेन जातमात्र एव मया त्रातव्योऽन्यत्र मुक्त्वा इति ध्यात्वा मायया वातग्रस्तीभूय मन्दं मन्दं पश्चात् पतति युथस्य। पशूनामप्यपत्येषु मोहो भवति। यतः "आदाय मांसमखिलं स्तनवर्जमङ्गात्, मां मुञ्च वागुरिक! यामि कुरु प्रसादम्। अद्यापि शष्यक-वलग्रहणानभिज्ञा, मन्मार्गमार्गणपराः शिशवो मदीयाः ॥ १ ॥" असौ करिण्यन्यभोग्या मा भवतु। अतः क्षणं प्रतीक्ष्यते। सा तु मन्दं मन्दं चलन्ती घट्या घटीद्वयेन च पत्युर्मीलति। एवं क्रमात् दिनेन दिनद्वयेन च मिलति। हस्ती दध्यौ इयं पत्नी वातग्रस्ताऽभूत्। किं क्रियते। ततोऽभूद्यूथपो विश्रम्भचेताः। कदाचित् प्रसवसमयं मत्वा दूरस्थे यूथपे मौलितृणपूला तापसाऽऽश्रमं ययौ। विनयवतीं करिणीं शरणार्थिनीमिव मत्वा मुनयः प्रोचुः। पुत्रि! तिष्ठ

इह निर्भया । तत्रस्था तस्मिन्नहनि गजं सुलक्षणोपेतमसूत सा हस्तिनी। तं बालं तत्रैव मुक्त्वा मन्दं मन्दं यूथपार्श्वे गता । पयः पाययितुं बालं समायाति चान्तरा । तापसैर्ग्रासदानेन कलभो वृद्धिं नीतः तापसबालैः सह स कलभः करकोटरं पयःपूर्णं कृत्वा वृक्षान् सिञ्चति स्म । ततो मुनिभिः सेचनक इति नाम दत्तम् । सेचनकः क्रमाद्विक्रमी बभूव । सेचनकोऽन्यदा नदीं गतः पानीयं पातुम् । तं पितरं यूथपं युद्धेन हत्वा यूथपतिर्बभूव सेचनकः क्रमात्, स हस्ती दध्यौ । तापसाऽऽश्रमेऽस्मिन् मन्माताऽहं छलेन पतिं वञ्चयित्वा जनितो वर्धितश्च। माऽपरा करोत्यस्मिन्नाश्रमस्था इति ध्यायन् दन्ती तमाश्रमं बभञ्ज । अयं दुर्मत्तो हस्ती अस्माकमाश्रमान् भङ्क्ष्यति इति ध्यात्वा तापसाः सेचनकस्वरूपमाचख्युः श्रेणिकभूपस्याग्रे । ततः श्रेणिकः सेनां संनह्य तं हस्तिनं धर्तुं वने गतः । छलेन बलेनापि कोऽपि तं गजं वशीकर्तुं न शक्नोति । तदा राजा विषण्णोऽभूत् । विषण्णं तातमालोक्य सानन्दनन्दिषेणस्तं हस्तिनं वशीकर्तुं स्वयमुत्थितः। नन्दिषेणं समायान्तं वीक्ष्योहापोहपरो जातजातिस्मृतिः पूर्वभवसम्बन्धिनमवगत्योर्द्ध्वस्तरथौ । तं करिणं वशीकृत्य श्रीश्रेणिकभूपाय ताताय ददौ नन्दिषेणः । ततो राजा तं सेचनकहस्तिनं पट्टहस्तिनं चकार । पुत्रं सविशेषं ग्रासाद्यर्पणात् प्रीणयामास भूपः । इत श्रीवीरः पुरोद्याने समवासार्षीत् । नन्दिषेणोऽन्यदा श्रीवीरपार्श्वे

धर्मोपदेशमाकर्ण्य पप्रच्छ भगवन्! अयं गजो मयि कथं प्रीतिपरोऽभूत्। ततो भगवता तस्य प्राग्भववृत्तान्तः प्रोक्तः। इतः श्रेणिकप्रभृतिलोको धर्मं श्रोतुं तत्रागात। तथाहि—माणुस्सखित्तजाई कुलरूवारुग्गमाउयं बुद्धी। सवणं गहणं सद्धा, संजमो लोगंमि दुलहाइं॥१॥ इति श्रुत्वा भगवद्वाणीं प्रबुद्धो नन्दिषेणः संयमं ममार्ग प्रभुपार्श्वे। प्रभुणोक्तम्-चारित्रावरण-कर्मभोगफलं च बलवत। विद्यतेऽद्यापि दीक्षायै, मा भूद्वत्स समुत्सुकः॥१॥ ततः प्रभुणा वार्यमाणोऽपि दीक्षां जिघृक्षुरभूद्या-वत्तावदाकाशे इति दिव्या वाणी जाता। मा ग्रहीस्त्वं दीक्षां भोगफलं विद्यते तव। एवमुक्तेऽपि नन्दिषेणो दीक्षां जग्राह नन्दिषेणः प्रमोदात् षष्ठाष्टमादितपःपरोऽविश्रमं विजहारानुप्रभुं वीरम्। सूत्रार्थवाचनापरो द्वादश भावना भावयन् द्वाविंशतिं २२ परीषहान् सहमानः कर्मद्रुमुन्मूलयामास॥ तथाहि—"खुहापिवासासीउन्ह—दंसाचेलारइत्थिय। चरियानिसीहिआ सिज्जा अक्कोसवहजायणा॥ १॥ अलाभरोगतणफासा, मलसक्कारपरीसहा। पण्णाअन्नाणसमत्तं, इय बावीसपरीसहा॥२॥" अथोद्भवन्तीं भोगेच्छां भोगकर्मोदयाद्रोद्धुं तपः प्रबलं करोति नन्दिषेणः आतापनां करोति स वा। यतः—"आयावयंति गिम्हेसु, हेमंतेसु अवाउडा। वासासु पडिसंलीणा, संजयासु समाहिया॥ १॥" चारित्रवारिणी देवता नित्यं तस्य भोगाम्बुधौ पातयितुं यततेस्माततश्चारित्रं रक्षितुं पर्वतमारुह्य झंपां दातुकामोऽभून्नन्दिषेणो

यावत्तावत्तं पतन्तं करे धृत्वाऽन्यत्र मुक्त्वा देवतोवाच। किं मुधा मर्तुं यतसे।भोगफलमभुक्त्वा न मृतिं यास्यसि। तत एकाकी तीव्रतपःपरो नन्दिषेणोऽन्यदाऽनाभोगात् कस्याश्चिद्वेश्याया गृहे आहारार्थं प्रविष्टो धर्मलाभमुच्चचार। वेश्याऽप्याह सहासेयं, धर्मलाभेन किं मम। शर्मलाभं धनेनाह—मीहे सप्रत्ययं यतः ॥१॥ मामियं हसतीति मानात्तीव्रात्तृणमाचकर्ष ऋषिर्यावत्तावद्रत्नकोटिर्द्वादशमिता व्योम्नोऽपतत् तस्य तपोलब्ध्या। शर्मलाभोऽनेन धनेन तवास्त्विति कथयित्वा यावद्यातिर्यातिं, तावद्वेश्ययोक्तम्-किन्ते तपोभिर्मृदुता-जितपुष्कलदुष्करैः।भोगान् भुंक्ष्व मया प्राण-भर्तर्मर्तव्यमन्यथा ॥२॥ततो मुनिर्देव्युक्तं भोगफलं मत्वा तां वेश्यामङ्गीचक्रे।ततस्तत्र धर्मोपदेशेन प्रतिदिनं दश दश नटविटान् प्रबोध्य दीक्षां ग्राहयित्वा मया भोक्तव्यमित्यभिग्रहं नन्दिषेणो ललौ। मुक्तार्षलिङ्गः स तया सह भोगान् भुञ्जानो दिनं प्रति दश दश जनान् प्रतिबोध्य दीक्षां ग्राहयामास। अन्यदा द्वादशवर्षान्ते भोजनवेलायां जातायामपि यदा दशमो नरो नाभिलत् तदा द्वित्रिवारं रसवत्यां कृतायामकस्माद् हास्येन वेश्ययोक्तम्—स्वामिन्नुचिष्ठ भुंक्ष्व। अद्य दशमो भवानेव भवतु। ततस्तस्या एव तद्वचोऽङ्गीकृत्य तां जल्पन्तीमपि तृणमिव त्यक्त्वा पुनर्गुरुपार्श्वे गत्वाऽऽलोचनां सम्यग् गृहीत्वा दीक्षां लात्वा तीव्रं तपस्तप्त्वा कर्मक्षयं च कृत्वा मुक्तिसुखं नन्दिषेणः प्राप ॥

॥ इति नन्दिषेणकथा समाप्ता ॥

वैयावृत्यं वितन्वानः साधूनां वरभावतः । बध्नाति तनुमान् नन्दि-षेणवत्कर्म सुन्दरम् ॥ १ ॥

तथाहि——मगधदेशभूषणे नन्दिग्रामे सोमिलो द्विजो वसति स्म । तस्य सोमिला पत्न्यभूत् । तयोर्नन्दनो नन्दिषेणोऽभूत् । बाल्ये तस्य पितरौ मृतौ । आकेशनखपर्यन्तं तं कुरूपं नन्दिषेणं दौर्भाग्यकर्मोदयं मत्वा स्वजनैरपि तत्यजे स मातुलगृहे स्थितः चारिपानीयानयनादिकर्म करोति स्म । अन्यदा दुःखितं भागिनेयं विनयपरं मत्वा मातुलो जगौ । मा खेदं कुरु, मम सप्त कन्यकाः सन्ति । ताभ्य एकां कन्यां तुभ्यं दास्ये । ततो विशेषतस्तस्य गृहकर्माणि सोत्साहं कुरुते स्म । मत्वा पितृचेष्टितं नन्दिषेणपरिणयनस्वरूपगर्भितं प्रथमा कन्या तातान्रे जगौ यद्यहं नन्दिषेणाय त्वया दास्यते तदा मया मर्तव्यमेव । तच्छ्रुत्वा नन्दिषेणं व्याकुलं चिन्तापरं मत्वा मातुलोऽवग्—द्वितीयां कन्यां तुभ्यं दास्याम्यहं मा विषादं कुरु । द्वितीयाऽपि तथैव श्रुत्वा प्रथमपुत्रीवज्जगौ एवमन्याभिः प्रतिषिद्धो नन्दिषेणो विषादमापन्नः । तं विषण्णं मत्वा मातुलोऽवग्—कस्याप्यन्यस्य पुत्रीं तुभ्यं दापयिष्यामि । ततोऽन्या या या कन्या तस्यार्थं मातुलेनानीता सा सा दौर्भाग्यकर्मोदयात्तं नेहते दृष्ट्या मनसापि । ततो नन्दिषेणो विषण्णो दध्यौ । अत्र किं स्थीयते मया यदीदृशं कर्म समायातं मरणमेव क्रियते मया । एवं ध्यात्वा नन्दिषेणो

विषण्णो वैराग्यवासितः रत्नपुरं पुरं गतः। तत्रापि दम्पती भोगपरौ वीक्ष्य स्वं निनिन्द । अहमीदृगभाग्यवानभूवम्। ततो वने गतो नन्दिषेणो भृगुपातचिकीर्षुः कायोत्सर्गस्थमुनिना वारितः। तं प्रणम्य स्वकर्मस्वरूपं जगौ यतः— " रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः।" मुनिर्ज्ञानात्तद्भावमुद्भाव्याभाषत—मुग्ध! वैरूप्यवैराग्यात् मा कुरुष्व मृतिं, मरणेन कोऽपि पश्चात्कृतकर्मणो न छुटति। यतः—" कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥ १ ॥" तस्माद्धर्मेण श्रीवीतरागोदितेन कृतेन तत् प्राक्कृतं कर्म छिनत्ति जनः। तस्माद्यावज्जीवं शुद्धधर्मं कुरु। येन भवान्तरे सुखी भवसि त्वं, इत्यादिधर्मोपदेशात् प्रबुद्धो नन्दिषेणो गुरुपार्श्वे जग्राह व्रतम्। नन्दिषेणो विनयपूर्वं पठन् धर्म्मशास्त्रं गीतार्थोऽभूत्। ततोऽभिग्रहं च ललाविति। साधूनां लघुवृद्धग्लानानां वैयावृत्यं कृत्वैव मया भोक्तव्यम्। अनिर्वेदेन तं साधुं साधुवैयावृत्त्यं कुर्वाणमवाधिना विज्ञाय शक्र एकदा संसदि जगौ—यादृशो नन्दिषेणो वैयावृत्त्यविषये निश्चलोऽस्ति तादृशोऽन्यः कोऽपि नास्ति। देवैरपि न चाल्यते स्वाभिग्रहात्। ततोऽश्रद्दधानः कश्चित् सुर इन्द्रवचो निशम्य रत्नपुरोपान्तेऽभ्येत्यैकेन रूपेण ग्लानसाधुरभवत्। तं साधुमतिसारिणं मुक्त्वा द्वितीयः साधुरूपभृत् नन्दिषेणपार्श्वे यावच्छालामागात्तावन्नंदिषेणो विहृत्य शालामागत्ये-

र्यापथिकीं प्रतिक्रम्य भक्तपानप्रत्याख्यानं पारयित्वा भोक्तुमुपविशन्नभूत् । साधुः प्राघूर्णकोऽवग् भो साधो ! त्वयाऽभिग्रहो गृहीतोऽस्ति । कथं साधुवैयावृत्त्यमकृत्वा भोक्तुमुपविश्यते । साधुं नन्दिषेणोऽवग्—क्वास्ति साधुर्ग्लानः । प्राघूर्णकोऽवक्–पुराद् बहिरस्ति । तेन पानीयं शुद्धं बहु गृहाण । तस्य साधोस्तृषा लग्नाऽस्ति । ततो नन्दिषेणः पानीयं प्रासुकं विहर्तुममत्रं लात्वा गतः श्राद्धगृहे । यत्र यत्र स साधुर्याति, तत्र तत्र देवोऽशुद्धं जलं करोति । अविषण्णो बहुषु गृहेषु भ्रमन् मुनिरकस्मात् लब्धिप्रभावेण सुरशक्तिं विजित्य जलं शुद्धं प्राप्य ततस्तेन प्राघूर्णकसाधुना समं बहिरुद्याने नन्दिषेणः साधुसमीपे ययौ । तं साधुं तादृशमतीसारिणं दृष्ट्वाऽनेन वैयावृत्त्येनाहं कृतकृत्यो भविष्यामि इति मत्वा मुनिं प्रक्षालयितुं प्रवृत्तः । यथा यथा नन्दिषेणस्तं प्रक्षालयति तथा तथा स साधुर्दुर्गन्धमतीसारं मुञ्चति । नन्दिषेणो दध्यौ अहो अयमेष साधुर्भाग्यवानपि ईदृग्रोगभागभूत् । ततः कर्मभ्यः कोऽपि राजा रङ्को वा यतिः शक्रो वा न छुटति । ततस्तं साधुं स्कन्धे कृत्वा पौषधशालायां नेतुं नन्दिषेणश्चचाल । पदे पदे हदन् दुर्गन्धं कर्कशं च जल्पन् नन्दिषेणशरीरं लिम्पति विष्टया दुर्गन्धया । तथापि नन्दिषेणो न मनाग् दुर्गंछां चकार । ततो यदा त्वरितं चलति नन्दिषेणस्तदा साधुर्जल्पति । एवंविधेन चलनेन मम प्राणा गमिष्यन्ति ।

तवातीव वर्योऽभिग्रहो येन त्वया एवंविधं कर्म क्रियते । ततो यावन्मन्दं मन्दं गच्छन्नभून्नन्दिषेणस्तावज्जगाद । वर्त्मनि कदाऽपि मम मरणं भविष्यति ततो दुर्गतिपातो भावी । आराधना अपि मम न भविष्यति । ततो नन्दिषेणस्तं साधुं तथाभूतं शालायामानीय दध्यौ । अयं साधुर्मया कथं नीरोगः करिष्यते इति स्वं निनिन्द । ततस्तं वैयावृत्त्ये मेरुनिश्चलं मत्वा देवता प्रत्यक्षीभूय सर्वं विष्ठादिकमपसंहृत्य पुष्पवृष्टिं तन्मस्तकोपरि कृत्वा प्राह त्वं धन्योऽसि । यादृशो वासवेन वर्णितस्ततोऽधिकोऽसि । ततस्तं मुनिं नत्वा क्षमयित्वा सुरः स्वर्गे गतः । स यतिर्द्वादशसहस्राब्दीं तपस्तप्त्वा कृतानशनोऽन्यदाऽभूत् । तदाऽनशनिनं वन्दितुं सान्तःपुरचक्री प्राप । तस्य तदन्तःपुरीसुकुमारकुन्तलस्पर्शं दृष्ट्वा निदानं चकार । स्त्रीवल्लभोऽहं भवेयमिति । प्रान्ते स्वं दौर्भाग्यं कर्म स्मृत्वा निदानमिदमकरोत् । भूयासमहं स्त्रीवल्लभोऽनेन तपसा । महाशुक्रेऽसौ मृत्वा देवोऽभूत् । इतः सूर्यपुरेऽधकवृष्णेः सुभद्रायां नवाऽभवन् पुत्रास्ते चामी--समुद्रविजयोऽक्षोभ्य-स्तिमितः सागरस्तथा । हिमवानचलः धरणः, पूरणः अभिचन्द्रः ॥ १ ॥ ततो देवलोकात् च्युत्वा नन्दिषेणजीवो दशमः पुत्रो वसुदेवोऽभूत् । तेन सौभाग्यकर्मणा द्वासप्ततिसहस्रामिताः कन्याः परिणीताः । तच्च विस्तरात् वसुदेवहिंडिनेमिचरित्रादवगन्तव्यम् । इति नन्दिषेणकथा समाप्ता ॥

सिंहागिरिकथा वज्रस्वामिकथाया ज्ञातव्या ॥ १२ ॥

दानादिकं वृषं कुर्वन्, शश्वत् भव्यजनः स्फुटम् । कृतपुण्य इवाप्नोति, परत्रेह सुखश्रियम् ॥ १ ॥

भूमिभामामहाभाल–विभूषणसहोदरम् । पुरं राजगृहं नाम्ना, राजते स्वःपुरीनिभम् ॥ २ ॥ राजा श्रेणिकनामाऽभूत् तत्राराातितमोऽर्यमा । पालयति स पृथिवीं, न्यायमार्गेण संततम् ॥ ३ ॥ धनेश्वराभिधः सार्थ–वाहो भूरिधनेश्वरः । सुभद्रेति प्रिया तस्याऽऽ–सीत्सच्छीलशालिनी ॥४॥ क्रमात् कृतपुण्य इति पुत्रोऽजनि तस्य श्रेष्ठिनः पूर्वपुण्योदयात् । क्रमाद्वर्धमानः सर्वकलाकुशलोऽजनि कृतपुण्यः । श्रीदश्रेष्ठिनः पुत्रीं धन्यां मातापितृभ्यां कृतपुण्यः परिणायितः । साधुपार्श्वे तिष्ठन् विषयेपु पराङ्मुखोऽभूत् कृतपुण्यः । ततो मातापितृभ्यां चिन्तितम् । एष कदाचित् प्रव्रज्यां गृहीष्यति तदाऽऽत्मनोः का गतिः । तेन गणिकापार्श्वे मुच्यते । तत्र नटविटादिताद्दग्संयोगात्ताद्दशो भविता । यतः–" अंबस्स य निंबस्स य, दुन्हंपि समागयाइ मूलाइं । संसग्गीइ विणट्ठो, अंबो निंबत्तणं पत्तो ॥ १ ॥" ततो धनेश्वरेण नटविटगणिकापार्श्वे मुक्तः कृतपुण्यः । ततस्तथा शिक्षितः कृतपुण्यो यथा क्रमाद्गणिकाऽऽसक्तः सन् मातापितरावपि न स्मरति स्म । क्रमाद्विशेपतोऽनङ्गसेनागणिकापार्श्वे कामितः सन् कृतपुण्यः क्षणमपि न मुञ्चते । मातापितरौ सर्वं धनादि तस्य भोगार्थं प्रेषयतः

स्म । तस्य तत्र तिष्ठतो द्वादशाब्दानि क्षणवत् जातानि । इतोऽकस्मादुत्पन्नतीव्रज्वरौ मातापितरौ स्वर्गं जग्मतुः । अन्येद्युः सा कुट्टिनी स्वां चेटीं धनानयनार्थं कृतपुण्यगृहे प्रेषयामास । चेटी तत्र गता तादृशं पतितप्रायं गृहं शून्यं विलोक्य कृतपुण्यप्रियान्तिके गत्वा जगौ—कल्याणि! तव कान्तेन, प्रेषिताऽस्मि त्वदन्तिके । विज्ञातुं कुशलोदन्तं, धनं चानेतुमञ्जसा ॥ १ ॥ तव कान्तेनास्मत्स्वामिनीपार्श्वस्थेन धनमानयितुमहमत्र प्रेषिताऽस्मि तेन धनमर्प्पय । तव कान्तः कुशली सन् स्वगृहकुशलादि पृच्छति स्म । सा धन्याऽतीव प्रसन्नाऽऽस्या जगौ-सखि! कान्तस्य तस्याऽऽज्ञा, मम सीमन्तलेखिनी । किमाचक्षे पुनः क्षेमं, दैवे प्रातीपिके सति ॥ १ ॥ त्वमत्र धनानयनकृते आगास्तद्वरं पुनस्तस्य कान्तस्याज्ञा मया मस्तके कृता । अद्याहमेतया कृतार्थास्मि । किं क्रियते मदभाग्यात्तादृग् श्वश्रूश्वशुरौ स्वर्गं गतौ । श्वश्रूश्वशुराभ्यां धनं प्रेषं प्रेषं पुत्रस्नेहाद् गृहमीदृशं कृतम् । अधुना मत्पार्श्वे मत्पित्रार्पितमाभरणमेकं विद्यते । तद् गृहीत्वा गच्छ । तत्रानेन भपणेन मत्कान्तं प्रमोदय।तदाभरणमादाय दासी कृतपुण्यपार्श्वे आगता। अर्पितं तदाभरणं तस्मै प्रोक्तं च गृहस्वरूपम् । ततः कृतपुण्यः खिन्नः सन् तदाभरणं तस्यै वेश्यायै दत्तवान् । वेश्यायै च कृतपुण्यो गृहस्वरूपं प्रोक्तवान् । ततो रहोवृत्त्या कुट्टिन्या प्रोक्तम्—असौ कृतपुण्य उपायेन निष्कासनीयः । ततस्तस्या कुट्टिन्या आदेशाद्यदा (दासी) तस्याभिमुखं धूलि-

प्रक्षेपादि करोति। तदाऽनङ्गसेना मातुरग्रे जल्पति। एष गुणवान् एतावन्ति वर्षाण्यत्र स्थितोऽभूत्। बहुधनमस्य भक्षितमावाभ्यां कथमधुनैवंविधा विडंबना क्रियते। कुट्टिनी जगौ-आत्मनः कुलाचार एवंविधो विद्यते। यावत्तस्य कामुकस्य गृहे धनं भवत्यर्पयति च तावन्मन्यते नान्यथा। एवंविधां वार्तां श्रुत्वा कृतपुण्यो दध्यौ। मनस्यन्यद्वचस्यन्यत्, क्रियायामन्यदेव हि। यासां साधारणस्त्रीणां, ताः कथं सुखहेतवे ॥१॥ कुष्ठिनोऽपि स्मरसमान्, पश्यन्तीं धनकांक्षया। तन्वन्तीं कृत्रिमं स्नेहं, निस्नेहां गणिकां त्यजेत् ॥ २ ॥ मांसमिश्रं सुरामिश्र—मनेकविटचुम्बितम्। को वेश्यावदनं चुम्बे—दुच्छिष्टमिव भोजनम् ॥ ३ ॥ इत्यादि। ततः कुट्टिनीकृतां विडम्बनां सहित्वा कृतपुण्यः स्वगृहगमनाय चचाल। गृहसमीपेऽभ्येत्य पतितप्रायं गृहं दृष्ट्वा यावत् कृतपुण्यो द्वारमुपाययौ। तावत् पत्नी कान्तमागच्छन्तं वीक्ष्य हृष्टचित्ता जलपूर्णकरकं हस्ते गृहीत्वाऽऽचमनाय संमुखमाययौ। ततस्तया वितीर्णमाचमनं लात्वा गृहमध्येऽभ्येत्य प्रियामुक्तासनमुपविष्टः। ततः प्रियया भोजनसामग्री कृता। कृतपुण्यः कृतस्नानो देवगृहे जिनमार्चित्वा वर्यपुष्पैः स्तोत्रेण स्तुत्वा च बुभुजे। कृतपुण्यस्य कान्तस्य सर्वः स्वगृहवृत्तान्तः प्रियया प्रोक्तः। ततस्तेनेति चिन्तितम्। अहो अहमभाग्यशिरोमणिः यतो मातापितृभ्यां सुखं न दत्तं तेन पुत्रेण जातेन किम्। यतः—" किं जातैर्ब-

हुभिः पुत्रैः, शोकसन्तापकारकैः । वरमेकः कुलाऽऽलम्बी, यत्र विश्राम्यति कुलम् ॥ १ ॥ यैर्वृद्धिं नीयते धर्म्मो, बन्धुवर्गकुले यशः । पितुः पुत्रास्त एव स्यु-र्वैरिणः स्वैरिणः परे ॥ १ ॥ इक्षुक्षेत्रवंशजालीकदलीविषपादपाः । फले जाते विनश्यन्ति, दुष्पुत्रेण कुलं यथा ॥ २ ॥" पितरौ यन्मयाऽगाधे, क्षिप्तौ दुःखमहार्णवे । धनं निधनमानीतं, पितृपर्यायसञ्चितम् ॥ ३ ॥ ततः प्राह पत्नी--शोको न कर्तव्यः, यद्भावि तद्भवति । यतः—"गते शोको न कर्तव्यो, भविष्यं नैव चिन्तयेत् । वर्तमानेन कालेन, वर्तन्ते हि विचक्षणाः ॥ १ ॥ कर्मणो हि प्रधानत्वं, किं कुर्वन्ति शुभा ग्रहाः । वशिष्ठदत्तलग्नोऽपि, रामः प्रव्रजितो वने ॥ २ ॥" इत्यादि प्रियावचः श्रुत्वा स्वस्थः सन् शोकं त्यक्त्वा समाधिना कृतपुण्यो गृहेऽस्थात् । क्रमात्तया समं ऋतुसुखमनुभवतः आधानमभूत् पत्न्याः । अथ कदाचित् पत्न्याः पुरः कृतपुण्यः प्राह—मदन्यो नास्ति कोऽपि पापी । यतो मयि जाते मातापितरौ दुःखितौ भूत्वा मृतौ । मया धनं च निधनं नीतम् । विना धनं वाणिज्यमपि कर्तुं न शक्यते । यतः—"बीजं विना कृषिर्नैव, यथा चाम्बु विना कृषिः । तथा नीवीं विना लक्ष्मी-र्नोर्जितुं शक्यते क्वचित् ॥ १ ॥ प्रियाऽऽचष्ट स्वामिन् खेदं मा कुरु । अनल्पोऽयमसौ कल्पः, स्वस्वाधीनं धनं हि वः । दीनाराणां सहस्रं च, गृह्यतामनुगृह्य माम् ॥ २ ॥ दीनारसहस्रमेकं

मे समरति । तेन त्वं व्यवसायं कुरु । ततः शुभेऽहनि बहुमूल्यं स्वल्पं क्रयाणकं लात्वा प्राचीं दिशं गन्तुकामः कृतपुण्यः स्फीतसार्थमध्ये रात्रौ पत्न्या तल्पे शायितः क्वचिद्देवकुले । ततः पत्नी पश्चात् स्वगृहे जगाम । इतस्तत्र पुरे बहुधनवान् धनदेवव्यवहारी वसति स्म । तस्य पत्नी रूपवती । तयोर्धर्मं कुर्वतोर्जिनदत्ताभिधः पुत्रोऽभूत् । क्रमात् कान्ते मृते (तथा) जिनदत्तो धर्मकर्मकुशलो महेभ्यपुत्रीश्चतस्रः परिणायितः अनेकप्रकारैर्भोगैस्ताभिर्विलसन्नकस्मान्मृतिं गतो रात्रौ जिनदत्तः । ततस्तया रूपवत्या स्थविरीभूतया सर्वा वधूराकार्य प्रोक्तम्—यदि युष्माकं भर्ता मृत इति राजा श्रोष्यति तदात्मीयाः सर्वाः श्रियो गृहीष्यति अपुत्रत्वात् । तेन भवतीभिर्न रोदितव्यम् । प्रच्छन्नं भूमिमध्ये क्षेप्यश्च यथा कोऽपि न जानाति । अहमपि न रोदिष्यामि (अन्यपतिं) चाराधयत तावद्यावत्पुत्रा भवन्तीनां भवन्ति । ततस्ता वध्वस्तं पतिं भूमिगतं कृत्वा स्नानं कृत्वा देवकुलोपान्तस्थसार्थसमीपे गताः । कृतपुण्यं पश्यन्ति स्म । तं तथावस्थं शनैरुत्पाट्य स्वगृहे समानीय त्वं पते! जय चिरमिति जल्पन्ति स्म ताः स्थविरावध्वः । तदा स्थविराऽग्रस्नुषाचतुष्टयस्यापि, पश्यतस्तत्र निरूपा । तदीयं कण्ठमालम्ब्य, रुदत्येवमुवाच सा ॥ १ ॥ हा वत्स बहुवात्सल्य, विहाय निजमातरम् । एतावन्ति दिनानि त्वं, क्व यातोऽसि क्व वा स्थितः । निरालम्बा शयालम्बा, तवाम्बाऽस्मि न संशयः ।

त्वं पुत्र जातमात्रोऽपि, हृतः केनापि पाप्मना ॥ ३ ॥ इत्युक्त्वा सा जरती प्राह–इदानीं तावकीनस्य, ज्येष्ठबन्धोर्विपत्तितः । तव संपत्तितश्चास्मि, शोकहर्षसमाकुला ॥ ४ ॥ बन्धुवध्वश्चतस्रोऽमूरमूश्च विपुलाः श्रियः । एता नद्य इवाम्भोधिमगाधं त्वामुपस्थिताः ॥ ५ ॥ अतः परं पुत्र त्वयाऽन्यत्र कुत्र न गन्तव्यं स्वेच्छयाऽत्र स्थेयम् । आभिर्वधूभिः समं भोगान् भुंक्ष्व । कृतपुण्यो दध्यौ । किं स्वप्नं लभ्यमानमस्ति । अथवाऽसौ एव मां स्थापयति तदा स्वर्गसौख्यमेव समुपस्थितम् । एवं ध्यात्वा कृतपुण्योऽवग्–मातर्मम सर्वं विस्मृतम् । अधुनाऽत्राऽऽगां शुभकर्मोदयात् । ततो व्यचिन्तयच्चेति सः । यतः–"श्रीयोगः सुदृशां योगः, स्वयंवरमिव द्वयम् । उपस्थितमतो व्योम–प्रसूनैः किं विकल्पनैः ॥१॥" मातर्मया त्वदीयाज्ञा, देवशेषेव सुन्दरा । पालनीया सदा यत्ना–दिहामुत्र सुखप्रदा ॥ १ ॥ क्रमाच्चतस्रो वध्वो गर्भं दधुः पुत्राश्चत्वारो बभूवुः तेषां जन्मोत्सवः कृतः । तस्य तत्र तस्थुषो द्वादशवत्सरी सुखनिमग्नस्य गता । ततोऽन्यदा वृद्धया प्रोक्तम्–भवतीनां चत्वारः पुत्रा बभूवुः । तेन राजाऽऽत्मनः श्रियं न गृहीष्यति । ततोऽसौ यत्र स्थानादानीतस्तत्र स्थाने मोच्यते । ताभिरुक्तं मातः कथमयमात्मनो लक्ष्म्यादिवर्द्धको मोच्यते । वृद्धयोक्तं ज्ञायते पुरुषस्वरूपम् । कदाचिदसावात्मनः श्रियं बलाद् गृहीष्यति तदा का गतिः । ततो बलात्तं मोचयितुं ताः साग्रहं ग्राहितास्तया । तत-

रताभिः शम्बलकृते मोदकचतुष्टयं तदर्थं कृतम्। तन्मध्ये रत्नचतुष्टयं क्षिप्तम्। ततो दासीपार्श्वादुत्पाट्य तं सुप्तं वस्त्रप्रान्तबद्धमोदकचतुष्टयं पूर्वस्थाने पुरमध्ये मुमोच वृद्धा। तदानीमेव पूर्वं विदेशे गत्वा द्वादशवर्षाणि भ्रान्त्वा तस्मिन्नेव स्थाने स एव सार्थवाहोऽवततार। श्रुतं कृतपुण्यप्रियया सार्थाऽऽगमनम्। तत्राऽऽगता पतिं सुप्तं दृष्ट्वा पार्श्वे स्थिता यावत्तावत् उज्जजागार पत्नीं ददर्श च हृष्टः। ततः प्रियायुक्तः कृतपुण्यः स्वगृहे समागात्। भक्त्या गौरवितः सदन्नपानदानतः पत्न्या भर्तुः पुरः पुत्रोत्पत्तिस्वरूपं प्रोक्तम्। पत्न्या प्रोक्तं—पते! किमानीतं तेनोक्तं किमपि नार्जितं मया पूर्वकृतपापोदयात्। अपरं किमपि नोक्तं लज्जया। मोदकचतुष्टयं कान्ताऽऽनीतं तया भाजनमध्ये क्षिप्तम्। पुत्रोऽन्यदा लेखशालायां गत्वा प्रातराशकृते समागतः। मात्रा दत्तं मोदकं गृहीत्वा लेखशालायां गतः। तत्र मोदको भक्षितः, तन्मध्याद्विशिष्टः प्रस्तरो निर्गतः! बालकस्तं प्रस्तरं दृष्ट्वा लेखशालिकाऽग्रे प्राह। ममायं विशिष्टो घुण्टकः पट्टिकाघुण्टनार्थं भविष्यति। तं घुण्टकं गृहीत्वा कान्दविकगृहे पट्टिकामज्जनार्थं गतः। पट्टिकां मज्जयतस्तस्य हस्तादकस्माद् घुण्टिको जलभृतभाजनान्तः पतितस्तदा जलं द्विधाऽभूत्। तज्जलं तथाभूतं दृष्ट्वा कान्दविको दध्यौ। अयं प्रस्तरो जलकान्तरत्नं बहुमूल्यं तेन किमपि सुखभक्षिकामस्मै वितीर्य गृह्यते मया यदि तदा वरम्। एवं ध्यात्वा कान्दविकस्तस्मै वर्यमोद-

कद्वयं दत्त्वा तं प्रस्तरं ललौ बालं वञ्चयित्वा । ततस्तन्मोदकद्वयं भक्षयित्वा हृष्टोऽपरघुण्टकेन पट्टिकां घुण्टयित्वा लेखशालां गतो बालः कृतपुण्यपुत्रः । कान्दविकेन स प्रस्तरो गुप्तीकृतः । क्रमादन्येद्युः श्रेणिकभूपतेः सेचनको हस्ती गङ्गानद्या मध्ये जलं पिबन् स्नानं कुर्वन् तन्तुजीवेन निरुद्धः निर्गन्तुं न शक्नोति । अनेके उपचाराः कृताः परं स हस्ती जलान्निर्गन्तुं न शक्नोति यदा । तदा राजा श्रेणिकोऽभयकुमारमन्त्रियुक् तत्रागात् । राज्ञाऽपि बहव उपचाराः कृतास्तथापि गजो बहिर्न निर्याति । ततः खिन्ने भूपतौ अभयकुमारो बुद्धिमानुवाच । तन्तुजीवेन हस्ती गृहीतोऽसौ यदि जलकान्तो मणिर्जलमध्ये गजपार्श्वे मोच्यते तदा जलं द्विधा भवति तन्तुजीवो गजं मुक्त्वा जलमध्ये गच्छति । ततो भूपेनोक्तं भाण्डागारादानीयतां जलकान्तो मणिः । अभयकुमारस्ततो भाण्डागारं विलोक्य प्राह—स्वामिन् भाण्डागारे जलकान्तमणिर्नास्ति, तेन पुरमध्ये पटहो वाद्यते । यः कश्चिज्जलकान्तमणिमानयिष्यति तस्मै राज्यार्द्धयुता स्वपुत्री दास्यते मया । ततो भूपादेशादनुगैः पटहो वाद्यमानः पुरमध्ये स्थाने स्थाने कान्दविकगृहोपान्ते गतः, तदा कान्दविकेन पटहः स्पृष्टः । ततो राजपार्श्वमानीते कान्दविके राजपुरुषै राजा मुमुदे । बहुलोकयुतो राजा नदीतीरे गतः ततः कान्दविको जलकान्तमणिमानीय राजपार्श्वे मुमोच यावत्तावज्जलं द्विधाचक्रे ।

तन्तुजीवो नष्टः गजो मुत्कलोऽभूत् । पटहभेरीमृदङ्गादिबहूनि वादित्राणि वाद्यन्ते । राजा हृष्टः । कान्दविकस्य राज्ञा सन्मानं कृतं । कान्दविको हृष्टोऽभूत् । वाद्यमानेषु बहुवादित्रेषु सेचनकगजारूढो राजा तुरङ्गमारूढाभयकुमारः कान्दविकयुक् नानाप्रकारं दानं याचकेभ्यो विश्राणयन् स्वगृहमाजगाम । कान्दविकः सन्मानितः सन् स्वमणिमादाय गृहे गतः । इतो राजा अभयकुमारमाकार्य रहस्यवग् । कान्दविकस्यात्मनः पुत्री राजपुत्रवरयोग्या कथं दास्यते मनोरमाह्वया । अभयोऽवग्—स्वामिन् खेदो नानेयः । यस्य रत्नमिदं भविष्यति, तं बुद्ध्या प्रकटीकरिष्यामि । ततः सर्वं युष्मन्मनोऽभिमतमेव भविष्यति । ईदृशं रत्नं जलकान्तरूपं राजगृहामात्यगृहे मुक्त्वा कान्दविकतुल्यनीचगृहे न भवति । यतः—"पीयूषं रजनीकरे वरतराभासश्च सूर्येऽबुधौ, रत्नानां निचयो मरुत्तरुगणो मेरौ ग्रहा अम्बरे । स्वर्गे स्वर्गिगजस्तथा सुरहयो गीर्वाणगौ मञ्जुला । चक्रं चक्रिनिकेतने भवति वै नान्यत्र तिष्ठेत् क्षितौ ॥१॥ रत्नानि रोहणक्ष्माभृद्वार्धिष्वेव भवन्ति हि । गजा विन्ध्याटवीष्वेव प्राप्यन्तेऽन्यत्र नैव हि ॥२॥ तथा वर्याणि वस्तूनि, रत्नादीनि च भूतले । भवन्ति मेदिनीपाल—महेभ्यामात्यसद्मसु ॥ ३ ॥" तेन कस्यापि व्यवहारिणो रत्नमिदं भविष्यति । यस्य भविष्यति च तस्मै राज्यार्धयुता पुत्री दास्यते । ततो राजा हृष्टः । राज्यार्द्धं पुत्रीयुतं कान्दविकाय दास्यते इति कथयित्वाऽभयकुमारेण

स्वजनाः कान्दविकमाकारयितुं प्रेषिताः । तत्र गत्वा ते जगुः । राजा त्वामाकारयति । राज्यार्धं पुत्रीयुतं दास्यति । कान्दविको हृष्टः स्वजनसहितः । ततः कान्दविको वर्यवस्त्राणि परिधाय राजगृहे समागात् । अभयकुमारेण सन्मानितः । पृष्टं च तत्र रत्नमिदं क चाटितम् । तेनोक्तं मम गृहे क्रमागतमस्ति । ततोऽभयकुमारेण पूर्वशिक्षितान् स्वसेवकानाकार्य प्रोक्तम् । अस्मै राज्यार्द्धं कन्यायुतं दीयतां ततस्ते राजपुरुषा मन्त्रिप्रेरिताः कम्बाभिः तं तथा ताडयन् । यथा क्षणमेकं निश्चेष्टकाष्ठीभूतः । क्षणेन स्वस्थीभूते कान्दविकेऽभयोऽवग् । सत्यं वद क लब्धं रत्नं यदि सत्यं न जल्पिष्यते त्वयाऽधुना तदा भूरिकम्बाभिस्ताडनान्मृत एव, मरणभयात् कान्दविकेनोक्तमामूलचूलतो रत्नप्राप्तिस्वरूपम् । "जगौ ततोऽभयः सत्यं, स एवास्येदमीदृशं कल्पद्रूणां सुवर्णाद्रौ, दृश्यते सम्भवःपरम् ॥१॥" ततो राज्ञाऽभयकुमारवचनेन कृतपुण्याय राज्यार्द्धं मनोरमाकन्यायुतं विश्राणितम् । ततोऽभयकुमारो ग्रामैकसहितामेकां कान्दविककुलोत्पन्नां कन्यां भूपादेशाद्दापयामास कान्दविकाय । यतो राज्ञोक्तं निष्फलं न भवति । वर्येभारूढं कृतपुण्यं मनोरमाप्रियायुतं वादित्रवादनपुरस्सरं स्वगृहे प्रेषयामासाभयकुमारः । तदा लोका जगुः । यादृशी रत्या प्रीत्या वा कंदर्प्पस्य शच्येन्द्रस्य श्रिया कृष्णस्य गौर्या भवस्य शोभा भवति तथा कृतपुण्यस्य मनोरमया । यतः—ततोऽभयकुमारेण समं कृतपुण्यस्य

प्रीतिर्जाता । चन्द्रसमुद्रयोरिव, पद्मार्कयोरिव । एकदा रहसि अभयकुमाराग्रे कृतपुण्येन स्वसम्भवपुत्रचतुष्टयोत्पत्तिस्वरूपं प्रोक्तम् । मन्त्रीश नगरेऽत्रैव, मम पत्नीचतुष्टयं ॥ चतुःसुतयुतं चास्ति, परं वेद्मि न मन्दिरम् ॥ १ ॥ पुरेऽस्मिन् तद्गृहं चत्वारः पुत्रा जाताश्चात्र । अभयकुमार आचष्टाहो तव चातुर्यं वर्ण्यं विद्यते । यत्त्वया यत्र द्वादश वर्षाणि स्थितं तदपि न ज्ञायते । तेन तत्र महच्चातुर्यम् । कृतपुण्योऽवग्—सुप्त एव तया वृद्धया स्वगृहे नीतः पश्चादपि सुप्त एव मुक्तो द्वादशवर्षाणि सप्तमभूमिधवलगृहे स्थापितोऽहम् । अभयकुमारेणोक्तम्—ये तव पुत्रा अभूवंस्तत्र, ते त्वामुपलक्षन्ति न वा । कृतपुण्येनोक्तम् । मम श्मश्रु हस्ते गृह्णन्ति ममाङ्के उपविश्य बहुशस्तात तातेति जल्पन्तोऽभूवन् । अभयोऽवग् त्वं च ताः पत्नीरुपलक्षयसि न वा तेनोक्तमुपलक्षयाम्यहं ताः । अभयोऽवग्—ताः पत्नीः पुत्रयुताः अहं ते प्रकटीकरिष्यामि । अथाभयकुमारेण द्विद्वारो महान् प्रासादः कारितः । एकेन द्वारेण प्रविश्यते द्वितीयेन निर्गम्यते । कृतपुण्यतुल्यरूपां यक्षप्रतिमां तन्मध्येऽभयः स्थापयामास । ततः पटहमिति वादयामासाभयकुमारः या या स्त्री स्वीयसर्वापत्ययुता पञ्च पञ्चमोदकान्विता यक्षं नत्वा द्वितीयद्वारेण निर्गच्छति । तस्याः कुलस्य कुशलं भविष्यति, नो चेन्मरणं भविष्यति । अग्रेतनचतुर्दश्यामागन्तव्यम् ।

ततश्चतुर्दश्यामभयकुमारः कृतपुण्ययुतः प्रासादपार्श्वेऽभ्येत्योपविष्टः । सर्वा स्त्री स्वापत्ययुता मोदकस्थालयुता एकद्वारेण प्रासादमध्ये प्रविश्य मोदकान् ढौकयित्वा यक्षं प्रणम्य द्वितीयद्वारेण निर्याति । इतः सा वृद्धा चतुर्वधूचतुःपुत्रयुता यक्षं नन्तुमागात् । तदा कृतपुण्यो जगौ-एषा सा वृद्धा । यावद्वृद्धा मोदकस्थालं यक्षाग्रे मुक्त्वा प्रणमति वधूयुता तावत्ते चत्वारः पुत्रा यक्षपार्श्वे गताः तात तातेति जल्पन्तः, प्रमोदोत्फुल्ललोचनाः । यक्षाङ्कपालीपल्यङ्कमध्युषुस्तनयास्तदा ॥ १ ॥ तदा कश्चिद्यक्षस्य श्मश्रुणि विलग्नः, कश्चित् हस्ते, कश्चिदुदरे कश्चिन्मस्तके । तदाऽभयेन तत्रैत्योक्तम् । अमी ते चत्वारः पुत्राः चतस्रो वध्वः । ततस्तौ तस्याः पृष्ठे स्वसेवकान् प्रेष्य तस्या गृहं जग्मतुः । तत उपलक्ष्य ताः कन्यास्ते पुत्राश्च सा लक्ष्मीस्तस्याभवन्, कृतपुण्यस्याभयकुमारबुद्ध्या । साऽनङ्गसेना वेश्याऽपि तमङ्गीचकार च । एवं कृतपुण्यस्य सप्त प्रिया बभुवुः । अन्येद्युर्जगद्वन्द्यः श्रीवीरस्वामी भव्यजीवान् प्रबोधयन् वैभारगिरौ समवासार्षीत् । तदा श्रेणिकभूपतिरभयकुमारकृतपुण्यादिपरिवारयुक्तः श्रीवीरं वन्दितुं ययौ । अत्र श्रीवीरेण देशना दत्ता-धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः, सौभाग्यार्थिषु तत्परः किमपरं पुत्रार्थिनां पुत्रदः । राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां, तत् किं यन्न ददाति किं न तनुते स्वर्गापवर्गायते ॥ १ ॥ अत्र देशनान्ते

कृतपुण्यः कृताञ्जलिः पप्रच्छ । भगवन् ! केन कर्मणा पूर्वभवार्जितेनास्मिन् भवेऽन्तराऽन्तरा सम्पदो विपदोऽभूवन् मम । वीरः प्राह—पूर्वभवे श्रीपुरे त्वं वत्सपालकोऽभूः । परं दौर्गत्यानिर्विण्णः परमान्नं गृहे गृहे निष्पद्यमानं वीक्ष्य मातरं प्रति जगौ—परमान्नं मे देहि । अम्बा रुन्दती जगौ—पुत्र ! गृहे किमपि नास्ति, कथं परमान्नं दीयते । अन्नं नास्ति जलं नास्ति, नास्ति मुद्रा युगन्धरी । धान्यं च लवणं नास्ति, तन्नास्ति यद्धि भुज्यते ॥ १ ॥ ततस्तां रुदन्तीं बालं च रुदन्तं वीक्ष्य प्रातिवेश्मक्यस्तन्दुलदुग्धशर्करादि ददुः तस्यै । तया परमान्नं निष्पादितम् । पुत्राय परमान्नं परिवेष्य कार्यार्थं प्रातिवेश्मकगृहे ययौ । इतो मासक्षपणपारणके साधुद्वयं तत्र विहर्तुमागतम् । साधुद्वयं कृशशरीरं चारित्रपात्रं दृष्ट्वा दध्यौ गोपालः—अहो मे सफलं जन्म, दिनोऽयं रुचिरोऽद्य मे । यामोऽयं सुन्दरो मेऽद्य, वेलेयं मेऽद्य सुन्दरा ॥ १ ॥ यतोऽधुना समायातं, वर्यं साधुद्वयं स्फुटम् । प्रतिलाभ्य भविष्यामि, कृतार्थोऽन्नं तमोहरम् ॥ २ ॥ ततस्तदा हृष्टचेताः स्वस्थानादुत्थाय प्रणम्य, गोपालकोऽवग्—मम भाग्यमागतं युष्मत्पादानामत्रागमनात् । अयं शुद्धग्रासाहारोऽङ्गीक्रियताम् । एकं भागं परमान्नस्य दत्त्वा पुनर्दध्यौ । एतन्मात्रेण परमान्नेनास्य किं भविष्यति । ततो द्वितीयं भागं एवं तृतीयं भागं च एतस्मै कृतपुण्यः ददौ । एवं त्रिवारं दत्तं परमान्नम् । ततो

गते यतिद्वये मात्रा पुनरपि परमान्नं परिवेषितम् । ततः कालक्रमाद्गोपालको मृत्वा त्वमभूः कृतपुण्यकः । एवं त्रिवारं विभज्य यतिभ्यां दानं दत्तं तेन त्रिधा तत्रान्तराऽन्तरा सुखमभूत् । आकर्ण्यैवं स्वं पूर्वभवं कृतपुण्यो जातवैराग्यो ज्येष्ठे पुत्रे गृहभारमारोप्य सप्तक्षेत्र्यां स्वं धनं उप्त्वा श्रीवीरपार्श्वे दीक्षामादाय च स्वर्गसुखभागभूत् । ततश्च्युतः शिवं गमिष्यति । ॥ इति कृतपुण्यकथानकं दानविषये ॥ १४ ॥

उपसर्गान् कृतान् व्याघ्र-सिंहादिभिः शरीरवान् । सहमानः शिवं याति, सुकोसलमुनीन्द्रवत् ॥ १ ॥

पुरा अयोध्यायां इक्ष्वाकुवंशे कीर्तिधरो राजा न्यायाध्वना राज्यं कुरुते स्म । तस्य सहदेव्यभिधा पत्नी बभूव । क्रमात्तयोः पुत्रः सुकोशलनामाऽजनि । स च क्रमाद् धर्मकर्मशास्त्रं पपाठ । अन्येद्युः श्रीधर्म्मसूरयस्तत्राययुः । धर्मोपदेशं श्रोतुं तत्र नृपो ययौ । गुरुभिरिति धर्मोपदेशो ददे । तथाहि—“ आर्यदेशकुलरूपबलायु-र्बुद्धिबन्धुरमवाप्य नरत्वम् । धर्म्मकर्म न करोति जडो यः, पोतमुज्झति पयोधिगतः सः ॥१॥ जरा जाव न पीडेई, वाही जाव न वड्ढई । जाविंदिया न हायंति, ताव धम्मं समायरे ॥ २ ॥ विषयगणः कापुरुषं, करोति वशवर्त्तिनं न सत्पुरुषम् । बध्नाति

मशकमेव हि, लूतातन्तु र्न मातङ्गम् ॥ ३ ॥ गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गताः, दृष्टिर्भ्रश्यति रूपमेव ह्रसते वक्त्रं च लालायते ॥ वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते, हा कष्टं जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥४॥ संझरागजलबुब्बूवमे, जीविए जलबिन्दुचंचले । जुवणे नईवेगसन्निभे, पावजीव किमत्थं न बुज्झसे ॥ ५ ॥ " इत्यादि धर्मोपदेशं श्रुत्वा संवेगधारी कीर्तिधरो राजा शिशुमपि सुकोशलं राज्ये न्यस्य स्वयं दीक्षां जग्राह । प्रतिमाधरः कीर्तिधरो यतिर्गृहीतशास्त्रार्थो विजहार । मात्रा पुत्रस्नेहात् स्वर्णजटिता दन्तपङ्क्तिः कारिता । सुकोशलः क्रमाद्वर्द्धमानो यदा यदा पितरं स्मरति । तदा तदा माता कीर्तिधरस्य पत्युर्दोषान् गृह्णाति स्म । अथ कदाचित् कीर्तिधरो यतिरयोध्यामध्ये षष्ठपारणे भिक्षायै समागात् तदा सहदेवी तं पतिं दृष्ट्वा दध्यौ । यदि मदीयोऽयं पुत्रः पितरं द्रक्ष्यति तदा दीक्षां गृहीष्यत्येव । तेन पुराद् बहिरयं यतिर्निष्कास्यते । ततः सहदेवी तं पतिं सेवकपार्श्वात् पराभूय सुकोशलावेदितमेव पुरान्निष्काशयामास । कीर्तिधरं पतिं पुराद्बहिर्निष्काश्यमानं दृष्ट्वा धात्र्या सुकोशलाय प्रोक्तम् ततः सुकोशलः कीर्तिधरयतिपार्श्वे गत्वा तं च नत्वा प्राह—पुरमध्ये त्वं समागच्छ । कीर्तिधरोऽवग्—सांप्रतं पुरमध्ये नागमिष्यते मयोपसर्गसम्भवात् । ततः सुकोशलो मातृकृतं पितृपराभवं मत्वा राज्यं तृणवत् त्यक्त्वा पितुः पार्श्वे व्रतं ललौ ।

ततः सुकोशलः पित्रा सह विजहार । तीव्रं तपो द्वावपि कुरुतः । सहदेवी पतिपुत्रवियोगादार्तध्यानेन मृत्वा व्याघ्री वनमध्येऽभवत् । कदाचित्तौ पितापुत्रौ मुनी विहरमाणौ व्याघ्र्यधिष्ठितायां भुवि गतौ । तदा व्याघ्रीं संमुखमागच्छन्तीं दृष्ट्वा कीर्तिधरोऽवग्—अन्यास्मिन् मार्गे गम्यते । ततः सुकोशलः साहसमवलम्ब्य तेनैव मार्गेण गच्छन् कृतानशनो व्याघ्रीविदार्यमाणो वर्यध्यानात् सर्वकर्मक्षयात् केवली जज्ञे । मुक्तिं तत्क्षणादगात् ॥ व्याघ्री सुकोशलदन्तपंक्तिं वीक्ष्योहापोहपरा जातजातिस्मृतिः पुत्रं ज्ञात्वा पश्चात्तापपरा स्वकर्म निन्दन्ती सहस्रारस्वर्गे गता । कीर्तिधरो मुनिरपि प्राप्तकेवलज्ञानो मुक्तिं ययौ । इति सुकोशलकथा समाप्ता ॥ १५ ॥

योऽष्टापदे चतुर्विंशतिं जिनान्नौति स तस्मिन्नेव भवे मुक्तिं याति । एवं श्रीवीरपार्श्वे श्रुत्वा गौतमस्वाम्यष्टापदे जिनान्नन्तुं गतः । देवांस्तत्र नत्वा यावद्बहिर्बलानके उपविष्टस्तावद्वैश्रमणः सुरस्तत्रागतो जिनान्नत्वा धर्मं शृण्वन् पुण्डरीकाध्ययनं श्रीगौतमेन कथ्यमानं श्रद्दधे । ततः स स्वर्गाच्च्युतो वज्रस्वाम्यजनि । तच्चेदमध्ययनम्—

यः पाति संयमं शुद्धं, मनोवचननिग्रहैः । स एव मुच्यते पापा–त्पुण्डरीकयतीशवत् ॥ १ ॥
यः प्राप्य संयमं मर्त्यो, विराधयति सन्ततम् । स एव लभते दुःखं, दुर्गतौ कण्डरीकवत् ॥ २ ॥

तथाहि महाविदेहे क्षेत्रे पुष्कलवतीविजये पुण्डरीकिणी पुरी स्वर्गखण्डमिवासीत् । तत्र महापद्मो राजा राज्यं न्यायाध्वना चकार । तस्य पद्मावती प्रिया सच्छीलशालिन्यभूत् । पुण्डरीककण्डरीकौ सुतावभूतां तयोः । एकदा साधवो नलिनवनोपवनं समाजग्मुः, तत्र वन्दितुं गुरून् महापद्मराजा ययौ । धर्मोपदेशो ददे गुरुभिः । "असारेऽस्मिन् भवे नास्ति, सुखं व्याधिश्च विद्यते । जानन्तोऽपि जना एवं, न कुर्वन्ति वृषं मनाग् ॥ १ ॥ संसारंमि असारे नत्थि सुहं वाहिवेयणापउरे । जाणंतो इह जीवो, न कुणइ जिणदेसियं धम्मं ॥ २ ॥" इत्यादि धर्मोपदेशमाकर्ण्य महापद्मः पुण्डरीकाय राज्यं वितीर्य संयमश्रियं जग्राह । पुण्डरीकः कण्डरीकयुतो राज्यं चकार । अन्येद्युः पुण्डरीकः कण्डरीकं प्रति जगौ—भो वत्स मम चिरं भवविरागता जाताऽस्ति । तेन त्वं राज्यं गृहाण । अहं तु चारित्रं संसारदुःखौघतृणे लवित्रं गृहीष्यामि । कण्डरीकोऽभ्यधात् ज्येष्ठसहोदर ! त्वमेवं किं जल्पसि मामपारसंसाराऽम्भोधौ पातयितुम् । य आत्मनोऽभीष्टो भवति तस्य तु सुखदं भवति तद्दीयते सद्भिः । राज्यं तु नरकासात—सन्ततिप्रतिदायकम् । निगद्यते जिनाधीशै—र्वाञ्छद्भिर्हितमङ्गिनाम् ॥ १ ॥ ततः पुण्डरीकोऽपि जगौ—मम विषया न रोचन्ते । यतः—" वत्स मत्सरिणो ज्ञेयाः विषया विषमूर्तयः । तानीन्द्रियाणि संसारे, पातयन्ति जनांश्चिरम् ॥ १ ॥" कण्डरी-

कोऽवग्—वृद्धो यो नन्दनो भवति स तु राज्यस्य धर्ता भवत्येव । तेन त्वया न किमपि प्रत्युत्तरो दातव्यः । ततः कण्डरीकः पुण्डरीकं पर्यवसाय्य दीक्षां ललौ । पुण्डरीकः प्रजां पालयन् मनो विना स्त्रियं भुङ्क्ते स्म । कण्डरिकस्तु नानाविधाभिग्रहादितपःपरः संयमं पालयामास । इतोऽन्येद्युः कण्डरीकः संयमश्रीसक्तः सन् कस्यचिन्नरेन्द्रस्य राज्यसम्पदं वीक्ष्य दध्यौ मया मुधा हारितं राज्यं यदर्थमेवंविधं कष्टं करिष्यमाणमस्ति तत्स्वर्गादिसुखमधुना दृश्यते केनापि न, राज्यं तु प्रत्यक्षसुखमस्ति, तेन मुधाऽहं कायक्लेशं करिष्ये । यतः—" तीव्रं तपो मनोमुख्य—पञ्चेन्द्रियादियन्त्रणम् । देहिनां जायतेऽत्यन्त—वेदनाहेतवे खलु ॥ १ ॥ एवं ध्यायन् सदा चित्ते, कण्डरीकोऽधमाशयः । एकेन्द्रियादिजीवानां, विराधनां तनोति सः ॥ २ ॥ एवं विचिन्त्य स्वपितृराज्यं भ्रातृपार्श्वाज्जिघृक्षुः कण्डरीकश्चचाल स्वपुरं प्रति । पुण्डरीकिणीपुर्युपान्तस्थोद्याने समेत्य स्वमुपकरणं वृक्षशाखायां बद्ध्वा शाद्वले स्थाने कण्डरीक उपविष्टः । ततः कस्यचिन्नरस्योद्यानपालकस्य मुखात्स्वागमनं कण्डरीको ज्ञापयामास पुण्डरीकाय । ततो राजा हृष्टः स्वभ्रातृपार्श्वे समेत्य ववन्दे तत्क्रमौ । वृक्षशाखायामुपकरणं बद्धमालोक्य पुण्डरीको दध्यौ । अहो ! एवंविधवैराग्यवासितचित्तस्य एवंविधा सचित्तविराधनारूपा चेष्टा भवति, तदा मोहस्य विलसितं सर्वम् । यतः—" क्षणं सक्तः

क्षणं मुक्तः, क्षणं क्रुद्धः क्षणं क्षमी । मोहाद्यैः क्रीडयेवाहं, कारितः कपिचापलम् ॥ १ ॥ विषयगणः कापुरुषं, करोति वशवर्त्तिनं न सत्पुरुषम् । बध्नाति मशकमेवहि, लूतातन्तुर्न मातङ्गम् ॥ २ ॥ तदानीं " कण्डरीको जगौ, मया संयमं पालयितुं न शक्यते, तेन मम राज्यमर्प्पय । राजा जगौ—प्रागपि मया व्रतं जिघृक्षुस्त्वं वारितोऽपि संयममलाः । अधुना यदि तव राज्यग्रहणेच्छाऽस्ति, तदाऽऽवयो राज्यसंयमयोर्व्यत्ययो भवतु । ततो राजा व्रतचिन्हानि ललौ, कण्डरीकस्तु राज्यचिन्हानि छत्रादीनि जग्राह । ततो निःसङ्गचित्तः सन् विजहार पुण्डरीकयतिः, कण्डरीकस्तु प्राप्तराज्यः बह्वन्नं भक्षयन्—सेवकैर्हसितः सन् दध्यौ, यैः सेवकैर्हसितमस्ति, तेषां शिक्षा दास्यते । कर्मयोगाद्रात्रौ तस्यामेव विशूचिका जाता कण्डरीकस्य । ततो यद्यदौषधं तस्य दीयते सेवकैस्तत्तन्न गुणाय भवति । ततो रुष्टः कडण्रीको दध्यौ, एतैः सेवकैः सचिवाद्यैर्मां हन्तुमुपायो मण्डितोऽस्ति । यदि नीरोगो भविष्यामि, तदा सर्वेषां घाणुकप्रक्षेपादिना प्राणान् गृहीष्यामि । एवं रौद्रध्यानपरः कण्डरीकस्तस्मिन्नेव दिनात्यये विपद्य सप्तमे नरके गतः । यतः—" आर्ते तिर्यग्गतिस्तथागतिरधो० ॥ १ ॥ " पुण्डरीकस्तु स्वयंगृहीतसंयमो जिनादिष्टसंयमं शुद्धं पालयितुकामो दध्यौ, गुरुपार्श्वे गत्वा गुरुहस्ते संयमं गृहीत्वा संयमं शुद्धं पालयिष्यामि । मार्गे गच्छन् पुण्डरीकः कस्यचिद्गृहे-

रूक्षान्नं प्राप्यैकान्ते च भुक्त्वा कस्मिंश्चिद्ग्रामे तृणसंस्तरे सुष्वाप। रात्रौ शीतेन बाधितोऽकस्मात्समुत्पन्नतीव्रवेदनो दध्यावेवं पुण्डरीकः, अहमभाग्यवान् श्रीगुरवोऽपि न वन्दिताः प्राप्तोऽपि संयमो मुधा भविष्यति, यदि गुरूणां पार्श्वे गमिष्यते, तदा गुरूपदिष्टमार्गेण शुद्धः संयमः पालयिष्यते। ततः सर्वान् सूक्ष्मान् बादरांश्च जीवान् स्वयं क्षामयन् शुभध्यानपरः पुण्डरीको मृत्वा सर्वार्थसिद्धिविमानमाससाद। यतः—"प्रणिहन्ति क्षणार्द्धेन, साम्यमालम्ब्य कर्म तत्। यन्नहन्यान्नरस्तीव्र–तपसा जन्मकोटिभिः ॥१॥" ॥ इति शुभाशुभभावनायां पुण्डरीककण्डरीककथा समाप्ता ॥१६॥

अभिमानं त्यजन् जाति–कुलश्रीलाभसंभवम्। केशिगच्छेशवन्मुक्ति–सातभाग् जायतेऽङ्गवान् ॥१॥

तथाहि—आमलकल्पायां पुर्यां श्रीवीरं समवसृतं नत्वा देवः सूर्याभो व्यजिज्ञपत, भगवन्! श्रीगौतमादियतीनामहमद्य दिव्यं नाट्यविधिं दर्शयिष्ये, मामनुजानीहीति विज्ञप्तः स्वामी नैवादिदेश न च प्रत्यादिदेश। तत ऐशान्यां पीठस्थः देवः सव्यासव्यभुजद्वयात् देवानप्सरसश्च विकुर्व्याष्टसु दिक्षु नृत्यं मर्त्त्येष्वसंभाव्यं दिव्यर्द्धिवर्द्धितं द्वात्रिंशद्विधं नाट्यं दर्शयित्वा प्रभुं प्रणम्य स्वर्गमुद्ययौ। ततः श्रीगौतमः प्रभुं प्रणम्य पप्रच्छ, भगवन्! कोऽयं

देवः कुतोऽस्यायं बोधिरभूत् धर्मेण केन कर्मणास्येदृशी ऋद्धिः सम्पन्ना । अथ श्रीवीरः स्वामी प्राह एष देवो नरकपथप्रस्थितोऽपि गुरुप्रतिबोधात् स्वर्गपदवीं प्राप । तथाहि—श्वेताम्बीपुर्यां प्रदेशीति नाम्नाऽभवद्भूपः तस्य प्रिया सूर्यकान्ता सूर्यकान्ताह्वो नन्दनोऽजनि । तस्यालंघ्यवचाश्चित्रनाममन्त्री कार्यात्कदाचन श्रावस्त्यां जितशत्रुनृपान्तिके ययौ तत्रागतं श्रीपार्श्वनाथगणधरं गणधरभारधारिणं चतुर्ज्ञानशालिनं केशिनं समायातं श्रुत्वा गुरुं वन्दितुं ययौ । गुरुणा धर्मोपदेशो दत्त इति । " धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं धर्मेणैव भवन्ति निर्मलधियो विद्यार्थसम्पत्तयः । कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवतु वः स्वर्गापवर्गप्रदः ॥१॥ " इत्यादि धर्मोपदेशं श्रुत्वा चित्रो मन्त्री प्राह—तथाहि—श्वेताम्ब्यां गन्तुमाचार्यैः, केशी चित्रेण मन्त्रिणा । स्वस्वामिनः प्रबोधाय, विज्ञप्तो भक्तिपूर्वकम् ॥ १ ॥ आचार्यः प्राह—इहलोकैकधीः क्रूरः, परलोकपराङ्मुखः । साहसैकरसश्चण्डः, स कथं बोधमर्हति ॥ २ ॥ ततश्चित्र आचष्ट, सन्त्यन्ये धानिनो ये तपोभृतां सदा सत्कारसन्मानदानप्रणयपेशलाः, तेषां किमशक्यं, तेन तत्र पादावधारणेन मत्स्वामिनं संसारसमुद्रमज्जन्तं धर्मोपदेशबेडयोद्धर । वर्तमानेन योगेनेत्युक्त्वा मन्त्रिवचोऽनुमेने मुनिः । ततः श्रीसूरिः केशी विहरन् भुवि श्वेताम्ब्याः पुर्या बहिरुद्याने

समागतः । गुरुं बहिरुद्याने समागतं श्रुत्वा चित्रश्चित्ते चिन्तितवानिति । अयं चेन्नरकं गन्ता, प्रभुर्मय्यपि मन्त्रिणि। ततः स्वामिप्रसादाना-मह स्यामनृणः कथम् ॥ १ ॥ ततः केनाप्युपायेन, गुरुं येन नयाम्यहम् । प्रतिकर्ता रुजं वैद्यो, गुरुर्दुष्कर्मणां पुनः ॥ २ ॥ ततो वाहवाहनिकाछलेन मन्त्री भूपतिं बहिरुद्याने यत्र गुरवो धर्मोपदेशं ददानाः सन्ति, तत्रासन्नप्रदेशे नीतवान् । वाहान् खेलयित्वा राजा द्रुमच्छायायामुपाविशत् श्रमछिदे, गम्भीरनिर्घोषं शब्दं श्रुत्वा राजाऽवग्, भो चित्र ! कस्य एष शब्दः श्रूयते । न ज्ञायते सम्यक् कस्यायं शब्द इति मन्त्रिणोक्तं, मन्त्रिणा प्रेरितो भूपस्तत्र गुरुसन्निधौ ययौ । उपविष्टोऽग्रे राजा । तदा गुरव एवं प्रोचुः । गिरेः शृङ्ग इवोत्तुङ्गे, नृभवेऽपि प्रमादिनः । उत्पद्य स्वास्थ्यं भो भव्याः !, पित्सवः किं भवावटे ॥ १ ॥ पापात्मानः कथं निद्रां, कुर्वन्ति निशि निर्भयाः । दीर्घीभूता हि सा तेषां, नरकाह्वानहेतवे ॥ २ ॥ आत्मकर्मान्यलोकादि, परोक्षत्वान्न चेन्मतम् । तत्पितामहपित्राद्या, अपि स्युस्ते न संमताः ॥ ३ ॥ वाचः परप्रबोधाय, प्रोच्यन्तेऽतीन्द्रियश्च सः । तद्वक्तुमपि नो युक्तं, प्रत्यक्षैकप्रमाणिनाम् ॥ ४ ॥ धर्मिणां च विनात्मानमिच्छादिगुणसंश्रयम् । धर्मत्वादिह चैतन्यमन्यथा नोपपद्यते ॥ ५ ॥ इत्यादि धर्मसूक्तानि जीवस्थापकानि श्रुत्वा

नास्तिकमतवादी प्रदेशी राजा जगौ—नास्ति जीवोऽदृश्यत्वात् । गुरुणोक्तं—यो वक्ति अहं सुखी अहं दुःखीति प्रत्ययो धर्म्मिणं विना न जायते, तेन धर्म्मी समस्त्येव, यो धर्मी स जीव एव । ततः—भूयोऽन्वयुक्तभूपोपि, मयै· कस्तस्करः प्रभो ! । क्षिप्त्वान्तःकुम्भि तद्द्वारं, दृढं नीरन्ध्रितं स्वयम् ॥ १ ॥ कालेन स मृतो दृष्टः, कृम्याकुलकले-वर· । तज्जीवनिर्गमोऽन्येषा—मागमो वाऽभवत्कथम् ॥ २ ॥ चूर्णपेषं च पिष्ट्वाऽपि, चौरे जीवो विलोकितः । प्रतिपत्तिकमप्यत्र, प्रत्यभ्यज्ञायि नो पुनः ॥ ३ ॥ चौरे कस्मिन् मया सद्यः, श्वासं रुध्द्वा विपादिते । प्राक्पश्चाच्च तुलाऽभेदः, सदसज्जीवभूरभूत् ॥ ४ ॥ गुरुरूचेऽथ नीरन्ध्रं, कुम्भिकान्तर्यदा नरः । शङ्खं वादयते शब्दः स बहिः श्रूयते कथम् ॥ ५ ॥ अभिघात्याभिघातित्वे, तस्मिंश्चाव्यभिचारिणि । न मूर्तत्वं विना तस्माद्, द्रव्यस्कन्धात्मको ध्वनिः ॥ ६ ॥ सौक्ष्म्यान्मूर्तोऽपि तच्छब्दः कुम्भीमध्याद्विनिःसरन् । अमूर्तस्यास्य जीवस्य, सन्देहं न भिनत्ति किम् ॥ ७ ॥ पिष्टस्यारणिकाष्टस्य, चूर्णे वन्हिर्न वीक्षितः । स चास्त्येव यथा तत्र, जीवोऽप्येवं विचिन्त्यताम् ॥ ८ ॥ दृतौ च वायुना पूर्णे, नापूर्णेऽपिच भिद्यते । तुला तथैव जीवेऽपि, नृप ! किं न विदृश्यते ॥ ९ ॥ इत्थं विवर्तसूक्ष्माणां, मूर्तानां विविधान्यपि । अमूर्तस्य स्वभावेन, तद्वक्तव्यं किमात्मनः ॥ १० ॥ शक्तं

सूक्ष्मं चिदात्मान–मात्मानं कर्मवर्मितम् ॥ निश्चित्येति महाराज !, कुरु धर्ममनातुरः ॥ ११ ॥ धर्माज्जन्म० । १ । क्रमागतामपि क्ष्माप !, त्यज नास्तिकतां क्षणात् । किं दरिद्रतया श्रेयः, श्रियं संश्रय संमुखीम् ॥ १२ ॥ केऽपि सहस्रंभरयो, लक्षंभरयश्च केऽपि केऽपि नराः । नात्मम्भरयः केचित्, फलमेतत्सुकृतदुष्कृतयोः ॥ १३ ॥ इत्यादि धर्मोपदेशमाकर्ण्य प्रदेशी राजा सम्यक्त्वमूलानि द्वादश व्रतानि जग्राह । राजा दृढव्रतो धर्मं पालयन् गृहमेधिनां चिराद्वैराग्यवासितोऽभवत् । अन्यदा सूर्यकान्ता पुरुषान्तररागिणी पौषधपारणे विषं प्रदेशीराज्ञे ददौ । स राजा कृताराधनकः प्रान्ते स्मृतपञ्चनमस्कारो मृत्वा स्वर्गे प्रथमे सूर्याभविमाने सुरोऽभवत् । स एवायं देवः सूर्याभश्चतुःपल्योपमस्थितिरभूत् । अत्र चास्मद्भक्तितो मां यतीश्वरांश्च वन्दितुमागतो भावपूजां चकार । स देवस्ततश्च्युतो विदेहेषु मर्त्यभवं प्राप्य सर्वकर्ममुक्तो मुक्तिं गमिष्यति । इतः श्रीगौतमः प्रभुं प्रणम्यान्यत्र विजहार । इतः कस्मिंश्चिदुद्याने श्रीगौतमो यावत् समवासार्षीत्, तावदन्यत्रप्रदेशे केशी गणभृत् समवासार्षीत् । केशी गणभृत् गौतमं प्रति प्राह–भो गौतम ! भवानीदृशो वेषादिर्दृश्यते कथं ? । गौतमस्तदा चतुर्विंशतितमतीर्थङ्कराचारस्वरूपं जगौ । केश्यपि श्रीपार्श्वनाथाचारादिस्वरूपं जगौ । अत्रोत्तराध्ययनसम्बन्धी विवादो ज्ञातव्यः । शासनभेद-

भीरुः श्रीपार्श्वनाथान्वयी केशी गणभृत् श्रीगौतमोक्तं यतिधर्मं प्रपेदे, श्वेतवासा अभूत् क्रमात् सिद्धिं गतः केशी । उक्तञ्च—" नाभून्मुनीश इह नो भविता समूल,—मुन्मूलितस्मयतरुर्गुरुकेशितुल्यः । यो जैनशासनविभेदभियेंद्रभूतिं, ज्यायानपि व्रतलघुं गुरुमेव मेने ॥ १ ॥ "

इति केशिगणधरकथा समाप्ता ॥ १७ ॥

कोऽपि भव्यजनो वीक्ष्य, त्रिजगत् क्षणभङ्गुरम् । गृह्णाति संयमं सद्यः, करकण्डूमहीशवत् ॥ १ ॥

चम्पापुर्यां श्रीवासुपूज्यचैत्यशोभितायां दधिवाहनो राजाऽभूत् । तस्य राज्ञो राज्ञी पद्मावती चेटकभूपपुत्री बभूव । सा पद्मावती सगर्भा दोहदमेवं बभार । धृतातपत्रा भूभर्त्रा, भूपनेपथ्यधारिणी । सिन्धुरस्कन्धमारूढा, किल कक्षे ललाम्यहम् ॥१॥ एवंविधं दोहदं लज्जावशात् सा प्रकाशयितुं भूपाग्रे न शशाक । सा कृशाङ्गी भूपपृष्टाऽन्यदा स्वं दोहदं प्रकाशयामास । ततो राज्ञा सा पत्नी धृतातपत्रा करिस्कन्धारूढा वने नीता । तदाऽकस्माद्गजः स्मृतविन्ध्याटवीशल्लक्यादिभोगो मदोन्मत्तः सन् चचाल दूरदेशं प्रति । राजराज्ञ्यौ दध्यतुः, किं करिष्यते आवाभ्यामयं गजो न तिष्ठति । राजा तु दुरासन्नान् महावृक्षान् वटादीन् वीक्ष्य राज्ञीं प्रति जगौ । वटपादपे त्वमवलम्बेथाः, अहमप्य-

वलम्बयिष्ये च। यथा गजोऽग्रतो गच्छति आवां तु गृहे ततो गमिष्यावः। ततः समागते वटपादपे राजा लब्धलक्षतया विलग्नः राज्ञी तु विहस्ता न लग्ना गजस्तु राज्ञीयुतो दूरतो गतः, अदृशीभूते गजे राजा वटादुत्तीर्य सशोकः प्रियावियोगात् दुःखितोऽभूत्। राज्ञी तेन गजेन दुष्टकर्मणेव निर्मानुषारण्यं नीता। यतः—"स्फुरन्त्युपायाः शान्त्यर्थमनुकुले विधातरि। प्रतिकूले पुनर्यान्ति, तेऽप्युपाया अपायताम् ॥ १ ॥ तृष्णान्धः स गजः सरसीं वीक्ष्य पयः पातुं स्थितः, पयः पिबति गजे शनै राज्ञी उत्ततार। ततः सा राज्ञी भयभ्रान्ता तद्वनं मुक्त्वाऽन्यत्र गता। क्रूरेभ्योऽपि महाक्रूरं, भीषणेभ्योऽपि भीषणम्। वनं च वीक्ष्य सा राज्ञी, चिन्तयामास चेतसि ॥ १ ॥ यतः—"विद्वान् मूर्खो भटो भीरुः, श्वपाकः पाकशासनः। राजा रङ्कश्च नात्येति, शासनं कोऽपि दुर्विधेः ॥ २ ॥ वीक्ष्यते यदथैकत्र, तदन्यत्राऽन्यथा क्षणात्। अहो दोलेव लोलेव, दुर्विधेर्विविधो विधिः ॥ ३ ॥ निर्माणकर्मणा ख्यात—पङ्कपिण्डकरो विधिः। दण्डेन भ्रमयत्येषः, जगच्चक्रं कुलालवत् ॥ ४ ॥" क तत्पुरं क स मे प्रेयान् केदं वनं मम समागतं, चिन्तितं च किमुपालम्भेनानेन। विधेरग्रतः कोऽपि न छुटति, मयैव स्वयमियमापत् स्वस्मिन् विहिता कस्य दोषो दीयते। ततो धैर्यवज्रमयं हृदयं कृत्वा पद्मावती चतुःशरणाराधनाद्युच्चारपूर्वं

सुकृतानामनुमोदनं कृत्वा सागारमनशनं जग्राह । एवंविधे श्वापदसंकटे पञ्चपरमेष्ठिनमस्कारं पुनः पुनः स्मरन्ती वर्त्मनि पद्मावती तापसाश्रमं ययौ । तां स्त्रियमागतां वीक्ष्य तापसोऽवग्--का त्वं कस्य सुता कस्य च प्रियाऽसि, कुतस्तवावस्थेदृशी विद्यते । तवास्मिन्नाश्रमे तिष्ठन्त्याः समाधिर्भविष्यति । ततस्तया सर्वं स्वं वृत्तान्तं तस्याग्रे प्रोक्तम् । तेन तापसेन चेटकराजसुता वाग्भिरमृतकल्पाभिः सैवं जल्पिता । त्वमत्र तिष्ठ । ततस्तेन सा स्वोपाहृतैः फलैः प्राणयात्रामकार्यत । ततस्तया प्रोक्तमेष मार्गः कुत्र गमिष्यति ? तेनोक्तं दन्तपुरस्याध्वाऽस्ति । तत्र दन्तवक्रोऽस्ति भूपतिः । तत्र मध्ये निर्भया त्वं चम्पां गच्छेः । ततः सा पद्मावती तापसं प्रणम्य दन्तपुरे गत्वा साध्वीनां पार्श्वे ययौ । वन्दित्वा सा साध्वीर्यथावदग्रे उपविष्टा, तावत् साध्व्योक्तं, श्राविके ! कुतस्त्वमागाः ? निवेदिते तया स्वोदन्ते प्रवर्तिनी प्रत्युवाच । दुःखैकसारे संसारे, सुखाऽऽभासोऽत्र स क्वचित् । स्वप्ने राज्यमिव भ्रान्ति--रियं विजयतेतराम् ॥ १ ॥ दुर्घटं घटयन्नेपः, सिद्धं विघटयन् हठात् । घटनोद्घटनव्यग्रो, नैव निर्विद्यते विधिः ॥२॥ जिनं जिनमतं किञ्च मुक्त्वा जिनमतं श्रितान् । अवस्कर इवाप्यन्य--शेषसंसारविस्तरः ॥ ३ ॥ इत्यादि धर्मोपदेशमाकर्ण्य प्ररूढसंवेगा तदैव व्रतमग्रहीत् पद्मावती । व्रतविघ्नभियाऽप्रोक्ते तया गर्भे निजे प्रवर्तिनी जगौ--महानुभागे ! त्वया पूर्वं किं गर्भस्वरूपं

नाख्याथि ? उड्डाहो भाविष्यति । पद्मावत्योक्तं भगवति ! यद्यहं गर्भमकथयिष्यं तदा त्वं संयमं नादास्यः । तेन भयेन मया नोक्तो गर्भः । ततो महत्तर्या सा साध्वी प्रच्छन्नं स्थापिता । अन्येद्युः पद्मावती पुत्रमसूत । तदा प्रवर्तिन्योक्तं यद्ययं बालो रक्ष्यते तदा महानुड्डाहो भवति यदि कस्यापि हस्तेनार्प्यते तदा बहुसंसारवर्द्धकं पापं भवति, ततोऽयं यत्नतः शनैः पुराद् बहिर्मुच्यते । ततः पद्मावती नीरागचित्ता संसारमसारं मत्वा नामाङ्कितमुद्रारत्नयुतं बालकं श्मशाने मुमोच । तं बालं तथास्थितं दृष्ट्वा जनङ्गमो लात्वा रहो निजगृहमनयत् । अनपत्यायाः स्वपत्न्याः स बालकोऽर्पितो जनङ्गमेन । सा जनङ्गमा तं बालं पालयति स्म । एतत् सर्वं पद्मावत्या रहसि स्थितया ज्ञातं मंदाक्षी सा साध्वी स्वाश्रयं प्राप्ता । स बालो जनङ्गमगृहे ववृधे । रममाणः स बालेषु, राजते राजतेजसा । पतितोऽपि गणे श्वाण्णां, यो मणिर्मणिरेव सः॥१॥ राजोपमानः स बालः क्रीडति स्म करकंडूया बालात् करेण कंडूयति स्वं शरीरमिति स बालः । ततोऽभवत्तस्य करकण्डूरिति नाम । सोऽपि षड्वर्षदेशीयः सार्वभौमाकृतिः पितुरादेशात् पातिस्म श्मशानदेशं धिग् विधिम् । अन्येद्युस्तत्रागतौ मुनी वंशजालीं वीक्ष्य मिथः प्रोचतुः, योऽस्य वंशस्य मूलाच्चतुरङ्गुलीस्त्यक्त्वा वंशस्य चतुरङ्गुलमात्रं पर्व आदत्ते, सोऽवश्यं राज्यं लभते । तदा साधुवचस्तादृशं मात-

ङ्गचालेन केनचिद् द्विजन्मना च श्रुतम्। द्विजातिर्यावद्दहः साधुप्रोक्तं करोति तावत् करकण्डूरागत्यावग्—रे द्विज ! त्वं कथं मम वंशं मत्पालितं गृहीष्यसि ?। कलिं कुर्वाणौ तौ राजकुले गतौ। ताभ्यां स्वं स्वं स्वरूपं प्रोक्तम्। कारणिकैर्हसद्भिरुक्तं—भो चाण्डालपुत्र! यदा तव राज्यं भवति, तदा त्वयाऽस्मै द्विजाय ग्राम एको दातव्यः। वंशखण्डोऽस्य चाण्डालपुत्रस्य भवतु। ततः स जातिस्वभावत्वात् चाण्डालपुत्रं हन्तुं द्विजातिश्चिन्तयति। द्विजातिस्वरूपं चावगत्य चाण्डालो जिजीविषुः सकुटुम्बोऽगमत् कांचनपुरम्। तत्रापुत्रे नृपे मृतेऽमात्यैरधिवासितदिव्यैः पुराद् बहिरभ्येत्य प्रदक्षिणीकृत्य करकण्डू राज्येऽभिसिषेचे। तदा जयजयेतिशब्दमुच्चैः पौराश्चक्रुः। तदानीं तूर्यनपूर्यत स्वयं, प्रधानैरुपनीते च परिधायान्यद्वाससी प्राग् शिक्षित इव तुरङ्गममारुरोह स बालकः। सोऽन्तर्नगरं यावत् प्रविशति नागरैः प्रीतिसागरैः सह, तावन्म्लेच्छोऽयमिति द्विजास्तं मेनिरे। ततस्तैर्द्विजैः रुद्धः क्रुद्धो दण्डं यदाऽऽददौ। तावद्देवताधिष्ठितत्वात्तदाऽतिदिद्यते। तदा द्विजा भीता जगुः। भोराजंस्त्वं! वर्णाश्रमाणा—माचार्यो देव! राजसे। त्वं महेन्द्रो महेशस्त्वं, त्वं विष्णुस्त्वं प्रजापतिः। साक्षात्तेजस्त्वयि क्षात्रं, पवित्रमतिजृम्भते॥१॥ कर्मणा कृष्यते वर्णः कर्मणा स निकृष्यते। वर्णानां ब्राह्मणादीनां, जातिस्तत्रात्र कारणम्॥२॥ यः कर्मप्रकृतौ लीनः, परब्रह्ममयः-पुमान्। स जात्या कम्बुकेनेव, किं परा

वर्त्यते क्वचित् ॥३॥ नरकेषु च तिर्यक्षु, मनुष्येषु सुरेषु यः । आत्माऽयं नावमन्तव्यः, स क्वचिद् दैवतं हि सः ॥४॥ अनेनैव निमित्तेन, त्रिकालज्ञानिनो जगुः । जीवस्य हिंसया पापं, जीवस्याऽहिंसयाऽनघम् ॥५॥ अन्धे तमसि मग्नानामस्माकं त्वं महागुरुः। तेजसैव तथाऽनेन, ज्ञानमुन्मीलितं हि तत् ॥ ६॥ नाराजकेषु राष्ट्रेषु, हव्यं दहति पावकः । न च धर्माः प्रवर्तन्ते, न च वर्षति माधवः ॥७॥ कुतो धनं कुतो दाराः, शरीरं च कुतो नृणाम् । सर्वदेवमयस्त्राता, यदि राजा न पालयेत् ॥ ८ ॥ सर्वावलोकने सूर्यः, पापानां निग्रहे यमः । कुबेरो भरणे राजा, प्रायश्चित्तेषु पावकः ॥९॥ तदेनस्तदविज्ञान–जनितं नो विशोधय । तीर्थं राजा प्रजानां हि, कल्मषक्षालनक्षमम् ॥ १० ॥ इत्यादिना ब्राह्मणैर्विज्ञप्तो भूपतीव्रमत्सरी उवाच । येषामहं संमतोऽस्मि ते सर्वे मान्याः अन्ये तु द्विजा वध्याः । तैर्द्विजैः सर्वैरुक्तं, त्वमस्माकमनुमतोऽसि । ततोऽवग् भूपः–एतर्हि तर्हि मातङ्गान् संस्कारैर्ब्रह्मसूरपि (कुरुध्वं)। ततो भीता द्विजा भूपं प्रति जगुः–यदाह देवस्तत्तथ्यं, संस्कारैरेव विप्रता । नहि ब्राह्मणजात्योऽपि, व्रात्यो ब्राह्मण्यमर्हति ॥ १ ॥ अद्विजस्याष्टवर्षस्य, जातस्यातः परं द्विजैः । तत्त्वेनाभूततद्भावात्, बटूकरणमिष्यते ॥२॥ यद्देवस्य रोचते तत्तु क्रियते एव, व्यवहारस्तु बलीयान् विद्यते लोकेषु। ततो विमृश्य राजोवाच द्विजान् प्रति । ततः ते जनङ्गमा द्विजा भवन्तु अस्माकं

वाटधानवासिनः । इत्युक्ते नृपेणाकाशात् पुष्पवृष्टिरपतत् । जय जय भूपेति दिव्यवागजनि अथ तैर्ब्राह्मणै राजादेशात् तेषां जनङ्गमानां संस्कारो विहितः । ततस्ते ब्राह्मण्यं लभन्तोच्चैर्देवमानवपूजिताः । उक्तञ्च—"दधिवाहनपुत्रेण, राज्ञा तु करकण्डुना । वाटधानकवास्तव्याश्चाण्डाला ब्राह्मणाःकृताः ॥१॥" ततो महामहोत्सवपूर्वं पुरे प्रविश्य मन्त्र्यादिभिर्विहितराज्याभिषेकः सप्रतापो राज्यं करोति करकण्डूः । इतः स वादी द्विजः करकंडूं प्राप्तराज्यं श्रुत्वा तत्र चाभ्येत्य ग्राममेकं याचते स्म । ततो राज्ञोक्तं द्वारस्थेन द्विजं प्रति । गच्छ द्विज चम्पायां तत्र मन्निदेशतो ग्रामं तुभ्यं दास्यति । ततो द्विजस्तत्र गत्वा चम्पेशं ग्रामं याचते स्म । करकण्डूनिदेशतो दधिवाहनो दध्यौ । अहो मूर्खः स करकण्डूराजा, य एवं मां वदति । ततो राजा तं प्रति प्राह—कपोतपोन्नतिम्लेच्छपोतः कथमनात्मवान् । यो मया सैनिकः श्येनः पक्षीन्द्रेण विरुध्यते ॥१॥ त्वं तु दूतत्वात् याचकत्वादवध्यो रणे तस्य प्राणग्रहणादहं तुभ्यं ग्रामं दास्यामि । ततस्तेन द्विजेन तद्भूपोक्तं करकण्डूपार्श्वे गत्वा प्रोक्तम् । ततस्तत्कालमेव सन्नह्य करकण्डूश्चम्पां प्रत्यचलत् । ततस्तं करकण्डूमायान्तं श्रुत्वा दधिवाहनो वप्रं सज्जीकृत्य युद्धायाचलत् । सङ्ग्रामभूमिर्युद्धाय सज्जीकृता । ततो मिथः द्वयोर्भूपयोर्महान्तं संग्रामं जीवसंहारं च मत्वा पद्मावती साध्वी पुत्रपत्योर्युद्धं जायमानं ज्ञात्वा तद्वारणाय करकण्डूपा-

श्रेऽभ्येत्यावग्—अहं तव माता अयं तव पिता दधिवाहनो राजा । मुद्रारत्नाक्षरसंवादतः पितरं दधिवाहनं मातरमार्यिकां पद्मावतीं करकण्डूर्मेने । हृष्टश्च करकण्डूरत्यन्तम् । ततः आर्यिकया प्रबोधयितुं भूपं पुरमध्ये गतं, दासीपार्श्वात् समागतं राज्ञे ज्ञापितं साध्व्या, ततो राजा तत्रागत्य प्रमोदात्तां पद्मावतीं यतिनीं प्रणणाम, पृष्टं च (राज्ञा) त्वया कथं संयमो गृहीतः ? स गर्भः कथमभूत ? तयोक्तं येन तव वप्रो वेष्टितोऽस्ति स एव ते पुत्रः । ततो राजा प्रातः पादचारेण तत्र पुराद् बहिरायाद्यावत्तावत् पुत्रोऽपि पादचारी सम्मुखमेत्य पितुः पादौ प्रणणाम । ततः पुरमध्ये महामहोत्सवपूर्वं तं पुत्रं प्रवेश्य प्राप्तवैराग्यो राजा राज्यं दत्त्वा च दीक्षां दधिवाहनो ललौ । करकण्डूर्द्वयो राज्ययोर्भोगभूत् । करकण्डूः कलिङ्गेशो न्यायात् प्रजाः प्रशशास । तस्य राज्ञः क्रमाद् बहूनि गोकुलान्यासन् । तन्मध्ये एको बली शंडोऽभूत्, येन बहवः शंडा भग्नाः । स चाभीष्टोऽभूद्राज्ञः भृशम् । तमेवान्यदा मृत श्रुत्वा यावत्तत्र तं द्रष्टुं याति भूपस्तावन्मृत एव स दृष्टो राज्ञा । तं तथास्थं शंडं वीक्ष्य राजा श्लोकभेवं जगौ यतः—यस्य दृता महोक्षाणो, दूरादाकर्ण्य गर्जितम् । गोष्ठाजिरेष्वभज्यन्त, वट्यते हि स वत्सकैः ॥ १ ॥ चेतनाचेतनं लोकं, सृष्ट्वा सृष्ट्वाऽतिघस्मरः । अहो महोदरः कालो, न तृप्यति हहा लिहन् ॥ २ ॥ उपायैर्मूर्खकेभ्योऽपि, रक्ष्यते वस्त्व-

नेकशः । न सर्वमूर्खकस्यास्य, प्रतीकारस्तु विद्यते ॥ ३ ॥ दृश्यते यद्यदैवेह, तत्तदैव न दृश्यते । त्रिलोकीमल्लिकागोलैः, कालः खेलति कौतुकी ॥ ४ ॥ अभूत्वाऽऽप्नोति यो भूतिं, भूत्वा वाऽभूतिमाप्नुयात् । अभावादिरभावान्तोऽभावो भावः कथं भवेत् ॥ ५ ॥ कुटुम्बदेहश्रीदारा, वर्यवस्त्वादयोऽखिलाः । अनित्या एव दृश्यन्ते, नित्यं तूलोच्चया इव ॥ ६ ॥ इत्यादि ध्यायन् यावद्वैराग्यवासितो जातिस्मृत्या पूर्वभवं सस्मार यः करकण्डूरभूत् तावद्देवता रजोहरणादिलिङ्गमदात्तस्मै । देवतादत्तलिङ्गोऽथ, तृणवत्त्यक्तवैभवः । भेजे प्रत्येकबुद्धत्वं, करकण्डुर्मुनीश्वरः । श्वेतं सुजातं सुविभक्तशृङ्गं, गोष्ठाङ्गणे वीक्ष्य वृषं जरार्त्तम् । ऋद्धिं त्वऋद्धिं प्रसमीक्ष्य बोधात्, कलिङ्गराजाऽऽप चरित्रधर्मम् ॥ १ ॥

॥ इति करकण्डूकथा समाप्ता ॥ १८ ॥

हल्ल विहल्ल सुदंसण, साल महासाल सालिभद्दो अ ॥
भद्दो दसन्नभद्दो, पसन्न चंदो अ जसभद्दो ॥ २ ॥

स्वल्पस्यापि कोऽपि हेतुः स्यात्, वैराग्ये भववस्तुषु । गजमृत्युः परित्यज्य (त्यागे) यथा हल्लविहल्लयोः ॥ १ ॥

अस्योपनयः । श्रेणिकेन भूपेन सुतप्रीत्या हल्लविहल्लयोः स्वसुतयोः सेचनकः पट्टहस्ती प्रसादीकृतः । कुणिको रुष्टः । श्रेणिकं सेवकपार्श्वात्ताडयति स्म । अन्येद्युः कुणिको यावद्भोक्तुमुपविष्टः, तावत् पुत्रेण स्थाले मूत्रितं तदा कूणिकेन वक्त्रं मोटयित्वा पुत्रो दूरीकृतः । चिल्लणाऽवग्—यदा त्वं जातस्तदा दुष्टस्वप्नोपलम्भादुत्करटिकायां त्याजितस्त्वत्पित्रा पश्चादानीतस्त्वं तदा तवैकाङ्गुली मार्जार्या खण्डिता । तत्रातीव वेदना जाता । यदोत्पन्नवेदना या त्वदङ्गुली तां त्वत्पिता मुखान्तः क्षिपतिस्म, तदा तव वेदना याति स्म । एवं सदा मोहवशात् त्वदङ्गुलीं क्वथितां मुखे चिक्षेप । त्वं त्वधुना पितरमेवं कशाघातैस्ताडयसि ततोऽभ्युत्थाय त्वरितं कुठारं गृहीत्वा काष्टपञ्जरं भङ्क्त्वा-पितरं कर्षयिष्यामीति ध्यायन् यावन्निःससार तावत्तं पुत्रं तथाविधं समागच्छन्तं दृष्ट्वा श्रेणिको दध्यौ, मां मारयिष्यत्येषः । ततः तालुपुटविषभक्षणान्मृत्वा प्रथमपृथिव्यां गतः । ततः कुणिकपत्न्या पद्मावत्या स्वपुत्रस्योदयनस्य कृते सेचनको हस्ती याचितो हल्लविहल्लपार्श्वात् । ततस्तौ बिभ्यतौ प्रणश्य विशालायां मातामहस्य चेटकस्य शरणं गतौ । कूणिकनृपश्च सर्वाभिसारेण तां पुरीं रुरोध । चेटककूणिकयोः समरसंरम्भे जायमाने मनुष्याणां सहस्राणि परलोकं गच्छन्ति स्म । हल्लविहल्लौ सेचनकमारूढौ कूणिकसेनाया उपस्कन्दं कुरुतः स्म । दुर्द्धरत्वात्तौ बहून् भटान् हत्वा यातः स्म ।

स्वं बलं ताभ्यां बहुहन्यमानं दृष्ट्वा कूणिकेन स्वसैन्यस्य परितः खादिराङ्गारपूर्णा खातिका रहः कारिता । तदुपकण्ठे त्रासः सेचनको हल्लविहल्लाभ्यां भृशं प्रेर्यमाणो विभङ्गज्ञानी तौ हल्लविहल्लौ निजस्कन्धादुत्तार्य स्वयं खातिकायां पतितो विपेदे प्रथमश्वभ्रे गतो हस्ती । तेनैव वैराग्येण व्रतोत्कण्ठितौ हल्लविहल्लौ जातौ । ततः शासनदेव्या उत्पाट्य श्रीवीरपार्श्वे मुक्तौ । ततः संयमं जगृहतुः । श्रीजिनोदिततपःपरौ हल्लविहल्लौ मृत्वा सर्वार्थसिद्धिविमाने जग्मतुः ।

॥ इति हल्लविहल्लकथा समाप्ता ॥

पालयन् दर्शनं शुद्धं, शीलं च मुक्तिसौख्यदम् । मुक्तिं गच्छति भव्याङ्गी, सुदर्शन इवादरात् ॥ १ ॥

तथाहि—जम्बूद्वीपदक्षिणादिग्विभूषणभरतखण्डे चम्पापुरी विद्यते तत्र रणसिंहभूपपुत्रो दधिवाहनराजा राज्यं न्यायाध्वना पालयामास । राधावेधसाधनेन राज्ञा अभया देवी परिणीता । तत्रार्हद्दासोऽतुलबलसमृद्धिः श्रेष्ठी वसति स्म । अर्हद्दासी पत्नी तस्यासीत् । द्वावपि श्रीजिनोक्तधर्मं कुरुतः । तस्या अर्हद्दास्या उदरे कोऽपि पुण्यवान् जीवोऽवततार । अर्हद्दासी सदा जिनपूजाशुद्धसम्यक्त्वपालनपराऽजनि । क्रमात् पुत्रमसूत । शुभेऽहनि स्वजनलोकसन्मान-

दानपूर्वं नानाप्रकारदानं याचकेभ्यो ददानोऽर्हद्दासश्रेष्ठी पुत्रस्य सुदर्शन इति नामादात्। वर्द्धमानः क्रमात् पुत्रः सुदर्शनो गृहीतधर्मशास्त्रोऽभूत् यतः—"रूपयौवनसम्पन्ना, विशालकुलसम्भवाः। विद्याहीना न शोभन्ते, निर्गन्धा इव किंशुकाः ॥ १ ॥ पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलाः। तस्मान्मूर्खसहस्रेण, प्राज्ञ एको न लभ्यते ॥ २ ॥" ततः सुदर्शनः पित्रा मनोरमाऽभिधां महेभ्यपुत्रीं वरमहोत्सवपुरस्सरं परिणायितः। तया पत्न्या सह धर्मं कुर्वाणः सुदर्शनः सुदर्शनं पालयतिस्म। मूलं बोधिद्रुमस्यैतत्, द्वारं पुण्यपुरस्य च। पीठं निर्वाणहर्म्यस्य, निधानं सर्वसम्पदाम् ॥ १ ॥ गुणानामेव चाधारा, रत्नानामिव सागरः। पात्रं चारित्रवित्तस्य, सम्यक्त्वं श्लाघ्यते न कैः ॥ १ ॥ पुत्रं गृहभारधरणयोग्यं मत्वाऽर्हद्दासश्रेष्ठी गुरुसंनिधौ संयमं जग्राह। सोऽथ सुदर्शनो विशेषेण राजमान्यो बभूव। पितुरधिकोऽभूद्गुणैः सुदर्शनः। यतः—" कुम्भः परिमितमम्भः, पिबति पपौ कुम्भसम्भवोऽम्भोधिम्। अतिरिच्यते सुजन्मा, कश्चिज्जनकान्निजेन चरितेन ॥ १ ॥ तत्र चान्यो नृपार्च्यः पुरोधाः कपिलाह्वः सुदर्शनस्य मित्रमभूत्। अन्येद्युः कपिलः प्रोचे प्रेयस्या कपिलाख्यया, स्वामिन्! तिष्ठसि कुत्र त्वं? पुरोधाः प्रोवाच, सुदर्शनस्य मित्रस्योपान्ते तिष्ठामि, गोष्ठीक्रियते तत्र मया। तस्य किं नाम त्वया न ज्ञायते?। रूपेण कन्दर्पः, वाचा वाचस्पतिः,

बुद्धया बुधः, तेजसा सूर्यः, सौम्येन सोमः, कर्मच्छेदनकर्कशत्वेन मङ्गलः, धिषणया शुक्रः, कुकर्ममन्दत्वेन मन्दो जितोऽस्ति तेन सुदर्शनेन। किं च विशेषेण शीलगुणेनैकेन सर्वेपूत्कृष्टोऽस्ति सुदर्शनः। किन्तु विधात्रा सर्वगुण-मयश्चक्रे सः। सा कपिला पत्युर्मुखात्तद्गुणानाकर्णयन्ती सुदर्शनश्रेष्ठिन्यनुरागिण्यभूत्। यतः—"स्मितेन भावेन मदेन लज्जया, पराङ्मुखैरर्द्धकटाक्षवीक्षितैः। वचोभिरीर्ष्याकलहेन लीलया, समन्तपाशं खलु बंधनं स्त्रियः॥१॥"

सदा सुदर्शनेन सङ्गमिच्छन्ती कपिलाऽन्येद्युर्भर्तरि कस्मिंश्चिद् ग्रामे गते कूटघटबुद्धिः सुदर्शनश्रेष्ठिगृहे गत्वा श्रेष्ठ्यग्रेऽवग्। भवतः सुहृत् ज्वरी जातोऽस्ति। तेन त्वामाकारयति। अहं त्वामाकारयितुमागताऽस्मि। विलम्बो न क्रियते, वेलां क्षमते न। सुदर्शनोऽवग्—मया न ज्ञातं सम्यग्। ततः सर्वं कार्यं मुक्त्वा तत्कालमुत्थाय सुदर्शनो मित्र-गृहमध्ये गतः। यथा यथा सुदर्शनो गृहमध्ये प्रविशति तथा तथा सा द्वाराणि दत्ते। ततो मध्येगेहं गत्वा कपि-लाऽवग्—स्वामिन्नहं बहुकालात् त्वत्सङ्गं वाञ्छन्ती अस्मि। इयं शय्या इदं मद्वपुस्तदायत्तं विद्यते। भोगान् स्वेच्छया भुंक्ष्व। ततो यदा सुदर्शनो न मन्यते तदा तस्य शरीरेण सङ्गं करोति सा बलात्। सुदर्शनस्तु न मनाग् विकारं गच्छति। सुदर्शनो जगौ त्वं केन वाहिता ? अहं तु नपुंसकोऽस्मि। त्वया कस्याप्यग्रे न वक्तव्यम्। ततस्तयोक्तं

त्वयाऽपि कस्याग्रे मे दुश्चेष्टितं न वक्तव्यम्। ततस्तया मुक्तः श्रेष्ठी स्वगृहमागतोऽभिग्रहं ललौ। मया कस्यापि गृहे यथा तथा न गन्तव्यम्। ततः अन्येद्युर्वसन्तसमये सपौरः पृथ्वीपतिरुद्यानसम्पदं भोक्तुं महाश्चर्येण निर्ययौ। अभया महाराज्ञी साऽपि यानारूढा कपिलया सार्द्धं निर्ययौ। तदा मनोरमा षड्भिः पुत्रैर्निर्ययौ। सुदर्शनोऽप्यचालीत्। कपिलाऽपि मनोरमां पुत्रयुतां वीक्ष्याभयां प्रति प्राह। केयं स्त्री ? कस्यामी पुत्राः ? अभयाऽवग्—सुदर्शनश्रेष्ठिनः इयं पत्नी इमे पुत्राश्च, तच्छ्रुत्वा कपिलाऽवग्—पुरा मयैष परीक्षितो यत्रा तदा नपुंसकोऽस्मीत्यब्रवीत्। अभयोचे—त्वं वाहिताऽसि वञ्चिताऽसि। तदा कपिलाऽवग्—सखि ! अयमेवंविधोऽस्ति। यदि त्वमेनं रमयसि तदा ज्ञास्यते, त्वमेव चतुराऽसि। अभययोक्तमहमेनं वशीकरोमि तदाऽहं ज्ञेया। ततोऽन्यदा पण्डितया सख्या राज्ञी-प्रोक्ता तव चेतसि का चिन्ताऽस्ति ? तदा अभयया प्रोक्तं स्वं स्वरूपम्। ततो सखी जगौ-मेरुशिखरं कदाचिच्चलति, तथापि सुदर्शनो न चलति शीलव्रतात्। असौ परनारीसहोदरः सुदर्शनः। अभयाऽवग्—एकत्रा तं सुदर्शनमत्रानय त्वम्। पण्डिताऽवग्—पर्वदिने छलेनात्रानयिष्ये। अन्यदा कौमुदीमहोत्सवे समागते राजा पटहवादनपूर्वं सान्तपुरः पौरलोकयुतो वने गतः। तदाऽभया शिरोर्तिमिषं कृत्वा गृहेऽस्थात्। सुदर्शनश्रेष्ठी चतुर्दशीपर्व मत्वा

नृपं मुत्कलाप्य देवकले कायोत्सर्गे तस्थौ । तदा पण्डिता यक्षप्रतिमां सप्तभायां वाद्यवादनपूर्वं शिबिकारूढां कृत्वाऽऽनयति, एवं कृत्वा कृत्वा विश्वसितेषु सौविदल्लादिषु यक्षप्रतिमाच्छादनारथमारोप्य राजभवने राज्ञीपार्श्वे नीतः सुदर्शनः श्रेष्ठी कायोत्सर्गस्थ एव । ततोऽभययोक्तं भो सुदर्शन ! मया सह भोगान् भुंक्ष्व । चाटूक्तिभिस्तया भूयो भयो जल्पमाने सुदर्शनो न वक्ति तदाऽभया प्राह—यदि त्वं मदीयं वचो न मन्यसे तदा तव प्राणानहं गृहीष्यामि । यदा स सुदर्शनः श्रेष्ठी तद्वचो नाङ्गीचकार । तदा तयोच्चैः स्वरं जल्पितमिति भो भो लोका ! धावत अयं दुष्टः पापी मदीयं शीलं भङ्क्तुमागतोऽस्ति । ततो राजपुरुषा आगताः श्रेष्ठी राजपार्श्वे आनीतो राज्ञा वादितोऽपि पौषधभङ्गभयान्न वदति, तदा राजा रुष्टोऽवग्—अयं पापी शूलायां क्षिप्यताम् । ततो राजपुरुषैः पुरमध्ये भ्रामयित्वा शूलायां क्षेप्तुं श्मशाने नीतः सुदर्शनः । इतो मनोरमा स्वस्य भर्तुः स्वरूपमवगत्य मम भर्ता तादृग् न भवतीति । मनोरमा कायोत्सर्गे स्थिता । यदा मम भर्तुर्विघ्नो विलयं व्रजिष्यति, तदा मया कायोत्सर्गः पारयितव्यः । ततो यावद्राजपुरुषास्तं शूलायां चिक्षिपुस्तावत् स्वर्णसिंहासनं कृतं शासनदेव्या । ततो राजा तत्र गतः । तं तथास्थं श्रेष्ठिनं दृष्ट्वा राजा चमत्कृतः । शासनदेव्योक्तं, यदि अस्य श्रेष्ठिनः कोऽपि विरुद्धं चिन्तयिष्यति, तदा तस्य प्राणा मया

गृहीष्यन्ते । असौ श्रेष्ठी शीलवान् महोत्सवपुरस्सरं स्वगृहे गतः । ततो श्रेष्ठी वैराग्यवान् संयमं गृहीत्वा सर्वकर्मक्षयं कृत्वा प्राप्तकेवलज्ञानः सुदर्शनः शीलप्रभावात् मुक्तिमगात् मनोरमाऽपि क्रमात् संयमं गृहीत्वा क्षीणसर्वकर्मपुञ्जा मुक्तिं गता । इति सुदर्शनश्रेष्ठिकथा समाप्ता ॥ २० ॥

भावनां भावतोऽनित्या-दिकां भावयतां नृणाम् । ज्ञानं शालमहाशाल,-साधूनामिव जायते ॥ १ ॥

तथाहि-पृष्टचम्पा नाम पुरी स्वःपुरीसोदरा जिनप्रासादधोरणीबन्धुरा विद्यते । तत्र शालो राजा राज्यं पृथिवीं पालयामास न्यायात् । तस्य लघुभ्राता महाशालो युवराजपदवीं प्राप । इतः पूर्वं काम्पील्यपत्तने पिठरराज्ञे शालमहाशालपित्रा यशोमती पुत्री दत्ता । तयोः पुण्यं कुर्वतो गांगलिर्नामा पुत्रोऽभूत् । इतः श्रीवीरजिनो रविः पृथिवीं प्रबोधयन् गोविलासैः पृष्टचम्पापुर्या उद्याने सुभूभागाभिधे समवासार्षीत् । देवै रूप्यरत्नस्वर्णमयं प्राकारत्रयं योजनमितं समवसरणं चक्रे । श्रीवीरः सिंहासने धर्मदेशनां कर्तुमुपविष्टः । तदा शालमहाशालौ सहोदरौ धर्मं श्रोतुं तत्राजग्मतुः । परमेश्वरो योजनगामिन्या वाण्या सर्वजीवप्रबोधदायिन्या धर्मोपदेशं दातुं लग्नः । यतः-" देवा दैवीं नरा नारीं, शबराश्चापि शाबरीम् ।

तिर्यञ्चोऽपि तैरश्चीं, मेनिरे भगवद्गिरम् ॥१॥ ताराध्वतारातटिनीभुजङ्ग–तरङ्गगङ्गासिकताकणानाम् । सङ्ख्यां स कृत्वा कुरुतां तु धर्मं, यो धर्ममीप्सुः कृतकृत्यगेहः ॥१॥ अवाप्य धर्मावसरं विवेकी, कुर्याद्विलंबं न हि विस्तराय । तातो जिनरतक्षशिलाधिपेन, रात्रिं व्यतिक्रम्य पुनर्न नेमे ॥२॥ मज्जं विसयकसाया, निद्दा विगहाय पंचमी भणिया । एए पंच पमाया, जीवं पाडंति संसारे ॥ ३ ॥ तणकट्ठ जह अग्गी, लवणसमुद्दो नईसहस्सेहिं । नय सो जीवो सक्को, तप्पेउं कामभोगेहिं ॥४॥ जरा जाव न पीडेइ, वाही जाव न वड्ढइ । जाव इंदिया न हायंति, ताव धम्मं समायर ॥ ५ ॥ इत्यादि धर्मोपदेशं श्रुत्वा प्राप्तवैराग्यः शालो महाशालं प्रति जगौ । त्वं राज्यं गृहाण अहं दीक्षां गृहीष्यामि । मम-राज्यसुखं तृणतुल्यं शोभते, राज्यान्तं नरकान्तमिति वचनात् । महाशालो जगौ, अहं तवैवंविधोऽभीष्टोऽस्मि, भ्रातर्मां नरके क्षेप्तुमीहसे त्वं राज्यविश्राणनात् । मुक्तिसुखं त्वमीहसे भोक्तुं, मम नरकवेदनां दातुं वाञ्छसि ? । अहो ! एवं-विधा प्रीतिस्तव । यतः–"नो वैद्या नच भेषजं न च पिता नो बान्धवा नो सुता, नोऽभीष्टा कुलदेवता न जननी स्नेहा-नुबन्धान्विता । नार्यो नो स्वजनो न वा परिजनः शारीरकं नो बलं, नो शक्तास्त्रुटितुं सुराः सुरवराः सन्धातुमायुर्ध्रु-वम् ॥१॥ एगदिवसंपि जीवो, पव्वज्जमुवागओ अनन्नमणो । जइवि न पावइ मुक्खं, अवस्स वेमाणिओ होइ ॥२॥"

इत्यादि मिथो द्वौ सहोदरौ व्रतं जिघृक्षू काम्पील्यपुरात् स्वं जामेयं गांगलिं मातापितृयुतं तत्रानयामासतुः । ततो गांगलिं जामेयं महोत्सवपुरस्सरं स्वराज्ये शालभूपो भ्रातृयुग् न्यवीविशत् । ततो जिनालयेऽष्टाह्निकामहः कृत्वा सप्तक्षेत्र्यां स्वं धनं व्ययित्वा श्रीवीरपार्श्वे शालमहाशालौ संयमं ललतुः । ततो निरन्तरं शुद्धं संयमं पालयन्तौ तपःक्रियानुष्ठानपरौ श्रुतं भणन्तौ गुरुपार्श्वे बहुश्रुतावभूताम् । एकदा श्रीवीरेण श्रीगौतमस्वामी शालमहाशालयुतो राजगृहाच्चम्पापुर्यां गांगलिजामेयप्रतिबोधाय प्रेषितः । तत्रागतः श्रीगौतमः उद्यानवने समवासार्षीत् । तत्र श्रीगौतमं शालमहाशालौ च नन्तुं गांगलिः पितृमातृयुतो ययौ । तथाहि—"संझरागजलबुब्बुओवमे, जीविए य जलबिंदुचंचले । जुव्वणे य नईवेगसंनिभे, पाव जीव किमयं न बुज्झसि ॥१॥ सम्पदो जलतरङ्गविलोला, यौवनं त्रिचतुराणि दिनानि । शारदाभ्रपरिपेशलमायुः, किं धनैः कुरुत धर्ममनिन्द्यम् ॥ २ ॥" धर्मोपदेशमाकर्ण्य श्रीगौतमस्वामिपार्श्वात् प्राप्तवैराग्यो गांगली राजा स्वं पुत्रं राज्ये न्यस्य यशोमत्या मात्रा पिठरेण पित्रा सह संयमं जग्राह । ततः श्रीगौतमस्वामिनोक्तं,—युष्माभिर्दीक्षा गृहीता परं शुद्धा पालनीया, शुद्धं संयमं विना मुक्तिर्न भवति । एके सिंहतुल्या भूत्वा दीक्षां लात्वा फेरुवत् पालयन्ति, एके जनाः कातराः फेरव इव गृहीतव्रताः सिंहा इव पालयन्ति संयमम्, एके कातराः फेरव इव संयमं गृहीत्वा फेरव इव

पालयन्ति, एके सिंहा इव साहसिका व्रतं लात्वा सिंहा इव पालयंति शुद्धं संयमम्, तेन भवद्भिस्तथा चारित्रं यतनया पालनीयं यथा करतलगता मुक्तिश्रीर्भवतां भवति । यतः " एगादिवसंपि जीवो, पव्वज्जमुवागओ अनन्नमणो । जइवि न पावइ मुक्खं, अवस्स वेमाणिओ होइ ॥ १ ॥ ततस्ते गांगालिपिठरयशोमत्यः शालमहाशालौ च श्रीगौतमेन समं चलन्त इति भावयामासुः ।—जातश्चैको मृतश्चैको, एको धर्मं करोति च । प्रायं स्वर्गसुखे जीवः, श्वभ्रे गच्छति कः समम् ॥ १ ॥ मूढाः कुर्वन्ति ये मे मे, वपुः पुत्रगृहादिकम् । तेऽपि त्यक्त्वा नरोऽगाधे, मज्जन्ति भवसागरे ॥ २ ॥ अन्यो जीवो भवेद्यत्र, देहात्तत्र गृहादिकम् । कथमेतन्मदीयं तु, मन्यते तत्त्ववित् बुधः ॥ ३ ॥ कुटुम्बधनधान्यादि, सर्वं दुःखसमुद्भवम् । देहं च मन्यते यः स्वं, कर्म बध्नाति स कुधीः ॥ ४ ॥ एको धर्ममुपार्जनं च विबुधः कृत्वा स्वयं गच्छति, स्वर्गं पापमुपार्ज्य घोरनरकं दुःखाकरं प्राणभृत् । एको दुःखततिमसारमपि भो धृत्वा च मुक्त्यालयं, तस्मात्त्वं भज तावतो हि शरणं धर्मं त्यज स्वं गृहम् ॥ १ ॥ इत्यादि भावनां भावयतां तेषां क्रमाद् केवलज्ञानं समुत्पन्नम् । श्रीवीरजिनान्तिके नन्तुं प्राप्ताः । [श्रीगौतमे त्रिः प्रदक्षिणां कुर्वति शालादिषु त्रिः प्रदक्षिणां कुर्वत्सु] (ते प्रदक्षिणयामासुः, प्रणनाम तु गौतमः ॥ तीर्थं नत्वाऽथ ते पञ्च, चेलुः

केवलिपर्षदि । तानूचे गौतमो हन्त, वन्दध्वं परमेश्वरम् ॥१॥) श्रीवीरो जगौ। भो गौतम ! केवल्याशातनां मा कुरु। गौतमोऽवक् का केवल्याशातना क्रियमाणाऽस्ति मया ? । श्रीवीरोऽवग् गौतम ! एषां शालमहाशालादीनां केवलज्ञानं जातमस्ति। ततस्तान् स्वहस्तदीक्षितान् लब्धकेवलज्ञानानुत्थाय भक्तिपूर्वं स्वं निन्दन् क्षमयामास । ततः श्रीगौतमो महावीरं जिनं प्रति प्राह भगवन् ! अहमभाग्यवान् यस्मै दीक्षां यच्छामि तस्य केवलज्ञानं जायते मम तु न । ततो भगवतोक्तं—मा खेदं कुरु तवापि केवलज्ञानं भविष्यति । यश्च श्रीअष्टापदे चतुर्विंशतिं जिनान् वन्दते तस्य तस्मिन्नेव भवे केवलज्ञानश्रीरुत्पद्यते। एतच्छ्रीवीरजिनोक्तं श्रुत्वा श्रीगौतमोऽष्टापदे गत्वा श्रीचतुर्विंशतिं जिनान्नत्वा पञ्चदशशतं त्र्युत्तरं तापसानां प्रतिबोध्य दीक्षां ग्राहयामास । तेषां साधूनां क्रमात् केवलज्ञानमुत्पन्नं परमान्नभोजनसमवसरणदर्शनप्रभुमूर्त्तिदर्शनात् । इतः शालमहाशालादयः आयुषः क्षये मुक्तिं भेजुः । इतिशालमहाशालकथा समाप्ता ॥२१॥

दददानो भावतो दानं, यतिभ्यः शुद्धमेकदा । लभतेऽनर्गलां लक्ष्मीं, शालिभद्र इवाङ्गवान् ॥ १ ॥

विषयेषु जनः स्पर्धां, कुरुते त्वस्तु मुक्तये। निर्द्वन्द्वा सा यथा जज्ञे, धन्यश्रीशालिभद्रयोः ॥ २ ॥ तथाहि—जम्बूद्वीपे दक्षिणभरतमध्ये राजगृहे पुरे श्रेणिको राजा न्यायाध्वना राज्यं चकार । तस्यामात्यो गोभद्रनामा श्रेष्ठ्यभूत् ।

तस्य पत्नी सच्छीला सुभद्राऽभूत् । अन्यदा शालिक्षेत्रं स्वप्ने वीक्ष्य क्रमात् पुत्रमसूत सुभद्रा, शालिक्षेत्रस्वप्नात् शालिभद्र इति नाम दत्तम् । अष्टवर्षदेशीयः शालिभद्रः पित्राऽशेषकलाः पाठितः । यतः प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम् । तृतीये नार्जितो धर्म्मश्चतुर्थे किं करिष्यति ॥ १ ॥ क्रमान्महेभ्यपुत्रीर्द्वात्रिंशतं श्रेष्ठी पुत्रं यौवने पर्यणाययत् । देवविमानसमे गृहे ताभिः पत्नीभिः समं भोगान् भुञ्जानः शालिभद्रो गतमपि कालं न जानाति, स्वर्गेऽप्सरोभिरिवेन्द्रः सुखं तिष्ठति तथाऽयम् । अन्यदा गोभद्रः श्रेष्ठी उत्पन्नवैराग्यः श्रीवीरपार्श्वे दीक्षां गृहीत्वा विधिना संयमं प्रपाल्य गृहीतानशनो मृतो देवोऽभूत् । स सुरः शालिभद्रभार्यैः सुतवात्सल्यतः पुत्रस्य भद्रायुक्तस्य नित्यं दिव्यं भूषणादिवस्तु ददातिस्म । " पंचसु जिणकल्लाणेसु, चेव महरिसितवाणुभावाओ, जंमंतरनेहेण य, आगच्छंती सुरा इहयं ॥ १ ॥ चत्तारि पंच जोयण–सयाइ गंधो य मणुअलोअस्स । उड्ढं वच्चइ जेणं, न हु देवा तेण आवंति ॥ २ ॥" इतस्तत्र पुरे वणिजो रत्नकम्बलान् गृहीत्वा श्रेणिकपार्श्वे विक्रेतुमाययुः । राज्ञा मूल्ये पृष्टे तैर्लक्षद्रविणमूल्यमेकैकस्य रत्नकम्बलस्य प्रोक्तम् । राज्ञोक्तं एकेन लक्षमूल्येन कम्बलेन बहवस्तुरङ्गमा लभ्यन्ते, तेन मया न गृहीष्यन्ते । ततस्ते पुरमध्ये विक्रेतुं गताः । रत्नकम्बल-

स्वरूपमवगत्य चेल्लणा राज्ञी प्राह स्वामिन् ! एकं रत्नकम्बलं मह्यं देहि इति कदाग्रहं जग्राह राज्ञी । ततो राज्ञा त एव वणिज आकार्य रत्नकम्बलो लक्षद्रव्येण मार्गितः । तैरुक्तं भद्रायाः सर्वाणि रत्नकम्बलानि दत्तानि लक्ष-लक्षद्रविणमूल्येन । ततो राज्ञा पुमानेको रत्नकम्बलं लक्षद्रव्येण मार्गयितुं प्रेषितो, भद्रापार्श्वे गत्वा लक्षद्रविण-मूल्येनैकं रत्नकम्बलं याचते स्म । भद्रा प्राह तं प्रति ते षोडश कम्बला द्विधा द्विधा कृत्वा शालिभद्रस्य द्वात्रिंशत्प्रियाभ्यो मयाऽर्पिताः । ताभिरंघ्रीन् प्रक्षाल्य लूषयित्वा च त्यक्तास्ते रत्नकम्बलाः । यदि राज्ञः कार्यं स्यात्तदा खंडितानि रत्नकम्बलानि गृहाण चिल्लणार्थे । गच्छ त्वया विज्ञप्यतामेवं प्रभुः । स पुमान् गत्वा भद्रोक्तं राज्ञोऽग्रे प्राह । तदा राज्ञी प्राह वणिजोऽपि वर्याः येषां पत्न्य एवंविधरत्नकम्बलभोगं कुर्वन्तिस्म । लक्ष्मीर्यदि भोगाय नायाति तदा तया किं प्रयोजनं, या नदीवेगगजकर्णध्वजादिवच्चञ्चलाऽस्ति । यतः—" संज्झरागजल-बुब्बूओवमे, जीविए य जलबिंदुचंचले । जुव्वणे य नईवेगसंनिभे, पाव ! जीव ! किमयं न बुज्झसि ॥ १ ॥ सम्पदो जलतरङ्गविलोला, योवनं त्रिचतुराणि दिनानि । शारदाभ्रपरिपेशलमायुः, किं धनैः कुरुत धर्ममनिन्द्यम् ॥२॥" ततः श्रेणिकस्तं शालिभद्रं द्रष्टुकामः स्वं जनमाकारयितुं प्रैषीत् । आहूते शालिभद्रे भद्रा स्वयमेत्य भूपपार्श्वे

व्यजिज्ञपत् । नायाति जातु मत्सूनुः, धरित्रीश ! बहिः क्वचित् । मद्गृहागमनाद्गेहं, ममाद्य त्वं पवित्रय ॥१॥ श्रेणिकः कौतुकी प्राह—भद्रे ! आयास्यामि भवत्या गृहे शालिभद्रं द्रष्टुम् । भद्राऽवक्—त्वं कियत्कालं तिष्ठेत्युक्त्वा गृहमागत्य गोभद्रदेवपार्श्वात् विचित्रगजतुरङ्गकदलीप्रभृतिचित्ररचनां गृहे सर्वत्र कारयित्वा राजमार्गे तु विशिष्टतमापूर्वदिव्यपट्टकूलादिविचित्ररचनां कारयित्वा हट्टशोभांच स्ववेश्मनृपवेश्म यावत् भूपमाकारयामास । ततो राजा स्वगृहान्निर्गत्य राजवर्त्मनि हट्टशोभामपूर्वां स्थाने स्थाने कृतां स्थाने स्थाने शातकुम्भमयलोद्रनीलमणिमयमयूरमौक्तिकमयस्वस्तिकाभरणदिव्यपट्टकूलविहितोल्लोचादिशोभां पश्यन् पदे पदे दिव्यसुरभिद्रव्यभूषिताशेषादिग्देश भद्रागृहमागात् । चतुर्थ्यां भुवि भूपं दिव्यसिंहासनेऽध्यास्य भद्रा सप्तम्यां भूमौ गत्वा शालिभद्रमभाषत । श्रेणिकोऽत्रागतोऽस्ति त्वां वीक्षितुम् । शालिभद्रोऽवग्—मातः ! यत् क्रयाणकं समायातमस्ति तद् गृह्यतां, भद्राऽभ्यधान्न च स द्रव्यं क्रयाणकं वा किन्तु मगधाधीशः श्रेणिकः सर्वप्रजापालकोऽस्ति सः । इति श्रुतिपथाऽपूर्वां मातृवाणीमाकर्ण्य दुःखितो मनसि दध्यौ, धिग् ममेदं जन्म, यन्ममापीश्वरोऽस्ति परः । अतः परं परायत्तै—र्वृत्तिर्भोगैरलं मम । गहीष्ये चरणं चारु, श्रीवीरचरणान्तिके ॥ १ ॥ इति ध्यायन् मातृवचनानुरोधतः शालिभद्रः सुकुमालतनुः भूपपार्श्वेऽभ्येत्य प्रणामं विन-

यादकार्षीत् । आलिङ्ग्य भूभुजाङ्केन शालिभद्रमुत्सङ्गीकृतः । अग्निस्पर्शान्नवनीतं यथा गलति, तथा राज्ञो स्वाङ्गस्पर्शाद्गलद्बिन्दुतनुं शालिभद्रं वीक्ष्य भूपोऽवादीत्, भो भद्रे ! कथमेष ते पुत्र एवं गलद्बिन्दुशरीरो दृश्यते । भद्राऽवग्—अस्य पिता गृहीतसंयमो भूत्वा देवलोके गतः, तत्रस्थः स्नेहान्मनोऽभीष्टं वस्तु पुत्राय मह्यं च पूरयति । तस्मादयं मनुष्योचिते गन्धवासस्रगादिभिर्दूयते पुत्रो मदीयोऽयं तन्मुच्यतामयं सुतः, ततो राज्ञा मुक्तः शालिभद्रः सप्तमभूमिभुवं गतो विमुक्तकर्मा जीव इव मुक्तिम् । ततो भद्रया दिव्यस्नानपानीयैः स्नानं कार्यमाणभूपाङ्गुलीयकं स्नानवाप्यां पपाताकस्मात् । ततः कृतस्नानो राजा इतस्ततो विलोकयन् विलक्षोऽभूद्यावत्तावद्भद्राऽऽदेशाद्दासी कूपमध्ये पतितां मुद्रिकां दर्शयामास । ततो राजा स्वमुद्रामन्या बह्वीर्मुद्रा विलोक्य दध्यौ । मम मुद्रायाः पूर्वं च स्नानवापीपतितमुद्रिकाया अङ्गाररत्नयोरिव सर्षपस्वर्णाचलयोरिवान्तरं विद्यते । राजा जगौ—केषामेतानि मुद्रिकादीनि दृश्यन्ते ? । दासी आचष्ट—शालिभद्रस्य तद्भार्याणां चाभरणानि दिनं दिनं प्रत्युत्तीर्यन्ते यानि तानि अत्र क्षिप्यन्ते, गोभद्रदेवार्पितानि नवानि भूषणादीनि परिधत्ते शालिभद्रादिपरिवारसर्वः । ततो विस्मितो भूप. सपरिवारो दिव्यभोजनेन भद्रया भोजितो-विभूषणैर्विभूषितश्च दध्यौ—क मम सुखं कास्य सुखम् । ततः शालिभद्रं भोगसुखं स्मरन् भूपः स्वावाससासाद ।

इतः श्रीधर्मघोषगुरुमागतं श्रुत्वा शालिभद्रस्तत्रागत्य विनयपूर्वं ननाम । ततो गुरुभिरिति धर्मोपदेशो ददे । "गेहं जर्जरमाखुभिः कृतबिलं चेलं च यूकालयं, शय्या मत्कुणसंकुला वपुषि रुग् रूक्षासनं भोजनम् । वृत्तिर्भारवहाद्भिका पत्नपत्राक् जाता कुरूपा वधू–र्यस्येत्थं ननु सोऽपि नोज्झति गृहासङ्गं हहा मूढधीः ॥ १ ॥ अज्जं कल्लं परंपरारं, पुरिसा चिंतंति अत्थसंपत्ति । अंजलिगयंव तोयं, गलंति जियं न पिच्छंति ॥ २ ॥ ये जनाः संयमं शुद्धं, पालयन्ति सदाऽऽदरात् । तेषां करतले स्वर्गा–पवर्गश्रीः प्रजायते ॥ ३ ॥ इत्यादि श्रुत्वा शालिभद्रो जगौ–मातरमापृच्छ्य संयमश्रियं गृहीष्यामि श्रीप्रभुपादपार्श्वे । ततः शालिभद्रो वैराग्यवासिताशयो गुरुं नत्वा गृहे ययौ । मातृपार्श्वं शालिभद्रः कृताञ्जलिर्जगौ–मया श्रीधर्मघोषसूरिपार्श्वे धर्मः श्रुतः तेनाऽहं तत्पार्श्वे संयमं गृहीष्यामि, ममादेशं देहि । भद्राऽवग्–त्वदीयं शरीरं सुकुमालमस्ति व्रतचर्या दुष्करा, तेन तव देहः कष्टं न सहिष्यते ॥ "शालिभद्रो जगौ मातः, पुमांसः सुखमांसलाः । व्रतकष्टासहा नूनं, जायन्ते कातराः किल ॥१॥ गतसारेऽत्र संसारे, सुखभ्रान्तिः शरीरिणाम् । लालापानमिवाङ्गुष्ठे, बालानां स्तन्यविभ्रमः ॥२॥" इत्यादि युक्त्या मातरं पर्य्यवसाय्य प्रतिदिनमेकैकां पत्नीं प्रबोध्य त्यजन् सप्तक्षेत्र्यां स्वां श्रियं शालिभद्रो वपतिस्म । इतः शालिभद्रस्य कनिष्ठा भागिनी धन्यस्य पत्युः शिरः

स्नपयन्ती नेत्राश्रु मुमोच । स्कन्धोपरि नेत्रांभः पतितं मत्वा धन्योऽवग्--किं प्रिये रोदिपि ? । प्रिया प्राह--मम भ्राता शालिभद्रो व्रतार्थी दिनं प्रति एकां एकां पत्नीं मुञ्चन्नस्ति, तेन ममाश्रुपातोऽभूद् दृग्भ्याम् धन्योऽवग्--ते बन्धुर्हीनसत्त्वोऽस्ति । प्रियाऽऽचष्ट--यदि ते शक्तिरस्ति तदा किं त्वया न त्यज्यन्ते प्रियाः । इति मर्मवचः श्रुत्वा धन्योऽवग्--अतः परं त्वया न सङ्गमो मम कर्तव्यः । तादृशं दीक्षाग्रहणोत्सुकं मनो ज्ञात्वा ताः खिन्नाः पत्न्यः सर्वाः पतिं प्रति प्रोचुः--एपा पत्नी मुग्धेवं जजल्प । नाथ ! नर्मोक्तिभिः क्रियमाणाभिरेवं तव कर्तुं न युज्यते । ततः शालिभद्रभगिनी प्राह--स्वामिन् ! यन्मया मौग्ध्यात् प्रोक्तं तत् क्षम्यतां ममापराधस्त्वया, अतः परं मया मनागपि न करिष्यतेऽपराधः अस्मादृशामुपरि कृपा एव क्रियते, उत्तमानामेवं कर्तुं न युज्यते, यदि त्वया संयमो गृहीष्यते तर्हि त्वामेवानुपतिष्यामः, पतिः स्त्रीणामेव दुस्त्यजः । इति ता ब्रुवतीर्धन्यो धन्यंमन्योऽन्वमन्यत ॥ १ ॥

ततो धन्य उत्थाय शालिभद्रोपान्ते गत्वाऽवग्--भो शालिभद्र ! किमेवं कातरः सन्नेकैकां स्त्रियं त्यजसि, मया तु सर्वा अपि स्त्रियः समकालं त्यक्ताः प्रव्रज्याऽऽवाभ्यां गृहीष्यते । इतः श्रीवीरो वैभारगिरौ समवासार्षीत् । यावच्छालिभद्रः सर्वाः प्रियास्त्यक्ष्यति तावद् धन्यो दानं दत्त्वा सादरोऽपि श्रीवीरपादाब्जे संयमं जग्राह । धन्यं प्रव-

जितं श्रुत्वा शालिभद्रोऽपि श्रीवीरपर्यन्ते संयमं जग्राह । स्वामिनैव समं शश्वद्विहरन्तौ यतीश्वरौ । धन्यश्च शालिभद्रश्च, तौ संजातौ बहुश्रुतौ ॥ १ ॥ एकद्वित्रिचतुर्मासो—पवासादितपःपरौ, नत्वा वीरं पुरादेत्य, शुश्रुवतुः धर्मदेशनाम् ॥ २ ॥ तथाहि—माणुस्स खित्तजाई कुलरूवारुग्गमाउयं बुद्धी । सवणग्गहाण सद्धा, संजमो लोगंमि दुल्लहा होइ ॥ १ ॥ अन्यदा मासक्षपणपारणे धन्यशालिभद्रौ भिक्षार्थं गच्छन्तौ वीरं नत्वा जगदतुः—स्वामिन् ! अद्य कस्या हस्ते आवयोः पारणं भविष्यति । प्रभुः प्राह—मातुर्हस्तेन ते शालि—भद्रार्थ ! यतिनायक !। भविष्यति द्रुतं पार—णकं धन्ययुतस्य ते ॥ १ ॥ इच्छामीति गदन् शालि—भद्रो धन्यसमन्वितः । भिक्षार्थं वीरमानम्य, चचाल नगरान्तरे ॥ २ ॥ भद्रागेहद्वारि क्षामताधारिविग्रहौ धन्यशालिभद्रसाधू विहर्तुमदृष्टपूर्वाविवागतौ तया भद्रयापि नोपलक्षितौ । श्रीवीरं शालिभद्रं धन्यमद्य वन्दिष्ये इति ध्यानपरा भद्रा स्वं पुत्रमपि शालिभद्रमायान्तं नाबुद्ध । ततो यती तौ क्षणमात्रं प्रतीक्ष्य तस्माद्गृहान्निरीयतुः । पुरीप्रतोल्यां तौ समायातौ । इतो दधिविक्रेत्री काऽपि वृद्धा स्त्री पुरीमध्ये समायान्ती उत्प्रस्रविणी जज्ञे शालिभद्रनिभालनात् । हृष्टा प्रीतिपरा शालिभद्राय हृद्यं दधि यथेष्टं वृद्धा प्रादात् । ततोऽभ्येत्य श्रीवीरचरणा-

न्तिके ईर्यापथिकीं प्रतिक्रम्य रचिताञ्जलिः भद्रासूरित्यभाषत—स्वामिन् ! यत्त्वया मातृहस्ते पारणकं मम प्रोक्तं तन्नाजनि कथम् ? । भगवान् प्राह—यन्मयोक्तं तत्सत्यं, पुरा शालिग्रामे एका धन्याभिधा स्त्री विधवाभूत् । तस्याः संगमाह्वो नन्दनो भर्तरि मृते ग्रामीणवत्सरूपाणि चारयामास । कदाचिदुत्सवे जायमाने प्रत्योकः पायसं निष्पद्यमानं वीक्ष्य जननीपार्श्वे तमयाचत । माताऽवग्—मे दुःस्थायाः कुतः पायसं संपद्यते । ततो बालो भृशं कदाग्रहं मंडयित्वा पायसं मार्गयन् भृशं रुरोद । यतः—"चोरा य चुल्लका वि य, दुज्जणविप्पा य निच्चपाहुणया । नच्चिणिधुत्तनरिंदा, परस्स पीडं न याणंति ॥१॥ स्मारं स्मारं पतिं पूर्वसम्बन्धिनीं लक्ष्मीं च तारं तारं वृद्धा रुरोद । तां रोदनपरां वीक्ष्यासन्नगृहस्त्रीभिर्मिलित्वा दुःखकारणं पृष्टा वृद्धा स्वपुत्ररोदनसम्बन्धं जगौ । ततो दयया कयाचित्—स्त्रिया पय आनीतं, कयाचित्स्त्रिया तन्दुला आनीताः, कयाचित्स्त्रिया घृतं शर्करा च दत्ता, तस्यै कयाचित्स्त्रिया स्थालमपि संगमजेमनाय दत्तम् । ततो मात्रा पायसं निष्पाद्य खंडघृतयुक्तं पायसं स्थाले परिवेष्य पुत्राय वृद्धा केनचिद् हेतुना प्रातिवेश्मगृहे गता । इतस्तदैव सद्दैवतः कश्चिन्मुनिर्मासक्षमणपारणके संगमगृहे आगात् । संगमोऽपि तं यतिं चारित्रपात्रं तपःकृशतनुमालोक्य हृष्टो दध्यौ । अहो पात्रमहो वित्त—महो चित्तमिदं त्रयम् । दुर्लभं मन्दभाग्यानां, ममोद्भूतमहो अर्हम् ॥ १ ॥

इति प्रफुल्लचित्तः स्थालमुत्पाट्य हृष्टहृत् ददौ पायसं तस्मै संगमः । साधुरपि शुद्धमन्नं गृहीत्वा धन्यंमन्यो निजाश्रये गतः । भुक्तमनेन पायसं बुभुक्षयेति समायातया मात्रा पुनः परिवेषितं पायसं पुत्राय । तदा संगमो बुभुक्षयाऽऽकण्ठं भुक्त्वा रजन्यामकस्मादजीर्णतया मृत्वा गोभद्रश्रेष्ठिपुत्रो भवानभूत् । तयापूर्वभवसम्बन्धिन्या मात्राद्य दत्तं दधि तुभ्यम् । ततोऽसारं संसारं मत्वा कृतपारणकौ तौ धन्यशालिभद्रौ वीरमापृच्छ्य वैभारगिरौ गत्वा शुद्धे भूतले कृतपादपोपगमानशनौ तस्थतुः । तदा समेत्य भद्रा तीर्थेशं नत्वाऽपृच्छत्—शालिभद्रधन्यौ कथं भिक्षार्थं नायातौ मद्गृहेऽद्य । तद्वृत्ते प्रभुणोक्ते भद्रा दुःखिता वैभारगिरिं गत्वाऽनुश्रेणिकश्च भद्रा तौ तथास्थितौ वीक्ष्य तथा भद्रा रुरोद यथाऽन्यानपि बहून् रोदयामास, मया मन्दभाग्येन गृहागतौ न ज्ञातौ, एकवारं उत्तरं दत्तम् । श्रेणिकोऽवग्—भो शालिभद्र ! एकदा मात्रे स्वं मुखं दर्शय, मातृतः परं तीर्थं न विद्यते । ततो राजा भद्रां प्रति प्राह—भद्रे ! त्वं धन्याऽसि, यस्याः पुत्र इदृगस्ति । इत्यादि कथयित्वा भूपेन प्रबोधिता भद्रा स्ववधूयुता गृहमगात् । श्रेणिको निजं गृहं गतः । ततः शुक्लध्यानारूढौ शालिभद्रधन्यौ सर्वार्थसिद्धाख्ये विमाने जग्मतुः ।

भद्राऽपि क्रमात् प्राप्तवैराग्या श्रीवीरजिनपार्श्वे संयमं गृहीत्वा तपस्तप्त्वा च स्वर्गं गता । ततश्च्युत्वा मुक्तिं यास्यति ।

॥ इति शालिभद्रकथा समाप्ता ॥ २२ ॥

कुर्वाणो मानवो नित्यं, जिनेन्द्रशासनोन्नतिम् । भद्रबाहुगणाधीश, इवाप्नोति वृषं बहुम् ॥ १ ॥

तथाहि—दक्षिणदिशि प्रतिष्ठानपुरे भद्रबाहुवराहाह्वौ द्वौ द्विजौ सहोदरौ निर्धनौ वसतः स्म । तत्र श्रीयशोभद्रसूरयो विहरन्तः समाजग्मुः। तत्र भद्रबाहुवराहौ धर्मं श्रोतुं तत्रायातः । धर्मोपदेशोऽत्र भोगाभङ्गुरवृत्तयो० ॥ १ ॥ इत्यादि धर्मोपदेशं श्रुत्वा द्वौ सहोदरौ स्वगृहं गत्वा मन्त्रयेते स्म—गृहे तु श्रीस्तादृशी नास्ति मनुष्यजन्म सफलीभवति यया [सा तु नास्ति] तेन संयमो गृह्यते । इत्यादि विमृश्य द्वावपि बान्धवौ प्रवव्रजतुः । क्रमाद्भद्रबाहुश्चतुर्दशपूर्वी बभूव । षट्त्रिंशत्सूरिगुणवान् दशवैकालिक १ उत्तराध्ययन २ दशाश्रुतस्कन्ध ३ कल्प ४ व्यवहार ५ आवश्यक ६ सूर्यप्रज्ञप्ति ७ सूत्रकृत ८ आचाराङ्ग ९ ऋषिभाषितादि दश इति ग्रन्थानां निर्युक्तिकर्ता, भाद्रबाह्वीं संहितां व्यधाच्च । तदा आर्यसंभूतविजयोऽपि चतुर्दशपूर्वधरो वर्तते । श्रीयशोभद्रसूरयः स्वर्गं ययुः । भद्रबाहुसंभूतिविजयौ स्नेहलौ मिथो विहरतः स्म । वराहो विद्वानभूत् केवलं गर्वपर्वताधिरूढोऽभूत्, सूरिपदं याचते भद्रबाहुसहोदरपार्श्वात् । भद्रबाहुना

ण इति भाषितः वत्स विद्वानसि, क्रियावानसि, तत्वज्ञोऽसि, परं सगर्वोऽसि, सगर्वस्य सूरिपदं न दद्मः। एतदुक्तं तस्य न रुचितं, गुरुवचनं वर्यमपि कस्यापि विषं भवति। अभव्यस्य सुकुमालमपि कर्णशूलं भवति। ततो व्रतं तत्याज वराहः, मिथ्यात्वं गतः, पुनर्द्विजवेषं जग्राह, वराहसंहितादि नवीनं शास्त्रं रचयामास। महाज्योतिष्को बभूव। लोकेषु स्वां ख्यातिमिति प्रथयामास। अहं बाल्ये लग्नमभ्यस्यामिस्म। तद्विचारे च सदा तिष्ठामिस्म। एकदाऽहं तु प्रतिष्ठानपुराद्बहिर्लग्नं मंडयामिस्म। तल्लग्नमस्पृष्ट्वा स्वस्थानमागमं, सुप्तः सन् गृहे लग्नमस्पृष्टं स्मरामिस्म। ततो लग्नं मार्ष्टुं तत्रोपरि चालितः। यावत्तत्र यामि तावल्लग्नस्थाने पञ्चास्यमपश्यं, तथापि निर्भयीभूय लग्न-भक्त्या सिंहस्याधो हस्तं क्षिप्त्वा, यावल्लग्नमपसारयामि तावत्सूर्यः प्रत्यक्षीभूयावग्—वत्स! तव दृढया लग्न-ग्रहभक्त्या बाढं तुष्टोऽस्मि, वरं वृणीष्व। तदा मयोक्तं—यदि त्वं प्रसन्नोऽसि तदा मां त्वं स्वविमाने नय सर्वं ज्योतिश्चक्रं दर्शय। ततोऽहं रविणा स्वविमाने स्थापितः सर्वं ज्योतिश्चक्रं दर्शितं सूर्येण चारमानादि प्रोक्तं, ततः कृतकृत्योऽहं सूर्यमापृच्छ्य विश्वोपकाराय भूमौ समागाम्। ततो लोकोपकारायाहं भ्रमन्नस्मि। मम वराहमिहिर इति नाम दत्तं रविणा, लोके परां पूजां प्रापमहम्। ततः प्रतिष्ठानपुरे जितशत्रुभूपेन स्वपुरोहितः कृतः यतः—

गौरवा० ॥ १ ॥ श्वेताम्बरान्निन्दति वराहमिहिरः सदा । एते श्वेताम्बराः काका इव कुत्सितं शब्दं कुर्वन्ति व्याख्यानछलात् । तच्छृण्वतां श्रावकाणां शिरःशूलमुत्पेदे । धिगस्माकं जीवितं, येनास्मासु सत्सु एवं गुरूणामवहीलनामेते कुर्वते, अहो महत्कष्टं अयं वराहमिहरः कलावान् नृपमान्योऽस्ति गुरून्निन्दति किं क्रियते । भवतु तथापि गुरून् विज्ञपयामः । ततः आकारिताः श्रीभद्रगुरवः । कारितस्तेषां प्रवेशमहोत्सवः, स्थापिता गुरव उपाश्रये । व्याख्याने अनेके महेभ्या राजपुत्राश्चायान्ति । भद्रबाहुमागतं श्रुत्वा वराहो बाढं जगौ, तथापि तेभ्यो नापकर्तुमशकदसौ, अत्रान्तरे भूपगृहे पुत्रो जातः । राजा वराहपार्श्वाज्जन्मपत्रिकां कारितवान् । शतवर्षायुरसौ बाला भविष्यति तेनोक्तमिति । दानानि दीयन्ते । लोका वर्धापनिकापूर्वं तत्रायान्ति राजगृहे । वराहमिहिरोऽतीव मानितो भूरिधनदानात् । गुरूणामवहीलनार्थं राज्ञोऽग्रे वराहेणोक्तं,—सर्वे जना अत्र युष्मद्गृहे समायाताः । एक आचार्यो भद्रबाहुरागतोऽस्ति सोऽत्र नायातः, तस्य देशत्यागरूपो दण्ड एव दीयते । ततो राज्ञा मन्त्रिपार्श्वाज्ज्ञापितं—त्वमत्र कथं नागाः । भद्रबाहुना ज्ञापितं—द्वितीयवारं क आगमिष्यति । राज्ञा ज्ञापितं—भो भद्रबाहो ! एवं त्वया कथमुच्यते । गुरुणोक्तं ज्ञापितं यदि सत्यमग्रे प्रोच्यते । तदा राज्ञोऽसमाधिरभूत् । राज्ञा ज्ञापितं तव न भयं

यज्ज्ञातं तत्त्वया वाच्यम् । ततो गुरुणा ज्ञापितं सप्तमदिने निशीथे बिलाडिकामुखान्मरणं पुत्रस्यास्य भावि, तस्मिन् मृते शोकविसर्जनायागमिष्यते मया । [राज्ञा ज्ञापितं कथमेतद्भवद्भिर्ज्ञातम् ।] ततो राज्ञा सर्वत्र ग्राममध्यात् बिलाडिकाः पुराद्बहिः कर्षिताः । सप्तमे दिने निशीथे धात्री स्तन्यं पाययितुं द्वारशाखाग्रे उपविष्टा । इतोऽकस्मादर्गला बालस्य मस्तकोपरि पतिता मृतश्च सः । ततो लोकैरुक्तं—वराहोऽयमज्ञानी गुरवो ज्ञानिन एव । राज्ञा धिक्कारः कृतो वराहस्य । ततः श्राद्धशतयुता गुरवः शोकापनोदाय राजपार्श्वे गताः । शोकापनोदसूक्तानि कथितानि । ततो राज्ञोक्तं—भवता बालस्य सप्तदिनायुः कथं ज्ञातं ? बिलाडिकाया मुखान्मरणं नाभूत् किं कारणं तत्र ? । गुरुणोक्तं अर्गलामुखे बिलाडिकारूपमस्ति । अस्माभिर्यदा पुत्रो भवतो जातः सा एव वेला सूक्ष्मबुद्ध्या गृहीता, तेन ज्ञातमायुः । ततो वराहः खिन्नो यावत्पुस्तकानि जले क्षेप्तुं लग्नः, तावद्वारितो भद्रबाहुना । शास्त्रेषु सर्वज्ञप्रणीतेषु सम्यग् प्रोक्तमस्ति, परं ज्ञातृत्वं दुर्लभं विद्यते । यतः "अमंत्रमक्षरं नास्ति, नास्ति मूलमनौषधम् । अनाथा पृथिवी नास्ति, आम्नायाः खलु दुर्लभाः ॥ १ ॥" अत्र ज्ञातृत्वे कारणं अस्य वराहस्य विद्यागर्वो विद्यते, यतो गर्व एवाज्ञानं नान्यत् । यतः—" प्रभुप्रसादस्तारुण्यं,

विभवोरूपमन्वयः । शौर्यं पाण्डित्यमित्येत--दमद्यं मद्यकारणम् ॥ १ ॥ "अत्रान्तरे केनचिच्छ्राद्धेनोक्तं वराहाग्रे । युष्मादृशाः कृपणकाः कृमयोऽपि यस्यां, भान्ति स्म संतमसमप्यगमन्निशाऽसौ । सूर्यांशुदीप्रदशदिग् दिवसोऽधुनाऽयं, भात्यत्र नेन्दुरपि कीटसमः किमु त्वम् ॥ १ ॥ इति वदन्नेव नष्टः स श्राद्धः । ततो बाढं रुष्टस्तस्मिन् वराहो निन्दितो लोकैर्दुनोऽभूत् । एते गुरवो ज्ञानिन एव । एकदा राज्ञा पृष्टौ वराहमिहरश्रीभद्रबाहुगुरू । अत्राद्य किं भविष्यति । वराहेणोक्तं अद्य पाश्चात्यप्रहरे अमुकस्थाने अकस्मात् जलदे वर्षति मण्डलमध्ये द्विपञ्चाशत्पलमितो मत्स्यः पतिष्यति । गुरुणोक्तं एकपञ्चाशत् सार्द्धपलमितो मण्डलात्तस्माद्बहिः पूर्वदिशि च । ततः सन्ध्यायामकस्मात् मेघे वर्षति गुरूक्तप्रमाणो मत्स्यो गुरूक्तस्थाने पतितः । ततो गुरवो मानिता वराहोऽपमानितः । ततो जिनधर्मं प्रपेदे राजा । वराहोऽपमानं गमितो भागवतीं दीक्षां लात्वा अज्ञानकष्टानि कुर्वाणो गुरुषु द्वेषं वहन् मृतः । जैनधर्मद्वेपी व्यन्तरोऽभूत् । साधुषु न प्रबभूव द्वेषवानपि । तपो हि वज्रपञ्जरप्रायं मुनीनां, अतः श्राद्धानुपद्रोतुं लग्नो व्यन्तरः गृहे गृहे रोगानुत्पादयामास । श्रावकैः स्वदुःखं रोगोत्पत्तिहेतुं गुरुणामग्रे विज्ञप्तं-- भगवन् ! त्वयि जगत्पूज्ये सति कथं सङ्घपीडा विद्यते । गुरुभिरभाणि मा भैष्ट सोऽपि वराहो मृत्वा व्यन्तरी-

भूय पूर्ववेगात् श्रीसङ्घं पीडयति स्म । [ततो गुरुभिरुक्तं–]मा दुःखं यूयं कुरुध्वं, सर्वं वर्यं भविष्यति । ततः श्रीभद्रबाहुगुरुभिरुपसर्गहरं स्तोत्रं षड्गाथामयं कृत्वा श्राद्धेभ्यो दत्तं पठनाय प्रोक्तं च तच्चेदं "उवसग्गहरंपासं, पासं वंदामि कम्मघणमुक्कं । विसहरविसनिन्नासं, मंगलकल्लाणआवासं ॥ १ ॥ विसहरफुलिंगमंतं, कंठे धारेइ जो सया मणुओ । तस्सगहरोगमारी, दुट्ठजरा जंति उवसामं ॥२॥ चिट्ठउ दूरे मंतो, तुज्झ पणामोवि बहुफलो होइ । नरतिरिएसुवि जीवा, पावंति न दुक्खदोगच्चं ॥ ३ ॥ तुह सम्मत्ते लद्धे, चिंतामणिकप्पपायवब्भहिए । पावंति अविग्घेणं, जीवा अयरामरं ठाणं ॥४॥ इय संथुओ महायस भत्तिभरनिब्भरेण हियएण ता देव दिज्जबोहिं भवे भवे पासजिणचंद ॥५॥" तमुपसर्गहरं स्तोत्रं पठतां श्राद्धानां स व्यन्तरो मनागपि प्रभवितुं न समर्थः । ततो रोगोपशान्तिर्जाता च । यत्र तत्रापि कार्ये स्तोत्रे स्मर्यमाणे धरणेन्द्रेणागत्य गुरुपार्श्वात् प्रान्तगाथाऽपसारिता । तत् स्तोत्रमद्यापि स्मृतं विघ्नानि उपशामयति । स श्रीभद्रबाहुगुरुश्चतुर्दशपूर्वधरः बहुकालं भव्यजीवान् प्रतिबोध्य स्वर्गं गतः । ततश्च्युतोऽवश्यं मुक्तिं यास्यत्येव ।

। इति श्रीभद्रबाहुकथा समाप्ता ॥ २५ ॥

अभिमानं विमुञ्चन्ति, ये जना ऋद्धिसंभवम् । त एव वृण्वते मुक्तिं, दशार्णभद्रभूपवत् ॥ १ ॥

तथाहि—अत्रैव भरते दशार्णपुरपत्तने दशार्णभद्रभूपो भुवं शशास । "पार्थिवानामलङ्कारः, प्रजानामेवपालनम् । किरीटकटकोष्णीषैर्भूष्यन्ते केवलं नटाः ॥ १ ॥ भपस्त्रिकालं जिनपूजां चकार । यतः—"जिनस्य पूजनं हन्ति, प्रातः पापं निशाभवम् । आजन्म विहितं मध्ये, ससजन्मकृतं निशि ॥१॥" अन्यदा दशार्णपुरोपान्तस्थदशार्णगिरौ श्रीवीरः सार्वः समवससार । देवैः स्वर्णरत्नरजतवप्रमयं योजनमितं कपिशीर्षश्रेणिरोचिष्णु चतुःप्रतोलीचारु समवसरणं कृतं । तत्रोपविष्टः प्रभुश्चतुर्मुखश्चतुस्त्रिंशदतिशयशाली चतुष्षष्ठीन्द्रादिद्वादशपर्षदामग्रे धर्मोपदेशं दत्ते । तदोद्यानपालो भूपाग्रे श्रीवीरागमं ज्ञापयामास । राजा पारितोषिकं ददौ । तत उत्थाय ससाष्टपदानि संमुखं गत्वा प्रभुं स्तौति । यथा—जगद्वितीर्णकल्याण ! कल्याणकमलालय ! । जय त्वं जिन सर्वज्ञ ! सर्वज्ञततिसंयुत ! ॥ १ ॥
कलाकलामलज्ञानो—दय ! दयोदधे ! प्रभो ! । तार ! तारय मां धूत-मान मानभवाम्बुधे ! ॥ २ ॥
स्मारं स्मारं गुणग्रामं, कारं कारं तव स्तुतिम् । दर्शं दर्शं मुखं तेऽद्या--भूवं भूवंद्य ! निस्तमाः ॥ ३ ॥
स्तुत्वेति दध्यौ नृपः—प्रातर्विस्तरादहं प्रभुं वन्दिष्ये । यथा पुरा केनापि न वन्दितः भूपो लोकानां वीरागमनज्ञा-

पनाय पुरे पटहं दापयामास । पुरं पताकातोरणवन्दनमालादिरम्यं दन्दह्यमानागुरुकर्पूरव्याप्तनभोमण्डलं चाकारयत् । प्रातः सर्वशृङ्गारसारः सिन्धुरारूढो राजा सज्जीबभूव । तत्राष्टादशसहस्रं गजाः, चतुरशीतिलक्षाणि वाजिनः, २१ सहस्रं रथाः, ९१ कोटि पत्तयः, १६ सहस्र ध्वजाः, मेघाडम्बरछत्राणि पञ्चशतानि, ६९००० स्त्रीकर्यः, ५०० राज्यः सुखासनारूढाश्चेलुः । सामन्तसचिवादयोऽपि सशृङ्गाराश्च । स्थाने स्थाने गीतनृत्यादीनि कार्यन्ते । लोका अपि स्वस्वर्द्धिमानशृङ्गाराश्चेलुः, राजापीदृग् परिवारशाली याचकेभ्यो रूप्यस्वर्णदुकुलादि दानं ददानः पुष्पप्रकरशोभितराजपथे गर्वाज्जगदपि तृणं मन्यमानः छत्रशाली प्रभुं नन्तुं चचाल । दशार्णाद्रिसमीपे ययौ । ततो यानानि संस्थाप्य तत्र पञ्चाभिगमपूर्वं प्रभुं प्रदक्षिणीकृत्य यथोचितस्थानमुपाविशत् राजा । तदा हृष्टो राजा दध्यौ—यथा सर्वर्द्ध्या प्रभुर्मया नेमे, तथा न केनापीन्द्रादिना चक्रिणा वा वन्दितो भावी । तदा दशार्णभद्रस्य गर्वं सौधर्मेन्द्रोऽवधेर्ज्ञात्वा दध्यौ अहो उत्तमोऽयं भूप एवं गर्वं धत्ते न तद्वरं, यतो लोके गर्वः श्रेष्ठो न । यतः—
" उत्सर्पयन् दोषशाखा, गुणमूलान्यधो नयन् । उन्मूलनीयो मानद्रु—स्तन्मार्दवसुहृत्प्लवैः ॥ १ ॥ औचित्याचरणं विलुम्पति पयोवाहं नभस्वानिव, प्रध्वंसं विनयं नयत्यहिरिव प्राणस्पृशां जीवितम् । कीर्तिकैरविणीं मतङ्गज इव—

प्रोन्मूलयत्यंजसा, मानो नीच इवोपकारनिवहं हन्ति त्रिवर्गं नृणाम् ॥ २ ॥ अस्याहो भक्तिरागोऽयं, विश्वपूज्यस्य पूजने । परमेतेन मानेन, दुष्यतेऽमुष्य हीयते ॥ ३ ॥ निखिलैर्निर्जरैरेव, शक्रैः सर्वर्द्धिभिर्जिनाः । युगपद्यदि पूज्यन्ते, तथापि स्युर्न पूजिताः ॥ ४ ॥ जिनानामनन्तगुणानां सर्वतः पूजा न केनापि कर्तुं शक्यते । ततः शक्रेण भूपगर्वोत्ताराय व्योम्नि दिव्यशक्त्या ६४ सहस्रं गजा विचक्रिरे । तत्रैकैकहस्तिनः ५१२ मुखानि । मुखे मुखेऽष्टौ दन्ताः । दन्ते दन्तेऽष्टौ वाप्यः । वाप्यां वाप्यामष्टकमलानि । कमले कमले एकैकैव कर्णिका । कर्णिकायामिन्द्रोपवेशाय सिंहासनं, तत्रेन्द्रोऽग्रमहिषीयुत उपविशति । कमले कमले लक्षपत्राणि । पत्रे पत्रे द्वात्रिंशद्देवदेवीरचितानि३२बद्धनाटकानीन्द्रैः सर्वैः कार्यन्ते । प्रथममेकगजे दन्तसङ्ख्या४०९६, एकगजे वाप्यः ३२७६८, एकगजे पद्मानि २६२१४४, कर्णिकाशक्रोपविशनप्रासादयोः सङ्ख्या २६२१४४, एकगजे पद्मदलानि २६२१-४४०००००, एकगजे द्वात्रिंशद्बद्धनाटकसङ्ख्या ८३८८६०८००००० । अतः परं सर्वगजसङ्ख्या ६४००० एकग-जमुखानि ५१२ । ३ कोटि २७ लक्ष ६८ सहस्रं मुखसर्वसङ्ख्या । गजस्य एकमुखे ८ दन्ताः । २६ कोटि २१ लक्ष ४४ सहस्रं सर्वगजदन्तसङ्ख्या, दन्ते दन्ते वाप्यः ८ । २०९ कोटि ७१ लक्ष ५२ सहस्रं सर्वगजवापीसङ्ख्या ।

वाप्यां वाप्यां ८ कमलानि १६७७ कोटि ७२ लक्ष १६ सहस्रं सर्वगजकमलसङ्ख्या । कमले कमले लक्ष-लक्षपत्राणि १६ शतलक्षकोटी ७७ लक्षकोटि ७२ सहस्रकोटिः १६० कोटयः सर्वगजपत्रसङ्ख्या । पत्रे पत्रे द्वात्रिंशद्बद्धनाटकं ५३६८ कोटाकोटि ७० लक्षकोटि ९ सहस्रकोटि १२० कोटयः, एवं सर्वमीलने सर्वगजनाटकसङ्ख्या॥ १६ शतलक्षकोटि ७७ लक्षकोटि ७२ सहस्रकोटि १६० कोटयः कर्णिका। १६७७ लक्षकोटि ७२ सहस्रकोटी १६० कोटय जिनप्रासादाः । १६७७ कोटि ७२ लक्ष १६ सहस्रं इन्द्राः । एकैकस्य इन्द्रस्य पार्श्वे ८ अग्रमहिष्यः, १३ सहस्रकोटि ४२१ कोटि ७७ लक्ष २८ सहस्रं इन्द्राणीसर्वसङ्ख्या । सर्वगजरूपानां सङ्ख्या ५३६८७०९१२०००००००० । तदेतावद्रूपनान् सौधर्मशक्रो देवदुन्दुभिनादरम्यश्रीवीरगुणग्रामगर्भनाट्यानि विलोकयन्नभस उत्तीर्य प्रदक्षिणीकृत्य प्रभुं ववन्दे भूपः । तां सौधर्मेन्द्रर्द्धिं पश्यंश्चित्रलिखित इवासीत्, ततो यदा शक्रो गजादुत्तरीतुमैच्छत् तदा गजोऽग्रिमौ पादौ स्वप्रभुं सुखेनोत्तारयितुं पर्वतस्योपरि निम्नीचकार । तदा गजस्याग्रिमौ पादौ आर्द्रपङ्के इव भुवि निमग्नौ । तदेन्द्रो गजादुत्तीर्य प्रभुं ननाम । यत्र गजः पादौ निम्नीचक्रे, तस्य स्थानस्य गजाग्रपदकमिति नाम लोकप्रसिद्धमजनि । नृपस्ताहग्विभासुरं शक्रं वीक्ष्य दध्यौ । अहोरूपमहोऋद्धि-रहो स्त्रैणं च शक्रस्य ।

अहो भक्तिरहो शक्ति–रस्यान्यत्सर्वमप्यहो ॥ १ ॥ मद्विभूतिः शक्रविभूत्यग्रेऽणूयते, अतो मुधैव गर्वः कृतः, जिनः सर्वप्रकारैर्न केनापि पूजितः स्यात् । शक्रस्यार्हेति सर्वोत्कृष्टा भक्तिः, अतोऽलं राज्यश्रियाऽनया । यद्यहमधुना दीक्षां न भजे तदा मया सर्वथा हारितमेव । यद्यत्र व्रतं गृह्णामि तदेन्द्रो जित एव । एवं ध्यात्वा भूपस्तत्रैव धीमान् पञ्चभिर्मुष्टिभिर्लोचमकृत स्वयम् । तादृशगजाश्वयुवत्यादिराज्यं–मुक्त्वा प्रभुपार्श्वे संयमं ललौ । ततो मुनिं जातं वीक्ष्य शक्रो भक्त्या नमश्चक्रे प्राह च । दशार्णभद्र ! सत्साधो ! संयमश्रीविराजित ! । धन्यस्त्वं येन दुष्पुरा, प्रतिज्ञा पूरिता निजा ॥ १ ॥ पुनः पुनः प्रणूयेति, यतिं नत्वा जिनाधिपम् । संप्राप वासवः स्वर्गे, श्रद्धापूरितमानसः ॥ २ ॥ क्रमात्कर्मक्षयं कृत्वा दशार्णभद्रो मुक्तिं ययौ ॥ इति दशार्णभद्रराजर्षिकथा समाप्ता ॥ २६ ॥

शुभध्यानं वितन्वानः, क्षीणकर्मा जनः क्षणात् । लभते केवलज्ञानं, प्रसन्नचन्द्रसाधुवत् ॥ १ ॥

पोतनपुरे सोमचन्द्रराजा । तस्य धारिणीप्रिया प्रसन्नचन्द्रपुत्रश्च । एकदा राज्ञी राज्ञः शिरसि वेणीवालान् विवृण्वती पलितं दृष्ट्वा राज्ञो हस्तेऽमुचत् जगौ च पलितानि जातानि जरां ज्ञापयन्ति । राजा जगौ–हा मे पूर्वजा

वृद्धत्वेऽनागतेऽपि सुतं राज्ये न्यस्य व्रतं जगृहुः । मम तु वार्द्धक्ये समागतेऽपि न वैराग्यं जातमहमधम एव । यतः—" नाधमानां जरा स्वान्ते, मध्यानामेति मूर्द्धतः । स्वान्तान्मूर्द्धनि धन्याना—मारोहति सतां पुनः ॥ १ ॥ लज्जयाऽहं तया हन्त, विषीदे वार्द्धकं कियत् । अखंडकुलधर्माणां, मृत्युः सोऽपि महोत्सवः ॥ २ ॥ मनसि जरसाऽभिभूता, जायन्ते यौवनेऽपि विद्वांसः । मन्दधियः पुनरितरे, भवन्ति वृद्धत्वयोगेऽपि ॥ ३ ॥ " इत्या-मुक्त्वा शीर्णतृणमिव राज्यं त्यक्त्वा प्रसन्नचन्द्रं बालमपि तदा राजा स्वराज्येऽभ्यषिञ्चत् । वनाय सोमचन्द्रो यावच्चचाल । तावद्धारिण्यपि पत्नी वारिताऽपि तेन राज्ञा समं धात्र्या सार्द्धमचलत् । सोमचन्द्रो वने गत्वा तापसव्रतं जग्राह । तस्यैवंविधा व्रतश्रीरासीत् । यतः—"उटजः सौधमिङ्गुद्या—स्तैलैर्माणिक्यदीपकाः । श्रद्धैवान्तः-पुरं श्रेष्ठं, प्रीतिः पक्षिमृगाश्रया ॥ १ ॥ सर्वासनजयो योग्या, चमूः शमदमादयः । फुलदाः फलदाः सूदा, निग्राह्या-आन्तरारयः ॥ २ ॥ क्षणः परस्य पुंसो वा, ध्यानं पाड्गुण्यचिन्तनम् । सोमचन्द्रस्य राजर्षेः, प्रव्रज्या राज्य-वल्लभौ ॥ ३ ॥ " धारिण्या तापसव्रतग्रहणात् प्राक् संपन्नगर्भया पुत्रो जनितः । प्रसवरोगेण धारिणी दिवं ययौ । वल्कलैः प्रावृतं बालं प्रति प्राह तापसः । वत्स ! तव शैशवेऽपि तव वल्कलचीरिताऽस्ति, तेन वल्कलचीरीति तव

नाम भवतु । राज्ञी दिवं गताप्यवधिज्ञानेन स्वं पुत्रं बालं मत्वा महिषीरूपं कृत्वा तत्रागत्य स्तन्यमपाययत् मोहेन । यतः—"रागी बध्नाति कर्माणि, वीतरागो विमुच्यते । जना! जिनोपदेशोऽयं, संक्षेपाद्बन्धमोक्षयोः ॥ १ ॥" धात्र्यपि तं बालकं पालयामास । धारिण्यपि स्तन्यपानं कारयामास । स मुनिः तं सुतं स्वाङ्के धत्तेस्म सदा । धान्यैरन्यैर्वन्यैः पोष्यमाणः शैशवोत्तरं भेजे । कुमारो लोकव्यवहारं कमपि मनाग् न वेत्ति । अन्येद्युः स्वं सोदरं वल्कलचीरिणं पितुरन्तिकस्थं श्रुत्वा कस्यचिन्मुखात् सहोदरेण तेन विना स्वं शून्यममंस्त प्रसन्नचन्द्रभूपः । ततः केनापि मनुष्येणाकारितो वनात्तस्मात् पितुः समीपं न मुमोच कुमारः । ततः प्रसन्नचन्द्रो दध्यौ -उपायं विना मम पार्श्वे नैष्यतीति मत्वा तां कूटरचनां वेश्यां मुक्त्वा-नान्यो वेत्ति । यतः—"मायोपनिषदां शास्त्रं, क्षेत्रं निकृतिवीरुधाम् । वशीकरणमस्त्येव, वेश्यैव मुग्धदेहिनाम् ॥ १ ॥" इत्यादि । ततो राजा पण्यस्त्रीपेटकं कपटकूटकुशलमाकार्याऽवग्—मद्भ्राता सर्वलोकव्यवहारबाह्यो वने विद्यते । स कथमपि नायाति अत्र, तथा कर्तव्यं, यथाऽत्रायाति । ताभिरुक्तमस्मदीया बुद्धिर्विलोक्यताम् । तथा करिष्यतेऽस्माभिर्यथा सुखेनात्र वल्कलचीरी भवद्भ्राता समेष्यति । ततस्ताः हृष्टाः सिंहकेसरमोदकादिवर्यखाद्ययुता ऋषिवेषधराः सिंहपोतवने ययुः । तं जन्मजटिलं क्षत्रियब्रह्मचारिण-

गतं बिल्वामलकादिफलभारिणं वीक्ष्य वेश्याः सन्मुखाः समागताः । ता वेश्या दृष्ट्वा तापसा अमी कुतोऽभ्यागता इति ध्यायन् वल्कलचीरी तातामिवादये इति प्राह—के यूयं ? काश्रमो वः ? क यास्यथ ? । ताभिरुक्तं—वयं मुनयो वीतरागाः परंपुमर्थानुरक्ताः पोतनाश्रमतस्त्वां वीक्षितुमत्रागताः तत्र भक्तिं कर्तुं च । यतः—" सपर्ययाऽतिथीनां हि, तपोवृद्धिस्तपस्विनाम् । विहिता जायते स्वर्गा—पवर्गसुखदायिनी ॥ १ ॥ " मुनिः प्राह—वनादेतानि फलानि मयाऽऽनीतानि यूयं गृह्णीध्वं बहूनि पुनरानेष्याम्यहं तानि कृतार्थोऽहमद्य भवामि युष्मद्दानविश्राणनात् । ता वेश्याः प्रोचुः—त्वदानीतेषु ईदृशेषु फलेषु विरसेषु अस्माकमिच्छा न स्यात् । पोतनाश्रमजानां फलानां विरहे [illegible] भवति नः । तेनोक्तं—पोतनाश्रमजानि फलानि कीदृशानि भवन्ति । ताभिः सितोपलानिष्पन्नमोदकादि-[illegible]नानि वर्णाणि दर्शितानि । तानि स्वादन्यास्वाद्य वल्कलचीरी बिल्वादिफलेषूद्विग्नोऽभूत् । ततस्तासामङ्गस्पर्श-[illegible]नाच्च वल्कलचीरी जगौ—अहो भवतामङ्गे ईदृशं मार्दवं सुखदं कुतोऽजनि । युष्माकं हृदये च इदं वेदिकारम-णीयं कुतोऽभूत् । ता मुनिं प्रोचुः—ये पोतनाश्रमे वने ईदृशानि फलान्यास्वादयन्ति, तेषामीदृशं सुकुमालं सुखदं वेदि-काद्वयं जायते । ततस्तेन तस्मिन् (तयोः) वेदिकाद्वयस्थफलयोर्गाढकरो दत्तस्ततस्तयाऽत्यन्तसुखमभूत । प्रोक्तं च तेन—

मम कथमीदृशानि फलानि च ईदृग्वेदिकाफलस्पर्शो भविष्यति । ततस्ताभिरुक्तं–अमु वनं त्यक्त्वा पोतनाश्रमे अस्मन्मैत्रीं कुरु यदि तदा सर्वं समीहितं भविष्यति एत्र । ततस्तासामङ्गस्पर्शं सितोपलाद्राक्षादिमाधुर्याधिकं ज्ञात्वा तस्य वनफलास्वादसुखं विस्मृतम् । ततस्तेनोक्तं–तिष्ठत यूयमत्र क्षणं, अहं यावत्तापसोपकरणानि संगोप्य छन्नं तत्रायामि । ततो यावत्तापसोपकरणादि संगोप्य यावद्वेश्यापार्श्वे वल्कलचीरी समायाति । इतः सोमचन्द्रं राजर्षिमागच्छन्तं दृष्ट्वा शापात् भीता दिशोदिशं नष्टाः । ततो वल्कलचीरी तत्पृष्ठौ एक एव ता द्रष्टुं चचाल । मृगशाव इव इतस्ततो वने भ्रमन् रथिकं पथिकं व्रजन्तं वर्त्मनि वीक्ष्याभिवादयामीति मुनिर्जगौ । रथ्याह क गन्ताऽसि ? मुनिराचष्ट–ताताहं पोतनतपोवने । रथी प्राह–अहमपि तत्र यास्यामि । ततस्तमेवानुव्रजन् तत्प्रियां वीक्ष्य ताताभिवादयामीति जगौ । ततस्तौ दम्पती दध्यतुः । अयं तापसाश्रमोत्पन्नः, स्त्रीपुंसयोरपि भेदं न वेत्ति । ततो वल्कलचीरी मार्गे गच्छन् रथ्यान् वृषान् प्रतोद्यमानान् वीक्ष्य मुनिर्जगौ । एते मृगाः किं वृथा दूयन्ते घातैः । ततो रथ्याह एतैर्वृषैरीदृशं कर्म कृतमस्ति, तेन कर्मविपाकेनेदृशी वेदना जायमानास्त्यधुना । रथी तस्यार्जवेन वशीकृतो मोदकान् तस्मै मुनये ददौ । तानपि आस्वाद्य मुनिर्दध्यौ–हुं ज्ञातं तानि फलान्येव सांप्रतं मद्भाग्येन संमुखान्यायातानि । रथी मार्गे एकं तस्करं

जित्वा तस्य चित्तं ज्ञात्वा क्रमात्पोतनाश्रममगात् । मुनिनोक्तं--क्वास्ति पोतनाश्रमः ? । रथी जगौ--अयं पोतनाश्रमः अत्र सुखं तिष्ठ । ततो रथी स्वगृहं प्रत्यचलत् । ततः प्रत्यहं प्रतिगृहं गच्छन् मुनिः स्त्रीपुंसयोर्दर्शनेनाभिवादयामीति जल्पन् वेश्यापाटके गतः । तत्र कामपि वेश्यां वीक्ष्य ताताभिवादयामीति जगौ । ततो वेश्यया मुग्धस्वभावोऽयं मुनिर्महत्पुण्यमिदं, अयं मुनिर्यदि मदीयाङ्गस्पर्शं करोति, तदाऽहं कृतार्था भविष्यामीति ध्यात्वा गृहमध्ये नीत्वा स्वाङ्गस्पर्शादिस्नानं चक्रे । वेश्या तु बहुपुण्यलाभोत्पादमात्मनि मानयन्ती तत्कृतनखक्षतादि सहते । ततो वेश्यया सुकुमालशरीरोऽयं मुनिरिति कृत्वाऽस्मत्पुत्र्या समं पाणिपीडनं कारितम् । मुनिर्दध्यौ । ईदृशमातिथ्यं कुत्रापि न दृष्टम् । तदा तस्या गृहे विवाहतूर्याणि वाद्यन्ते, वल्कलचीरी तु तस्याः करस्पर्शं परमसुखमयं मेने । इतः पूर्वनियुक्ताः पण्यस्त्रियोऽभ्येत्य तस्मिन्नेवाह्नि प्रसन्नचन्द्रभूपाग्रे प्रोचुः--स कुमारोऽस्माभिर्लोभयित्वा दूरतो नीतो यावत्तावत्सोमचन्द्रर्षिरागात् । ततो वयं शापभयान्नष्टाः । सोऽपि वल्कलचीर्यपि नष्टः । ततोऽस्माभिः स न प्राप्तः । किं करिष्यतेऽग्रत इति ज्ञायते पोतनाश्रमफलानि दर्शितानि सन्ति तेनात्रागमिष्यते च । राजा खिन्नो दध्यौ--मया वर्यं न कृतं तस्य तातस्य वियोगोऽभूत्, ममापि न मीलितः, किं क्रियते हस्तो दग्धः पृथुकोऽपि

न प्राप्तः । ततो राजा शोकातुरोऽखिलं राजकार्यं विसृज्य सशल्यस्तस्थौ । इतः कश्चिद्वेश्यागृहे नवीनं विवाहं जायमानं श्रुत्वा राज्ञोऽग्रे प्राह । राजाऽपि ता एव पूर्वप्रेषिता वेश्याः प्रेष्य स्वभ्रातुरेव विवाहं जायमानं जज्ञौ । ततो राज्ञा वेश्या तत्राकारिता प्रोक्तं च रे मद्भ्रातुः कथं त्वया स्वपुत्री दत्ता । वेश्या जगौ—सदनं स्वयमासाद्य, कुमारमुनये मया । सुताऽद्य दयितामदायि, देव ! दैवज्ञवार्तया ॥ १ ॥ तदर्थं मत्कृतः सर्वोऽपराधो नरेश्वर ! क्षम्यतां क्रियेतां मय्युपरि प्रसन्नविलोचने । ततो राजा तत्र स्वं सहोदरं प्रियासखं दृष्ट्वा मन्त्रीश्वरान् प्रति जगौ किं करिष्यते तेन भ्रात्रा नीचकुलजा कन्याङ्गीकृता । मन्त्रिणो जगदुः—न दोषोऽत्र नीचकुलादपि भूपाः कन्यां वृण्वते । यतः—"विषादप्यमृतं ग्राह्य—ममेध्यादपि काञ्चनम् । अधमादुत्तमां विद्यां, स्त्रीरत्नं दुष्कुलादपि ॥१॥" ततः स्वपट्टहस्तिसमारूढं स्वसहोदरं सप्रियं कृत्वा महता महेन भूरिदानं ददानो राजा स्वसौधमानिनाय । तत आवासः तस्य स्थित्यै अर्पितः, श्रीर्वह्वी अर्पिता । सहोदरेण सममेव राजा भुङ्क्ते । यतः—" तत्र विज्ञजनादेषः, संप्रदायप्रदायकात् । राज्ञाऽमितैर्दिनैश्चक्रे, व्यवहारबृहस्पतिः ॥ १ ॥ लिपिसंख्यानयादक्षः, पदवाक्यप्रमोदितः । स कलाकुशलो जज्ञे, प्राज्ञो राज्ञोऽभियोगतः ॥ २ ॥ अन्यदा कस्मिन्नन्याये कृते बद्धं रथिनं कुमारो मोचयामास । भ्रात्रो-

कुक्षौ हृदि गौरी, रसनाग्रे सरस्वती । हृदयेऽथ दया तस्या—वसन् वल्कलचीरिणः ॥ १ ॥ अन्याभिर्बह्वीभिः कन्याभिः समं राज्ञा स कुमारः पाणिपीडनं कारितः, युवराजपदवीं ग्राहितश्च । ततः स्वस्य भूपस्यावरजोऽत्यन्तप्रीतयेऽभूत् । ततश्च सोमचन्द्रर्षिः कुमारमदृष्ट्वा निजमात्मानमश्रुप्रवाहैरसिञ्चत् । राज्ञा प्रसन्नचन्द्रेण वल्कलचीरिसम्बन्धज्ञापनात् सोमचन्द्रराजर्षिर्निःशोकश्चक्रे । ततः पारणकं चक्रे । प्रसन्नचन्द्रस्तेन भ्रात्रा समं गोष्ठीं कुर्वन् गतमपि कालं न वेद । अथ द्वादशवर्षान्ते भर्तुरेकदा अङ्कादुत्तीर्य पुत्रोऽगादङ्कं वल्कलचीरिणः । ततस्तं ललन्तं बालकं दृष्ट्वा वल्कलचीरी स्वस्यैव शैशवं सस्मार—अहमधमोऽस्मि, यतो जाते मयि माता प्रथमं मृता, वार्द्धकत्वे मया यौवनं प्राप्तेन पिताऽपि त्यक्तः । ततः पितुः पालनर्णात्कथं मोक्ष्येऽहं धिग् धिग् मम कृत्रिमस्नेहत्वं अहं निष्ठुरो मया प्राप्तसौख्येन कदाऽपि पितुः सारा न कृता । ततोऽहमधमोऽस्मि । यतः—" इक्षुक्षेत्रं वंशजाली, कदलीविषपादपाः । फले जाते विनश्यन्ति, कुपुत्रेण कुलं यथा ॥ १ ॥ आस्तन्यपानाज्जननी पशूनां, आदारलम्भावधि चाधमानाम् । आगेहकर्मावधि मध्यमाना—माजीवितात्तीर्थमिवोत्तमानाम् ॥ २ ॥ " एवं ध्यात्वा चिरं वल्कलचीरी पितृमिलनोत्सुकः प्रसन्नचन्द्रपार्श्वे जगौ—भ्रातरहमेकदाऽपि पितुः पादनत्यर्थं न गतः, अतः परं मया तातपादनतिं विना भोजनं न कर्तव्यं तेन समा-

देशं देहि तत्र गमनाय । ततो नृपो वल्कलचीरियुतो मुनेः पावनं स्ववनं ययौ । वनमध्ये गच्छन् वल्कलचीरी भ्रातुरग्रे इदं जगौ एते बिल्वेङ्गुदीमुख्या बहवः पादपाः पुरा आरोपिताः फलान्येव ददते पथि गच्छतां, इत्यादि वार्तां कुर्वाणः प्रसन्नचन्द्रराजा तातपादाम्बुजं नत्वा मुमुदेतराम् । सोमचन्द्रमुनिस्तं गौरवयामासाङ्कारोपणात् । तदा सोमचन्द्रऋषेरानन्दाश्रुवारिभिस्तौ पुत्रौ स्वकृतं पातकमलं प्रक्षालयामासतुः । ततो वल्कलचीरी गोपितानि तापसोपकरणभाण्डादीनि प्रत्युपेक्षितुमभ्यागात् पर्णशालोटजान्तः । तापसभाण्डं तत्पूर्वमुक्तं रजोऽवगुण्ठितं स्वोत्तरीयाञ्चलेन प्रत्युपेक्षितवान् वल्कलचीरी यत्नपूर्वं, तत एवं दध्यौ--मया प्रागपि एवंविधानि यतिपात्राणि कर्हिचित् प्रत्युपेक्षितानि । इत्यूहापोहतः पूर्वभवसम्बन्धिभवं ददर्श जातिस्मरणतः--मया पूर्वं श्रीगुरुपार्श्वे चारित्रं जिनसम्बन्धि गृहीतं शुद्धं पालितं परमल्पायुष्कत्वाद्देवलोकेऽगमं, पुनस्ततश्च्युत्वा कर्मयोगाद्राजपुत्रो भूत्वा जिनधर्मं न प्रापम् । इदं राज्यं गजकर्णचपलं जीवितव्यं च । अन्तरायैरियत्कालं वञ्चितोऽस्मि मुधाऽहं, आसन्नमपि श्रामण्यं न मयाऽबोधि तदा । असारोऽयं भवोऽगाधो, नानादुःखप्रदायकः । गजाश्वस्त्रीरमामुख्यं, वस्तु सर्वं विनश्वरम् ॥ १ ॥ इत्यादि असारसंसारस्वरूपं द्वादशभावनात्मकं ध्यायन् क्षणादेव क्षीणाशेषकर्मा वल्कलचीरी कुमारः

केवलज्ञानमाप । तदा देवैरभ्येत्य यतिलिङ्गं ददे । देवविहितकनककमले निविश्य सोमचन्द्रप्रसन्नचन्द्रयोरिति धर्मो-
पदेशं ददौ वल्कलचीरी । तथाहि—मोहभूतकुलाक्रान्ते, रागद्वेषविभीषिके । क्रोधाख्योत्तालवेताले, लोभविक्षो-
भराक्षसे ॥ १ ॥ प्रेतायतेन्द्रियग्रामे, कषायोद्धुषितानले । मिथ्यात्वाख्यमहागृध्रे, मायागोमायुयोषिति ॥ २ ॥ अभि-
मानमहाशृङ्गे, मनोभवपिशाचिनि । जराजन्ममृत्युजात्यादि—शाकिनीकुलसंकुले ॥ ३ ॥ संसारनामानि महा—
श्मशानेऽत्र महाभये । कथं नियातीनिश्चिन्ता, रमन्ते हन्तजन्तवः ॥ ४ ॥ अस्माददूरे सर्वज्ञ—शासनं ब्रह्मपत्तनम् ।
निर्वेगं नातिनिर्वाण—पुरद्वारोपमं पुरम् ॥ ५ ॥ धर्मं जिनवरप्रोक्तं, कुर्वाणा मानवाः सदा । लभन्ते परमं सौख्यं,
सर्वकर्मक्षयात् क्षणात् ॥ ६ ॥ श्रुत्वेति धर्मसंबोधं, महोदययियासया । मुनिभूपावभूतां तौ, जैनशासनवासनौ ॥७॥
तदा श्रीवीरजिनः पोतनपुरे उद्याने नाम्ना मनोरमे समवासार्षीत् । तदा स वल्कलचीरी स्वयंबुद्धः केवली भ्रातृपितृ-
युतः श्रीवीरं नन्तुं ययौ । ततो जिनोऽवग्—भो केवलिन् ! त्वं केवल्यसि । त्वया मम शेषसाधूनामपि न प्रणामः कार्यः ।
ततः स्वामी केवलिसदसि गतः । सोमचन्द्रर्षिः परमेश्वरेण स्थविरपार्श्वे क्रियां शिक्षितुं मुक्तः । तदा जिनेन धर्मदेशने-
ति कृता । आयुर्वायुतरत्तरङ्गतरलं लग्नापदः संपदः ... मुरेश्वरधनुर्लोलं बलं यौवनं, विद्युद्दण्डतुलं धनं गिरिनदीकल्लोलवच्चञ्चलम् । स्नेहं कुञ्जर-

कर्णतालचपलं देहं च रोगाकुलं, ज्ञात्वा भव्यजनाः सदा कुरुत भो धर्मं महानिश्चलम् ॥१॥ इत्याकर्ण्य धर्मदेशनां प्रबुद्धः प्रसन्नचन्द्रभूपोऽसारसंसारतां विभावयन् गृहेऽभ्येत्य बालमप्यङ्गजं राज्ये निवेश्य प्रभुपार्श्वे चारित्रं पोतानाधिपो ललौ। विश्वाम्भोजाम्भोजिनीपतिना श्रीजिनेन सह पर्यटन् क्रमाद्दशपूर्वधारी जज्ञे। जिनमापृच्छ्यैकाकी पर्वतशृङ्गगुहादिविषमस्थानेषु कायोत्सर्गं कर्मक्षयनिमित्तं करोतिस्म । अन्यदा राजगृहासन्नवनमार्गे कायोत्सर्गे प्रसन्नचन्द्रर्षिः परमात्मध्यानपरः एकाग्रचित्तस्तस्थौ । तदा श्रीवीरो वैभारगिरिपार्श्वे समवासार्षीत् । श्रेणिकराजा जिनं नन्तुं चचाल । तं तादृशं यतिं ध्यानलीनचित्तं वीक्ष्य श्रेणिकभूपो नत्वा तस्य प्रशंसां कुर्वन्नग्रतोऽचालीत् । समवसरणे गत्वा जिनं त्रिःप्रदक्षिणीकृत्य यथास्थानमुपविष्टः । कृताञ्जलिः श्रेणिकः पप्रच्छ—मया मार्गे आगच्छता प्रसन्नचन्द्रराजर्षिर्ध्यानैकाग्रचित्तो वन्दितः । स यद्यधुना कालं करोति तदा क गच्छति ? । स्वामी प्राह—सप्तमीं नरकभुवं याति राजा दध्यौ—एवंविधस्य साधोरीदृशी गतिः कथमादिष्टा परमेश्वरेण । मया स्वामिप्रोक्तं सम्यङ् नावगतं पुनः पृच्छामीति ध्यात्वा पुनराचष्ट राजा—भगवन्नधुना म्रियते तदा स साधुः कां क्षितिं याति ? प्रभुः प्राह—[षष्ठीं भुवमित्यादि] सर्वार्थसिद्धिविमानं यावत् पृष्टोत्तरदाने प्रभुभूपयोर्जायमाने तं भावमबुद्ध्वा श्रेणिको जगौ—भगवंस्त्वयैवं

सन्दिग्धं कथं जल्पितं ? यावत् प्रभुरुत्तरं ददाति तावत् तस्मिन् दिग्देशे दुन्दुभिः श्रुतो भूपेन । पुनः पृष्टं भगव-न्नयं देवदुन्दुभिः कुत्र वाद्यमानोऽस्ति । प्रभुणोक्तं—प्रसन्नचन्द्रर्षेः केवलज्ञानमुत्पन्नं तेन तत्र देवैः केवलिमहोत्सवः क्रियमाणोऽस्ति । श्रेणिको जगौ—भगवन् ! भवता सन्दिग्धं कथं प्रोक्तम् ? प्रभुणोक्तं यदुक्तं मया तत्सत्यमेव । मनःपरिणामो विषमो विद्यते जीवानाम् । यदा त्वया स ऋषिर्नतस्तस्य शुभपरिणामोऽभूत्तदा । त्वदग्रतश्चलन्नादौ सुमुखेन त्वत्सेवकेन स ऋषिर्नतः प्रोक्तं च धन्योऽसौ, इदृग्राज्यं मुक्त्वा व्रतं ललौ । एतच्छ्रुत्वा तस्य ऋषेस्तदा शुभपरिणामोऽभूत् । ततः पृष्ठे त्वत्सेवको दुर्मुख आगच्छन् ऋषिं वीक्ष्य जगौ । अहोऽयं पाखण्डी व्रतं लात्वा स्थितोऽस्ति । अस्य महत्पातकं लगति । यतोऽनेन बालपुत्रं राज्ये निवेश्य व्रतं गृहीतमस्य किं पुण्यं भविष्यति । अधुना चम्पेशदधिवाहनादिभूपैः शत्रुभिरस्य पुरी वेष्टिताऽस्ति । क्षणमात्रेणास्य पुत्रं हत्वा राज्यं गृही-ष्यते तैः । इत्थं दुर्मुखोक्तिभिर्ध्यानाच्चलितः । तैः सह मनसा युद्धं चकार । यदा त्वया तस्य गतिः पृष्टा तदोक्तं मया सप्तमनरकगतिस्तस्य । यदा द्वितीयवारं पृच्छा कृता त्वया तस्य युद्धं कुर्वतः नागशुभानां समाप्तिरभूत् । सर्वे वैरिणो हताः पुनरेकास्तिष्ठति । ततस्तं रिपुं हन्तुं शिरस्केनेच्छन् प्रसन्नच-

न्द्रर्षिः क्रोधव्याप्तः शीर्षे हस्तं चिक्षेप, ततो मस्तकं मुण्डितं ज्ञात्वा दध्यौ—मया किं युद्धं कृतं मुधा, अहं तु यतिः सर्वसङ्गत्यागयस्मि । यतो यतीनां सर्वत्र पुत्रमित्रवैरिषु सममेव चित्तं विलोक्यते । यतः "शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि । भवे मोक्षे भविष्यन्ति, साधवः समचेतसः ॥ १ ॥" एवं ध्यायन् सप्तम्यादिगतिं क्षिपन् सौधर्मादिस्वर्गगतिमर्जयन् सर्वार्थसिद्धिगतिं यावदागतस्तावत् द्वितीयवारं पृच्छा कृता । अधुना केवलज्ञानमपि जातं तस्यर्षेः । ततः प्रभुं प्रणम्य तत्र प्रसन्नचन्द्रकेवलिनं नत्वा गतो गृहे श्रेणिकः । ततश्चिरकालं भव्यजीवान् प्रबोध्यायुषः क्षये प्रसन्नचन्द्रराजर्षिर्मुक्तिं ययौ । इति प्रसन्नचन्द्रराजर्षिकथासमाप्ता ॥ २७ ॥

भव्यजीवाँल्लसद्वाण्या, बोधयन् भविकोऽङ्गवान् । लभते स्वर्गसौख्यादि, श्रीयशोभद्रसूरिवत् ॥ १ ॥

तथाहि—श्रीशय्यंभवसूरयश्चतुर्दशपूर्वधारिणो भव्यजीवान् प्रबोधयन्तो महीपीठे ग्रामे पुरे पुरे विहारं चक्रुः । पाटलीपुरपत्तने ययुः श्रीगुरवः तदा तत्र विप्रो यशोभद्रनामा श्रीगुरुपार्श्वे समागात् । तत्रेति धर्मं शुश्राव—भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः, तत्त्वस्येह कृते परिभ्रमत रे लोकाः श्रुतचेष्टितैः । आशापाशशतोपशान्तिविशदं चेतः समाधीयतां, काप्यात्यन्तिकसौख्यधाम नियतं श्रद्धेयमस्मद्वचः ॥ १ ॥ संसारंमि असारे, नत्थि सुहं

न्द्रर्षिः क्रोधव्याप्तः शीर्षे हस्तं चिक्षेप, ततो मस्तकं मुण्डितं ज्ञात्वा दध्यौ—मया किं युद्धं कृतं मुधा, अहं तु यतिः सर्वसङ्गत्याग्यस्मि । यतो यतीनां सर्वत्र पुत्रमित्रवैरिषु सममेव चित्तं विलोक्यते । यतः " शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि । भवे मोक्षे भविष्यन्ति, साधवः समचेतसः ॥ १ ॥ " एवं ध्यायन् सप्तम्यादिगतिं क्षिपन् सौधर्मादिस्वर्गगतिमर्जयन् सर्वार्थसिद्धिगतिं यावदागतस्तावत् द्वितीयवारं पृच्छा कृता । अधुना केवलज्ञानमपि जातं तस्यर्षेः । ततः प्रभुं प्रणम्य तत्र प्रसन्नचन्द्रकेवलिनं नत्वा गतो गृहे श्रेणिकः । ततश्चिरकालं भव्यजीवान् प्रबोध्यायुषः क्षये प्रसन्नचन्द्रराजर्षिर्मुक्तिं ययौ । इति प्रसन्नचन्द्रराजर्षिकथासमाप्ता ॥ २७ ॥

भव्यजीवाँल्सद्वाण्या, बोधयन् भविकोऽङ्गवान् । लभते स्वर्गसौख्यादि, श्रीयशोभद्रसूरिवत् ॥ १ ॥

तथाहि—श्रीशय्यंभवसूरयश्चतुर्दशपूर्वधारिणो भव्यजीवान् प्रबोधयन्तो महीपीठे ग्रामे पुरे पुरे विहारं चक्रुः । पाटलीपुरपत्तने ययुः श्रीगुरवः तदा तत्र विप्रो यशोभद्रनामा श्रीगुरुपार्श्वे समागात् । तत्रेति धर्मं शुश्राव—भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः, तत्त्वस्येह कृते परिभ्रमत रे लोकाः श्रुतचेष्टितैः । आशापाशशतोपशान्तिविशदं चेतः समाधीयतां, काप्यात्यान्तिकसौख्यधाम नियतं श्रद्धेयमस्मद्वचः ॥ १ ॥ संसारंमि असारे, नत्थि सुहं

जलतरङ्गविलोला, यौवनं त्रिचतुराणि दिनानि । शारदाभ्रमिव चञ्चलमायुः, किं धनैः कुरुत धर्ममनिन्द्यम् ॥ १ ॥ घनापायः कायः प्रकृतिचपला श्रीरपि चला, महारोगा भोगाः कुवलयदृशः सर्प्पसदृशः । गृहावासः पाशः प्रणयिषु सुखं स्थैर्यविमुखं, असारः संसारस्तदिह निपुणा जागृत जनाः ॥ २ ॥ " एवं विमृश्य द्वौ भ्रातरौ मातरमापृच्छ्य श्रीयशोभद्रपार्श्वे दीक्षां जगृहतुः । श्रीयशोभद्रसूरिभिस्तथा भाणितौ तौ यथा द्वादशाङ्गीं ज्ञातवंतावभूताम् । क्रमात् श्रीयशोभद्रसूरिभिर्भद्रबाहोः सूरिपदं वितीर्णम् । श्रीयशोभद्रसूरयः श्रीशत्रुञ्जयादिषु यात्रां चक्रुः । श्रीयशोभद्र-सूरयः शुद्धं चारित्रमाराधयामासुः । आयुःक्षयावसरे सम्यग् [गुरुपार्श्वे] आराधनां चक्रुः । ततः क्रमादायुषः क्षये यशोभद्रसूरिपादाः गच्छभारं श्रीभद्रबाहौ मुक्त्वा स्वर्गं जग्मुः ॥ इति यशोभद्रकथा समाप्ता ॥ २८॥

बाल्येऽपि केऽपि वैराग्याद् गृहीत्वा धर्ममादरात् । जम्बूकुमारवन्मुक्तिसातभाजो भवन्ति हि ॥ १ ॥

तथाहि—मगधदेशे भूमिविभूषणे सुग्राम इति विश्रुतो भासतेतराम् । तत्र राष्ट्रकूटाभिधस्य कौटुम्बिकस्य रेवतीनाम्ना पत्न्यभूत् । एतयोः क्रमाद्भवदत्तभवदेवाह्वौ सुतावभूताम् । क्रमाद्वर्धमानौ धर्म्मकर्म्मपरौ जातौ च तौ । अन्यदा सुस्थितसूरिपार्श्वे वैराग्यवासितो भवदत्तो जगृहे व्रतम् । अनुसूरिपदद्वन्द्वं शास्त्राणि पठन् गीतार्थीभूयान्यदा

भवदत्तयतिः कृताञ्जलिर्जगौ । सांसारिकवन्दापनेच्छाऽस्ति । प्रभो ! आदेशं देहि । गुरोरादेशं प्राप्य सुग्रामग्रामे गतो भवदत्तः । इतो नागिलायाः पाणिग्रहणं कुर्वाणेन भवदेवेन भवदत्तो नोपलक्षितः । ततो गुरुपार्श्वे गतो हसितो भवदत्तः साधुभिः—स्वां स्फूर्तिं स्फोरयित्वा भ्रातृप्रबोधनार्थं गतः, तत्र त्वं चोपलक्षितोऽपि न । मयाऽसौ दीक्षां ग्राहयितव्यो भ्रातेति प्रतिज्ञां कृत्वा पुनर्भवदत्तो भवदेवं वन्दापयितुं चालितो गतस्तत्र यावत्तावन्नागिलाया मण्डनमहोत्सवे जायमानेऽर्द्धमण्डिता नागिलाऽभूत् । तावत्तत्रागतो भवदत्तः । भ्रातरमागतं प्रेक्ष्योत्थाय भवदेवो ननाम भक्त्या । शुद्धान्नपानेन भ्रात्रा भवदत्तः प्रतिलाभितः । ततो भवदत्तो व्रजन् भवदेवं कियन्तीं भूमिं सार्द्धमाकार्य पथि प्राह—धन्योऽसि त्वं यस्य साधावीदृशी भक्तिरित्यादिवाग्भिरस्तं प्रीणयित्वा तस्य हस्ते घृतभृतं पात्रं ददौ । अपरमज्ञानं सर्वं विसृज्य भवदत्तो भवदेवेन समं बाल्यक्रीडादिवार्तां कुर्वाणो गुरुपार्श्वे जगाम । गुरुं नत्वा भवदत्तः प्राह—भगवन्नयं भ्राता मया भवत्पार्श्वमानीतोऽस्ति । दीक्षां जिघृक्षुरस्ति । तेन दीक्षां भवदेवं ग्राहय । ततो दाक्षिण्येन भवदेवेन भ्रातुरुपरोधतो दीक्षा गृहीता । एकेन मुनिना भ्रात्रा च समं गुरुं नत्वाऽन्यत्र भवदत्तो गतः । भ्रातृवचसा संयमं पालयन् नागिलां करिणीमिव हस्ती भवदेवः सस्मार । कालेन भवदत्तस्तपस्तीव्रं तप्त्वा स्वर्गं ययौ । भ्रातरि स्वर्गं

गतेऽन्येद्युः साधुश्रेणीं सुप्तां मुक्त्वा नागिलां स्मरन् निशि निरससार भवदेवः। यतः—"रागी बध्नाति कर्माणि, नारीलक्ष्मीविमोहितः। नीरागो लभते सौख्यं, मानवोऽमलमानसः ॥ १ ॥ उल्लो सुक्को य दो छूढा, गोलया मट्टिया मया। दोवि आवडीआ कुट्टे, जो अल्लो सोवि लग्गइ ॥२॥" अथ चलन् भवदेवः सुग्रामासिमानि क्वचित् प्रासादे गत्वा स्थित.। तदा तत्रैकया वृद्धया सुश्राविकया साकमेका स्त्री समायाता। सैव नागिला नाम्नी। तत्रापृच्छत् भवदेवस्तस्याः पार्श्वे नागिला कथं तिष्ठतीति ? प्रतितो नागिलया भवदेवं मत्वा प्रोक्तं—त्वं नागिलापतिरसि किं ? भवदेवोऽवग्—अहं तस्याः पतिरस्मि, परं भ्रात्रा स्वसद्मतः छद्मना गुरुपार्श्वे दीक्षितोऽहं मनो विना। मया नागिलास्मरणेनैवं व्रतं पालितं द्वादशवर्षाणि। अथ सा विद्यते न वा। एवं भवदेवे जल्पत्यकस्माद्दैवयोगान्नागिलासख्याः पुत्रस्तत्रागतोऽभूत्। स प्राग् शिक्षितः साधौ शृण्वति प्रकटमेव मातुरग्रे प्राहेति। मातरहमासन्नग्रामे भोजनार्थं निमन्त्रितोऽस्मि, दक्षिणार्थं च गमिष्यामि, वेला तु न क्षमते, गेहमेहि त्वं, अहंपूर्वभुक्तं दुग्धमुच्छालयित्वा भाजने क्षिप्त्वा तत्र गत्वा भुंक्त्वा च दक्षिणां गृहीत्वा पश्चादागत्य पुनस्तद्दुग्धं पास्यामि। एतच्छ्रुत्वा भवदेवो हसन्नवादीत्—एवं कथं वमितमन्नं जुगुप्सितं बालकोऽयं भक्षयिष्यति ?। ततोऽवग् नागिला—अहमेव तव प्रियाऽस्मि, त्वया पूर्वं वान्ताऽ-

गतेऽन्येद्युः साधुश्रेणीं सुप्तां मुक्त्वा नागिलां स्मरन् निशि निरससार भवदेवः। यतः—"रागी बध्नाति कर्माणि, नारीलक्ष्मीविमोहितः । नीरागो लभते सौख्यं, मानवोऽमलमानसः ॥ १ ॥ उल्लो सुक्को य दो छूढा, गोलया मट्टिया मया । दोवि आवडीआ कुड्डे, जो अल्लो सोवि लग्गइ ॥२॥" अथ चलन् भवदेवः सुग्रामसिमनि क्वचित् प्रासादे गत्वा स्थित. । तदा तत्रैकया वृद्धया सुश्राविकया साकमेका स्त्री समायाता । सैव नागिला नाम्नी । तत्रापृच्छत् भवदेवस्तस्याः पार्श्वे नागिला कथं तिष्ठतीति ? प्रतितो नागिलया भवदेवं मत्वा प्रोक्तं—त्वं नागिलापतिरसि किं ? भवदेवोऽवग्—अहं तस्याः पतिरस्मि, परं भ्रात्रा स्वसद्मतः छद्मना गुरुपार्श्वे दीक्षितोऽहं मनो विना । मया नागिलास्मरणेनैवं व्रतं पालितं द्वादशवर्षाणि । अथ सा विद्यते न वा । एवं भवदेवे जल्पत्यकस्माद्दैवयोगान्नागिलासख्याः पुत्रस्तत्रागतोऽभूत् । स प्राग् शिक्षितः साधौ शृण्वति प्रकटमेव मातुरग्रे प्राहेति । मातरहमासन्नग्रामे भोजनार्थं निमन्त्रितोऽस्मि, दक्षिणार्थं च गमिष्यामि, वेला तु न क्षमते, गेहमेहि त्वं, अहंपूर्वभुक्तं दुग्धमुच्छालयित्वा भाजने क्षिप्त्वा तत्र गत्वा भुंक्त्वा च दक्षिणां गृहीत्वा पश्चादागत्य पुनस्तद्दुग्धं पास्यामि । एतच्छ्रुत्वा भवदेवो हसन्नवादीत्—एवं कथं वमितमन्नं जुगुप्सितं बालकोऽयं भक्षयिष्यति ? । ततोऽवग् नागिला—अहमेव तव प्रियाऽस्मि, त्वया पूर्वं वान्ता-

दत्तेति नामाऽजनि तस्य । क्रमाद्वर्धमानः पित्रा सहस्रशः कन्याः परिणायितः । ताभिः कन्याभिः समं भोगान् भुञ्जन् सागरदत्तो गतमपि कालं न जानाति । एकदा सागरदत्तः सप्तभूमिधवलगृहोपरिस्थो जलदं सर्वदिग्व्यापिनं गर्जितविद्युत्शालिनं दृष्ट्वा क्षणादुद्भूतेन वातेनापसारितं प्रेक्ष्य समस्तभावेषु भङ्गुरीभावं व्यचारयत् । वज्रकायशरीराणामर्हतां यद्यनित्यता । कदलीसारतुल्येषु, का कथा शेषजन्तुषु ॥ १ ॥ इत्यादि । अहो अनित्य-मिदं जगदिति चिन्तयन् प्रतिबुद्धः सागरदत्तः संयमं गुरुपार्श्वे जग्राह भावतः । इतः तत्रैव विजये वीतशोकायां पुर्यां पद्मरथभूपतेः वनमालायाः पत्न्या उदरे भवदेवजीवो दिवश्च्युत्वा शिवकुमारनामा पुत्रोऽभूत् । क्रमाद्वर्धमानः पित्रा कुमारीः सुकुमाराङ्गीः परिणायितः शिवकुमारः । अन्येद्युस्ताभिर्महेलाभिः सह सदनस्योपरि स्थितः शिवः कामसमृद्धस्य सार्थवाहस्य सद्मनि मुनिसागरदत्तमात्तभिक्षं व्यलोकयत् यदा तदाऽकस्मात् सुरैः कृतां पुष्पवृष्टिं तत्र मुनेरुपरि वीक्ष्य शिवकुमारो हृष्टोऽभवत् । अथ तस्य स्वस्थानगतस्य कृतपारणस्य मुनेः पार्श्वे धर्मं श्रोतुं शिवकुमारोऽगात् । तदा कथामध्ये शिवकुमारपूर्वभवकथां न्यवेदयन्मुनिः । ततः शिवकुमारो वैराग्यरङ्गपूर्णमना यतिं नत्वा गृहेऽभ्येत्य पितरौ व्रतं याचते स्म । पितृभ्यामुक्तं यदि त्वं दीक्षां गृहीष्यसि, तदाऽऽवयोर्मृतिरवश्यं भवि-

न्यसेन । त्वं तु करुणापरोऽसि । मातापितृहत्यां कोऽपि न लाति । पुत्रः प्राह—यद्भवद्भिरुक्तं तत्सत्यं परमनन्तेषु भवेषु मिथो जीवानामनन्ताः सम्बन्धा जाताः सन्ति । तेन मया त्वं सहस्रशो जनितोऽसि, त्वया त्वहं सहस्रशः । यतः—" मातापितृसहस्राणि, पुत्रदारशतानि च । मिथो जातानि च केषां, पिता वा तनयो भवेत् ॥ १ ॥ " पिता प्राह—तथैवं वक्तुं न युज्यते । त्वमेवाधारोऽसि आवयोः इत्यादिना पर्यवसायितः शिवकुमारः स्वीकृतभोजनग्रहपरं गृहस्थपरस्तरशौ । गृहे दृढधर्मेण श्राद्धेन समं धर्मकर्म्मकुर्वन् द्वादशवर्षपर्यन्ते कृतानशनः स्वायुषः क्षये निर्व्यूढभाव-चारित्रः शिवकुमारो ब्रह्मलोके विद्युन्माली देवोऽभूत् । इतः श्रीवीरे जिनेन्द्रे राजगृहे समवसृते वन्दितुं विद्युन्माली सुरः समागात् । सर्वेषु देवेषु अतीवभासुरकान्ति देवं विद्युन्मालिनमालोक्य विस्मितः श्रेणिकभूपः प्रभुं प्रणम्य पप्रच्छ—अनेन देवेन किं तपः पूर्वभवे कृतं येनेदृग् रूपवानभूत् ? प्रभुणा पूर्वभवसम्बन्धिस्वरूपं प्रोक्तं, पुनः पृष्टं श्रेणिकेन । दिवश्च्युतस्यास्य कागतिर्भविष्यति । प्रभुः प्राह—अतः सप्तमे दिनेऽत्रैव पुरे ऋषभदत्तपुत्रो जम्बूनामा कुमारो भविष्यति, केवलज्ञानी भूत्वा मुक्तिं गमिष्यति । ततः परं कोऽपि केवली न भविष्यति । ततो विद्युन्मालिनः सुरस्य चतस्रः कान्ताः प्रभुं प्रणम्य पप्रच्छुः—अस्माकं का गतिर्भविष्यति ? । प्रभुः प्राह—यूयमपि श्रेष्ठिनां पुत्री

भूत्वाऽस्य च योषितो भविष्यथ । एतत् श्रीवीरजिनोक्तं श्रुत्वा तदा स देवो विद्युन्माली तत्प्रियाश्च प्रभोः पुरो नृत्यं व्यधुः । ततो विद्युन्माली सप्रियो हृष्टः प्रभुं नत्वा स्वर्गमगात् । इतोऽन्येद्युर्वैभारगिरौ समायातं सुधर्म्मस्वामिनं नन्तुं गताऽभूदृषभप्रिया । व्याख्यानान्ते जम्बूवृक्षविचारं कथ्यमानं गणभृता श्रुत्वा धारिणी पप्रच्छ—भगवन् ! मम पुत्रो भविष्यति न वा ? सुधर्मा जगौ—महासति साधूनां सावद्यमुपदेशं वक्तुं न युज्यते । तथापि महापुण्यलाभं वीक्ष्य निरवद्यं प्रोच्यते साधुभिः । तेनाष्टोत्तरशतमाचाम्लानि कुरु तेन ते जम्बूस्वप्नसूचितः पुत्रो भविष्यति इत्युक्तं श्रुत्वा धारिणी स्वगृहमागत्याचाम्लतपो गुरुप्रोक्तमकरोत् । ततो विद्युन्माली सुरः स्वर्गाच्च्युतो जम्बूस्वप्नसूचितो धारिणीकुक्षाववतीर्णः । क्रमाद्धारिणी पुत्रं प्रासूत । जम्बूस्वप्नावलोकनान्मातापितृभ्यां जम्बूकुमार इति नाम दत्तम् । इतः समुद्रस्य श्रेष्ठिनः पद्मावती पत्नी समुद्रश्रियं सुतामसूत १, समुद्रदत्तस्य श्रेष्ठिनः कमलमाला पत्नी पद्मश्रियं पुत्रीमसूत २, सागरदत्तश्रेष्ठिनः पत्नी विजयश्रीः पद्मसेनाह्वां सुतामसूत ३, कुबेरदत्तस्य जयश्रीः प्रिया कनकसेनाह्वां सुतामसूत ४, एताश्चतस्रोऽपि दिवश्च्युता विद्युन्मालिसुरवल्लभा अवतीर्णाः । कुबेरसेनस्य कमलावती नभसेनाह्वां पुत्रीं प्रासूत ५, श्रमणदत्तश्रेष्ठिपत्नी सुषेणा कनकश्रियं पुत्रीं प्रासूत ६, वसुषेणप्रिया वीरमती

भूत्वाऽस्य च योषितो भविष्यथ । एतत् श्रीवीरजिनोक्तं श्रुत्वा तदा स देवो विद्युन्माली तत्प्रियाश्च प्रभोः पुरो नृत्यं व्यधुः । ततो विद्युन्माली सप्रियो हृष्टः प्रभुं नत्वा स्वर्गमगात् । इतोऽन्येद्युर्वैभारगिरौ समायातं सुधर्म्मस्वामिनं नन्तुं गताऽभूदृषभप्रिया । व्याख्यानान्ते जम्बूवृक्षविचारं कथ्यमानं गणभृता श्रुत्वा धारिणी पप्रच्छ—भगवन् ! मम पुत्रो भविष्यति न वा ? सुधर्मा जगौ—महासति साधूनां सावद्यमुपदेशं वक्तुं न युज्यते । तथापि महापुण्यलाभं वीक्ष्य निरवद्यं प्रोच्यते साधुभिः । तेनाष्टोत्तरशतमाचाम्लानि कुरु तेन ते जम्बूस्वप्नसूचितः पुत्रो भविष्यति इत्युक्तं श्रुत्वा धारिणी स्वगृहमागत्याचाम्लतपो गुरुप्रोक्तमकरोत् । ततो विद्युन्माली सुरः स्वर्गाच्च्युतो जम्बूस्वप्नसूचितो धारिणीकुक्षाववतीर्णः । क्रमाद्धारिणी पुत्रं प्रासूत । जम्बूस्वप्नावलोकनान्मातापितृभ्यां जम्बूकुमार इति नाम दत्तम् । इतः समुद्रस्य श्रेष्ठिनः पद्मावती पत्नी समुद्रश्रियं सुतामसूत १, समुद्रदत्तस्य श्रेष्ठिनः कमलमाला पत्नी पद्मश्रियं पुत्रीमसूत २, सागरदत्तश्रेष्ठिनः पत्नी विजयश्रीः पद्मसेनाह्वां सुतामसूत ३, कुबेरदत्तस्य जयश्रीः प्रिया कनकसेनाह्वां सुतामसूत ४, एताश्चतस्रोऽपि दिवश्च्युता विद्युन्मालिसुरवल्लभा अवतीर्णाः । कुबेरसेनस्य कमलावती नभसेनाह्वां पुत्रीं प्रासूत ५, श्रमणदत्तश्रेष्ठिपत्नी सुषेणा कनकश्रियं पुत्रीं प्रासूत ६, वसुषेणप्रिया वीरमती

अदीयमाने संयमे स्वयं शीलव्रतं जिघृक्षुर्जम्बूः स्वगृहे आगच्छन् मार्गे वैरिभी राजगृहे वेष्टिते सति पुरप्रस्थै राजपुरुषैर्ढिकानिकायन्त्रैः प्रस्तरान् मोच्यमानान् वीक्ष्य स्वास्मिन् विघ्नमवगत्य पश्चाद्गुरुपार्श्वे गत्वा शीलव्रतं लात्वा स्वगृहे समागात्। ततो मातापितरौ प्रति प्राह भो मातापितरौ! अनुज्ञां मह्यं ददतं, अहं दीक्षां गृहीष्यामि। मातापितरावूचतुः--एकस्त्वमेवावयोः पुत्रोऽसि। त्वां विनाऽऽवां निराधारौ कथं भविष्यावः। एकशो मनोरथोऽष्टवधूपरिणयनोत्सवेन पूरणीयस्त्वया। ततः पितृवचोऽनुरोधतोऽवग् जम्बूः। अहं पूज्ययोर्वचनानुरोधात् कन्या विवाहेनाङ्गीकरिष्यामि। यदि ताः प्रतिबोधयिष्येऽहं, तदा दीक्षा गृहीतव्या, नो चेद्गृहवासो भवतु मम। ततो ज्ञापितं जम्बूस्वामिनेदं कन्यापित्रादिपार्श्वे। अहं दीक्षां गृहीष्यामि। ततस्तैः श्रेष्ठिभिः स्वस्वपुत्रीणामग्रतः प्रोक्तं जम्बूकुमारो विवाहानन्तरं भवतीः प्रतिबोध्य दीक्षां गृहीष्यति। ततः कन्यास्ता जम्बूपार्श्वेऽभ्येत्य जगुः--अस्माभिस्त्वमेव वरितोऽसि। यदि अस्मिन् भवे त्वमस्माकं पतिर्भविष्यसि तदा भव्यं नो चेत् संयमो भवतु। यदि वयं त्वां कथाभिः संसारासक्तं करिष्यामः तदा त्वमेवपतिरस्माकं नो चेत् त्वया सह संयमो गृहीतव्य एव। ततः स जम्बूर्लग्नदिने गजाधिरूढः शिरसि धृतातपवारणः प्रकीर्णप्रकरवीज्यमानोभयपार्श्वः ता अष्टावपि श्वशुरगृहेषु

अदीयमाने संयमे स्वयं शीलव्रतं जिघृक्षुर्जम्बूः स्वगृहे आगच्छन् मार्गे वैरिभी राजगृहे वेष्टिते सति पुरप्रस्थै राजपुरुषैर्ढुकनिकायन्त्रैः प्रस्तरान् मोच्यमानान् वीक्ष्य स्वस्मिन् विघ्नमवगत्य पश्चाद्गुरुपार्श्वे गत्वा शीलव्रतं लात्वा स्वगृहे समागात्। ततो मातापितरौ प्रति प्राह भो मातापितरौ! अनुज्ञां मह्यं ददतं, अहं दीक्षां गृहीष्यामि। मातापितरावूचतुः–एकस्त्वमेवावयोः पुत्रोऽसि। त्वां विनाऽऽवां निराधारौ कथं भविष्यावः। एकशो मनोरथोऽष्टवधूपरिणयनोत्सवेन पूरणीयस्त्वया। ततः पितृवचोऽनुरोधतोऽवग् जम्बूः। अहं पूज्ययोर्वचनानुरोधात् कन्याविवाहेनाङ्गीकरिष्यामि। यदि ताः प्रतिबोधयिष्येऽहं, तदा दीक्षा गृहीतव्या, नो चेद्गृहवासो भवतु मम। ततो ज्ञापितं जम्बूस्वामिनेदं कन्यापित्रादिपार्श्वे। अहं दीक्षां गृहीष्यामि। ततस्तैः श्रेष्ठिभिः स्वस्वपुत्रीणामग्रतः प्रोक्तं जम्बूकुमारो विवाहानन्तरं भवतीः प्रतिबोध्य दीक्षां गृहीष्यति। ततः कन्यास्ता जम्बूपार्श्वेऽभ्येत्य जगुः–अस्माभिस्त्वमेव वरितोऽसि। यदि अस्मिन् भवे त्वमस्माकं पतिर्भविष्यसि तदा भव्यं नो चेत् संयमो भवतु। यदि वयं त्वां कथाभिः संसारासक्तं करिष्यामः तदा त्वमेवपतिरस्माकं नो चेत् त्वया सह संयमो गृहीतव्य एव। ततः स जम्बूर्लग्नदिने गजाधिरूढः शिरसि धृतातपवारणः प्रकीर्णप्रकरवीज्यमानोभयपार्श्वः ता अष्टावपि श्वसुरगृहेषु

ष्यामि । प्रभवः प्राह—किमेवंविधभोगान् प्राप्तान् त्यक्ष्यासि ? । जम्बूः प्राह—मधुबिन्दुरिव भोगसुखं नृणां विद्यते, प्रभवः प्राह—भो जम्बुकुमार ! को मधुबिन्दुरुच्यते ? जम्बूरुवाच—कश्चिद् दरिद्रो भीमाभिधसार्थेशेन समं लक्ष्म्यर्थं विदेशं प्रत्यचलत् । मार्गे चौरैः लुण्टिते सार्थे स दरिद्रो नष्टोऽग्रे गच्छन् गजमापतन्तमालोक्य भयभ्रान्त इव ततो नश्यतिस्म । गजं पृष्ठावागच्छन्तमालोक्य कूपे झम्पामदात् । कूपमध्ये पतन् दरिद्रः कूपकण्ठस्थवटशाखां कूपमध्य-गतामवलम्ब्यान्तरे तस्थौ । कूपतले प्रसारितमुखमजगरं चतुर्षु कोणेषु सर्पचतुष्टयं वटपादपं च श्वेतकृष्णमूषकाभ्या-मुत्कीर्यमाणं स्वदेहं मधुमक्षिकालक्षाविलक्षीकृतं च सिन्धुरेण वटवृक्षं चाल्यमानं [हस्ति १ मूषक २ सर्प्पा ३ जगर ४] वीक्षणात् दुःखं जानाति । तावन्मधुबिन्दुं मुखे पतितमास्वाद्य सुखं मन्यते । यतः—" विषयगणः कापुरुषं, करोति वशवर्तिनं न सत्पुरुषम् । बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गम् ॥ १ ॥ ददति तावदिमे विषयाः सुखं, स्फुरति यावदियं हृदि मूढता । मनसि तत्त्वविदां तु विचारके, क विषयाः क सुखं क परिग्रहः ॥ २ ॥" इतः कोऽपि विद्याधरो व्योम्नि व्रजन् तं तथाविधे कष्टे पतितमालोक्य करुणयाऽवग्—भो महानुभाग ! अस्मिन् मद्धरते विलग्य बहिरागच्छ । ततः स दुःस्थोऽवग्—क्षणमेकं तिष्ठ, अयं मधुबिन्दुरतीवमधुरः पतन्नस्ति मुखे मदीये ।

ष्यामि । प्रभवः प्राह–किमेवंविधभोगान् प्राप्तान् त्यक्ष्यसि ? । जम्बूः प्राह–मधुबिन्दुरिव भोगसुखं नृणां त्रियते, प्रभवः प्राह–भो जम्बुकुमार ! को मधुबिन्दुरुच्यते ? जम्बूरुवाच–कश्चिद् दरिद्रो भीमाभिधसार्थेशेन समं लक्ष्म्यर्थं विदेशं प्रत्यचलत् । मार्गे चौरैः लुण्टिते सार्थे स दरिद्रो नष्टोऽग्रे गच्छन् गजमापतन्तमालोक्य भयभ्रान्त इव ततो नश्यतिस्म । गजं पृष्ठावागच्छन्तमालोक्य कूपे झम्पामदात् । कूपमध्ये पतन् दरिद्रः कूपकण्ठस्थवटशाखां कूपमध्यगतामवलम्ब्यान्तरे तस्थौ । कूपतले प्रसारितमुखमजगरं चतुर्षु कोणेषु सर्पचतुष्टयं वटपादपं च श्वेतकृष्णमूषकाभ्यामुत्कीर्यमाणं स्वदेहं मधुमक्षिकालक्षाविलक्षीकृतं च सिन्धुरेण वटवृक्षं चाल्यमानं [हस्ति १ मूषक २ सर्पा ३ जगर ४] वीक्षणात् दुःखं जानाति । तावन्मधुबिन्दुं मुखे पतितमास्वाद्य सुखं मन्यते । यतः–"विषयगणः कापुरुषं, करोति वशवर्तिनं न सत्पुरुषम् । बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गम् ॥ १ ॥ ददति तावदिमे विषयाः सुखं, स्फुरति यावदियं हृदि मूढता । मनसि तत्त्वविदां तु विचारके, क्व विषयाः क्व सुखं क्व परिग्रहः ॥ २ ॥" इतः कोऽपि विद्याधरो व्योम्नि व्रजन् तं तथाविधे कष्टे पतितमालोक्य करुणयाऽवग्–भो महानुभाग ! अस्मिन् मद्धस्ते विलग्य बहिरागच्छ । ततः स दुःस्थोऽवग्–क्षणमेकं तिष्ठ, अयं मधुबिन्दुरतीवमधुरः पतन्नस्ति मुखे मदीये ।

पुत्री गृहीता द्वितीयेभ्येन पुत्रो गृहीतः। अङ्गुलीयकनामतः कुबेरदत्तकुबेरदत्ता इति नाम जातं तयोः। अथ ताभ्यामिभ्याभ्यां विमृश्य मिथस्तावेव परिणायितौ। ततः परिणयनादनन्तरं देवगृहे मिथो वरकन्ये रममाणे पणीकृतमुद्रादर्शनात् कुबेरदत्तया पत्या सह मिथो भ्रातृभावः प्रतर्कितः। तया कुबेरदत्तस्यापि ज्ञापितो भ्रातृभावः। ताभ्यां पृथग् पृष्टौ जनीजनकौ प्रोचतुः। यमुनायां पेठामध्यस्थौ युवां लब्धौ। ततः कुबेरदत्ता विरक्ता व्रतं जग्राह। कुबेरदत्तस्तु भूरिक्रयाणकयुतो मथुरायां व्यवसायार्थं ययौ। कुबेरसेनायां पत्नीकृतायां कुबेरदत्तः पुत्रमजनयत्। कुबेरदत्ताऽपि गोपितमुद्रिका क्रमादन्येद्युर्जातावधिज्ञाना गुरुणीमापृच्छय कुबेरसेनाप्रतिबोधाय कुबेरसेनागृहाऽऽसन्नोपाश्रये तस्थौ। तयोर्मातृसहोदरयोः प्रतिबोधाय पालनकस्थं बालमित्याललाप कुबेरदत्ता-भ्राताऽसि इत्यादि विरुद्धं यतिनीवचो निशम्य कुबेरदत्तोऽभ्येत्य पप्रच्छ किं त्वयेदं विरुद्धं वचः प्रोच्यते? ततस्तया सनामाङ्कितं मुद्रारत्नं दर्शितं प्रोक्तं च—तवेयं वेश्या माता अहं च भगिनी तेन मयाऽष्टादशनात्रकसम्बन्धोऽस्य सनोः प्रोचे। ततः स्वमात्मानं निन्दन् लज्जितः स्वचरित्रेण कुबेरदत्तो वित्तं सप्तक्षेत्र्यामुप्त्वा गुरुपार्श्वे व्रतं जग्राह। ततस्तीव्रं तपस्तप्त्वा कुबेरदत्त आयुरन्ते त्रैदिवं धाम जगाम। कुबेरसेनाऽपि स्वं दुश्चेष्टितं चिन्तयन्ती भववासविरक्ता स्वकुलोचितं धर्मं त्यक्त्वा श्रावकधर्मं प्रतिपाल्य स्वर्गं गता। जम्बूस्वामिप्रोक्तामित्थं कथां श्रुत्वा

पुत्री गृहीता द्वितीयेभ्येन पुत्रो गृहीतः। अङ्गुलीयकनामतः कुबेरदत्तकुबेरदत्ता इति नाम जातं तयोः। अथ ताभ्यामिभ्याभ्यां विमृश्य मिथस्तावेव परिणायितौ। ततः परिणयनादनन्तरं देवगृहे मिथो वरकन्ये रममाणे पणीकृतमुद्रादर्शनात् कुबेरदत्तया पत्या सह मिथो भ्रातृभावः प्रतर्कितः। तया कुबेरदत्तस्यापि ज्ञापितो भ्रातृभावः। ताभ्यां पृथग् पृष्टौ जनीजनकौ प्रोचतुः। यमुनायां पेटामध्यस्थौ युवां लब्धौ। ततः कुबेरदत्ता विरक्ता व्रतं जग्राह। कुबेरदत्तस्तु भूरिक्रयाणकयुतो मथुरायां व्यवसायार्थं ययौ। कुबेरसेनायां पत्नीकृतायां कुबेरदत्तः पुत्रमजनयत्। कुबेरदत्ताऽपि गोपितमुद्रिका क्रमादन्येद्युर्जातावधिज्ञाना गुरुणीमापृच्छ्य कुबेरसेनाप्रतिबोधाय कुबेरसेनागृहाऽऽसन्नोपाश्रये तस्थौ। तयोर्मातृसहोदरयोः प्रतिबोधाय पालनकस्थं बालमित्याललाप कुबेरदत्ता-भ्राताऽसि इत्यादि विरुद्धं यतिनीवचो निशम्य कुबेरदत्तोऽभ्येत्य पप्रच्छ किं त्वयेदं विरुद्धं वचः प्रोच्यते ? ततस्तया सनामाङ्कितं मुद्रारत्नं दर्शितं प्रोक्तं च—तवेयं वेश्या माता अहं च भगिनी तेन मयाऽष्टादशनात्रकसम्बन्धोऽस्य सनोः प्रोचे। ततः स्वमात्मानं निन्दन् लज्जितः स्वचरित्रेण कुबेरदत्तो वित्तं सप्तक्षेत्र्यासुप्त्वा गुरुपार्श्वे व्रतं जग्राह। ततस्तीव्रं तपस्तप्त्वा कुबेरदत्त आयुरन्ते त्रैदिवं धाम जगाम। कुबेरसेनाऽपि स्वं दुश्चेष्टितं चिन्तयन्ती भववासविरक्ता स्वकुलोचितं धर्मं त्यक्त्वा श्रावकधर्मं प्रतिपाल्य स्वर्गं गता। जम्बूस्वामिप्रोक्तामित्थं कथां श्रुत्वा

पठितः । श्रेष्ठी प्राह—यत् त्वया प्रोक्तं तत्र कः प्रत्ययः ? ततः मुनिः प्राह—अन्तर्गृहं शुनी नीता, जातजातिस्मृतिः सती । रत्नजातं तदेषा ताम्रि—खातं दर्शयिष्यति ॥ १ ॥ इत्युदित्वा मुनौ याते तथा कृते श्रेष्ठिना शुन्या निधानं दर्शितम् । ततो महेश्वरदत्तः पिण्डदानमनर्थकं मत्वा साधूक्तं जैनधर्मं प्रपेदे । श्रुत्वैतत् कथानकं प्रबुद्धः प्रभवः पञ्चशतचौरयुतो वैराग्यवासितचित्तोऽजनि । ततस्तदानीं समुद्रश्रीः जम्बूकुमारं प्रति प्राह—नाथ ! पते ! कान्त ! वल्लभ ! बककार्षुक इव त्वमेवं भोगान् प्राप्तांस्त्यजन् पश्चात्तापभाजनं माभूः । तथाहि—पुरा सुसीमाह्वे ग्रामे बकनामा कृषीवलोऽभूत् । वर्षाकालेऽन्यदा कङ्कुकोद्रवचीणकबरंट्टिकाचपलमुद्गादीनि धान्यानि क्षेत्रे उप्त्वा कार्यवशात् मालवके पुत्रीगृहे गतः कृषीवलः । तदा पुत्र्या गुडमण्डकादीनि भोजितः पिताऽवग्—एते गुडादयः कथं निष्पद्यन्ते ? ततः पुत्र्यादिस्वजनैः कूपखनादिगोधूमेक्ष्वारोपणादिवृत्तान्तः कथितः ततो गोधूमबीजमादाय पश्चात् स्वगृहे त्वरितमागत्य प्रागुप्तानि सस्यान्युत्पाटयितुं लग्नः कृषीवलः स्वजनैरुक्तमेवं कथं निष्पन्नं सस्यमुत्पाटयसि ? बकोऽवग्—यूयं मौनं कुरुथ । अत्र क्षेत्रे गोधूमादयो निष्पत्स्यन्ते । तेषां मधुराहाराणां भोजनं करिष्यते । चपलादि खादं खादमुदराणि कथितानि [चपलादिभिः पूर्वम्] । ततः स्वजनैरुक्तं एवं

पठितः । श्रेष्ठी प्राह—यत् त्वया प्रोक्तं तत्र कः प्रत्ययः ? ततः मुनिः प्राह—अन्तर्गृहं शुनी नीता, जातजाति-स्मृतिः सती । रत्नजातं तदेषा तान्नि—खातं दर्शयिष्यति ॥ १ ॥ इत्युदित्वा मुनौ याते तथा कृते श्रेष्ठिना शुन्या निधानं दर्शितम् । ततो महेश्वरदत्तः पिण्डदानमनर्थकं मत्वा साधूक्तं जैनधर्मं प्रपेदे । श्रुत्वैतत् कथानकं प्रबुद्धः प्रभवः पञ्चशतचौरयुतो वैराग्यवासितचित्तोऽजनि । ततस्तदानीं समुद्रश्रीः जम्बूकुमारं प्रति प्राह—नाथ ! पते ! कान्त ! वल्लभ ! बककार्षुक इव त्वमेवं भोगान् प्राप्तांस्त्यजन् पश्चात्तापभाजनं माभूः । तथाहि—पुरा सुसीमाह्वे ग्रामे बकनामा कृषीवलोऽभूत् । वर्षाकालेऽन्यदा कङ्गुकोद्रवचीणकबरंट्टिकाचपलमुद्गा-दीनि धान्यानि क्षेत्रे उप्त्वा कार्यवशात् मालवके पुत्रीगृहे गतः कृषीवलः । तदा पुत्र्या गुडमण्डकादीनि भोजितः पिताऽवग्—एते गुडादयः कथं निष्पद्यन्ते ? ततः पुत्र्यादिस्वजनैः कूपखनादिगोधूमेक्ष्वारोपणादिवृत्तान्तः कथितः ततो गोधूमबीजमादाय पश्चात् स्वगृहे त्वरितमागत्य प्रागुप्तानि सस्यान्युत्पाटयितुं लग्नः कृषीवलः स्वजनैरुक्तमेवं कथं निष्पन्नं सस्यमुत्पाटयसि ? बकोऽवग्—यूयं मौनं कुरुथ । अत्र क्षेत्रे गोधूमादयो निष्पत्स्यन्ते । तेषां मधुरा-हाराणां भोजनं करिष्यते । चपलादि खादं खादमुदराणि कथितानि [चपलादिभिः पूर्वम्] । ततः स्वजनैरुक्तं एवं

ऽनुरागवान् । कथं प्रिये ! न मज्जामि, सोऽहं मोहाम्बुधाविव ॥ १ ॥" इति द्वितीया कथा जम्बूस्वाम्युक्ता ॥ २ ॥

अथ पद्मश्रीरभाषिष्ट—वानर इवोभयतो भ्रश्यसि । तथाहि—हस्तिनागपुरस्वामी अरिकेसरी राजा अनेकभूपालैः सहितोऽटव्यां जगाम । वनाद्वनं भ्रमन् राजा वर्षत्सु जलदेषु कस्मिंश्चिन्निकुञ्जे स्थित्वाऽचलत् । कस्मिंश्चिज्जलाशयोपान्तस्थवने काञ्चिन्नारीं देवकुमारीसन्निभामालोक्य हृष्टो ललौ । तां स्त्रियं विशिष्टवस्त्राभरणभूषितां कृत्वा राजा सुमहोत्सवपूर्वं पुरमध्ये समागात् । पट्टराज्ञीं तां कन्यां चकार । भूपस्तया कन्यया सह भोगान् भुञ्जानो वासव इवेन्द्राण्याऽन्येद्युर्गवाक्षगृहमध्यस्थचित्रशालायामुपाविशत्, तावत् कश्चित् पुमान् ग्रामे ग्रामे पुरे पुरे लोकान् रञ्जयन् वानरनर्तनकारकस्तत्रागात् । वानरस्तदा नारीं नृपोत्सङ्गसङ्गिनीमालोक्य नर्तितुं नोत्सहते । तदा तेन पुंसा बहुशस्ताडितो वानरो नृपप्रियामुखाम्भोजदत्तदृग् भृशं रोदिति स्म । विलक्षे भिक्षुके तं वानरमनृत्यन्तं रुदन्तं च वीक्ष्य नृपपत्न्यवग्—अये वानर ! मया निषिद्धस्त्वं तदा लोभेन नामंस्थाः इदानीं मा रुदिहि । यतः—" गते शोको न कर्तव्यो, भविष्यं न च चिन्तयेत् । वर्तमानेन कालेन, वर्तयन्ति विचक्षणाः ॥ १ ॥ खेदं मुक्त्वाऽधुना सद्य, स्त्वं नृत्यं कुरु वानर ! । यादृशं क्रियते कर्म, तादृगाप्नोति मानवः ॥ २ ॥" इत्यादिना बोधितो वानरो नर्तनेनाद्भुतेन निःशेषं राजानं रञ्जयामास ।

ऽनुरागवान् । कथं प्रिये ! न मज्जामि, सोऽहं मोहाम्बुधाविव ॥ १ ॥ " इति द्वितीया कथा जम्बूस्वाम्युक्ता ॥ २ ॥
अथ पद्मश्रीरभाषिष्ट—वानर इवोभयतो भ्रश्यसि । तथाहि—हस्तिनागपुरस्वामी अरिकेसरी राजा अनेकभूपालैः सहितोऽटव्यां जगाम । वनाद्वनं भ्रमन् राजा वर्षत्सु जलदेषु कचिन्निकुञ्जे स्थित्वाऽचलत् । कस्मिंश्चिज्जलाशयोपान्तस्थवने काञ्चिन्नारीं देवकुमारीसन्निभामालोक्य हृष्टो ललौ । तां स्त्रियं विशिष्टवस्त्राभरणभूषितां कृत्वा राजा सुमहोत्सवपूर्वं पुरमध्ये समागात् । पट्टराज्ञीं तां कन्यां चकार । भूपस्तया कन्यया सह भोगान् भुञ्जानो वासव इवेन्द्राण्याऽन्येद्युर्यावत्स्वगृहमध्यस्थचित्रशालायामुपाविशत्, तावत् कश्चित् पुमान् ग्रामे ग्रामे पुरे पुरे लोकान् रञ्जयन् वानरनर्तनकारकस्तत्रागात् । वानरस्तदा नारीं नृपोत्सङ्गसङ्गिनीमालोक्य नर्तितुं नोत्सहते । तदा तेन पुंसा बहुशस्ताडितो वानरो नृपप्रियामुखाम्भोजदत्तदृग् भृशं रोदिति स्म । विलक्षे भिक्षुके तं वानरमनृत्यन्तं रुदन्तं च वीक्ष्य नृपपत्न्यवग्—अये वानर ! मया निषिद्धस्त्वं तदा लोभेन नामंस्थाः इदानीं मा रुदिहि । यतः—" गते शोको न कर्तव्यो, भविष्यं न च चिन्तयेत् । वर्तमानेन कालेन, वर्तयन्ति विचक्षणाः ॥ १ ॥ खेदं मुक्त्वाऽधुना सद्य, स्त्वं नृत्यं कुरु वानर ! । यादृशं क्रियते कर्म, तादृगाप्नोति मानवः ॥ २ ॥ " इत्यादिना बोधितो वानरो नर्तनेनाद्भुतेन निर्व्याजं राजानं रञ्जयामास ।

अथ जम्बूः प्राह—बहून् भोगान् भुञ्जानस्तृप्तो न भवत्यङ्गारकारक इव । तथाहि—चंद्रपुरे चन्द्रनामाऽङ्गारकारको ग्रीष्मसमये वारि समादायाटव्यामङ्गारान् कर्तुं ययौ । अङ्गारान् कुर्वतस्तस्य रात्रौ जलं त्रुटितं तृषाऽत्यन्तं लग्ना तालुशोषः समजनि । रात्रौ सुप्तस्तृषया बाधितो वापीकूपतडागनदीह्रदादिजलाशयस्थं पानीयं सर्वं पीत्वा क्वापि मरुस्थलीकूपेऽङ्गारकारकः समागात् । ततस्तृषयाऽत्यन्तपीडितो वटोपान्तस्थो वरत्राबद्धपूलकेन बिन्दुमात्रं तज्जलमाकृष्य जिह्वाग्रे लिहानो न तृप्तोऽङ्गारकारकः । एवं जीवाः सर्वे स्तन्यपानस्त्रीभोगवर्यवस्त्राभरणपरिधानादिसुखमनुभवन्तो न तृप्ताः स्युः, तथा नाहमतृप्तोऽस्मि सांसारिकसुखेषु ४॥ अथ पद्मसेनोवाच—हे नाथ मुक्त्यर्थी त्वमैहिकां प्राप्तां श्रियं विसृजन् गोमायुरिवात्यन्तमुभयभ्रष्टतां मा भज । तथाहि कस्यांश्चिदटव्यां शृगाल एकः पिशितखंडं प्राप, तमादाय सरित्तीरे गतः । तं मांसं भोक्तुंकामो नदीनीच्या बहिः क्षिप्तं मीनं दृष्ट्वा लौल्याज्जिघृक्षुरभूत् मांसखंडमधो मुक्त्वा शृगालो यावन्मीनं गृहीतुमधावत् तावन्मीनः पयोमध्ये प्रविष्टः । मांसखंडं शकुनिको गृहीत्वाऽऽकाशे गतः । ततः शृगाल उभय भ्रष्टो भूत्वा पश्चात्तापं दधौ चित्ते । एवं त्वमिमां श्रियमुज्झन् पारत्रिकीमीहमान उभयभ्रष्टो जम्बुक इव भविष्यसि ।

अथ पद्मसेनां प्रति जम्बूः प्राह — नाहं विद्युन्मालिविद्याभृदिव रागग्रहिलो भविष्यामि । त्वयाऽपि रागग्रहिलया

अथ जम्बूः प्राह—बहून् भोगान् भुञ्जानस्तृप्तो न भवत्यङ्गारकारक इव । तथाहि—चंद्रपुरे चन्द्रनामाऽङ्गारकारको ग्रीष्मसमये वारि समादायाटव्यामङ्गारान् कर्तुं ययौ । अङ्गारान् कुर्वतस्तस्य रात्रौ जलं त्रुटितं तृषाऽत्यन्तं लग्ना तालुशोषः समजनि । रात्रौ सुप्तस्तृषया बाधितो वापीकूपतडागनदीह्रदादिजलाशयस्थं पानीयं सर्वं पीत्वा क्वापि मरुस्थलीकूपेऽङ्गारकारकः समागात् । ततस्तृषयाऽत्यन्तपीडितो वटोपान्तस्थो वरत्राबद्धपूलकेन बिन्दुमात्रं तज्जलमाकृष्य जिह्वाग्रे लिहानो न तृप्तोऽङ्गारकारकः । एवं जीवाः सर्वे स्तन्यपानस्त्रीभोगवर्यवस्त्राभरणपरिधानादिसुखमनुभवन्तो न तृप्ताः स्युः, तथा नाहमतृप्तोऽस्मि सांसारिकसुखेषु ४॥ अथ पद्मसेनोवाच—हे नाथ मुक्त्यर्थी त्वमैहिकां प्राप्तां श्रियं विसृजन् गोमायुरिवात्यन्तमुभयभ्रष्टतां मा भज । तथाहि कस्यांश्चिदटव्यां शृगाल एकः पिशितखंडं प्राप, तमादाय सरित्तीरे गतः । तं मांसं भोक्तुंकामो नदीवीच्या बहिः क्षिप्तं मीनं दृष्ट्वा लौल्याज्जिघृक्षुरभूत् मांसखंडमधो मुक्त्वा शृगालो यावन्मीनं गृहीतुमधावत् तावन्मीनः पयोमध्ये प्रविष्टः । मांसखंडं शकुनिको गृहीत्वाऽऽकाशे गतः । ततः शृगाल उभय भ्रष्टो भूत्वा पश्चात्तापं दधौ चित्ते । एवं त्वमिमां श्रियमुज्झन् पारत्रिकीमीहमान उभयभ्रष्टो जम्बुक इव भविष्यसि ।

अथ पद्मसेनां प्रति जम्बूः प्राह—नाहं विद्युन्मालिविद्याभृदिव रागग्रहिलो भविष्यामि । त्वयाऽपि रागग्रहिलया

मस्याः स्त्रिया हस्यते । ततो विद्युन्माली लज्जितोऽधोमुखोऽभूत्, पुनर्नवं मार्गितं विद्यासाधनाय वर्षान्ते पुनरागतो भ्राता तथैव मोहे मग्नं भ्रातरं ददर्श मेघरथः । ततो भ्रातरं म्लेच्छकुले मग्नं वीक्ष्य मेघरथः पश्चात् स्वगृहं गतः । मेघरथो निःस्पृहो निष्कामी भूत्वा सम्यो विद्यापारगतोऽभूत् । विद्युन्माली तु म्लेच्छकुले तिष्ठन् क्रमात्तया चाण्डाल्या किङ्करीकृतो निःशङ्कं नीचगतीचं चादेशं करोति स्म । तादृशे दुर्गन्धे गृहे तिष्ठन् दुःख्यभूत् । पुनर्मृतो विद्युन्माली नरके दुःखभागभूत् । एवमहं विद्युन्मालिवत् संसारे मग्नो न भविष्यामि । तथा त्वमपि संसारसुखे रक्ता मा भव ॥ ९ ॥

कनकसेनाऽवदत्—मदीयं वचो मानय । शंखधमक इव लोभवान् मा भव । तथाहि—पुरा शालिग्रामे कणकुटाभिधः कौटुम्बी वसति । कणकुटः कस्यचित् कौटुम्बिकस्य क्षेत्ररक्षकोऽभवत् । क्षेत्रस्थः स सदा शंखनादेन सस्यभक्षकान् जीवान् दूरं नाशयामास । एकदा शंखयुतो निशामुखे ग्रामस्य क्षेत्ररक्षार्थे ययौ । निशीथसमये कस्यचिद् ग्रामस्य गोधनं भूरि अपहृत्य चलमानास्तस्य क्षेत्रस्य समीपे चौरा आययुः । अत्रान्तरे तेन क्षेत्ररक्षकेण कम्बुः पूरितो हेलया । तदा ते चौराः शंखशब्दमाकर्ण्य पृष्ठागतग्रामरक्षकशङ्कया गोधनं मुक्त्वा दूरतो भीता नेशुः । तत् चौरमुक्तं गोधनं ज्ञात्वा प्राप्तगोधनः प्रगे स्वराज्ञान्तः सदा शंखं पूरयामास एकदा पुनस्तत्रागताश्चौरास्तथैव शंखमापूर्यमाणं श्रुत्वा

दध्युः। सदाऽयं शंखको न वाद्यते। ततः सम्यग् विलोकितं चौरैः, ज्ञातश्च स शंखवादकः। ततो वयमनेन वाहिताः पूर्वमितिवदन्तस्तत्रागत्य तं शंखवादकं बद्ध्वा दृढं मुष्टिभिस्ताडयामासुस्तथा, यथाऽचेतनीभूय पतितः शंखो भग्नः तद्धनं सर्वमपहृतम्। एवं त्वमपि प्रिय! लोभेनाधिकां श्रियं वाञ्छन् शंखवादक इव दुःखीभवसीति १॥

अथ जम्बूस्तां प्रियां प्रति प्राह—कपिवदहं मुमूर्षुर्नास्मि। तथाहि—विन्ध्याभिधधराधरे अनेकश्वापदसंकुले कोऽपि वानरः प्रियाभिः सह क्रीडां कुर्वाणोऽनुवेलं विद्यते। कपिः कोऽपि बलिष्ठमन्यस्तत्प्रियाभिः सह भयोज्झितो रमते। क्रमाद्वानरी तमुपपातिमङ्गीकृत्य रमते। स्वपतिं तृणमपि न मन्यते वानरी। पार्श्वस्था वानर्योऽवोचन्—अयं वृद्धो वानरोऽभूत् तत्त्यक्तुं योग्योऽयमेवं विमृश्य सर्वा अपि वानर्यो युववानरं श्रिताः। यतः—"वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः, पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः। निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं सेवकाः, सर्वः स्वार्थवशाज्जनोऽभिरमते नो कस्य को वल्लभः॥ १॥" वृद्धो वानरो यूना समं युद्धं कुरुते। ततो यूना वानरेण स्त्रीदृष्टिपुष्टेन वृद्धो वानरो भग्नः। ततो नश्यत्कपिस्तृषाक्रान्तो जलार्थी शिलाजतुनि जलभ्रान्त्या मुखमक्षिपत् यावत्तावद्वानरवानर्यौ पृष्ठावागतौ वानरो मुखं क्रष्टुमग्रेतनौ पादौ प्रथमं क्षिप्त्वा पश्चात् पश्चातनावपि पादौ चिक्षेप वानरः। ततः कीलितसर्वाङ्गः

कापि मृत्युमाप । स वानरोऽक्षिप्तपदः पूर्वं वदनं चेदाकृषेत् तदा मरणं नाभविष्यत्तस्य । ततो भवादृशां नारीणां वाञ्छया संसारसुखशिलाजतुनि न मज्जामि ८ ॥ अथ नभसेनाऽऽचष्ट—अधिकेन लोभेन त्वं बुद्धिस्त्री इव हास्यतामनर्थं च प्राप्स्यासि । तथाहि—नन्दिग्रामे सिद्धिबुद्धिनाम्न्यौ वृद्धस्त्रियौ वसतः स्म । एकस्तत्र भोलिको नाम यक्षो मनोऽभीष्टप्रदाता बहिस्तिष्ठतिस्म । सिद्धिः सदा सत्पुष्पपूजादिभिर्यक्षं तथाऽऽरराध यथा दीनारं द्वयं प्रतिदिनं तस्यै अदात् । ततः सिद्धिः सा काष्ठपात्राणि मुक्त्वा हेमपात्रे भुङ्क्ते, महासौधं तया क्रमात् कारितम् । यक्षप्रसादात्तां सिद्धिं लक्ष्मीवतीं वीक्ष्य प्रीत्या रहसि बुद्धिः पप्रच्छ । कुलक्रमागतं स्वामी, दारिद्र्यं तावदावयोः । कुतो विभवपाथोधिः, जलदेवीव वर्तसे ॥ १ ॥ सा सिद्धिराचष्ट—भोलिको यक्ष आराधितः सन् प्रतिदिनं दीनारद्वयं दत्ते मह्यम् । एतदाकर्ण्य बुद्धिरपि भक्तिभरात्तं यक्षमारराध । ततो यक्षोऽवग्—भो बुद्धे ! किं तव विलोक्यते । बुद्धिराह—सिद्धिर्यल्लभते तव पार्श्वात्तद्विगुणं मह्यं देहि । ततो बुद्ध्यै चतुरो दीनारान् दत्ते । बुद्धियाचितं ज्ञात्वा सिद्धिरपि ततो द्विगुणं मार्गयामास दीनारान् । ततो बुद्धिरपि द्विगुणं याचतेस्म । ततः सिद्ध्या चिन्तितमिदम् । असौ द्विगुणं सदा याचते मम स्पर्धया । ततस्तथा कुर्वे यथा स्पर्धाकृतं फलं लभतेऽसौ बुद्धिः । ततः सिद्ध्या

यक्षाग्रे रहसि प्रोक्तं—मदीयमेकं नेत्रं त्वं लाहि। ततो यक्षेणैकं नेत्रं तस्या गृहीतम्। ततो बुद्धिरपि यक्षपार्श्वे याचते स्म सिद्धय त्वया यददासि तद्‌द्विगुणं मह्यं देहि। ततो यक्षवशात् बुद्धिरन्धीभूता। नोऽकारणरुषां सङ्ख्या, सङ्ख्याताः कारणाः क्रुधः। कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥१॥ तं नत्थि घरं तं नत्थि, राउलं देउलं पि तं नत्थि जत्थ अकारणकुविया दो तिन्नि खला न दीसंति ॥२॥ ईर्ष्यया लभते जन्तु—रन्धत्वं परवश्यताम्। इहैवामुत्र नरकादि, पुनर्दुःखमनुत्तरम्॥३॥एवं पते! त्वमपि अधिकाधिकामृद्धिं वाञ्छन् अनर्थे पातिष्यासि॥८॥अथ जम्बूः प्राह-हे कान्ते! नाहमन्यथागामी जात्यश्व इव भाविष्यामि, तथाहि-देवानां प्रिये एनां कथां शृणु—वसन्तपुरे जितशत्रुनृपो न्यायी धर्म्मवान् राज्यं कुरुते स्म। अन्यदा राजाऽवग्—कोऽस्ति मे राज्ये यो वाजिपरीक्षां सम्यग् जानाति। ततोऽश्वविद्याविशारदाः बहुषु घोटकेषु एकं जात्यश्वमानीय जगुः। यस्य राज्येऽयं वाहो वर्तते तस्य राज्यं सर्वथा वर्धते। भूपाः नमन्ति तं परैर्न जीयते स राजा। राजा तं घोटकं पृथग् कृत्वा दध्यौ। जिनदासस्यायं घोटको वर्द्धनायार्प्यते तदा वरम्। स तु निर्लोभी दयावानस्ति। ततो राज्ञा जिनदासायार्पितः सोऽश्वः। ततस्तं वाजिनं नृपदत्तं पालनाय प्राप्य वर्यां भूमिं चतुःशालिकां च कारयित्वा तत्र जिनदत्तो मुमोच। वर्यान्नपानादिदानेन जिनदासस्तं वर्द्धयामास। यथा यथा घोटको वर्द्धतेस्म, तथा

तथा राजा घोटकेभादिसम्पदा वर्द्धते स्म । श्रेष्ठी प्रातस्तं वाजिनं स्वयमारुह्य रारसि पयः पाययित्वा प्रत्यावृत्तः सन् श्रीवृषभदेवप्रासादे प्रदक्षिणात्रयं कृत्वा नत्वा प्रभुं श्रीनाभेयं गृहमुपैति । एवं स घोटको जलाशयं जिनगृहं जिनदासगृहं मुक्त्वाऽन्यत्र कुत्रापि न याति । तेभ्योऽन्यं मार्गं न जानात्यश्वः । इतः प्रत्यर्थिभूपेन तं राज्यवर्द्धनकारकं घोटकं ज्ञात्वा स्वसभायां प्रोक्तम्—कोऽस्त्यत्र यस्तं घोटकमत्रानयति । तस्मै ग्रामपञ्चकं दास्याम्यहम् । ततः एकः सेवको राजप्रसादमासाद्य कपटश्रावकीभूय वसन्तपुरे गतः । चैत्यदेववन्दनमिषेण जिनान् पुरमध्ये वन्दते गुरूंश्च । जिनदासेन तं वर्यं श्रावकं मत्वा स्वगृहे भोजितः । रात्रौ ततो जिनदासेन धर्मगोष्ठीं कुर्वता स्वपार्श्वे स्थापितः । अन्यदा कस्मैचित् कार्याय जिनदासो गतः । स कपटश्राद्धो हृष्टस्तं हयमारुह्य स्वपुरं प्रति चचाल । स घोटकः पयःस्थानकं देवगृहं जिनदासगृहं च मुक्त्वाऽन्यत्र कुत्र न याति। रारसि चैत्ये गृहे पुनः पुनर्गच्छन् । ततः कपटश्राद्धः खिन्नः सन् प्रातर्घोटकं मुत्कलं मुमोच । नष्टः स श्राद्धः स्वस्थानके गतः घोटकवृत्तान्तं राजाग्रे प्रोक्तवान् । घोटको मार्गत्रयं मुक्त्वाऽन्यत् स्थानमजानानः स्वस्थाने गतः । प्रातः घोटकं स्वयमागतं वीक्ष्य सेवकैर्घोटकापहरणवृत्तान्तं ज्ञात्वा च जिनदासाग्रे प्रोक्तः । ततोऽश्वो विशेषतो राज्ञा श्रेष्ठिना च सन्मानितः सुखभूत् । एवमहमपि ज्ञानदर्शन-

चारित्ररूपान्मार्गादन्यत्र मार्गे सर्वथाऽनभिज्ञोऽस्मि । अथ कनकश्रीराह—हेमपुरात् पुरा द्वौ बान्धवौ देशान्तरं प्रति चेलतुः । मार्गे गच्छन्तौ तौ क्वापि स्थाने पञ्चशिखरं वल्मीकं ददृशतुः । तस्य वल्मीकस्य एकस्मिन् शृङ्गे-खनिते पयो निस्ससार । तत्पयः पीत्वा तौ मुदितौ बभूवतुः । अथ ज्यायसा लघुरभिदधे—द्वितीयं शृङ्गं विलोक्यते । ततस्तस्मिन् शृङ्गे विलोकिते द्रव्यं तृतीये रूप्यं चतुर्थे स्वर्णं निर्गतं, पञ्चमे शृङ्गे खन्यमाने ज्यायसा भ्रात्रोक्तं, अतिलोभो न क्रियते । यतः—"सूलं मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भवः, क्रोधाग्नेररणिः प्रतापतरणिप्रच्छादने तोयदः । क्रीडासद्म कलेर्विवेकशशिनः स्वर्भानुरापन्नदी—सिन्धुः कीर्तिलताकलापकलभो लोभः पराभूयताम् ॥ १ ॥ महीयसापि लाभेन, लोभो न परिभूयते । मात्रा समधिकः कुत्र, मात्राहीनेन जीयते ॥ २ ॥" एकं शृङ्गं तिष्ठतु । ततः स भ्रात्रा वारितोऽपि लघुभ्राता लोभार्थी पञ्चमं शृङ्गं खनति यावत्तावत् ज्यायान् भ्राता पश्चाद् व्यावृत्योपविष्टः पञ्चमे शृङ्गे खनिते दृग्विषाहिना निर्गतेन स भस्मीकृतः चिरकालं दुःखी जातः । तथाऽतिलोभात् त्वमपि मुक्तिसुखं वाञ्छन् कृषिकलघुभ्रातृतुल्यतां मा गच्छ ॥ ११॥ जम्बूकुमारोऽवग्—प्रिये शुकनिकरोपमो न भविष्यामि । तथाहि—कस्मिंश्चिद्ग्रामे लोकैः क्षेत्ररक्षार्थं नलिकयन्त्राणि माण्डितानि । अन्यदा तत्रोपविष्टः शुकनिकरः । भ्रमता च

नलिकायन्त्रेणाधः कृतः । तत्र दृढं स्वचरणग्रहं पतनभयात् कुर्वन् आत्मानमबद्धमपि बद्धं मन्यमानो नचोत्पतति । अहं बोधाऽसिना छिन्नमोहपाशः स्वेच्छयोत्पत्य गच्छामि तत्पक्षितुल्यो नास्मि ॥ १२ ॥ अथवाऽत्रेयं कथा च वाच्या—विन्ध्याद्रौ सरोवरं पयःपूर्णमभूत् । तस्मिन् जलाशये कश्चित् कमठः स्थितः पुत्रपौत्रादियुग् । कदाचित् शैवालपटलापसरणात् पूर्णेन्दुमाकाशे विलोक्य रात्रौ मुमुदे । ततश्चिन्तितं तेन—कुटुम्बस्य दर्शयिष्यामि । ततः कच्छपः पयोमूले गतः स्वकुटुम्बपार्श्वे । कमो यावत् स्वकुटुम्बं तत्रानिनाय तावत्तच्छिद्रं गतम् । ततो भ्रामं भ्रामं चलच्चक्षुर्विलोकयन् पूर्णेन्दुं नापश्यत् । तद्वदिमं जिनधर्मं संयमप्राप्तिस्वरूपं गुरुसामग्रीं च प्राप्य न त्यक्ष्यामि ॥१२॥

जयश्रीर्जगौ—नागश्रीरिव मां किं विप्रतारयासि । तथाहि पद्मपुरे केलिप्रियो राजा राज्यं करोतिस्म । दिनं प्रति नवां नवां कथां वारकेण लोकमुखात् शृणोति । अथ कस्यचिद् द्विजस्य वारक आगतः । तस्य मौर्ख्यं विद्यते । ततो द्विजोऽचिन्तयत्—किं कथ्यते मया क्षोणिपतेरग्रे यदि नव्या कथा न कथयिष्यते तदा दुष्टो भूपो मां कारागृहे क्षेप्स्यति पितरं चिन्तापातितं कालमुखमालोक्य दौहित्र्या कुमार्योक्तं—त्वं ।चिन्तां मा कुरु । अहं कथां कथयिष्ये । ततः सा कन्या राजपार्श्वे गत्वाऽवग्—राजन्नद्याहं कथां कथयिष्यामि स्वसोदरार्थम् । राजाऽवग्—

तर्हि कथय त्वमेव । ततः कन्याऽवग् अत्रैव पुरे नागशर्मा माहणोऽस्ति, तस्य सोमश्रीः पत्नी, नागश्रीर्नन्दिनी । सा कस्मैचिद् द्विजवराय दत्ता पितृभ्याम् । विवाहसामग्र्यर्थं गतौ मातापितरौ ग्राममध्ये । एकाकिनी कन्या गृहेऽभूद्यावत्तावत् स चट्टद्विजस्तत्रागात् । उपलक्ष्य भाविनं पतिं तया भोजितः पतिः । सतूलिके पल्यङ्के शायितस्तया ध्यातं—मही तु विस्तीर्णा विद्यते । परिणयनं विनाऽस्य हस्तेनापि सङ्गो न कार्य इति ध्यात्वा पर्यङ्कस्याधः सुप्ता कन्या निर्विकारा । अकस्मात् कन्याया उपरि पतिः पतितः सुप्तो द्विजः । ततो लज्जाक्षोभात्तस्य प्राणा गताः । ततस्तया ध्यातं—अहं पापिनी मयाऽयं हतः । किं करिष्ये लोको ज्ञास्यति । ततस्स्वं पतिं द्विजं खण्डशः कृत्वा खातं भूमौ कृत्वा गर्तायां क्षिप्त उपरि धूलिं दत्वा कर्दमेन गोमययुक्तेन लिम्पयित्वा गर्तां पुष्पैर्गन्धैर्धूपैश्च धूपयित्वा यावत् स्थिता कन्या तावत् पितरावात्तविवाहसामग्रीकावागतौ । इत्युक्त्वा कन्या तूष्णीं तस्थौ राजा जगौ—अग्रतः कथय किं जातम् । कन्याह—अतीतः कालोऽहं यास्यामि राजावग्—तामहं कथं द्रक्ष्यामि । सा जगादाऽहमेव सा स्त्री । संसारनटिकानटने नटी । राजाऽवग्—कुमारि ! त्वया यदुक्तं तत्सत्यम् । साऽवग्—याः कथास्त्वं पुराऽश्रौषीर्लोकपार्श्वे ता यदि तथ्यास्तथेयमपि तथ्या । सैवमुक्त्वा स्वस्थानं गता ।

यथा तया नागश्रिया भूपो विप्लावितः । तथा त्वमपि किं कथाभिर्विप्लावयसि माम् ॥ १३ ॥ जम्बूः प्राह—ललि-
ताङ्गवदहं न भोगसुखे तथाऽऽसक्तोऽस्मि । तथाहि—कन्दर्पकोशपुरे शतायुधो राजा राज्यं करोति । तस्य लीलावती
प्रिया । सा कदाचित् सर्वाभरणभूषिता गवाक्षोपरि उपविष्टा ललिताङ्गाख्यं नरं तुरगारूढं मनोभवावतारं गच्छन्तमा-
लोक्य लीलावती पञ्चबाणबाणैस्ताडिता । तदा च ललिताङ्गस्तां वीक्ष्य पञ्चेषुबाणैस्ताडितः । भूपपत्नी दुर्लभा भवतीति
ध्यात्वा ललिताङ्गकुमारः स्वगृहे गतः । राजपत्नी कामशरपीडिता भूतार्ता इवाऽभवत् । दास्या स्वामिन्या मनोऽभिप्रायो
ज्ञातः, कथितं चानेष्यते सोऽत्र मया । सा दासी समुद्रप्रियेभ्यनन्दनं ललिताङ्गं ज्ञात्वा तत्र रहोऽभ्येत्योवाच ।
मत्स्वामिनी त्वामिच्छति भोगाय । सोऽवग्—पुराऽपि मम तस्या इच्छा विद्यते । यदाऽवसरो भवति तदा प्रोक्तव्यमहं-
मागमिष्यामि । दासी स्वामिन्यग्रे प्राह—राजा तु स्तोकं गृहद्वारान्निःसरति । ततश्चैकदाऽवसरं प्राप्य यावद्दासी तं
ललिताङ्गं कृतस्फारशृङ्गारमानयामास स्वामिनीपार्श्वे तावद्राजापि तत्रागतः । ततस्तया बिभ्यत्या दासीपार्श्वात् संचाराभिधे
खाले क्षिप्तः प्रोक्तं च त्वया न जल्पनीयम् । राजाऽगतोऽस्ति, यदि ज्ञास्यति भूपस्त्वामत्रागतं तदा शूलाभिरोपणात्
हनिष्यति । ततः स ललिताङ्गकुमारो बिभ्यत् संलीनाङ्गोऽस्थात् । ततस्तत्रस्थस्य तस्यानुकम्पया राज्ञी भोजनं दत्ते ।

स ललिताङ्गस्तत्रैव भुङ्क्ते हदति च । दौर्गन्ध्येन तत्रत्यं दुःखमनुभवन् गृहसुखं स्मरन् महादुःखी जातो ललिताङ्गः । अथ प्रावृषि कूपोर्द्धगामिभिर्मलवारिभिः प्रवाह्य प्रणालिकया बहिः कर्षितो ललिताङ्गो वप्रखालप्रान्ते पतितो धात्र्या दृष्टः । तादृग्संमूर्छितो गृहे आनीतः । सज्जीकृतोऽङ्गप्रक्षालनादिना । कुत्रास्थास्त्वमियन्तं कालमितिस्वजनैः पृष्टो न जाने इति लज्जयाऽवग्–स्वस्थीभूतो ललिताङ्गः । यदि कथंचिन्निःसृतो ललिताङ्गस्तया पुनराकारितः कदाचित्तत्र याति, अहं तु तादृशानशुचिप्रायान् भोगसुखादिकान् स्त्रीसंगत्या न वाञ्छामि मनागपि । यदि तादृशे स्त्रीभोगसुखे पतिष्यामि तदा मम नरकपात एव भवति । उपनयोऽत्र कूपसदृशात् गर्भवासान्निर्गतो भूयो विषयसुखास्वादासक्तस्तत्र याति । अहं ललिताङ्ग इव पुनस्तान् भोगान् न समीहे १४ । अथ कन्याऽवग्–मासाहसशकुनाभः मा त्वं साहसिको भव । तथाहि–एकस्मिन् गिरिगह्वरे सुप्तः सिंहः । तस्य सिंहस्य व्यात्ते मुखे प्रविश्य कोऽपि पक्षी मासाहसनामा दन्तान्तरलग्नानि मांसखंडानि चञ्चूपुटेनादत्ते मा साहसं कार्षीरिति गाढस्वरमुच्चरति च । अत्रान्तरे केनचित् पुरुषेण प्रोक्तं–भो पक्षिन् त्वं मुखेन मासाहसमिति ब्रूषे । व्याघ्रास्यादाकृष्य मांसं भक्षयसि च । ततस्त्वं मुग्ध एव दृश्यसे यतः स्ववचनानुरूपं न कुरुषे, एवं त्वं साक्षात् सुखं हित्वा मासाहसपक्षिव

स्वयं त्वयाङ्गीकरणे साहसं मा कुरु। यथा स सिंहो जागरितः सन् तं हन्त्येवं। तथा संयमोऽपि हरिसदृशोऽङ्गीकृतः कदाचिद्धानिष्यति त्वाम् ॥ १५ ॥ जम्बूः प्राह—अहं कुसङ्गतिं मुक्त्वा सोमशर्म्मपुरोहित इव सत्सङ्गतिं करिष्यामि। तथाहि—क्षितिप्रतिष्ठिते पुरे जितशत्रुराजा राज्यं करोतिस्म। तस्य सोमशर्म्मेति पुरोहितोऽभूत्। नित्यमित्राभिधो मित्रः १, द्वितीयः पर्वमित्रोऽभत् २, तृतीयः—प्रणाममित्रोऽभूत् पुरोहितस्य। तेन एकः सहपांशुक्रीडितो वयस्यः प्रतिपत्त्या स्वसमानो व्यधायि, द्वितीयः पर्वमित्रः २, तृतीयस्तु प्रणाममित्रः। अथ कदाचित्तस्य पुरोहितस्य राजा रुष्टोऽभूत्। ततः पुरोहितः सहजमित्रस्य सदने गत्वाऽवग्—मयि भूपो रुष्टोऽस्ति किं कारिष्यते। सहजमित्रेणोक्तं—भूपोरुष्टोऽस्ति यदि भवत उपरि तदा प्रथममत्र त्वां द्रष्टुं राजपुरुषाः समेष्यन्ति। तेनात्र स्थातुं तव न युक्तं गच्छाऽन्यत्र। ततः पुरोहितः पर्वमित्रगृहे गत्वा तथैवाह। तेनाऽप्युक्तं यदि त्वामत्र स्थितं राजा ज्ञास्यति, तदा मां त्वां च सकुटुम्बं घाणके क्षेप्स्यति। ततोऽन्यत्र प्रच्छन्नीभूय तिष्ठ। ततस्तृतीयस्य प्रणाममित्रस्य गृहे गत्वा तथैवोवाच। मित्रद्वयेन नाहं रक्षितः। प्रणाममित्रोऽवग्—न भेतव्यं त्वया, आवामेकीभूय स्थास्यावः राजा किं कारिष्यति ?। राज्यांतरे गमिष्यावः। ततस्तावन्यस्मिन् राज्ये गतौ। तत्र पुरोहितः प्रणाममित्रसांनिध्यान्मानितः सुख्यभूत्।

दृष्टान्तोपनयश्चैवं । कर्म्मपरिणामतुल्यो भूपः, जीवः पुरोहिततुल्यः, सहजमित्राभो देहः, सर्वे बान्धवाः पर्वमित्रतुल्याः, प्रणाममित्रतुल्यो धर्म्मः । यतो जन्मान्तरे जीवेन सह धर्मो गच्छति । जीवस्य यः परत्रापि, श्रियं यच्छति वाञ्छिताम् । ज्ञातिदेहौ विहायाहं, धर्ममाराद्धुमुद्यतः ॥ १ ॥ अतः कारणादहं संयमश्रीरूपं धर्म्मं मुक्तिसुखदातारमङ्गीकरिष्यामि । ततो जम्बूकुमारस्य संवेगामृतसोदरैर्वचोभिः सर्वचौरयुतस्य प्रभवस्य चाष्टानां कन्यानां वैराग्येण मनोवाञ्छितं जातम् । अष्टावपि कन्या ऊचुः—प्रमुखे सुखदैः स्वामिन् !, परिणामेऽतिदुःखदैः । इयत्कालं हहा कष्टं, विषयैर्वञ्चिता वयम् ॥ १ ॥ आपदां प्रथितः पन्थाः, इन्द्रियाणामसंयमः । तज्जयः सम्पदां मार्गो, येनेष्टं तेन गम्यताम् ॥ २ ॥ यस्य हस्तौ च पादौ च, जिह्वा च सुनियन्त्रिता । इन्द्रियाणि सुगुप्तानि, रुष्टो राजा करोति किम् ॥३॥ तत्तद्विवाहसंबंधा-दन्धे तमसि मज्जनात् । उद्धृताः स्मस्त्वया यद्वा, श्रेयसे सङ्गतं सताम् ॥४॥ आस्थितस्तत्त्वया एषः, श्रितोऽस्माभिरपि त्वयम् । सदैव नेतर्नेताऽसि, त्वमस्मान् शिवपत्तनम् ॥ ५ ॥ प्रभवोऽपि दध्यौ—धिगस्माकं ये वयं परधनहरणायोद्यताः स्मः । मया चौर्यद्यूतादिसेवाभिर्बहुपापमर्जितं तेन न ज्ञायते का गतिर्भविता यतः—" चौर्यपापद्रुमस्येह, वधबन्धादिकं फलम् । जायते परलोके तु, चिरं नरकवेदना ॥ १ ॥ " असौ

तु जम्बुरेवंविधः सुकुमाराङ्गः एवंविधां श्रियं कन्यायुतां त्यक्ष्यति । ततो योऽसौ मार्गमङ्गीकरिष्यति, स एव मयाश्रयितव्यः। एवं विमृश्य जम्बूपार्श्वे प्रभवोऽवग्—। उवाच प्रभवोऽप्युच्चै—र्महासत्त्व ! भवद्गुणैः। कृष्टस्त्वामनुयास्यामि, स्वकानापृच्छ्य निश्चितम् ॥ १ ॥ ततो वैराग्यवारिताशयाः प्रभवादयः तत्क्षणात् शासनदेव्या बन्धनान्मुक्ताः प्रोचुः जम्बूकुमारं प्रति । वयं स्वकुटुम्बं मुत्कलयित्वा प्रभाते दीक्षां ग्रहीतुं भवता सार्द्धमागमिष्याम. । जम्बूः प्राह—भो प्रभव ! जीवानां मनांसि चञ्चलानि सन्ति । यतः—“ क्षणं सक्तः क्षणं मुक्तः, क्षणं क्रुद्धः क्षणं क्षमी । मोहाद्यैः क्रीडयेवाहं, कारितः कपिचापलम् ॥ १ ॥ एकाग्रमनसा ध्याता, देवा अश्मसया अपि । अचिरेणैव तुष्यन्ति, किं पुनश्चेतनो जनः ॥ २ ॥” तेन प्रमादो न करणीयः। “ मज्जं विसयकसाया, निद्दा विकहा० ॥ ” जल्पितं पालनीयं त्वया, भवदीयं वचः प्रमाणमित्युक्त्वा प्रभवश्चौरयुतः स्वस्थानं गतः । ततो जम्बूकुमारं सदारं दीक्षां जिघृक्षुं ज्ञात्वा श्वसुराः पितरौ च तमेवानुयियासवोऽभूवन् । अथ जम्बूकुमारोऽपि विधिवज्जिनपूजां कृत्वा सप्तक्षेत्र्यां स्वधनं व्ययित्वा तुरङ्गारूढस्ताभिः प्रियाभिः समं विशिष्टाभरणभूषिताङ्गः स्वमातापितृयुतः श्रीसुधर्म्मस्वामिपार्श्वे ययौ दीक्षां ग्रहीतुम । इतः प्रभवः स्वकुटुम्बं मुत्कलाप्य पञ्चशतीचौरयुतो दीक्षां ग्रहीतुं तत्रागात् त्रिःप्रदक्षि-

णीकृत्य पञ्चमगणधरं श्रीसुधर्म्मस्वामिनं प्रणम्य जम्बूर्व्यजिज्ञपत्—संसारसागरोत्तार !, कर्णधार ! मुनीश्वर !। मां सकुटुम्बं चारित्र—यानपात्रेण तारय ॥१॥ ततः स्वपाणिपद्मेन, गणधारिधुरन्धरः। स्वजनैरन्वितं जम्बू—कुमारं तमदीक्षयत् ॥२॥ दीक्षां पञ्चशतसप्तविंशतिश्राद्धानां दत्त्वा सुधर्म्मस्वामीति धर्मोपदेशं ददौ । तथाहि—एके जीवाः संयमं सिंहतुल्या भूत्वा गृह्णन्ति श्रृगाला इव पालयन्ति, एके जीवाः श्रृगाला इव भूत्वा संयमं गृह्णन्ति शृगाला इव पालयन्ति, एके पुनः जीवाः श्रृगालाइव संयमं गृह्णन्ति सिंहा इव पालयन्ति, एके पुनः जीवाः सिंहाइव शूरवृत्त्या संयमं गृह्णन्ति सिंहा इव पालयन्ति । तेन भवद्भिश्चतुर्थभङ्गस्थैः संयमो निरतिचारः पालनीयस्तथा यथा करतलगतामुक्तिरपि भवति । प्रमादो न करणीयः, प्रमादेन संसारे भ्रमणं भवति गृहीतसंयमानामपि । यतः—"चउद्दसपुव्वी आहारगावि मणनाणी वीयरागा य । होंति पमायपरवसा, तयणंतरमेव चउगइआ ॥ १ ॥" ततो जम्बूर्विशेषतस्तपःपरोऽभूत् । तत्रैव तस्य मुनीशस्य स्तुतिः क्रियते यतिभिः। "नवणवई कंचणकोडीउ, जेणुज्झिया अट्ठ य बालियाओ। सो जंबूस्वामी पढमो मुणीणं, अपच्छिमो नंदउ केवलीणं॥ १॥" जम्बूस्वामिप्रभृतिभिः शिष्यैः कलितः कलभैरिवयूथनाथः श्रीसुधर्म्मस्वामी विहरन् चम्पानगर्या बहिरुद्याने समवासार्षीत् । तदा तदीयपादारविन्दं नन्तुं धर्म्मं श्रोतुं

च बहवो जनाः समाययुः । लोके गच्छन्तं दृष्ट्वा श्रीसुधर्म्मस्वामिनं वन्दितुं तदा श्रेणिकभूपपुत्रः कोणिकोऽपि तत्रागात् । त्रिः प्रदक्षिणीकृत्य श्रीसङ्घो धर्म्मं श्रोतुमुपविष्टः कोणिकयुग् । धर्मोपदेशमाहेति गुरुः—माणूसखित्त-जाई, कुलरूवारुगामाउअं बुद्धी । सवणं गहणं सद्धा, रांजमो लोगंमि दुलहाइं ॥ १ ॥ कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वा च गोलोमतः, पङ्कात्तामरसं शशाङ्कमुदधेरिन्दीवरं गोमयात् ॥ २ ॥ इत्यादिदेशनान्ते कोणिकः श्राद्ध-धर्ममङ्गीकृत्य जम्बूमुनिप्रभृतिशिष्यवर्गमद्भुतमालोक्य पप्रच्छ । श्रीसुधर्मगुरो ! कोऽयं, द्विपेष्विव सुरद्विपः । सुधांशुरिव धिष्णेषु, त्रिदिवाद्रिरिवाद्रिषु ॥ १ ॥ शालिधान्यमिवान्नेषु, कल्पद्रुम इव द्रुषु । अम्भोधिष्विव दुग्धाब्धि—श्चम्पकं कुसुमेष्विव ॥ २ ॥ हिरण्यमिव लोहेषु, रसेष्विव सुधारसः । अद्भुतस्तव शिष्येषु, सविशेषः प्रदीप्यते ॥३॥ त्रिभिर्विशेषकम् । ततः सुधर्मस्वामी गणभृत् जम्बूस्वामिनः प्राग्भवतपःसम्बन्धमशेषतः प्राह—पूर्वभवार्जितेन तपसा ईदृशी संपदस्य ऋषेर्जाताऽस्ति । एतदाकर्ण्य राजा हृष्टश्चम्पापुरीं ययौ । लोका अपि प्राप्तजिन-धर्मा गुरुं प्रणम्य स्वगृहं ययुः । सुधर्म्मस्वामी जम्बूप्रभृतिसाधुसमन्वितो विहरन् श्रीमहावीरं नन्तुमगात् । सुधर्म्म-स्वामिपार्श्वे पठन् जम्बूयतिरेकादशाङ्गीं चतुर्दशपूर्वीं च सूत्रार्थाभ्यां पपाठ । श्रीवीरनिर्वाणात् सुधर्म्मस्वामी दशमे

वर्षे जम्बूस्वामिने सूरिपदं ददौ । विंशतितमे च वर्षे गच्छभारं धुरन्धरजम्बूस्वामिने वितीर्य मुक्तिपुरीं सुधर्म्मस्वामी ययौ । ततःश्रीजम्बूगणधरः प्राप्तकेवलज्ञानोऽनेकभव्याङ्गिनः प्रबोध्य प्रभवस्य सूरेर्गच्छभारं वितीर्य सूरिपददान-पुरस्सरं श्रीवीरनिर्वाणात् वर्षचतुःषष्ठ्यां गतायां क्षीणाशेषकर्मा मुक्तिनगरीं ययौ । मनःपराऽवधी श्रेण्यौ, पुलाका-हारकौ शिवम् । कल्पत्रिसंयमा ज्ञानं, नासन् जम्बूमुनेरनु ॥ १ ॥ यतः—मणपरमोहि पुलाए, आहारगखवगउवसमे कप्पे । संजमतियकेवलिसिज्झणा य, जंबूमि वुछिन्ना ॥ २ ॥ घनागमैकप्रभवानि यस्य, माधुर्यधुर्याणि वचःफलानि । निषेव्य भव्या भवतापमौज्झन्, मुदे स जम्बूतरुरद्वितीयः ॥३॥ इति जम्बूस्वामिप्रभवस्वामिदीक्षाकथा समाप्ता ॥ २८ ॥

भवभीरुर्विमुञ्चेत, नाङ्गीकृतमभिग्रहम् । प्रतिकूलनिपातेऽपि, वंकचूलकुमारवत् ॥ १ ॥

तथाहि—विराटदेशे पृथ्वीभालविभूषणे पेढालपुरमस्ति । श्रीचूलराज्ञः पृथ्वीं पालयतः पुष्पचलाभिधपुत्रोऽभूत् । पुष्पचूला पुत्री च । सम्प्राप्तयौवनः क्रमाद् द्यूतव्यसनी बभूव । चौर्यं कुर्वाणः पुष्पचूलो वक्रगमनेन लोकान् दञ्चयतिरम । तता लोकैर्वंकचूल इति नाम दत्तं तस्य । ततोऽन्यायीति कृत्वा पित्रा निष्काशितः । यतः—" वैरवैश्वा-नरव्याधिवादव्यसनलक्षणाः । महानर्थाय जायन्ते, वकाराः पञ्च वर्द्धिताः ॥ १ ॥ द्यूतं सर्वापदां धाम, द्यूतं दीव्यन्ति

दुर्द्धियः । द्यूतेन कुलमालिन्यं, द्यूताय श्लाघ्यतेऽधमः ॥२॥ राज्यच्युतिं वल्लभया वियोगं, द्यूतान्नलः प्राप गतोरुभोगम् । प्रचण्डतामण्डितबाहुदण्डा-स्ते पाण्डवाः प्रापुररण्यवासम् ॥ ३ ॥ भार्याभगिनीभ्यां सह भिल्लीहल्लीराकसमलंकृतां कामपि पल्लीं वंकचूलो ययौ । तत्र पल्लीपतौ मृते तत्र वंकचूलोऽभूत् पल्लीपतिः । वंकचूलो बहुचौरपरिवृतो ग्रामे ग्रामे पुरे पुरे स्तैन्यार्थं याति । ज्ञानतुङ्गाचार्या विहरन्तोऽन्यदा वर्षाकाले वर्षति मेघे तत्रागताः । पल्लीपतिः प्राह—यदि यूयं कस्यापि धर्मोपदेशं न दत्त तदाऽत्र तिष्ठत । गुरुभिरुक्तमत्र कस्यापि धर्मोपदेशो न दास्यते स्वाध्यायाध्ययनतीव्रतपश्चरणकरणोद्यताः श्रीज्ञानतुङ्गसूरयो वंकचूलदत्ते गृहे स्थिताः । चतुर्मासीं स्वाध्यायाध्यापनादिना नीत्वा पारणकदिने गुरवश्चलितुकामा वंकचूलं प्रति जगुः—चतुर्मासी गता चलिष्यामो वयम्, श्रीगुरूणां पृष्ठौ तदा संप्रेषयितुं वंकचूलः कियत्परिवारपरिवृत्तश्चचाल । वंकचूलग्रामसीमामतिक्रम्य गुरुभिरुक्तं—भो वंकचूल ! इयं कस्य सीमा ? । वंकचूलोऽवग् इयं मदीया भूमिर्न । ततो गुरवो जगुः—महानुभाग! वयं निष्प्रत्यूहं स्वाध्यायाध्ययनादिपरास्तव ग्रामे स्थिताः । अद्य यावत् कस्यापि उपदेशो न दत्तः । अधुना किमपि अभिग्रहं गृहाण । अभिग्रहेण जीवाः सुखिनो भवन्ति । यतः—“ नियमोऽखिललक्ष्मीणां, नियन्त्रणमशृङ्खलम् । दुरितप्रेतभूतानां, रक्षामंत्रो निरक्षरः ॥ १ ॥” वंकचूलो

जगौ—भगवन् दीयताम् । ततो गुरवो जगुः—अज्ञातफलं १ काकमांसं च न भक्षणीये २, अनुरक्ताऽपि नृपपत्नी परिहार्या ३, प्रहारदानकाले च सप्तपदानि पश्चादपसर्तव्यं ४ इति नियमचतुष्टयं गृहाण । ततो वंकचूलेन गुरुप्रोक्तं नियमचतुष्टयं गृहीतं प्रणम्य पश्चादागाद्वंकचूलः । स वंकचूलः कदाचित् कस्मिन् ग्रामे अवस्कन्दं दत्त्वा व्याघुटितो मार्गे भ्रष्टोऽभूत् । अटव्यामटतस्तस्य लङ्घनत्रयं जातम् । ततो मनोहराणि फलानि दृष्ट्वा सेवकैश्चौरैः प्रोक्तं—फलानि सन्त्यत्र तानि भक्ष्यन्ते । वंकचूलस्तानि फलानि वीक्ष्य पप्रच्छ—किं नामैषां फलानां तैरुक्तं नाम न ज्ञायते, वंकचूलेनोक्तं ममाज्ञातफलभक्षणे नियमोऽस्ति, ततस्तैरुक्तमस्माकं नियमो नास्ति वयं भक्षयिष्यामः । वङ्कचूलोऽवग्-अज्ञातफलानि नास्वाद्यन्ते । ततो वार्यमाणा अपि ते चौराः सश्रीकानि तानि फलानि बुभुजिरे । ततः सद्यस्तेषु चौरेषु विपन्नेषु दध्यावेतानि विषफलानि, येषां भक्षणे मम गुरुभिर्नियमो दत्तोऽस्ति । ततः एकाक्येव निशि स्वपल्लीं प्रविश्य निशीथकाले स्वगृहे गतो वंकचूलः । वंकचूलो दध्यौ योऽयं नियमो यदि मम नाभविष्यत्तदा ममापि मरणमभविष्यत् । यतः—"सर्वाः सम्पत्तयस्तस्य, जायन्ते जन्मिनः खलु । यो गृहीतं व्रतं नैव, मुञ्चते शुद्धमानसः ॥१॥" एकदा कस्मिंश्चिद् ग्रामे गते वंकचूले वंकचूलस्य वैरिनर्तकैर्नाटकमारब्धम् । ततो वंकचूल-

माकारयितुं तत्रागता नर्तका गृहे। ततो वंकचूलभगिन्या ध्यातं—यदि वंकचलं ग्रामान्तरे गतं ज्ञास्यन्ति, ततो न सम्यक् इत्यादि विमृश्य भ्रातृवेषं परिधाय तत्र गत्वोपविष्टा। नृत्यं विलोक्य दानं दत्त्वा स्वगृहे समेत्य भ्रातृपत्नीयुता पुष्फचूला पुरुषवेषेण युता सुष्वाप। इतो वंकचूलो गृहमागतः। स्वां प्रियामन्यपुरुषयुतां पल्यङ्के सुप्तां वीक्ष्य क्रोधारुणलोचनः तयोर्द्वयोर्वधाय कृपाणमाकृष्य नियमस्मरणाच्च सप्तपदान्यपसृत्य यावत् प्रहारं दत्ते, तावत् संचलितखड्गप्रहार-प्रतिशब्देन जागरिता संभ्रान्ता पुष्पचूला जीवतु भ्राता मम वंकचूल इत्यादि उच्चरन्ती उत्तस्थौ। ततः प्रणामपूर्वं वंकचलेन पुरुषवेषकारणं भगिनी पृष्टा रिपुनटानां समागमादि जगौ। ततो वंकचलो हृष्टो गुरुदत्तं नियमं प्रशशंसेति—अहो ते गुरवो ज्ञानिनः। एकदा वंकचूलो वणिग्गृहे पितापुत्रयोर्लेखके कलहं वेश्यागृहे वेश्यां कुष्ठिनमपि कामयन्तीं वीक्ष्य कस्यापि भूपतेरन्तःपुरे भित्तिं विदार्यान्तः प्रविष्टो निशि राज्ञ्या हस्तो लग्नः। ततो राज्ञी तं कुमारं प्राह—मया सह भोगान् भुंक्ष्व बहूनि रत्नानि दास्यामि तुभ्यम्। वंकचलो गुरुदत्तं नियमं स्मरन् प्राह—त्वं मम माता। ततस्तया विरक्तया अयमुपपतिरिति पूत्कृते राजपुरुषैर्निबध्य प्रातर्भूपपार्श्वे नीतः। राज्ञा पृष्टः स वंकचूलो यथानुभतं रात्रिवृत्तान्तं जगौ। ततो राज्ञा कुड्यन्तस्थितेन रात्रिवृत्तान्तवेदिना तद्गुणरञ्जितेन स सामन्तीकृतः।

राज्ञ्याः स्वरूपं जानन्नपि न प्रकटीचक्रे । स्वगृहस्वरूपं कस्याप्यग्रे न कथ्यते । यतः—" स्वचिन्तितं कृतं छन्नं, गृहदुश्चरितं पुनः । वञ्चनं चापमानं च, मतिमान्न प्रकाशयेत् ॥ १ ॥ राजोपदेशेन वंकचूलश्चौर्यं मुक्त्वा सन्मार्गगामी बभूव । भूपादेशादन्येद्युः कमपि दुर्दान्तं वैरिणं जित्वा प्रहारविधुरो वंकचूलः स्वपुरमागात् चिकित्सा क्रियते वैद्यैस्तस्य । तस्मात् प्रहारघाताद्व्यथयाऽन्येऽपि रोगा जाताः । उपचारे बहुक्रियमाणेऽपि तस्य गुणो नाभूत् प्रत्युत दिनं दिनं प्रति क्षीयते शरीरं पथ्यं च न रोचते । ततस्तस्य रोगस्फेटनार्थं राज्ञा पटहोद्-घोषणा कारिता । योऽमुं जीवयति तस्मै यथेष्टं राज्यादि ददामि । तदा केनाप्यत्रागत्य वैद्येन (काक) मांसौ-षधं प्रोक्तम् । काकमांसं वैद्यैः कथ्यमानं वंकचूलः श्रुत्वा ऊचिवान्—अभक्ष्यं काकमांसं ततो नाहं भक्षयामि । ततो राज्ञा जिनदासाख्यश्राद्धं धर्मकर्ममित्रमाकारयितुं वंकचूलप्रबोधाय जनः प्रेषितः । यतः जीवस्य मित्रोक्तं दुर्लङ्घ्यं भवति । जिनदासो वंकचूलपार्श्वे समागात् पप्रच्छ । बन्धो ! वंकचूल ! तव देहे समाधिरस्ति ? । वंकचूलो जगौ—स्वागतं भवतो धर्मबन्धो ! समस्ति । देहे ममेदृशं जातम् । यतः—" रोगायत्तमिदं देहं, कर्म्मायत्तं च जीवितम् । आराधना तवायत्ता, कुरु मित्र ! यथोचितम् ॥ १ ॥ अथोचे जिनदासोऽपि, तदाशयदिदृक्षया । काकमांसौषधं भुंक्ष्व,

देहपाटवहेतवे ॥ २ ॥ साक्षेपं वंकचूलोऽथ, स्माह साहसिकाग्रणीः । कण्ठोपकण्ठविश्रान्त–जीवितोऽश सतां वरः ॥३॥ देहश्चलाचलो रोगैः, समीरैरिव वारिदः । कः कृती तत्कृते कुर्यान्निजाभिग्रहखण्डनम् ॥ ४ ॥ प्रशंसापूर्वकं प्राह, शृणु मित्र! यथोचितम् । एकत्वं सर्वथा जन्तोः, सर्वे भावा न निश्चलाः ॥ ५ ॥ तस्माद्देहे कुटुम्बे च, यौवने विभवे भवे । जीविते च प्रतिबन्धमकृत्ये मा कृथा वृथा ॥ ६ ॥ प्रतिपद्य चतुःशरणं, परमेष्ठिपरायणः । उत्तमार्थनिधिं कृत्वाऽच्युते चूलो गतः सुधीः ॥ ७ ॥ ” ॥ इति वंकचूलकथा समाप्ता ॥ २९ ॥

उपसर्गान् सहमानो, जनः प्राणान्तकारकान् । लभते निर्वृतिं गज–सुकुमालयतीशवत् ॥ १ ॥

तथाहि––गजसुकुमालकथां सुलसानागश्रेष्ठिकृष्णभ्रातृकथां विना न कथितुं शक्यते । तेनादौ तेषां सम्बन्धः प्रोच्यते । भद्दिलपुरे नागश्रेष्ठी बभूव, तस्य प्रिया सुलसा । वसुदेवपार्श्वात् कंसेन याचितानां सप्तानामपत्यानां मध्यात् षट् पुत्रा देवेन केनचित् नागपत्नीनिन्दुसुलसानाम्नीगृहे मुक्ताः । सुलसया वर्द्धिताः क्रमेण तान् देवकीसुतान् षडपि द्वात्रिंशतं कन्याः परिणायिताः प्रत्येकम् । षडपि श्रीनेमिपार्श्वे प्रबुद्धा दीक्षां जगृहुः । सर्वे चरमशरीरिणो द्वादशाङ्गीभाजोऽभूवन् । स्वामिना सह द्वारिकां गताः ते षडपि यतयः षष्ठपारणेऽन्यदा युगलिनो भूत्वा त्रिधा द्वारका-

पुरीमध्ये विहर्तुं जग्मुः । प्रथमं साधुयुगलं श्रीकृष्णगृहे भिक्षायै गतं, तदा देवक्या वन्दित्वा मोदकैर्लाभितम् । तस्मिन् गते द्वितीयं साधुयुगलमागतं तदैव देवक्या प्रतिलाभितं मोदकदानात् । ततस्तृतीये साधुयुगले तादृशेन रूपेण समागते देवकी विस्मिता मोदकैस्तत् प्रतिलाभ्य प्राह—मुहुर्मुहुः किं युवां विहर्तुमत्रायातौ दिङ्मोहो जातोऽस्ति, अथवा पुरमध्ये भिक्षाऽलभ्यमानाऽस्ति, अथवा किं मम विभ्रमोऽभूत् । तत्साधुयुगलं प्राह— महासति ! न तव दिङ्मोहोऽस्ति, वयं षडपि बान्धवाः सदृशाकाराः । भद्दिलपुरवास्तव्यनागसुलसाश्राविकापुत्राः स्मः । श्रीनेमिपार्श्वे दीक्षा गृहीताऽस्माभिः । द्वौ साधू पृथक् पृथक् तव गृहे विहर्तुमायाताः स्मः । ततो देवकी दध्यौ—षडपि साधवोऽमी कृष्णस्य तुल्या दृश्यन्ते । तिलमात्रेणापि एतेषां कृष्णस्य चान्तरं न दृश्यते अतिमुक्तमुनीन्द्रेण, जीवदष्टसुताः पुनः पुराख्याताः स्म तत्किं नु, ममैवामी षडङ्गजाः ॥ १ ॥ इति संशयापन्ना देवकी द्वितीयेऽह्नि श्रीनेमिपार्श्वे स्वसंशयापनोदाय गता । यावद्देवकी प्रभुं प्रणम्य यावज्जल्पति तावत् । भावज्ञोऽथ प्रभुः स्माह—षडमी सूनवस्तव, जीवन्तः शत्रुसेनाद्या वर्द्धिताः सुलसया ॥ १ ॥ तत उत्प्रसवस्तनी देवकी साधून् षडपि वन्दते स्म । ततो देवकी प्राह स्वामिन् ! मयैकोऽपि नन्दनो न लालितस्तेनातीव दुःखं विद्यते मे । जगौ-

स्वामी—देवाकि ! किं ताम्यसि, तव प्राग्कृतं कर्मात्र फलितम् । त्वया सपत्न्याः सप्त रत्नानि हृतानि प्राग्भवे । तस्या रुदन्त्याः पुनरप्येकं रत्नं प्रपञ्चेन समर्पितम् । ततः प्रभुं प्रणम्य प्राक्तनं कर्म निन्दन्ती देवकी स्वगृहे गत्वा कृष्णास्याऽस्थात् । मातरं दुःखितां वीक्ष्य कृष्णोऽवग्—मातः ! किं तव दुःखमस्ति । देवक्यवग्—पुत्र ! निष्फलं मम जीवितम् । त्वज्ज्येष्ठान् सुलसा बाल्ये, यशोदा त्वामपालयत् । अपूर्यत न मे बाल—लालनस्य मनोरथः ॥ १ ॥ वत्स ! तस्मादहं पुत्रमीहे वाञ्छितपूर्तये । बाललालनहर्षो हि, देवानामपि दुर्लभः ॥ १ ॥ विष्णुराचष्ट—मातः ! खेदो न कार्यस्त्वया । देवं वासवध्वजिनीपतिमाराध्य तव मनोरथः पूरयिष्यते मया । कृष्णेनाराधितो देवो हरिणेगमेषी प्रकटीभूयावग्—देवक्याः पुत्रो भविष्यत्यष्टमः, परं प्राप्ततारुण्यः प्रव्रजिष्यति । ततः कियत्यपि काले गते कोऽपि महर्द्धिदेवः स्वर्गाच्च्युत्वा सुस्वप्नसूचितो देवक्याः कुक्षाववतीर्णः । क्रमाद्देवकी पुत्रमसत । पुत्रजन्मोत्सवं कारयित्वा वसुदेवो गजसुकुमालेतिनामादात् । ततो निरन्तरं देवकी स्तन्यपानदानोत्सङ्गारोपणादिना वर्धयामास । मातुर्भ्रातुश्च नेत्राणि प्रमोदयन् क्रमाज्जल्पन् मनोहरं प्रमोदं ददानो गजसुकुमालो व्यवर्धत । प्राप्तयौवनो गजसुकुमारो द्रुमम-हीपतेः प्रभावत्याख्यां कन्यां परिणिन्ये पितुराज्ञया । अथ सोमशर्माद्विजस्य पुत्रीं सोमाह्वामनिच्छन्नपि गजसुकुमालो

माताभ्रातृभ्यां परिणायितः । अथ तस्मिन्नेव दिने श्रीनेमिनाथो बाहिरुद्याने समवासार्षीत् । तदा श्रीसमुद्रविजयराजा कृष्णश्च सपरिवारो धर्मोपदेशमाकर्णयितुं श्रीनेमिनाथपार्श्वे ययौ । भगवांस्तत्रेति धर्मोपदेशं ददातिस्म । " निर्दन्तः करटी हयो गतजवश्चन्द्रं विना शर्वरी, निर्गन्धं कुसुमं सरो गतजलं छायाविहीनस्तरुः । भोज्यं निर्लवणं सुतो गतगुणश्चारित्रहीनो यति–र्निर्देवं भुवनं न राजति तथा धर्म्मं विना पौरुषम् ॥ १ ॥ इत्यादि धर्मोपदेशं श्रुत्वा गजसुकुमालो वैराग्यवासितस्वान्तः पितरावापृच्छय भार्यायुग् दीक्षां जग्राह । यतः—" जह चयइ चक्कवट्टी, पवित्थरं तत्तियं मुहुत्तेण । न चयइ तहा अहन्नो, दुबुद्धी खप्परं दमओ ॥ १ ॥ " ततः प्राप्तसंयमो गजसुकुमालो वैराग्यवासितो नित्यं षष्ठाष्टमदशमादितपः कुर्वाणो नगराद्बहिः कायोत्सर्गे स्थितो ध्यानपरः परमात्मलीनोऽभूत् । अन्येद्युः प्रभुमापृच्छय श्मशाने सायं प्रतिमया गजसुकुमालं दृष्ट्वा सोमशर्मणा द्विजेन ध्यातं—अयं पापी मदीयां पुत्रीं परिणीय तत्कालमेवं चकार । ततः स द्विजाधमः क्रुद्धो गजसुकुमालमूर्द्धनि शकटीं मुक्त्वा [घटीकंठं च मुक्त्वा] तदुपरि चितातो ज्वलदङ्गारकानानीय मुमोच । तैरङ्गारैर्गजसुकुमालस्य कर्मेन्धनानि सर्वाणि तथा दग्धानि, यथा क्षणमात्रात्केवलज्ञानमुत्पन्नं मुक्तिरप्यभूत् । अथ कृष्णः प्रभुं नन्तुं गतो गजसुकुमालमसमीक्ष्य क मे भ्राताऽस्ति इति प्रभुं पप्रच्छ ।

प्रभुणोक्तं—द्विजान्निर्वाणमभूत्तस्य। हरिस्तत्प्रभुवचः श्रुत्वा मूर्छामाप। पुनः पप्रच्छ कृष्णः—कथं केवलज्ञानं जातम्?। प्रभुराह—द्विजसाहाय्यात्, द्विजेन मस्तके अङ्गारभृता शकटी मुक्ता, तेन कर्म्मक्षयोऽभूत्। यदि स द्विजोऽधुना साहाय्यं नाकरिष्यत् तस्य कर्मक्षयविषये तदा बहुकालेन कष्टात् कर्मक्षयोऽभविष्यत्। यथा अद्य त्वया मार्गे आगच्छता विप्र एकामेकामिष्टिकां वहन् देवकुलिकार्थे दृष्टः। ततस्त्वया एकेष्टिका तत्र नीता। ततः सर्वेण परिवारेणापि नीता बह्वी ततस्तस्य द्विजस्य प्रासादो निष्पन्नः। क्षणमात्रेण तस्य द्विजस्य इष्टिकावहनकार्यं समाप्तं तव साहाय्यात्। तथा गजसुकुमालस्यापि तस्य द्विजस्य साहाय्यात् सर्वकर्म्मक्षयोऽभूत्। तस्योपरि त्वया कोपो नानेयः। कृष्णेन प्रोक्तं—किं नाम स द्विजः?। प्रभुणोक्तं—अद्य त्वां प्रतोल्यां प्रविशन्तं वीक्ष्याकस्माद्यस्योदरस्फोटनान्मृत्युर्भावी स एव ज्ञेयः। ततो मुकुन्देनाग्निसंस्कारः कृतः। प्रभुणा शोक उत्तारितः। ततो विष्णुः प्रभुं नत्वा निरससार। स द्विजो वनादागच्छन् कृष्णमागच्छन्तं वीक्ष्य हृदयस्फोटनान्मृतः। तमकस्माद्विप्रं मृतं दृष्ट्वा विप्र उपलक्षितः। क्रमयोर्दोरिकां बन्धयित्वा पुरीमध्ये भ्रामितो द्विजः। पटहो वादितश्च कृष्णेन। यो यतीनां हन्ता भविष्यति स एवं विगोप्यो मया। ततो देवक्या अनित्यतादिदर्शनैः प्रभुणा शोक उत्तारितः। ॥ इति क्षमायां गजसुकुमालकथा समाप्ता ॥ ३० ॥

व्याघ्रादिमर्त्यविहिता–नुपसर्गान् बहून् दृढान् । प्राप्नोति चिन्तितं स्थान–मवन्तीसुकुमालवत् ॥ १ ॥

तथाहि–अन्येद्युः श्रीसुहस्तिसूरयो भूवलयं प्रबोधयन्तो देवाधिदेववन्दनार्थमवन्तीं ययुः । तत्र भद्रः श्रेष्ठी वसतिस्म । तस्य भद्रा प्रिया । तयोर्धर्मकर्मकुर्वाणयोरन्येद्युः सत्स्वप्नसूचितो नन्दनोऽभूत् । जन्मोत्सवः पित्रा कारितः । क्रमात्तस्यावन्तीसुकुमालेति नाम पित्रा दत्तम् । मातापितृभ्यां धर्मकर्मशास्त्रं पाठितः पुत्रः । पुनरवसरे द्वात्रिंशन्महेभ्यानां पुत्रीर्द्वात्रिंशद् देवकुमारीसोदरा अवन्तीसुकुमालः परिणायितः पित्रा । अन्येद्युस्तत्र भद्रमनुज्ञाप्य भद्रदत्तोपाश्रये श्रीसुहस्तिसूरयः स्थिताः । तत्र प्रदोषे तेऽन्येद्यु–राचार्या मधुरया गिरा, गुणयन्तिस्म नलिनी–गुल्माध्ययनमादरात् ॥ १ ॥ ललन् भद्रात्मजोऽवन्ती–सुकुमालो निजालये । द्वात्रिंशत्कामिनीजानि–रुन्निद्र–स्तत्तदाऽश्रृणोत् ॥ २ ॥ अवन्तीसुकुमालोऽध्ययनं तद्गुरुभिर्गुण्यमानं श्रुत्वा दध्यौ–किमिदं गुरुभिरुच्यमानं मया दृष्टमस्ति नलिनीगुल्मविमानमिति पुनः पुनरुहापोहपरोऽवन्तीसुकुमालो जातिस्मृतिवानभूत् । अहं प्राग्भवे नलिनीगुल्मविमाने देवोऽभूवम् । नलिनीगुल्मविमानसुखात्रत्यशर्मणोर्मेरुसर्षपयोरिवान्तरं विद्यते । तेन यदि तत्सुखं प्राप्यते तदा वरम् । यतः–" देवाणि देवलोए, जं च सुखं तं नरो सुभाणिओवि । न भणइ वाससएणवि,

जरस वि जीहासयं हुज्जा ॥ १ ॥" एवं विमृश्य गुरुपार्श्वे गत्वा गुरून् भक्त्या नत्वाऽवन्तीसुकुमालो
जगौ भगवन्तो ! यूयं किं नलिनीगुल्मविमानादत्राधुना समायाताः । येन श्रीपूज्यैः तत्रत्यस्वरूपं कथ्यमानमास्ति ।
गुरुभिरुक्तं—वयं तत्राधुना न गताः स्मः । किंतु श्रीसिद्धान्तोक्तमधुना श्रीनलिनीगुल्मविमानस्वरूपं गण्यमान-
मस्ति । तस्मिन् नलिनीगुल्मविमाने सन्ति ये देवास्तेऽतीव सुखिनः सन्ति । अवन्तीसुकुमालः प्राह—अहं तु ततो
विमानादायुषः क्षयादत्रोत्पन्नोऽस्मि । तस्य विमानस्य सुखस्मरणादहमत्र स्थातुं न शक्तोऽस्मि । अधुना एता वध्वो
राक्षसीतुल्याः शोभन्ते ताभ्यो देवनारीभ्यः । तेनात्र क्षणं स्थातुं न शक्यते । तथा कुरु यथा मह्यं दीक्षां दत्त्वा
जन्म कृतार्थं करोमि । एता वध्वो व्याघ्र्य इव मम भान्ति । तेन संयमं मह्यं ददत यूयम् । गुरुभिरुक्तं—माता-
पितृबन्धूनामनुमतिं विना दीक्षां दातुं न शक्यतेऽस्माभिः । ततस्त्वरितं तत्र विमाने गन्तुकामेनावन्तीसुकुमालेन
स्वयं संयमं गृहीत्वा गुरून्नत्वा श्मशानवने गत्वा कायोत्सर्गे स्थितम् । तदा पश्चाद्भवसम्बन्धिनी
प्रिया शिवाभूता तत्रागता । अवन्तीसुकुमालं कायोत्सर्गे दृष्ट्वाऽतीव कोपाविष्टा तं तथा खंडशश्च-
कार शिवा, तदा शुभध्यानादवन्तीसुकुमारो मृत्वा तदानीं नलिनीगुल्मविमाने गतः । प्रातः मातापितरौ

प्रियाश्चावन्तीसुकुमालस्य मृत्युस्वरूपमवगत्य दुःखिता अभूवन् । ततो गुरुभिरतिशयज्ञानिभिस्तत्राभ्येत्योक्तं—असौ अवन्तीसुकुमालो नलिनीगुल्मविमाने ययौ । अत्रत्यं सुखमस्य न रोचते । ततो यथा तेन दीक्षा गृहीता, यथा कर्म्म क्षिप्त्वा नलिनीगुल्मविमाने गतः । तथा गुरुभिरुक्तं—यत्रावन्तीसुकुमालः कर्म्म क्षिप्त्वा स्वर्गं गतः । तत्स्थाने महाकालनाम्ना प्रासादं महान्तं मातापितरौ कारयामासतुः । श्रीपार्श्वनाथप्रतिमां स्थापयामासतुश्च । ततः सर्वाः प्रियारता वैराग्याद् दीक्षां ललुः ॥ इति अवन्तीसुकुमालकथासम्बन्धः समाप्तः ॥ २१ ॥

पात्रे ददाति यो वित्तं, नित्यं शक्त्या सुभक्तितः । सौख्यानां भाजनं स स्या—द्यथा धन्योऽभवत् पुरा ॥१॥
पश्चात्तापं प्रकुर्वन्ति, दत्त्वा दानं मुनौ च ये । दुःखानां भाजनं ते स्यु—र्यथा धन्याग्रजाः क्षितौ ॥ २ ॥

तथाहि—प्रतिष्ठानाख्ये पुरे अभ्रङ्कषजिनचैत्यालङ्कृते जितशत्रुराजा राज्यं करोतिस्म न्यायाध्वना । य(इ)तः पूर्वं लज्जमानमेकं कुटुंबकं निःश्रीकं तत्र पुरे आजीविकाकृते समागमत् । तत्रैको बालको दाता, विनयी करुणापरः । वत्सरूपाणि लोकानां, चारयामास वृत्तितः ॥ १ ॥ कस्मिंश्चिदुत्सवे उद्याने लोकान् परमान्नादिप्रवराहारभक्षण-परान् वीक्ष्य वत्सरूपाणि तत्र मुक्त्वा गृहेऽभ्येत्य च मातुरग्रे दारकः प्राह—मातरद्य लोकाः परमान्नं भक्षयन्तः

सन्ति । तेन ममापि तद्देहि । मात्रोक्तं–पुत्र ! द्रव्यं विना कथं मया परमान्नादि तुभ्यं दास्यते । स पुत्रः प्राह–मातः ! यथा तथाऽऽनीय तन्मह्यं देहि । यतः–" चोरा य चौल्लका विय, गंधी विज्जा य भट्टपाहुणया । वेसाधुत्तनरिंदा, परस्स पीडं न याणंति ॥ १ ॥ " ततस्तेन पुत्रेण रुदताऽत्यर्थं माता मार्गिता तदप्राप्नुवती रुरोद । तां रुदन्तीं वीक्ष्य प्रातिवेश्मक्यस्तद्दुःखदुःखिता अप्राक्षुर्दुःखकारणम् । तया च पुत्रमनोरथः प्रोक्तः । ताभिरार्द्रचित्ताभिः प्रातिवेश्मिकाभिः पृथक् पृथक् क्षीरादिकं दत्तम् । मात्रा संस्कृत्य परमान्नं खंडादियुतं पुत्रस्थाले परिवेश्य कार्येण केनचिदन्यत्र गतम् । इतः सुकृतैराकृष्टस्तस्य गृहाङ्गणे मासक्षपणपारणे विहृत्यर्थमागान्मुनिः । दृष्ट्वा तं मुनिमनभ्रवृष्टिमिव रोमाञ्चकञ्चुकितबाल उत्थाय पाणिभ्यां पायसस्थालं गृहीत्वा प्रणम्य चावग्–भगवन् ! इदं परमान्नं प्रासुकं विद्यते । कृपां कृत्वा ममोपरि गृहाण, येनाहं कृतार्थो भवामि । तच्छुद्धमाहारं मत्वा मुनिः पात्रमधारयत् । धन्यंमन्योऽर्भकः सोऽपि परमान्नं तस्मै ददौ । तस्मात् पात्रदानतः स मनुष्यायुर्बबन्ध । ततो माता समागात्, रिक्तं स्थालं वीक्ष्य पुनः पुत्राय परमान्नं पर्यवेषयत् माता । बहु परमान्नं भक्षितं तेन । ततः स एव बालो बहिर्गतो वत्सरूपाणि गवेपयन् महर्षिं प्रणम्य तस्याग्रे उपाविक्षत् । " दुष्प्रापं प्राप्य

मानुष्यं, कार्यं तत् किञ्चिदुत्तमैः । येनाशु लभ्यते मुक्ति–सातं संसारिणा स्फुटम् ॥ १ ॥ संसारंमि असारे, नत्थि सुहं वाहिवेयणापउरे । जाणंतो इह जीवो, न कुणइ जिणदेसियं धम्मं ॥ २ ॥ " इत्यादि तत्पार्श्वे धर्मोपदेशं श्रुत्वा हृष्टो बालस्तस्यामेव रात्रावकस्माद्विशूचिकया मृतः सन् गोपालः तत्रैव पुरे धनसागरस्य श्रेष्ठिनः शीलवती प्रियाया गर्भे पुत्रत्रयोपरि वर्यस्वप्नसूचितोऽवततार । ततः क्रमात् सा पुत्रं प्रासूत प्रशस्तेऽहनि उच्चैः स्थितेषु ग्रहेषु, तेषां पुत्राणां नामानि क्रमान्मातापितृभ्यां दत्तानि । धनदत्तः १ धनदेवः २ धनचन्द्रः ३ धन्यः ४ । आद्यत्रयाणां पुत्राणां क्रमात् प्रिया अभूवन् । धनश्री १ धनदेवी २ धनचन्द्रा ३ । धन्यजन्मनि तन्नाले इलातले निधीयमाने निधानं निःसृतं तेन धन्योऽयं नाम कृतं तस्य । धन्ये वर्द्धमाने क्रमात् श्रेष्ठिगृहे दिने दिने लक्ष्मीर्विवृधे । समये कलाचार्यपार्श्वे सकला धर्मकर्मकला ग्राहितो धन्यो मातापितृभ्याम् । धन्यस्यातीव गौरवे क्रियमाणे त्रयोऽपि सोदरा ज्येष्ठाः पित्रोरग्रे प्रोचुः–एकोदरभवस्यास्य क्रियते किमादरोऽधिकोऽस्मभ्यम् । ततः पितरावूचतुः–गुणैरेष पूज्यः, यतः– " गुणा एव हि पूज्यन्ते, नतु ज्ञातेयडम्बरः । वानेयं गृह्यते पुष्प–मङ्गजस्त्यज्यते मलः ॥ १ ॥ " भूयो बभाषिरे ते भ्रातरः पितरं प्रति–परीक्षा क्रियतामिति । द्वात्रिंशद्रूपकांस्तेभ्यः पृथक् पृथग् दत्त्वा उक्तास्ते । पणायित्वा नौ

लाभं दर्शयिष्यथ यूयम् । प्रवृत्ता व्यवहर्तुं ते तु । धन्यस्तु बलाढ्यं मेढकं लात्वा राजपुत्रमेढकेन सममयोधयत् । दीनाराणां सहस्रं पणीकृत, यस्य मेढको हारयति सोऽन्यस्मै दीनाराणां सहस्रमर्पयति । तथा धन्यराजपुत्रमेढकयो-र्युध्यमानयोर्धन्यमेढकेन जितम् । ततो दीनारसहस्र तत्र धन्येनार्जितम् । धन्यो दीनारसहस्रं लात्वा गृहमाययौ । अपरे सोदराः स्वल्पलाभाः समाययुः । धन्ये प्रशंसिते मातापितृभ्यां पुनस्ते द्वितीयेऽहानि प्रोचुः—एकशोऽद्यानेना-र्जितं धनं तेनास्य वर्णनं क्रियते । अस्माभिस्तु बहुशो धनं पुरा यदार्जितं तद्विस्मृतं किं क्रियते । पुनः परीक्षा क्रियताम् । ततः पितृभ्यामर्पिताः षष्टिः कल्याणमाषकास्तेभ्यः पृथक् पृथक [दत्ताः] । सर्वादरेण व्यवसायं कृत्वा अप्राप्तलाभाख्योऽपि गृहमाययुः । धन्यस्तु धीमान् धर्म्मधुर्य आपणमध्ये गत्वा पणायोपाविशत् । इतस्तत्र महाधनः श्रेष्ठी कृपणशेखरो भरिभिरारम्भैर्धनमर्जयामास । दत्ते किमपि नो धर्मे परिवारस्यापि जीर्णवस्त्रान्नदानं विश्राणयति, स्वयं जीर्णं वस्त्रं परिधत्ते, धान्यं बर्जरीसंसक्तमन्नं भुङ्क्ते । घृतस्थाने तैलमेव स्तोकं भुङ्क्ते । वार्षिकादिषु पर्वसु मनागपि धनं न व्ययति स्म । ताम्बूलस्य स्थाने गुंदिकादिपत्राणि भक्षयतिस्म । अन्यं पुरुषं धनं व्ययन्तं वीक्ष्य शिरोर्त्तिर्भवत्यस्य । लक्ष्मीर्लक्ष्मीरिति कुर्वन् क्षणमपि विश्रामं न गृह्णाति । खनित्वाऽन्यदा गृहस्यान्तर्गर्ते

द्रव्येण पूर्णीचक्रे श्रेष्ठी। खट्वामन्तः शुषिरां कृत्वा रत्नोच्चयेन मध्ये पूरयामास। तां खट्वां गर्तोपरि स्थापयित्वा रात्रौ द्रव्यरक्षार्थे स्वपिति मूर्छया श्रेष्ठी। न वेत्ति मूढचित्तोऽसौ यद्दानेन लक्ष्मीर्भवति । जराजीर्णाङ्गो मृत्युकोटिं गच्छन् सन् श्रेष्ठी सुतैः खट्वाया अधः उत्तारयितुमारेभे यावत् तावच्छ्रेष्ठी जगौ। मां मा उत्तारयत यूयं खट्वाया अधः। अस्यामेव सुतस्य समाधिरस्ति। पुत्रैः प्रोक्तं—तात! यदीच्छा कस्याश्रिता भवतो भवति सा निवेद्यताम्। ततः स श्रेष्ठी मोहात् धनस्य स्वरूपं नाचीकथत्। प्राह च श्रेष्ठी—अपरेण पुण्येन सृतं, मया सार्द्धमेषा खट्वा ज्वालनीया, लोभेनैवं श्रेष्ठी जगौ। यतः—"तृष्णाखानिरगाधेयं, दुष्पूरा केन पूर्यते। या महद्भिरपि क्षिप्तैः, पूरणैरेव खन्यते ॥ १ ॥ अधः क्षिपन्ति कृपणा, वित्तं तत्र यियासवः। सन्तस्तु गुरुचैत्यादौ, तदुच्चैः फलकांक्षिणः ॥ २ ॥" पुत्रैर्हृष्टैरुक्तं—तातैवं करिष्यतेऽस्माभिर्भवदुक्तम्। ततः श्रेष्ठी विपन्नः। खट्वायुतो रत्नव्यतिकराऽविज्ञैः पुत्रैः श्मशानभूमौ नीतः। श्मशानपालकैः खट्वायां याचितायां श्रेष्ठिसुतैः सह कलिरजनि। ततः कलिभीतैः श्रेष्ठिपुत्रैः खट्वा चाण्डालेभ्योऽर्पिता। सा खट्वा श्मशानेशेन विक्रेतुं चतुष्पथे स्थापिता। तां खट्वां सगर्भां सलक्षणां ज्ञात्वा जग्राह धन्यः। यतः—"तृणवल्ल्यादिभिश्छन्नं, भूम्यां दूरगतं निधिम्। अपश्यन्तोऽपि चक्षुर्भ्यां, बुद्ध्या पश्यन्ति धीधनाः ॥ १ ॥" ततस्तां

खट्वां गृहे नीत्वा रत्नानि बहिः कर्षयित्वा जनकायार्प्पयामास धन्यः । ततः श्रेष्ठिना धन्यः सम्मानितः । ततो धन्यस्य कीर्तिः प्रससार। ततस्तद्भ्रातॄणां तदा तीव्रमत्सरोऽभूत्। ततस्ते सहोदरा ईर्ष्यालवस्तं हन्तुमिच्छन्ति सदा । तद्भर्तृचेष्टितं ज्ञात्वा भ्रातृजाया देवराय न्यवेदयन् प्रीत्या, अथ सोऽवक्—नापराद्धं मया किञ्चिदमीषां तदमी कथं द्रुह्यन्ति। ता अप्यूचुः—वत्सेदृक्षाः खलाः खलु । यतः—" नाकारणे रुषां सङ्ख्याः, सङ्ख्याताः कारणाः क्रुधः । कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥ १ ॥ " ततो धन्योऽध्यासीत्—मयाऽत्र न स्थेयं विघ्नोत्पत्तेः मां दृष्ट्वा भ्रातॄणां दुःखं भवति । यतः—" परपीडां न कुर्वन्ति, महान्तो हि कदाचन । तेन नात्राधुना स्थेयं, मया क्षणमपि स्फुटम् ॥१॥ " ध्यात्वेति निशि छन्नं धन्य एकाकी असहायः स्वपुरान्निस्ससार । धन्यः ततो ग्रामपुराकरादिसंकुलां त्रिपुलां बभ्राम । वर्याकारः पुमानिति ध्यात्वा क्षेत्रेशेन भोजनार्थं न्यमन्त्रयत । आसिनो जेमितुं यावद्धन्यः तावत् कुटुम्बिप्रिया भक्षाहर्त्री समागात्। क्षेत्रेशेनोक्तं—अमुमतिथिं भोजय, कोऽप्ययं धन्यः पुमान् अस्ति । यतः—" अपूजितोऽतिथिर्यस्य, गृहाद्याति विनिश्चितम् । गच्छन्ति विमुखास्तस्य, पितरः सह दैवतैः ॥ १ ॥ " परमान्नं तया तस्मै परिवेषितं तदाऽकस्मात् कौटुम्बिकस्य हलं खेटयतो हलं कलशकण्ठेऽलगत् । ततः स्वर्णपूर्णं कुम्भं

निर्गतं दृष्ट्वा कौटुम्बिकोऽवग्——भो अतिथे ! गृहाण त्वममुं निधिम् । त्वद्भाग्यान्निर्गतोऽयं निधिः, यथेच्छं भुंक्ष्व । तत उदारप्रकृतित्वात्तं निधिं तस्मै दत्त्वा ततोऽचलत् कृतप्रणामो धन्यः । ततश्चलन् राजगृहपुरबाह्योद्याने गत्वा धन्यो निषेदिवान् । पूर्वं शुष्कं वनं देवानुभावतो धन्यपुण्यप्रभावात्तदा पुष्पितं फलितं चाभवत् । धन्यस्य प्रभावात् स्वं वनं फलितं पुष्पितं दृष्ट्वा हृष्टोऽभून्मालिकः । नीत्वा तं गृहे मालिकः-सद्भक्तिं चकार भोजनदानात् । राज्ञोऽथ श्रेणिकस्याभूत् सोमश्रीर्नाम्ना पुत्रिका । स्वसा च शालिभद्रस्य सुभद्रेति कनीयसी बभूव । तथा कुसुमपालस्य पुष्पवत्याह्वसुताऽभूत् । ताश्चैकदिवसजातत्वात् सर्वा मिथः सख्योऽभूवन् । ता मिथोऽब्रुवन्निति कन्याः यदि अस्माकमेकः पतिर्भवति तदा वियोगो न स्यात् । अन्यदा पूष्पवत्यूचे सखीपुरः धन्योऽयं गुणवान् दृश्यते, तेनैवायं नो भर्ता भवति तदा वरम् । ततः सोमश्रीः पितुरग्रेऽवग्—धन्यो मे भर्ता भवतु । ततो हृष्टेन राज्ञा सोमश्रीर्धन्याय दत्ता । ततो भद्रया मालिकेन च स्वपुत्र्यौ तस्मै दत्ते । ततो राज्ञा धन्याय भूरिशो ग्रामा दत्ताः । धन्यो भोगान् भुङ्क्ते प्राक्कृतपुण्ययोगात् । अन्यदा धन्यो गवाक्षस्थः प्रियाभिस्ताभिः समं रममाणो मातापितरौ चातिदुःखितौ राजमार्गे गच्छन्तौ ददर्श । द्वाःस्थेनानाय्य संस्थाप्य तौ पितरौ सद्वस्त्रा-

भरणैर्भूषयित्वा सप्रियो धन्यः प्रणनाम भक्त्या, पुनर्नत्वाऽपृच्छत् धन्यः । क्व गतं तत्सर्वं धनम् ? । तौ पितरावूचतुः–त्वद्गमनादनु धनमपि गतम् । क्रमात्त्वमत्रस्थो भूपादिविश्राणितपुत्रीकः श्रुतोऽस्माभिः । तेनात्रागमाम वयम् । पुनरपि धन्योऽभ्यधात्–मातर्मे भ्रातरः क्व गताः । साऽवोचत्–ते त्रयोऽपि लज्जमाना बहिः स्थिताः सन्ति । धन्यस्तु तान् भ्रातॄन् तत्रानाय्य सन्मानदानपूर्वं पृथग् ग्रामान् ददौ तेभ्यः । यतः–" सन्तः स्वभावतः सर्व–शत्रुमित्रादिषु स्फुटम् । करुणावारितस्वान्ताः, भवन्ति प्रतिवासरम् ॥१॥" ततः सर्वं कुटुम्बं सन्मानदानतः धन्यः प्रीणयतिस्म । मातापितरौ धन्यं धन्यमिति जल्पतः । यदा ते सोदरा धन्ये मत्सरं कुर्वन्ति धन्यश्लाघामसहमानास्ते गृहवित्तं विभज्य पृथक् स्थातुं जल्पन्ति । ततः श्रेष्ठी दध्यौ । निर्भाग्यशेखरा एते नन्दना ध्यात्वेति तान् प्रति श्रेष्ठी जगौ–धन्ये मत्सरो न क्रियतेऽस्यैव भाग्यं वर्तते । ते प्रोचुः पुनः पुनर्यत्तात ! त्वया धन्यश्लाघा क्रियते नैतद्युक्तम् । यदा पूर्वमात्मनो गृहान्निर्गतः तदात्मीयगृहाद्रत्नानि बहूनि लात्वा गतः । तेनात्र तैरत्नैर्महर्द्धिको जातो राज्ञा सम्मानितश्च । तातपादाः प्रकुर्वन्ति श्लाघां धन्यस्य । अद्य पृथग् भवनं विना अस्माभिर्न भोक्ष्यते । इति भ्रातृवचः श्रुत्वा धन्यः पुनः स्वकुटुम्बं सुखं मुक्त्वा रात्रावेव शनैर्निर्गतो दूरदेशं यातुम् । नानादेशान् भ्रान्त्वा

कौशाम्ब्यां ययौ धन्यः । तत्र शतानीको राज्यं करोतिस्म । तस्य कोशे एकरत्नममूल्यमस्ति । परीक्षां तस्य कोऽपि न वेत्ति । ततः पुरे तत्र राज्ञा पटहो वाहितः । यो रत्नस्यास्य परीक्षां करोति तस्य तुष्टो राजा हस्तिनां शतमेकं वाजिनां शतपञ्चकं सौभाग्यमञ्जरीपुत्रीं ग्रामपञ्चशतीयुतां दास्यति । ततो धन्यस्तं पटहं तदा स्पृष्ट्वा राजसभायां ययौ । ततस्तेन धन्येन तस्य रत्नस्य परीक्षा कृता, यथा सर्वा सभा चमत्कृता । राजा पुत्रीं तस्मै दत्वा ग्रामादि पूर्वोक्तं ददौ महोत्सवपुरस्सरम् । ततः साधुरसौ इति तस्य धन्यस्य लोके ख्यातिरभूत् । द्रव्यार्जनकृते नराः तेन धन्येन प्रेषिताः देशेषु भूरिषु । अन्येद्युः धन्येन ख्यात्यर्थं लोकाचारस्वभावतः पुराद्बहिः सरः खानयितुमारब्धम् । इतः श्रेष्ठीगृहे धन्ये निर्गते धनं सर्वं गतं यतः ततः श्रेष्ठी दुःख्यभूत् धनं विना । यतः—"सहोदरव्यथाः पञ्च, दारिद्र्यस्यानुजीविनः । ऋणं दौर्भाग्यमालस्यं, बुभुक्षात्यन्तसन्ततिः ॥ १ ॥ तैलं नास्ति० ॥२॥" ततोऽथ दध्यौ श्रेष्ठी—पुनर्नैव गौरवं लभते नरः पूर्वं धन्यप्रभावेण विख्यातोऽत्र पुरेऽभूवम् । सांप्रतं लघुवाणिज्यं कथं कुर्वे विमृश्येति कुटुम्बेन सार्द्धं विचारं कृत्वा श्रेष्ठी सकुटुम्बो द्रव्यार्जनहेतवे विदेशं प्रति चिचलिषुरभूत् । श्रेष्ठी धन्यजायाद्वयं जनकगृहे प्रेषयामास । ततः श्रेष्ठी सुभद्रां प्रति प्राह—याहि वत्से स्वपितृगहे । सुभद्रा प्राह—तात ! युक्तमुक्तं त्वयाऽधुना

एकाग्रचित्तवृत्त्या तु विज्ञप्तिं मे शृणु त्वं विज्ञप्तिं मेऽवधारय ॥ यतः—" सुखे च विभवोद्धारो, स्त्रीभिः सेव्यं पितुर्गृहम् । श्वसुरस्य गृहं दुःखे, सुखे मोच्यं न सर्वदा ॥१॥ दुःखी पितृगृहं याति, यद्वा दुःखं प्रियालये, पितुर्गृहसुखं मुक्त्वा, दुःखे तिष्ठन्ति सुस्त्रियः ॥ २ ॥ सुखे दुःखे तथा दौःस्थ्ये, विदेशगमनेऽपि वा । देहच्छायेव तन्नूनं, स्थास्यामि श्वसुरालये ॥ ३ ॥ " तस्मादहं सुखे दुःखे वा श्वसुरालये एव स्थास्यामि नान्यत्र । इति श्रेष्ठी धनसारः वधूवचः श्रवणात् । सपरिवारो गृहद्वारे मुद्रां विधाय निर्ययौ निशि । ग्रामाद् ग्रामं पुरात् पुरं देशाद्देशं भ्रमन् धनसारः कर्मकरकर्म कुर्वन् कौशाम्बीं पुरीं ययौ । श्रेष्ठी नरं कंचित् तत्र दृष्ट्वाऽपृच्छत् । भो भद्र कथयतां निर्द्रव्यो योऽत्र नरः समेति स कथं निर्वाहं करोति । नरः प्राह—हे श्रेष्ठिन् ! सधना व्यवसायेन निर्वाहं कुर्वन्ति । निर्धनाः कर्मकराः परगृहे कर्म कृत्वा निर्वहन्ति । ये च निर्धना अत्रायान्ति, ते धन्यराजस्य सरसः खन्यमानस्य खननद्रव्येण निर्वाहं कुर्वन्ति । नराणां तत्र सरसि दीनारद्वयं दीयते, स्त्रीणामेकं प्रवाहेण दीयते । कष्टाहेषु ते भोजनं कुर्वन्ति सरःखनकाः । तच्छ्रुत्वा धनसारः सकुटुम्बस्तत्र सरसि गत्वा खननकर्मकरैः सार्धं खननकर्म करोति । तत्र खननद्रव्येण च निर्वाहं करोति । अन्येद्युर्धन्यः शिरोधृतश्वेतछत्रोऽश्वारूढः पदातिश्रेणिवेष्टितः सरोनरावलोकनार्थं

गतः। तदा जीव नन्द जयेत्यादि बिरुदावल्यः बन्दिभिः प्रोच्यन्ते। तदा जय जयेति भाषिणः कर्मकराः सर्वे निजं निजं कर्म त्यक्त्वा धन्यं प्रणमन्ति स्म। तेषां मध्ये स्वकुटुम्बकं वीक्ष्य धन्यो दध्यौ किमेतद्दैवेन कृतम्। माता चेयं पिता चायं, ममैते सोदरास्त्रयः। भ्रातृजायाः पुनरिमाः, सुभद्रा प्राण वल्लभा ॥ १ ॥ गोभद्रो जनको यस्या, भद्रा यस्या जनन्यहो। शालिभद्रानुजा सेयं, शीर्षे वहति मृत्तिकां ॥ २ ॥ विचिन्त्येति धन्यः प्राह—यूयं कुतः समागताः ?। ततः ते कर्मकराः स्थाननामादि संगोप्य मृषाउत्तरं ददुः इति धन्यो दध्यौ—एते मां नोपलक्षयन्ति। यतोऽहमीदृशीं राज्यावस्थां प्राप। ममैते स्वजना दुःखावस्थायां पतिताः सन्ति। यतः—"केऽपि सहस्रंभरयो, लक्षम्भरयश्च केऽपि नराः। नात्मम्भरयः केऽपि, फलमेतत्सुकृतदुष्कृतयोः ॥ १ ॥" ततः स्वसेवकानाकार्य धन्यः प्राह—एतेषां भोजने घृतं देयं, एतेऽतीव दुःस्था दृश्यन्ते। दयास्थानं च वैदेशिका विद्यन्ते। ततस्तैरुक्तं—स्वामिन्! सर्वेषां घृतं स्यात्तदा वरम्। राज्ञोक्तमेवं भवतु। ततः कर्मकराः सर्वे हृष्टा घृतं भक्षयन्तो जल्पन्ति स्म मिथः—एतेषां प्रभावतोऽस्माकमपि भोजने घृतमभूत्। द्वितीयेऽपि दिने तत्रागतो धन्य आहूय श्रेष्ठिनं प्रति मधुरया गिरा प्रोचे—श्रेष्ठिंस्तव कुटुम्बमतीव दुर्बलं दृश्यते। श्रेष्ठी जगौ—तक्राभावात्सर्वस्य कुटुम्बस्य रात्र्यन्धताऽजनि किं क्रियते, पूर्वकृतकर्मणैवंविधाऽवस्था

व्यश्राणि । ततो धन्योऽवग्—अस्मद्गृहे बह्व्यो गावो महिष्यश्च दुह्यन्ते, तेन तक्रग्रहणाय त्वयैका वधूर्वारकेण प्रेष्या । ततः श्रेष्ठी जगौ—महान् प्रसादस्ते, अतिप्रणामं चकार । ततो धन्यो दैवगतिं निन्दन् बहुजनपरिवृतः स्वगृहं ययौ । ततः प्रियाग्रे प्राह धन्यः—भो प्रिये ! एकः श्रेष्ठी करुणास्पदं वहिः सरः खनितुं समागतोऽस्ति । तस्य पुत्रचतुष्टयं विद्यते । तेषां पत्न्यः क्रमादेताश्चतस्रः सन्ति । तासां मध्याद्यदा एकाऽपि वधूरायाति तदा तस्यै महाकुम्भस्तक्रपूर्णः समर्पणीयस्त्वया । यदा लघ्वी स्नुषा समेति तदा तस्यै कुम्भकादि धान्यं शाल्यादि देयं त्वया । तेऽतीव दुर्बलाः सन्ति । तेभ्यो दानं ददत्यास्तवापि पुण्यं भविष्यति । दीनेभ्यो दानं दत्तं बहुपुण्याय भवति । यतः—" अभयं सुपत्तदाणं, अणुकंपा उचियकित्तिदाणं च । दोहिंवि मुक्खो भणिओ, तिन्निवि भोगाइअं दिंति ॥ १ ॥ " पतिनिर्देशात् सा तस्यै शाटिकां ददौ । स्नुषां शाटिकासहितां बहुतक्रमानयन्तीं वीक्ष्य श्रेष्ठ्याह—एषा भाग्यवती स्नुषा । तच्छ्रुत्वा श्रेष्ठिनं प्रति तिस्रो वध्वः प्रोचुः समत्सराः । त्वया व्याख्यातोऽग्रेऽस्माकं देवरो विदेशं गतः । अधुनैवं व्याख्यायमानाऽसावपि गमिष्यति । दिवा च मृत्तिकावहनं कुरुते । रात्रौ च भूमौ स्वपिति । एतावती एषा भाग्यशालिनी विद्यते । अन्यदा धन्यस्तां सुभद्रां समागतां वीक्ष्य पप्रच्छ का त्वं कथमिहागता ? लज्जयाऽधोमुखी साऽवग्—अहं

शालिभद्रस्वसा गोभद्रश्रेष्ठिपुत्री । त्वन्नामाभिधानेन पुरुषेण परिणीताऽहम् । स च गृहकलहे जायमाने विदेशं गतः । धन्योऽवग्—भद्रे तव पतिर्विदेशं गतः सन् त्वां विना मृत एव सम्भाव्यते । ततः पतिव्रतं त्यक्त्वा मया सह भोगान् भुंक्ष्व । साऽपि तद्वचः श्रुत्वा वज्राहतेव हृदि कर्णौ पिधाय तं प्रत्युपशङ्कासारमाह—"गतियुगलकमेवोन्मत्तपुष्पोत्करस्य, त्रिनयनतनुपूजा वाऽथवा भूमिपातः । विमलकुलभवानामङ्गनानां शरीरं, पतिकरजरजो वा सेवते सताजिहुः ॥१॥" हे धन्य साधुरसाधुरत्वं दृश्यसे मयाऽधुना । यन्मां वाञ्छसि परास्त्रियम् । परस्त्रीभोगादिह लोके परलोके च दुःखं लभते जनः । यत.—"विक्रमाक्रान्तविश्वोऽपि, परस्त्रीषु रिरंसया । कृत्वा कुलक्षयं प्राप, नरकं दशकन्धरः ॥ १ ॥" धन्योऽवक् कुप्य मा भद्रे !, कारणं च निशम्यताम् । परस्त्रीलम्पटो नाऽहं, नाहमन्यरमाहरः ॥ २ ॥ इदं वचनं त्वां परीक्षितुं मया जल्पितम् । साऽवग्—यदि मम त्वं पतिरसि तदा किमप्यभिज्ञानं कथय । सोऽवग्—राजगृहेशस्य धन्यो जामाता बभूव । तत्र प्रियात्रयं मुक्त्वा गात्रमात्रोऽत्र चागमम् । मया तुभ्यमेका मुद्रिका रत्नमयी दत्ता । इत्युक्ते तेन सा प्रियं मत्वा धन्यंमन्या त्रपापरा अधो विलोकयामास । ततो जीर्णवस्त्रपरित्यागाद्दर्यवस्त्राभरणभूषितां प्रियां कृत्वा धन्यश्चक्रे स्वगृहस्वामिनीं ताम् । इतः तामनागतां लब्ध्वी

वधूं वीक्ष्य वृद्धो वृद्धवधूं प्रत्यवक्—क्व गता सुभद्रा विलोकयतां बह्वी वेला जाता । वृद्धा वधूः प्राह—तक्रदोहिनीं गृहीत्वा गृहीत्वा धनसाधुगृहे गता दासीव तस्य गृहे तिष्ठति । स परिवृढो वर्यमाहारादि तस्यै दापयामास । तेनातिलोभात् स्थिता तत्र संभाव्यते । ततस्तत्र गत्वा वृद्धा वधूस्तां दिव्याभरणभूषितां वीक्ष्य पश्चात्त्वरितं समेत्य श्वसुराग्रे प्राह—मयोक्तं—एषा तत्र यान्ती कदाचिद्विरूपं करिष्यति । अथ तत्र गता सती तस्य धन्यसाधोः प्रियाऽजनि। स्त्रीणां चरित्रं को जानाति । यतः—" अश्वप्लुतं माधवगर्जितं च, स्त्रीणां चरित्रं भवितव्यता च । अवर्षणं चापि सुवर्षणं च, देवा न जानन्ति कुतो मनुष्याः ॥ १ ॥ प्राप्तुं पारमपारस्य, पारावारस्य पार्यते । स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ॥ २ ॥" तच्छ्रुत्वा श्रेष्ठी वज्राहत इव क्षणं भूत्वा व्यचिन्तयत् । अनया स्नुषया किं कृतं, हा धिक्, कुलद्वयेऽपि कलङ्कः कृतः । ततः श्रेष्ठी तं वृत्तान्तं, स्नुषाहरणकृतं व्यवहारिणां पुरः प्राह । व्यवहारिणः प्रोचुः—धन्यसाधोरस्य न कदाचित् कुमार्गे प्रवृत्तिर्दृष्टा । धन्योऽसौ गीयते परनारीसहोदरः । अधुना तु यद्विपरीतं कृतं तत्र हेतुरस्माभिः सम्यङ् न ज्ञायते । एष गूढमना विद्यते । तथापि तस्याग्रे भवत्स्नुषाछोटनविषये कथयिष्यते । तस्मिन् श्रेष्ठिनि स्वस्थाने गते इभ्या धन्यसाधोरन्ते गत्वा प्रोचुः । धन्यस्त्वं राजजामाता, धन्यस्त्वं साधुशेखरः । तवेदं युज्यते

नैतत, परस्त्रीहरणं शुभम्॥ १ ॥ तेषामिति वचः श्रुत्वा वार्तामपरां कर्तुं धन्यो लग्नः । ततो धन्यस्यानीदृशमभिप्रायं मत्वा ते इभ्याः स्वं स्वं गृहं ययुः, मिथो निमन्त्रयन्तिरमेति । एषः पूर्वं वर्यो ज्ञातोऽधुना तु प्रकृतिरस्य परावृताऽभूत् । यतः " बहुश्री राजसन्मानं, महाकुलजनिः पुनः । एतानि पुरुषं सद्यो, नयन्ति विकृतिं सदा ॥१॥ " ततः श्रेष्ठी धनावहो धन्यसाधोः पुरो गत्वा जगाद–अन्यायं कुरुतेस्म योऽत्र तस्य दण्डं कुरु त्वम् । तदन्यायं परित्यज्य मम स्नुषां मुञ्च । ततो धन्योऽवग्–भो भटा एष वधूं मार्गयति, तेनाऽयं गर्भागारे क्षिप्यताम् । ततस्तैर्भटैरुत्पाट्य धनावहो गर्भागारे क्षिप्तः । ततस्तत्र गत्वा धन्यः कृताञ्जलिः पितरं प्रणम्य प्राह–क्षन्तव्यो मेऽपराधस्त्वया । मया बालकवच्चापल्यं कृतम् । अहं तु तव पुत्र एव । तत् श्रुत्वा श्रेष्ठी हृष्टः । ततो धन्योऽवक्–त्वयोच्चैर्न वक्तव्यमधुना । तत्रस्थः पिता गौरवितः । श्रेष्ठिनः पत्न्यादिकं विस्मृतं तदा । ततो मातापि तत्रैत्य प्राह–भो धन्यसाधो त्वया कथं मम स्नुषा पतिश्च रक्षितः । ताभ्यां कोऽन्यायः कृतः । ततो गर्भागारे तां मातरं स्थापयित्वा मध्ये गत्वा प्रणम्य पूर्ववत् धन्यो मातरं क्षमयामास । एवं भ्रातरोऽपि रावां कर्तुं समागताः स्थापिताः । ततो भ्रातृजायाः पूत्कारं कुर्वत्यो धन्यद्वारे समेत्य प्रोचुः–असौ राजा अन्यायं कुरुते, अस्मदीयाः पतयोऽपि धृताः अनेन

धन्यसाधुनाऽधुना कस्याग्रे पूत्कारः करिष्यते। ततस्ताः प्रहरमेकं द्वारे स्थित्वा स्वकुटीरे गताः । प्रातस्ताः स्त्रियः शतानीकभूपसभायां रावां कर्तुं ययुः । चिरं जीव चिरं नन्देति जल्पन्त्यः प्रोचुश्च ताः—वयं कर्मकरत्वेन भवतो नगरे समागताः स्मः । भवतः पुरेऽधुना धन्येन साधुना प्रथमं देवरप्रिया पश्चात् श्वशुरः ततः श्वश्रूस्ततोऽस्मदीयाः पतयश्च हृताः कारागारे क्षिप्ताश्च । त्वमेव राजा प्रजापालोऽसि । हृतं कुटुम्बमस्माकं वयं कथं स्थास्यामः । उत्तरमपि स धन्यो न दत्ते । तासामिति वचः श्रुत्वा राजा धन्यपार्श्वे स्वसेवकं प्रेष्य निवेदयामास । एतासां स्त्रीणां कुटुम्बं मुञ्च । अन्यायो न क्रियते । धन्योऽवक्—भो राजसेवक ! अहं नान्यायं करोमि । कदाचित् यद्यहमन्यायं करोमि तदा किं सिद्ध्यते राज्ञा । ततः स राजसेवको राजपार्श्वे गत्वाऽवग्—धन्यो जल्पति—अहमेवंविधमन्यायं करोमि चेत्तदा किं करोति राजा । ततः क्रुद्धो राजा शतानीकस्तं जामातरं हन्तुं सकलसैनिकान् प्रैषीत् । राकोपं भूपं मत्वा धन्यस्तदा तत्क्षणात् संनह्य शकटेपु स्नुषादियुतं सर्वं वस्तु क्षिप्त्वा स्थितो यावत् तावद्राजसेवका युद्धं कर्तुं समागताः । मिथो युद्धे जायमाने शतानीकसेवकैर्भग्नं नष्टं च । ततो भग्नं स्वबलमाकर्ण्य शतानीको रणाय समागात् । अत्रान्तरे महामात्यैरभ्येत्य प्रोक्तं—स्वामिन्नयं तव जामाता,

तेन समं युद्धं कर्तुं न युज्यते । यदा धन्योऽत्रायातस्तदा त्वयैव बहुपरिच्छदः कृतः । बली जातोऽधुना, कुत्रापि विषमकार्ये क्षिप्त्वा हन्यते । अयं दुर्नयं कदापि न करोति । अधुना न ज्ञायते । कस्माद्धेतोरेवं करोति, किंचित् कारणं विद्यतेऽत्र । पृच्छ्यन्तामेताः स्त्रियः । इत्यादि विमृश्य ताः पृष्टा अमात्यैः । भवन्तीनां कोऽस्ति बान्धवो देवरो वा ? । ताः प्रोचुः—अस्माकं धन्याभिधो देवरः पुरान्निसृत्य कुत्रचिद् गतः । अधुना न ज्ञायते जीवन्नास्ति मृतो वा । सचिवैः प्रोक्तं—तस्याङ्गलक्षणं यूयं वित्थ ? येन प्रकटीक्रियते सः । ताः प्रोचुः—अस्माकं देवरस्य पादौ पद्माङ्कितौ हस्तौ च ऊर्ध्वरेखाङ्कितौ । तैरमात्यैरूचे—तर्हि धन्यस्य चिन्हवीक्षणहेतवे पादौ प्रक्षाल्येताम् । ततस्ताः स्त्रियोऽमात्यैर्धन्यपार्श्वे प्रेषिताः । परीक्षार्थं भ्रातृजायात्रयमागतं वीक्ष्य धन्योऽब्रवीदिति—यूयं किमर्थमिहागताः, युष्माकं किं प्रयोजनमस्ति । ताः प्रोचुः—देवरोऽसि त्वं नः । धन्योऽवक्—किं भवन्तीनां भ्रमोऽभूत् । अथवा किं युयमाकाशे सुप्ताः, स धन्यः श्रूयते राजगृहेशस्य सुतापतिः । लक्षणं विद्यते क्रमयोरस्माकं देवरस्य, तेनैकदा पादौ प्रक्षालयितुं त्वं देहि । ऊचे धन्यः परस्त्रीणां स्पर्शात् पातकं भवेत् । नाहं परस्त्रिया सार्द्धं वच्मि । स्पर्शे तु का कथा । तेनेत्युक्ते ता मौनेन स्थिताः खेदं दधत्यः सचिवैरुक्तं—खेदं मा कुरुध्वं यूयं स्थिरं तिष्ठन्तु । भो

धन्य ! त्वं मा स्वभ्रातृजायाः खेदं नय । पापं तव लगदस्ति इत्यादि सचिवैरुक्तो धन्यो मायां मुक्त्वा भ्रातृजायात्रयं निजनिकेतने प्रैषीत् । ततः संरम्भं मुक्त्वा सर्वं कुटुम्बं प्रकटीकृत्य भक्तिपूर्वं धन्यः प्रणनाम । जेमणकं च चक्रे । ततो धन्यो नृपपार्श्वे नन्तुं गतो यावत्तावद्राजाऽर्द्धासनं दत्वा तस्मै जगौ—भो धन्य ! त्वं धन्योऽसि । त्वया कथमेता भ्रातृजायाः खेदिताः सुचिरं ? धन्योऽवग्—भोभूप श्रूयतां बन्धुप्रिया बन्धूनां मिथो भेदं कुर्वन्ति । यतः—“बन्धूनां स्नेहबद्धानां, विना नारीं नहि च्युतिः । तालकस्य द्विधाभावं, करोति कुञ्चिका क्षणात् ॥१॥” नारीणां वचनैर्देव !, बान्धवाः स्युः पृथक् पृथक् । इति हेतोर्मया भ्रातृ—जायाः सांप्रति खेदिताः ॥ २ ॥ इत्यादि प्रीतिसंलापैः प्रीणयामास भूपं धन्यः ततः क्षोणीशं प्रणम्य धन्यः स्वगृहे गतः । ततो विनयेन पित्रादीन् प्रणम्य पूर्वं संजातं स्वगृहवृत्तान्तमापृच्छद्धन्यः । ततः श्रेष्ठी जगौ—यदा त्वं निर्गतस्तदा राज्ञा सर्वस्वं जगृहे । येषु देशेषु यद् द्रव्यं व्यवसायार्थमभूत् तत्तत्तदा विनष्टम् । दारिद्रे समागते गृहे मुद्रां दत्वा आजीविकाकृते वयमत्र समागताः । ततो राज्ञा शतानीकेन समं महाप्रीतिर्धन्यस्याजनि । सुभाषितादिभिर्मिथो राजधन्यौ कालं क्षणमिव नयतः । ततः पिता सर्वेषां पुत्राणां पुरः प्राह—भवद्भिर्दृष्टं धन्यस्य भाग्यम् । ततः सर्वे सोदरा धन्येन मानिताः । ततः पत्नीद्वययुतो धन्यो माता-

पित्रादिभिः सह राजगृहपुरं ययौ । श्रेणिकेन तदा महोत्सवपुरस्सरं पुरमध्ये निवेशितो धन्यः । चतस्रो महेभ्यानां कन्यकास्तदा धन्यः पर्यणैषीत् । प्रियाष्टकं तदा धन्यस्य जज्ञे । तदा धनदस्य धन्यस्य च धनेनान्तरं न ज्ञायते । इतरते भ्रातरो धन्यदत्तग्रामाः सुखेन तिष्ठन्तिस्म । क्रमात् तत्र दुष्काले पतिते सर्वे लोका विदेशं ययुः । तेऽपि धन्यसोदराः क्षीणधना त्यक्तगर्वा अभूवन् । अनिष्पन्नेषु ग्रामेषु निर्द्धनास्ते स्पर्द्धां धन्येन दधाना लोकैर्हेक्किता मालवं ययुः । आजीविकाकृते वृषान् बहुभारभरितान् कृत्वा ग्रामाद्ग्रामं गच्छन्तस्ते धनावहपुत्राः खेदं लभन्ते स्म । निर्भाग्या लाभमिच्छन्तस्ते गोधूमैर्वृषान् भृत्वा वाणिज्यार्थं राजगृहे समाययुः । तेषु चतुष्पथस्थितेषु क्रयविक्रयादिकुर्वत्सु तुरगारूढो धन्यो नृपमन्दिरात् समाययौ । धन्यस्य श्रियं तथाविधां बान्धवानां तादृशीं च वीक्ष्य जनोऽवदत्—हा दैवनिर्मितं कीदृग् बान्धवेष्वप्यन्तरं दृश्यते । यतः—"एकोदरसमुत्पन्नाः, एकनक्षत्रजातकाः । न भवन्ति समाः शीलाः, यथा बदरीकण्टकाः ॥१॥" धन्यो लोकवचः श्रुत्वा करुणापरोऽश्वादुत्तीर्य पादयोर्न्यपतत् । अत्यर्थं लज्जितास्ते मौनं दधुस्तदा । ततस्तान् गृहीत्वा स्वगृहं ययौ धन्यः । ततस्तान् वर्यविष्टरे निवेश्य धन्यः प्राह—युष्माकमियं लक्ष्मीर्मद्गृहसम्बन्धिनी स्वेच्छया विलसन्तु भवंतः । यतः—" विपुलापि न सा लक्ष्मी—र्भुज्यते या न बन्धुभिः । काकोऽपि वर्ण्यते सद्भि—र्भव्यः

स्वज्ञातिपोषणात् ॥१॥" तेऽप्यूचुर्भ्रातरः—तव गृहे वयं न स्थास्यामः धन्योऽवक्—तर्हि विभज्य तुर्यभागं धनस्य मह्यं ददतु भवन्तः। ततश्चतुर्णां भ्रातॄणां प्रत्येकं हेम्नः कोटयश्चतुर्दश जाताः। तैर्भ्रातृभिर्धन्यदत्तं धनं गृहीतम्। यतः—"दीयमानं न गृह्णन्ति, ये ते जगति पञ्चषाः। स्वकीयं परकीयं वा, धनमिच्छन्ति जन्तवः ॥१॥" ततो हेमयुता यावत्ते चलितास्तावद्वित्ताधिष्ठायकया देव्या द्वारे ते स्तम्भिताः। व्यावृत्तास्ते विलक्षाः सन्तो गर्वं मुक्त्वा धन्यपार्श्वेऽभ्येत्योचुः। त्वदीयं भाग्यमस्माभिर्दृष्टं भाग्यविवर्जितैः। मुधा अस्माभिस्त्वयि मत्सरः कृतः। अद्य प्रभृति नास्माभिर्मनाक् त्वयि मत्सरः कर्तव्यः। ततो धन्योऽवग्—भवन्तः समाधिना भुञ्जन्तु देवपूजादिपुण्यं कुर्वन्तः। ततस्ते तथा देवपूजादिकं कर्म कुर्वाणाः समाधिभाजोऽभूवन्। अन्येद्युस्तत्रागताश्चतुर्ज्ञानधारिणो धर्मघोषसूरयः तेषां पार्श्वे धर्मं श्रोतुं धन्यः सकुटुम्बोऽगमत्। स चतुर्ज्ञानी धर्मोपदेशं ददौ। तथाहि—जन्तूनामवनं जिनेशमहनं भक्त्यागमाकर्णनं, साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम्। मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनं, चेतःशोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥१॥' देशनान्ते धन्येन पृष्टं—भगवन्! केन कर्मणा भ्रातरोऽमी ममाग्रजाः व्यवसाये सत्यपि निर्धनाः। एतेषां गृहे धनं कथं न तिष्ठति? सूरीन्द्रः प्राह—एतैर्भूरितरं दानं न दत्तं

पूर्वभवे पुनर्न श्रद्दधे । तथाहि—लक्ष्मीपुरे एते त्रयोऽपि सोदराः सस्नेहा दारिद्रभाजोऽभूवन् । त्रयोऽपि नित्यं काष्ठानि कष्टेन वनादानीय विक्रीय कुटुम्बं पोषयन्तिस्म । अन्येद्युस्ते सशम्बलाः काष्ठानयनार्थं वने ययुः । मध्यान्हे ते यावद्भोक्तुमुपविशन्ति, तावन्मुनीन्द्रः शान्तात्मा मासक्षपणपारणार्थं तत्रागतः । तं तादृशं यतिमागतं दृष्ट्वा ते प्रोत्थाय प्रमुदिता बहुशम्बलमहमहमिकया विश्राणयन्तिस्म साधवे तस्मै । तेऽथ तस्मिन् साधौ गते पश्चात्तापमिति चक्रिरे । अत्रायातो मुधाऽस्माकं शम्बलं लात्वा गतः । न दायादो न गोत्रजः । अथवा साधोरस्य किं दूषणम् । वयमेव मूढा यतोऽविमृश्यैव दत्तं शम्बलम् । पश्चात्तापपरास्ते स्वसदनं ययुः । दानस्यानुभावेन तस्मिन् दिने किञ्चिदन्नं सुपात्राय दत्वा पश्चात्तापं चक्रुः । तेन पुण्येनाल्पर्द्धिव्यन्तरत्वं प्राप्य तस्माच्च्युतास्त्रयोऽपि भ्रातरो भवदीया अभूवन् । तादृग्दानप्रभावेणामीषां लक्ष्मीर्दर्शनप्रदाऽभूत् । योऽन्योऽपि साधुभ्यो दानं दत्वा पश्चात्तापं करोति स दानफलं न प्राप्नोति । उक्तं च—" दत्वा दानं ये मुनीन्द्रेषु पूर्वं, पश्चात्तापं कुर्वते पुण्यहीनाः । भाग्याल्लब्ध्वा यानपात्रं प्रधानं, झम्पापातं तन्वते ते समुद्रे ॥ १ ॥ दानस्य पुण्यं बहुभाग्यशाली, संप्रापयत्येव बहुस्थिरत्वम् । न भाग्यहीनाः खलु येन कुक्षौ, न पायसं तिष्ठति कुर्कुरस्य ॥ २ ॥ पश्चात्तापो न तत्कार्यो, दत्ते दाने मनीषिभिः । किन्तु पुण्य-

द्रुमो भाव–जलेन परिसिच्यते ॥ ३ ॥" अथ सुभद्रा शालिभद्रभगिन्यपि प्राह–भगवन्! मया केन कर्मणा मृद् वोढा। गुरवः प्रोचुः–स्वीयं भवं शृणु। यदा धन्यः पूर्वभवे वत्सपालकोऽभूत्, तदा यूयं चतस्रः प्रातिवेश्मिक्यो जाताः। गोपेन मार्गिते भक्ष्ये तदा प्रथमया दुग्धं ददे, द्वितीयया तन्दुलाश्च ददिरे, खंडा तृतीयया ददे, आज्यं वर्यं चतुर्थ्या ददे। ताभिरप्यर्जितं पुण्यं दानेन। तदा सुभद्रे! यत्त्वया मृद्वहने कर्म्म बद्धं तच्छृणु। तथाहि–कलहं कुर्वाणा दासी क्वाचिद्गोमयं वहन्ती त्वया हक्कितेति–रे दासि भारमेवोद्वहसि। एवंविधया गिरा सा दासी दूनाऽजनि। येन त्वया दानं करुणया गोपालाय दुःस्थाय व्यतारि, तेन शालिभद्रस्वसा त्वमभूः। येन त्वया तस्या दास्या मृत्तिकां वहेति शापो व्यतारि पूर्वभवे, ततोऽस्मिन् भवे त्वया मृत्तिका व्यूढा। इत्येवं संशयं भित्त्वा धन्यः सपरिवारो धर्ममङ्गीकृत्य स्वगृहं ययौ। ततो दिने दिनेऽधिकामधिकां लक्ष्मीं प्राप्नुवन् राजमान्योऽभूत्। अष्टाभिः प्रियाभिः समं दोगन्दुकदेव इव भोगान् भुञ्जानः सुखी बभूव धन्यः। धन्यो यथा दीक्षां ललौ, यथा तपःप्रभृति पुण्यं कृत्वा अनुत्तरविमाने गतः। तत्सर्वं शालिभद्रकथानकाज्ज्ञेयम्। इति दानपुण्योपरि धन्यकथानकं समाप्तम् ॥ ३२ ॥

अनित्यत्वादिकां शुद्धां, भावनां स्मरतो हृदि। इलातीतनयस्येव, पुंसः स्यात् केवली मुनिः ॥ १ ॥

तथाहि—इलावर्द्धने पुरे इलाभूषणे नराधिपशतसेव्यो न्यायी जितशत्रुनामा राजाऽभूत् इभ्यनामा श्रेष्ठी तत्राजनि। तस्य धारिणीति भार्या शीलादिगुणधारिणी बभूव। तयोर्भुञ्जानयोः सौख्यमपत्याभाव इति दुःखमभूत् तत इलादेव्याः श्रीजिनाधिष्ठायिकायाः पुत्रार्थमाराधनं कृतं ताभ्यां प्रोक्तं च यद्यावयोः पुत्रो भविष्यति, तदा त्वन्नामाङ्कितं नाम तस्य करिष्यते। तयोः सूनुः क्रमाज्जज्ञे तस्य जन्मोत्सवकरणपूर्वं इलातीपुत्र इति नाम कृतं ताभ्याम्। स ततो धात्रीभिर्लाल्यमानः क्रमादष्टवार्षिकोऽभूत्। ततः पितृभ्यां पाठाय लेखाचार्यसंनिधौ मुक्तः। विषमाण्यपि शास्त्राणि इलातीपुत्रः पपाठ सूत्रार्थाभ्याम्। यौवनं प्राप्तः स तरुणीजने न मनाग् मनो दत्ते किन्तु साधुजनस्येव सम्यक् शास्त्रविचारणे। यतः—

"सन्तोषस्त्रिषु कर्तव्यः, स्वदारे भोजने धने। त्रिषु चैव न कर्तव्यो, दाने चाध्ययने तपे ॥१॥ पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलाः। तस्मान्मूर्खसहस्रेण, प्राज्ञ एको न लभ्यते ॥२॥" ततस्त्रिवर्गशून्योऽयं माभवदिति ध्यात्वा जडधीः पिता दुर्ललिताख्यां गोष्ठ्यां तं पुत्रं मुमोच। अत्रान्तरे वसन्तसमये समायाते नानाप्रकाराशोकचम्पकचूतजम्बूप्रभृतिवृक्षफलपुष्पादिशालिनि वने इलातीपुत्रो जगाम। लंखिकाख्यस्य नटस्य कन्यका नृत्यन्ती तेन ददृशे। तत इलातीपुत्रस्तामङ्गीकर्तुकामः पुनः पुनर्ध्यायन् निश्चेष्टः कीलित इवाजनि। इङ्गिताकारकुशलास्तत्सेवकास्तं

वीक्ष्य वयस्या इलातीपुत्रं प्रति जगुः—तव पिता त्वां विना अधृतिं करिष्यतीति । स्वगृहे गम्यते । तैरिलातीपुत्रः स्वगृहे नीतः । तत्र शयने सुप्तः क्षणमपि समाधिं न लभते । तं तथाऽवस्थं पुत्रं वीक्ष्य पिताऽवग्—भो वत्स ! तव किं मन ईदृशं दृश्यते । तव केनापराधः कृतः । त्वत्तुल्योऽपरः कोऽपि विचारवान्नास्ति । ततः पुत्रे मौनं श्रिते वयस्याः प्रोचुः । अस्य लंखकनटस्य कन्यायां परिणेतुं मनोऽस्तिं । ततः पिताऽवग्—भो पुत्र ! त्वं कुलीनोऽकुलीनामिमां किं परिणेतुमीहसे । इति पितृवचः श्रुत्वा इलातीपुत्रो बभाषे । तात ! जानाम्यहं सर्वं सन्मार्गप्रवर्तनादि परं किं क्रियते, मनो मदीयमस्यामेव मग्नमास्ति । तस्यां लंखकन्यायां रक्तं पुत्रवचो मत्वा श्रेष्ठी दध्यौ—मयैवैतत् कृतमविचारितं पुत्रस्य कुसङ्गतिकरणात् । अथ वारितुं न शक्यते । मया निषिद्धः सन् कदाचिन् म्रियेत तदा मम का गतिः । इतो व्याघ्र इतस्तटीति न्यायः । यदि तामसौ न परिणेष्यति तदा मृत एव इत्यादि ध्यात्वा श्रेष्ठी-लंखकं प्रति जगौ—मम सनवे स्वसुतां त्वं देहि । ततो लंखकोऽभाषिष्ट स्पष्टं—त्वत्सूनोर्यदि वाञ्छा स्यात्ततोऽस्माकं मिलत्वसौ । ततः श्रेष्ठी खिन्नोऽपि प्राह सुताग्रे-वत्स ! भवत्वियं ते लंखपुत्री । पित्रोदितं श्रुत्वा दध्याविति इलातीसुतः । तातेन मत्कृते विरुद्धमपि वाञ्छितं प्रतिपन्नम्, अहं तु तां विना न क्षमो जीवितं धर्तुं, विचिन्त्यैवं गुरुजनोपदेश-

मवगणय्य मुत्कलाप्य मिलितुं लंखकपाटकेऽगादिलातीपुत्रः । तदा लंखकोऽवग्—यदि त्वमस्मदीयां नृत्यकलां शिक्षिष्यसे । तदा तुभ्यमियं कन्या दास्यते । ततः शिक्षितुं स लग्नः कामार्थी । "यतः कामाशुगैः स्वान्त—कुम्भे जर्जरिते सति । स्तोकमप्युपदेशाम्भः, क्षिप्तं सन्तिष्ठते कथम् ॥ १ ॥ प्राणानपि विमुञ्चन्ते, स्त्रीशस्त्रीदीर्ण-वक्षसः । मर्त्यास्तृष्णाविगानस्य, त्यागे तु किमदुष्करम् ॥ २ ॥" प्रज्ञाप्रकर्षवशान्नृत्यकलासु कोविदोऽभदिलातीपुत्रः । ततो लंखकोऽवक—स्वविज्ञानं प्रकाशय त्वं द्रव्यमर्जय । ततो महामहोत्सवेन कन्येयं तुभ्यं दास्यते । ततो वेनातटपुरे लंखकादियुतः इलातीपुत्रो गत्वा महीपालं भूपं व्यजिज्ञपत्—स्वामिन्! अद्य वयं नाटकं दर्शयिष्यामः । नाटकं दर्शय त्वमित्युक्ते भूपेन इलातीपुत्रः प्रेक्षणं नानाभिनयबन्धुरं तथा चक्रे यथा लोकाः सर्वेऽत्यन्तं चमत्कृताः । तदानीं राजा लंखकसुतां वीक्ष्य मोहितो हर्तुकामोऽभूत् । ततो राजा जगौ—भो इलातीपुत्र ! वंशोपरि सुतरस्तन्तून् बद्ध्वा तेषु विलग्नो नृत्यं कुरु । ततस्तथा नृत्ये कृते तेन राजाऽवग्—निराधारो भव । निराधारे व्योम्नि स्थिते तस्मिन् राजा दध्यौ—असौ तु न मृतः कथं लंखकपुत्री मम भविष्यति । एवं द्वित्रिवारं स भूपेन नृत्यं कारितः । चतुर्थे वारके वंशोपरि स्थितो राजानं लंखकसुतासक्तमनसं ज्ञात्वा इलातीपुत्रो दध्यौ—अहो विषयवैषम्यं, रक्तोऽयं

राजा नीचकुलोत्पन्नायां नट्यामप्यभूत्। मां मारयितुं पुनः पुनः नृत्यं कारयति। स्वःस्त्रीतुल्येऽन्तःपुरे सत्यपि अस्यां स्त्रियां मनः कुरुते राजा। ततो धिग् मामिमं भूपं च। यतः—"स्वाधीनेऽपि कलत्रे, नीचः परदारलम्पटो भवति। सम्पूर्णेऽपि तटाके, काकः कुम्भोदकं पिबति ॥ १ ॥" मया यन्मातापित्रोर्वचनमुल्लङ्घ्य एवंविधमकार्यं कृतम्। मया निर्मलमपि कुलं कलङ्कितं—इत्यादिवैराग्यवासिताशय इलातीपुत्रः कस्यचिन्महेभ्यस्य गृहे शान्तचित्तान् मुनीन् भिक्षायै प्रविष्टान् दृष्ट्वा दध्यौ—धनपतेरेता वधू रूपाजितरम्भा दृष्ट्वा एते साधवो मनागपि न संमुखं विलोकयन्तिस्म। एते वन्दनीया एव। यतः—" ते कह न वंदणिज्जा, रूवं दट्ठूण परकलत्ताणं। धाराहयव्व वसहा, वच्चंति महीपलोअंता ॥ १ ॥ अलसा होइ अकज्जे, पाणिवहे पंगुला सया होइ। परतत्तीसुयबहिरा, जच्चंधा परकलत्तेसु ॥ २ ॥ अहं त्वस्यां नीचकुलोत्पन्नायां नार्यां मनोऽकार्षम्। एवं ध्यायतः स्वकर्मभेदतः इलातीपुत्रस्य वंशोपरिस्थितस्य केवलज्ञानमुत्पन्नम्। ततो देवतादत्तालिङ्गो दिव्यस्वर्णाम्बुजस्थितो भूपाग्रे धर्मोपदेशमेवं दत्तवान्। भो भव्या इह संसारे, मानुष्यमतिदुर्लभम्। लब्ध्वा पाथोनिधौ मग्नं, चिन्तारत्नमिवामलम् ॥ १ ॥ इत्यादि धर्मोपदेशमाकर्ण्य राज्ञा पृष्टं—भवतोऽस्यां स्त्रियां कथं रागोऽभवत्। ततः केवली जगौ—पूर्वं वसन्तपुरपत्तने भूपपुरोहितो मदननामा

द्विजोऽभूत्, मोहनी वल्लभा प्राणेभ्योऽप्यतिवल्लभाऽऽसीत् । अन्येद्युः धर्मोपदेशं श्रुत्वा सुगुरोः पार्श्वे व्रतं ललतुः । निबिडेन निगडेनेव, रागेण तयोर्बद्धयोरतत्रापि प्रीतिः सर्वथाऽन्योऽन्यं नात्रुटत् । मोहनी मूढात्माऽन्यदा जातिमदं मनाग् चक्रे । तत्कर्म अनालोच्य मोहनी गुरोरग्रे क्रमाद्दिवि गता । द्विजोऽपि मृतः स्वर्गे गतः । ततो दिवश्च्युत्वाऽऽयुःक्षये इलावर्द्धनपुरे श्रेष्ठिपुत्रोऽभूदेवः सोऽहमिलातीपुत्रः। मोहन्यपि स्वर्गाच्च्युत्वा जातिमदकरणाल्लंखपुत्र्यभूत्। तत्र पूर्वभवसम्बन्धिना मोहेनास्मिन् भवे मम तस्यामभूत् स्नेहः । तच्छ्रुत्वा वैराग्यवासिता राजराज्ञीनटात्मजादयो धर्म्मं प्रपेदिरे । ततः शुक्लध्यानात् प्राप्य केवलज्ञानं मुक्तिं ययुः । इति इलातीपुत्रकथा समाप्ता ॥ ३२ ॥

कृतपापोऽपि संसारान्, मुच्यते भूरिकर्मभिः । चिलातीपुत्रवत् स्वर्गा-दिसुखैर्व्रियते पुनः ॥ १ ॥

तथाहि—क्षितिप्रतिष्ठितपुरे ज्ञमन्यो यज्ञदेवाह्वो द्विजो जिनमतनिन्दां दीर्घसंसारदायिनीं करोतिस्म । स्वं पण्डितमन्यो द्विजोऽन्यदा वादाय केनचित् क्षुल्लकेनाहुतः । ततस्तेन द्विजेनोक्तं यो मां जयति तस्याहं शिष्यो भवामि । ततः क्षुल्लकेन निग्रहस्थानं नीतः क्षणादीक्षां ग्राहितो द्विजः । अथान्यदा शासनदेवी द्विजं प्रति प्राह—यथा तरणिं विना चक्षुष्मानपि न पश्यति, तथा जीवो ज्ञानवानपि शुद्धं चारित्रं विना मुक्तिं न पश्यति, यतिवत् ।

ततो द्विजः शुद्धं चारित्रं पालयति। द्विजप्रिया श्रीमती तस्य वश्यतां कर्तुं तपःपारणके कार्मणं ददौ प्रियाय। तेन कार्मणेन क्लिश्यमानतनुर्द्विजो मृत्वा स्वर्गं गतः। ततः सा ब्राह्मण्यपि तद्दुःखदुःखिता व्रतं लात्वा स्वर्गं गता। पतिविषये कृतं कार्मणं नालोचितं तया। ततः स्वर्गाच्च्युत्वा यज्ञदेवो राजगृहपुरे धनसार्थवाहस्य चिलात्या दास्या उदरेऽवततार। क्रमात् पुत्रो जातः, तस्याभिधानं चिलातीपुत्र इति मातुर्नामानुसारेणाभूत्। यज्ञदेवप्रिया स्वर्गाच्च्युत्वा धनपत्न्यां भद्राह्वायां पुत्री सुंसुमाऽभूत्। पञ्च पुत्राश्च पूर्वं सन्ति तस्य। धनेन सुंसुमाख्याया दुहितू रक्षार्थं चिलातीपुत्रो मुक्तः। यदा यदा सुंसुमा रोदिति तदा तदा तस्या योनौ अङ्गुलीक्षेपं करोति। ततः सा न रोदिति, अतीव सुखं मन्यते। तं चिलातीपुत्रं तथा कुर्वाणं ज्ञात्वा राजदण्डभीत्या तं स्वगेहान्निरकाशयत्। यतः—" शिष्याणां हि गुरुः शास्ता, शास्ता राजा दुरात्मनाम्। अथ प्रच्छन्नपापानां, शास्ता वैवस्वतो यमः ॥ १ ॥" चिलातीपुत्रः सिंहगुहाभिधां भिल्लपल्लीं ययौ मल्लीमालामिव मधुव्रतः। मृते चौरपतौ चिलातीपुत्रः स्वस्वामी चौरैः कृतः। "विदेशान्तरितस्यापि, भाग्यं जागर्ति तद्वतः। अभ्रैस्तिरोहितस्यापि, भानोर्भासस्तमोपहाः ॥१॥ विषमास्त्रपीडितश्चिलातीपुत्रः सुंसुमां स्मरति। सुंसुमा च तम्। एकदा चिलातीसुतस्त्वाह—भो चोरा गम्यते राजगृहे पुरे, तत्र धनश्रेष्ठिगृहे बह्वी श्रीरस्ति एका

सुंसुमाह्वा सुता समस्ति च। यद्धनं चटति तद्भवतां सुंसुमा मम भवतु इति व्यवस्थया ते चौरा रात्रौ तत्र जग्मुः। चौरेषु गृहमध्ये प्रविष्टेषु श्रेष्ठी व्याकुलः पञ्चपुत्रयुक् क्वचिन्नीलीय रहसि स्थितो भीतः। यतः—"पंथसमा नत्थि जरा, खुहा समा वेयणा नत्थि। मरणसमं नत्थि भयं, दारिद्दसमो वयरिओ नत्थि ॥१॥" इतस्ते चौरा वित्तमादाय चिलातीपुत्रश्च सुंसुमां लात्वा चेलुः। ततः कलकलं कृत्वा पुरारक्षसहितः श्रेष्ठी पञ्चपुत्रयुक् चौरपृष्ठौ चचाल। ततस्ते चौराः पृष्ठौ पुरारक्षान्निष्काशितासीनायातान् वीक्ष्य भयविह्वला बभूवुः। ते सर्वे चौरास्त्यक्तलोप्त्रा दिशोदिशं नेशुः। पुरारक्षा आत्तवित्ताः पश्चाच्चेलुः। ततश्चिलातीपुत्रः स्कन्धे तां कन्यां वहमानस्त्वरितं चचाल। पञ्चपुत्रयुतं श्रेष्ठिनं धनं निष्काशितासिमागच्छन्तं वीक्ष्य कन्याशिरः छित्त्वा कबन्धं तत्रैव मुक्त्वा करात्तकन्यामस्तकोऽग्रतश्चिलातीपुत्रश्चचाल। इतो धनश्रेष्ठी धनं गतं वीक्ष्य पुत्रीकबन्धं वीक्ष्य क्षणं बहु विलप्य पश्चाद्वलित्वा स्वपुरमाजगाम। ततो धनः श्रेष्ठी श्रीवीरपार्श्वे धर्मं श्रोतुं गतः पुत्रयुतः। श्रीवीरेणेति धर्मोपदेशो ददे। "न श्रीमें विपुलाऽजनि नच मता जाता न वा सूनवो, जातं वा न गुणास्पदं न च मुदं धत्ते कुटुम्बं मम। द्विष्टो भूपतिर्मे खलाश्च कुदृशो देहं रुगार्तं सुतो, बाह्यो भूरि ऋणं गृणन्ति गृहिणां चेतसि चिन्ता इमाः ॥ १ ॥ इह संसारपाथोधौ, मानुष्यं प्राप्य

दुर्लभम् । आत्महितं हि कर्तव्यं सर्वारम्भेण धीमता ॥ २ ॥ प्रागुजन्मजाते सुकृते सति प्रभौ, विवेकिभिस्तत्पुनरर्ज्यते नवम् । नीवीधनादस्य पुनः कुतोऽर्जनं, वाप क्व धा प्रौषितबीजभोजिनः ॥ ३ ॥ इह लोइयंमि कज्जे, सव्वारंभेण जह जणो तणइ । ता जइ लक्खंसेणवि, परलोए ता सुही होइ ॥ ४ ॥ ” यतः—“ प्रबुध्यस्व प्रबुध्यस्व, द्विधा सपदि मानव ! । गृहे ज्वलति चौरा हि, सर्वस्वं लुण्टयन्त्यमी ॥ ५ ॥ जरा जाव न पडिेइ, वाही जाव न वड्ढई ॥ जाविंदिया न हायंति, ताव धम्मं समायरे ॥ ६ ॥” इत्यादिश्रीजिनस्यास्यादाकर्ण्य धर्मदेशनाम् । पञ्चभिः श्रेष्ठितनयैः, श्राद्धधर्मः समाश्रितः ॥ ७ ॥ धनः संप्राप्तवैराग्यः, श्रीवीरजिनसंनिधौ । जग्राह संयमं स्वर्गापवर्गसुखदायकम् ॥ ८ ॥ तीव्रं तपस्तप्त्वा चिरं धनः श्रेष्ठी स्वर्गमगात् । इतश्चिलातीपुत्रस्तु करात्तस्त्रीमस्तको रुधिराक्लिन्नशरीरोऽग्रतो वर्त्मनि त्वरितं व्रजन् मुनिमेकं शान्तं कायोत्सर्गस्थं ददर्श । चौरोऽवग्—भो मुनिपुङ्गव ! त्वरितं धर्मं कथय, नो चेदनेनासिना स्त्रीमस्तकवत्त्वच्छिरः छेत्स्यामि । ततस्तं योग्यं सत्पात्रं चौरं मत्वा मुनिरुपशमविवेकसंवरेति पदत्रयमुच्चरन् व्योममार्गे उत्पपात । स चौरश्चिलातीपुत्रो दध्यौ——अनेनाकाशगामिनी विद्या किं प्रोक्ता? अथवा मन्त्राक्षराण्युक्तानि, अथवा धर्माक्षराणि, इति ध्यायन् मुनिपदस्थाने उवसमविवेकसंवरेति ध्यायंस्तस्थौ

उपशमशब्दस्य कोऽर्थ इति ध्यायन् पुनर्जज्ञौ, उपशमः क्रोधाद्युपशान्तिः, एवं ध्यात्वोपशम आश्रितस्तेन चौरेण। विवेकस्य कोऽर्थः ? इति ध्यायता विवेकार्थस्तेन ज्ञात इति कृत्याकृत्ययोर्विवेकः क्रियते। ततः कृत्यस्याङ्गीकारोऽकृत्यस्य, त्याग इति विवेकः। ततो विवेक आश्रितस्तेन। संवरः पञ्चेन्द्रियाणां क्रियते, पञ्चेद्रियाणां प्रसरस्य निरोधः, इति संवरस्तेनाश्रितः। इति त्रिपदीं ध्यायन् सार्द्धदिनद्वयं कायोत्सर्गे चौरः स्थितः। रुधिरगन्धेन समागताभिः शूचिमुखीभिः कीटिकाभिः सर्वं शरीरं तस्य चालनीवत् कृतम्। तेन तथा कीटिकाविहितवेदनाऽधिसहिता, यथा सार्द्धदिनद्वयान्ते चिलातीपुत्रेण स्वर्गपदवी प्राप्ता। उक्तं च " जो तिहिं जएहिं सम्मं, समभिगओ संजमं समारूढो। उवसमविवेगसंवर–चिलाइपुत्तं नमंसामि॥ १ ॥ अहिसरीया पाएहिं, सोणियगंधेण जस्स कीडीओ। खायंति उत्तमंगं, तं दुक्करकारयं वंदे ॥ २ ॥ धीरो चिलाइपुत्तो, मूइंगलिआहि चालिणिव्व कओ। जो तहवि खज्जमाणो, पडिवन्नो उत्तमं अट्ठं ॥ ३ ॥ अड्ढाइज्जेहिं राइंदिएहिं, पत्तं चिलाइपुत्तेण। देविंदामरभवणं, अच्छरगणसंकुलं रम्मं ॥ ४ ॥ ॥ इति चिलातीपुत्रकथा समाप्ता ॥ ३४ ॥

तीव्रेण तपसा कर्म, कृतं दुष्टमपि स्फुटम्। युगवाहोरिवोपैति, क्षयं शीघ्रं शरीरिणः ॥ १ ॥

तथाहि—पाटलीपुरं नगरं शोभते स्म। तत्र विक्रमभूपो राज्यं कुरुतेस्म। मदनरेखा तस्य पत्नी बभूव। मतिसागरनामा मन्त्रीशो बभूव। अन्यदा राजा सचिन्तां पत्नीं वीक्ष्य दुःखहेतुं जिज्ञासुः पप्रछ। भो पत्नि! तव कस्य वस्तुनो विषये चिन्ता विद्यते। इति भर्तृवचः श्रुत्वा प्रिया प्राह—नाधुना वर्तते किञ्चि—दन्यदुःखस्य कारणम्। लालितायास्त्वया पत्या, विहाय निरपत्यताम्॥ १॥ तस्याः प्रियाया वाचं श्रुत्वा त्रिसन्ध्यं पूजापूर्वं पुत्रार्थे नृपः कुलदेवतामाराधयामास। क्रमात् पत्न्या गर्भोऽभूत्। क्रमात् प्राप्तसमये सा पुत्रमसूत। महोत्सवं कृत्वा युगबाहुरिति नाम ददौ राजा तस्मै। क्रमाद् वर्धमानो लेखशालायां पठितुं मुक्तो युगबाहुः पित्रा। यतः—"धनहीनो न हीनस्तु, धनं वा कस्य निश्चलम्। विद्याहीनस्तु यः कश्चित्, स हीनः सर्ववस्तुषु॥१॥ विद्या यशस्करी पुंसां, विद्या श्रेयस्करी मता। सम्यगाराधिता विद्या, देवता कामदायिनी॥२॥" अन्यदा लेखशालायां कश्चिद्वैदेशिकोऽतिथिः समायातः सोऽभाषिष्ट। ब्रूत लोकोत्तरस्फूर्तिः, कथं भूयात्पुमानिति? जगदुर्जगतीशेन, गौडेनाभिहिता बुधाः॥१॥ शास्त्रे शस्त्रे च जागर्ति, यस्य कीर्तिरनुत्तरा। भाषितः पुरुषः सैषः बुधैर्लोकोत्तरं परम्। उपाध्यायोऽपि प्राह—यस्य शस्त्रकलायां शास्त्रकलायां च बुद्धिः प्रसरति स उत्तमो ज्ञेयः। उपाध्यायस्यैवं वाचं श्रुत्वा नृपाङ्गजो बहिर्वने गतो मुनिपार्श्वे पप्रच्छ—

लोकोत्तरा कलावाप्तिः कथं जायते पुंसाम् । ते मुनयो जगुः—भो विक्रमबाहुनन्दन ! शुभकर्मानुकूल्यात् सर्वं शुभं विद्यादि जायते । अशुभकर्मणा दुःखमूर्खादि भवति । पुनः मुनयः प्रोचुः—पञ्चम्यादितपोयोगै—र्देवताराधनेन च । ज्ञानव्यक्तिर्भवेन्नृणां, मुक्तिसौख्यप्रदायिनी ॥१॥ तपसा च दृढं कर्म्म, कृतं प्राणभुजा भृशम् । क्षयं गच्छति मार्तण्डा—दिवान्धकारसञ्चयः॥ २ ॥ श्रुत्वा मुनिवचः स युगबाहुः षण्मासीं यावत्तपश्चकार । अथाकस्मान्मेघः समागात् । अम्भोद-पटलैर्व्योम्नि, छादितः सितदीधितिः । मुखेन्दुः पान्थनारीणां, सकज्जलजलाश्रुभिः ॥ १ ॥ वारिभिः सरोह्रदादि-भृतम् । एवंविधे वर्षति मेघे कश्चिद्राजानं प्रति प्राह—–गङ्गाप्रवाहः प्लावयन् नगरं प्रसरति, स ततो भूपो याव-दुत्तिष्ठति गङ्गाप्रवाहं पश्चाद्वालयितुं तावत् पुत्रः प्राह—ममादेशं देहि तात ! अहं यास्यामि । राजाऽवग्—हेपुत्र ! स्वर्णपुत्रमादाय तत्र गच्छ । पूजामस्य कृत्वा जलमध्ये प्रक्षिपेः । यथा जलोपसर्गः शान्तिं याति । तातं प्रणम्य तत्र गत्वा यावत्तातोक्तं चक्रे पुत्रः, तावद्राजपुत्रः कस्याश्चिन्नार्याः करुणध्वनिं शुश्राव । यावद्भूपभूस्तां कर्षितुं दध्यौ तावत् कापि स्त्री रुदन्ती जलचरान् भ्रमन्ती प्रकटीभूता जलमध्ये, प्राह च स्त्री—कोऽप्यस्ति भूपो भूपपुत्रोवा । यो मां ब्रुडन्तीं प्रवाहाद्रक्षति । प्राह पुनः स्त्री—रत्नगर्भाऽपि वन्ध्याऽसि, कुतो देवि ! वसुन्धरे ! । यत्र जातस्त्वया कोऽपि,

मत्प्राणत्राणकारणम् ॥ १ ॥ श्रुत्वेति वचो भूपभूः सर्वं परिवारमवगणय्यैतां स्त्रियं कर्षितुं जलान्तः प्रविष्टः । वीक्षितः सैनिकैः कन्या–मुद्दिधीर्षुर्महीमिव । स्फुरद्रत्नतलां सोऽयं, नारायण इवाबभौ ॥ १ ॥ प्लवमानः कुमारो यावत्तस्याः पार्श्वे ययौ, तावत्सा दूरं दूरतरं यातिस्म । क्रमात्तस्याः पृष्ठौ गच्छन् कुमारः सैनिकस्य दृष्टिगोचरादहश्यतां भेजे । ततः सर्वे कुमारानुगा राजपुत्रमपश्यन्तो दुःखिनोऽभूवन् । इतस्तं कुमारमपहृतं दृष्ट्वा सूर्योऽस्तं गतः । यतः–“ अस्तोकशोकभृल्लोक–चक्रं चक्रन्द चक्रवत् । तत्र मित्रे स्फुरद्वृत्ता–देशे देशान्तरं गते ॥ १ ॥ ” तदा लोका एवं जगुः–दिदृक्षुरिव तं भानुः, कुमारं मारविग्रहम् ॥ पाथोनाथपथेनाथ, पातालमुपजग्मिवान् ॥ २ ॥ अथ ते सैनिकाः पुरमध्येऽभ्येत्य कुमारस्वरूपं भूपस्याग्रे प्रोचुः । दम्भोलिनेव भूपाल–स्ताडितो हृदयेऽपतत् । तद्वार्तादुःखसंघट्ट–जन्मना शोकशङ्कुना ॥ १ ॥ चन्दनछटादिप्रक्षेपाद्राजा स्वस्थीकृतः प्राह पुत्रगुणस्वरूपमिति–क्व सा भक्तिः क्व सा शक्तिः, क्व सा क्षान्तिः क्व सा मतिः । एकैकशोऽपि दृश्यन्ते, हा हन्त नहि ते गुणाः ॥ १ ॥ त्वं तातवत्सलो वत्स !, जन्मतोऽपि प्रभृत्यभूः । मां जराजर्जरितं हित्वा, तत्संप्रति कुतो गतः ॥ २ ॥ ततोऽमात्या भूपं प्रति प्रोचुस्तदेति । स्वकर्मफलभोगेन, संसाराब्धौ शरीरिणः । बुद्बुदा इव यान्त्येके, समायान्त्यपरे पुनः

॥ १ ॥ यदेवेष्टवियोगादि, विरक्तेः कारणं सताम् । मोहान्धानां तदेवाहो, क्रोधशोककरं परम् ॥ २ ॥ न चक्रिणा न शक्रेण, कृतविक्रमसंक्रमम् । विश्वैकवीरमाख्यान्ति, दैवमेवंविधं बुधाः ॥ ३ ॥ वरसैन्येन दैत्येन, सेवितैः परिदेवितैः । असौ प्रकृतिदुर्दान्तः, कृतान्तः केन गृह्यते ॥ ४ ॥ इदं मन्त्रिवचः श्रुत्वा कृपाणमाकृष्य भूपः प्राह—कृतं तवानेन वक्तव्येन, दृष्टिपथाद् दूरं व्रज । ततो योजिताञ्जलिः साचिवेश्वरः प्राह—स्वामिन् ! मया मौढ्यादिदमुक्तं तथाऽपि किंचिदुच्यते । तदेवं दैवं यत्कुर्यात, कर्म कुर्याच्छुभाशुभम् । शोभैव सृष्टिसंहार—कारिकारणवर्णना ॥ १ ॥ जरा नित्यं पृष्ठौ धावति । पुत्रः समेष्यति दोदूया न क्रियते । इतोऽकस्मात् प्रातर्मङ्गलध्वनिः मंसलः श्रुतः । कश्चिन्नरस्तत्र तत्क्षणात् भूपाग्रेऽभ्येत्य प्राह—आन्ध्यहेतुतमःस्तोम—च्छेदभासुरभास्वतः । दिष्ट्या त्वं वर्द्धसे देव !, युगबाहोरिहागमात ॥ १ ॥ पारितोषिकं दानं तस्मै वितीर्य भूपो विस्मेरनेत्रो यावदुत्तिष्ठातिस्म । तावल्लोककोकानां, शोकमुन्मूलयन्नयम् । स्वच्छरोचिरलङ्कार—भासुराकारविग्रहः ॥ १ ॥ स्वयमीक्षणराजीव,—जीवातुः प्रातरागतः । भास्वानिवोदयकला—दुर्निरीक्ष्यो नृपाङ्गजः ॥ २ ॥ युग्मम् । नन्दनं प्रणमन्तं परिष्वज्य भूपो जगादेति—पुत्र ! त्वं कुत्र गतोऽभूः ? कथमत्रागाः ? । ततो मन्मथाकारः कुमारः प्राह—ताताहं गङ्गाप्रवाहं वालयितुं गतः । तत्रैकां स्त्रीं रुदन्तीं कर्षितुं प्रविष्टः

तदा मूर्छामापम् । अग्रे गच्छन् मूर्छामुषितचैतन्य–स्तामथानुव्रजंस्तदा । कोऽहं किमर्थं कुत्रास्मी–त्येवं न प्रतिपन्न-
वान् ॥१॥ क्षणेन सचेतनीभूयाहं स्वं सैकते स्थितमपश्यम् । न तत्पुरं न सा गङ्गा, न सा कन्या न सा रसा । आक-
स्मिकमिदं जज्ञे, किं विचारपथातिगम् ॥ १ ॥ किमिन्द्रजालं किं वा स्वप्नं किं वा चैतन्यविप्लवः, विचिन्त्येति क्षणं समु-
त्थाय परिभ्रमन् कल्पद्रुमाणां काननमेकमपश्यम् । तमारामं विलोकयन्नहमेकं चित्रकारकं प्रासादमुच्चैः सप्तभूममपश्यम् ।
यावदहं तस्य षष्ठ्यां भुवि गतस्तावदपूर्वं गीतध्वनिमश्रौषम् । ततोऽग्रतो गत्वा द्वारदेशे विलम्बितोऽहं कयाचिद्वे-
त्रधारिण्यागत्य भाषितः । अहं श्रीशारदादेव्या, त्वदाकारणहेतवे । शब्दविद्या प्रतीहारी, प्रेषिता तत्पुरो भव ॥ १ ॥
ततस्तया तत्र नीतः । शारदादेवीमपश्यम् । चारुनारीप्रचारेण, नतेनाप्सरसां पुरः । प्रेक्षाकौतूहलेनोच्चैः, क्षण-
माक्षिप्तचक्षुषीम् ॥ २ ॥ तर्कसाहित्यविद्याभ्यां, वामदक्षिणपार्श्वयोः । वालव्यजनपाणिभ्यां, वीज्यमानां मुहुर्मुहु-
॥ ३ ॥ अथाहं तस्यै देव्यै नमोऽकार्षम् । ततोऽहं वागुदेव्या स्वपादपीठे निवेशितः । हारहूरामधुरया वाण्या
भाषितश्चेति । मा वत्स! विस्मयायत्तं, कार्षीश्चित्तं नृपाङ्गज ! । ततो विनयं कुर्वाणं राजपुत्रं दृष्ट्वा वागुदेवी जगौ–
गङ्गाकन्यया मया तव सम्यगाराधनाभाजः स्तवनपूजनैः सत्त्वपरीक्षणं कृतम् । किंच स्वां प्रतीहारीं प्रेष्य त्वामिहानी

तोऽमि स्वक्रीडावनं दर्शयितुम् । त्वं तु सत्त्ववान् ज्ञातोऽसि । तव तपसाऽहं हृष्टाऽस्मि, प्राच्यैः पूर्वकृतकर्मभिरत्व-धीथैरतुष्टारम्यहं तुभ्यम् । प्राग्यकृतकर्मसम्बन्धः श्रूयताम् । यथाहि—पुरा पुष्पपुरे निर्धनः कोऽपि जनस्तिष्ठतिस्म, महोत्सवेऽन्येद्युर्नागरान् कौमुदीमहोत्सवकरणपरान् वीक्ष्याचिन्तयत् । मन्दभाग्योऽतिनिर्लज्जः, पात्रं निन्दति कर्मणाम् । मया(म)—समः समस्तेऽपि, नास्त्यन्यः कोऽपि भूतले ॥ १ ॥ एवं त्रिधेऽप्युत्सवे जायमाने मया न लब्धं मनागपि भैक्ष्यं, प्राणास्तु न मां मुञ्चन्ति । इह मया यद् भैक्ष्यं न लब्धं तत्पूर्वकर्मविलसितम् । समानेऽपि मनुष्यत्वे, विशेषोऽयमभूच्च यत् । तदत्राहमहो मन्ये, पुण्यापुण्ये निबन्धनम् ॥ १ ॥ तन्मया यत्र क्वचित् किंचिन्न कृतं सुकृतं पुरा । दुःखपात्रं तदत्राह—मभवं विभवं विना ॥ २ ॥ ततोऽहं क्वचिद्भैरवे गत्वाऽहं देहत्यागं करिष्यामि । यथा दुःखभाजनं भवान्तरे न भवामि । पर्यालोच्येति भैरवे भृगुपातं कर्तुं गतः । अभीष्टदेवतायाश्च, नमस्कारं चकार सः । झम्पापातं चिकीर्षुश्च, दिशो व्यालोकयन्नयम् । शमं मूर्तमिवाशोक-तले मुनिमुदैक्षत ॥ १ ॥ दृष्ट्वा च तं पञ्चाङ्गप्रणिपातेन प्रणनाम । ध्यानान्तेऽथ मुनीन्द्रोऽपि, ज्ञानत्रयमयः स्वयम् । ज्ञात्वोपकारमूचे तं, सुधामधुकिरागिरा ॥१॥ भो वत्स ! कुतस्त्वं समागाः उवाच सोऽपि निर्धनः—मम दारिद्र्यमद्यापि न गतं, युष्मद्दर्शनेन चाधुनाऽहं

कृतकृत्योऽस्मि । अथोवाच मुनीन्द्रः—कुतस्त्वमिति मूढोऽसि वत्साविदिततत्त्ववित् । तथाहि—सुलभा जीवलोकेऽस्मिन्, धृतिः श्रीः सुखसम्पदः । चिन्तारत्नमिवात्यन्तं, दुर्लभं जन्म मानुषम् ॥१॥ असारो देहो विनश्यति ततस्तपः कर्तव्यम् । तत्र कर्मविनाशाय, प्रायः कार्यस्तपोऽग्निना । संशोध्यनिर्म्मलः स्वात्मा, बुद्धिमद्भिर्विधीयते ॥ १ ॥ महात्मन् पूर्वदुष्कर्म, निर्मूलनसमीहया । युज्यते तपसाऽऽराद्धुं, ततस्ते ज्ञानपञ्चमी ॥ २ ॥ तावज्जाडयज्वरोद्गारै—र्जीर्यन्ते हन्त जन्तवः । यावन्नाविर्भवत्युच्चैस्तपस्तपनवैभवम् ॥१॥ येषां तपःकुठारोऽयं, कठोरः स्फुरति स्फुटम् । मूलादुच्छेदमायान्ति, तेषां दुष्कर्मवीरुधः ॥२॥ भावेनाराधितो येन, तपोधर्मोऽतिनिमलः तेनैवाराधितौ दान-शीलधर्मावपि ध्रुवम् ॥३॥ सम्पन्नानन्यसामान्यतपःसन्दोहदोहदः । वितनोति फलस्फीतिं, मनोरथमहीरुहः ॥४॥ तत्तत्क्षीणान्तरायस्य, पञ्चमीतपसाऽमुना । मनोरथतरुः सर्व—वांछितार्थं फलिष्यति ॥५॥ इत्युक्तो मुनिना तपोधर्मो निःपुण्येन तेन पुरुषेण गृहीतः । ततः स्वगृहे समागात् । ततः पञ्चम्यादितपः कुर्वाणः स्वजन्मकृतार्थतां चकार सः । ततः आयुः सम्पूर्णीकृत्य स दरिद्री पुरुषः पञ्चम्यादितपः—प्रभावान्नृपतेः सुतो युगबाहुरिति नामाभूः । एवं पश्चाद्भवसम्बन्धः प्रोक्तो मदीयो देव्या । पुनस्तुष्टया देव्योक्तम् । शस्त्रेशास्त्रे च कौशलं लोकोत्तरं भवतु तव । प्रतिपक्षप्रतिक्षेप—क्षममेकं परं पुनः । काममन्त्रं ददौ देवी, कलाकौशलदा-

धिनम् ॥१॥ एवं देवीपार्श्वे यावत् पूर्वं भवं श्रुत्वा शस्त्रशास्त्रादिकलाकौशल्यादिविद्या गृहीता मया, तावदहमात्मानं नदीपुलिनगामिनमपश्यम् । ततोऽहं प्रमोदमेदुरस्वान्तस्त्वां नन्तुं त्वरितमत्रागमम् । एतत्पुत्रोक्तं श्रुत्वा पुत्राय यौवराज्यपदवीं ददौ । कुमारोऽपि श्रियं प्राप्य, सहकार इवाङ्कुताम् । गमयामासिवान्काम—मर्थिसार्थं कृतार्थताम् ॥ १ ॥ ततः प्रभृति युगबाहुः मातापित्रोर्भक्तिं कुर्वाणो जिनधर्मकरणतत्परस्तपः करोति पञ्चम्यादिपर्वसु । अर्द्धरात्रावन्यदा स्वावासपर्यन्ते करुणध्वनिं शुश्राव युगबाहुः । जिज्ञासुः प्रभवं तस्य, कुमारः करुणामयः । कृपाणपाणिर्निर्गत्य, गतवान् ध्वनिसंमुखम् ॥ २ ॥ ततोऽन्तेवणं गतो युगबाहुरेकां स्त्रियं रुदन्तीं म्लानीभवन्मुखाम्भोजां लावण्यपुण्यखानिमपश्यत् । तदा नरेण केनचित् संभोगार्थं प्रार्थ्यमानां रुदन्तीं वीक्ष्य कुमारो वृक्षान्तरे छन्नं तस्थौ । तदा स पुमांस्तां स्त्रियं प्रत्येवमवदत् । मयि प्रपन्नदास्येऽपि, दास्यते यदि नोत्तरं । तदसिर्दृश्यतामेष, स्मर्यतामिष्टदेवताम् ॥ १ ॥ ऊचे कन्या तदा मूढ ! स्मरामि कमिवापरम् । युगबाहुः कुमारोऽस्ति, हृदि मेऽद्वैतदैवतम् ॥ २ ॥ यद्यत्र मन्दभाग्याया, नैव दैवेन दर्शितः । भवान्तरेऽपि मे भूयात्, प्राणनाथस्तथापि सः ॥ ३ ॥ हृष्टः स्वनामश्रवणात् कुमारो दध्यौ—इयं मम नाम कथं वेत्ति । कुमारः खड्गमाकृष्य, ततः क्रोधादधावत । स्त्रीघातपातकिन् । क्रूर ! क रे यासीति तर्जयन् ॥ १ ॥

अथासौ पुरुषः प्राह, भद्र ! द्रुतमितःसर। रजकस्यायुषि क्षीणे, खरवान्म्रियसे कथम् ॥१॥ कुमारोऽवग्—प्राणैः सत्वरगत्वरैरेभिः स्वार्थः परार्थश्च पुम्भिः कर्तव्य एव। किं चाऽतिक्रूरमेतत्ते, निर्मातुं कर्म नोचितम्। लोकद्वयविरुद्धं हि, विदधाति सुधीः कुतः॥ १ ॥ नरोऽवग—दुष्ट ! किं ममाप्युपदेशं ददासि ?। इत्युक्त्वा स नरो युगबाहुं हन्तुमुत्तस्थौ। खड्गाखड्गि युद्धं चिरं द्वाभ्यां कृतम्। अथ कुमारमजय्यसारविक्रमं हन्तुं दन्दशूकास्त्रं साक्षेपमक्षिपन्नर;। ततः कुमारः शारदादत्तं मन्त्रं नागपाशनाशाय सस्मार। तयोरस्त्रमस्त्रेण निवारयतोर्मिथश्चिरं युद्धमभूत्। क्रमात्कुमारेण स्तम्भनीविद्यया स नरः स्तम्भीकृतः। तदा कुमाररूपमालोक्य सा कन्या विस्मयोत्ताना मनसैवं व्यचिन्तयत्। स एव यदि राजेन्द्र—नन्दनोऽयमिहागमत्। उपचक्रे ममैतेन, नष्टो विद्याधराधमः॥ १ ॥ ततः स नरस्तेन बन्धनान्मुक्तः सन् कुमारस्य पादयोः पपात। तदा कोऽप्याविर्बभव विद्याधरो विमानादुत्तीर्य भासुरोदारनेपथ्यधरः। स विद्याधरः कुमारस्य पुरो भूत्वा जगौ—भो युगबाहो ! त्वं सुस्थितः सन् शृणु मे वचः। तथाहि—भरतक्षेत्रसीमान्त—वैताढ्योत्तरदिग्गतम्। अस्त्यपास्तामरपुरं, पुरं गगनवल्लभम्॥ १ ॥ तत्र मणिचूडनामा खग आसीत्। तस्य प्रिया मदनावली। तयोः पुत्री जलदेवतया दत्ताऽनङ्गसुन्दरी जज्ञे। क्रमाद्यौवनं प्राप्ता। चतुः-

षष्टिकलाकुशलाऽनङ्गसुन्दरी जाता । साऽनङ्गसुन्दरीति प्रतिज्ञां चक्रे । यः कश्चित् मत्कृतस्य प्रश्नचतुष्टयस्य प्रत्युत्तरं दास्यति स एव भावी मम भर्ता खेचरो भूचरो वा । ततस्तयाऽनङ्गसुन्दर्या कृतां प्रतिज्ञां श्रुत्वाऽनेके विद्याधरा नृपास्तत्राययुः । गर्वतः सर्वतोऽभ्येत्य, प्रश्नोत्तरबहिर्मुखाः । वृथाभवन्नपुण्याना–मिव लक्ष्मीमनोरथाः ॥ १ ॥ तत्रार्तेन भूभर्त्रा, पृष्टो नैमित्तिकोत्तमः । युगबाहुं शशंसास्या, भाविनं भूचरं वरम् ॥ २ ॥ ततः प्रभृति सा तत्र, लक्ष्मीरिव मुरद्विषि । वल्लभावाऽभवत्कामं, गुणैः श्रुतिपथागतैः ॥ ३ ॥ पूर्वेद्युः प्रातरेवास्य, सभासीनस्य भूभुजः । अगात्पवनवेगाख्यः, खगः शक्रपुरेश्वरः ॥ ४ ॥ पुत्रीमुद्वोढुकामोऽकृतप्रश्ननिर्णयो विलक्षो जहारैनामनङ्गसुन्दरीम् । ततोऽनेके खेचराः स्वस्वस्थाने ययुः । अस्यास्तु मातुलः सोऽह–मिहायातोऽस्मि दैवतः । अयं पवनवेगाख्यो, जामेयोऽस्ति ममाप्यसौ ॥ १ ॥ इतोऽकस्माच्चत्र मणिचूडोऽपि सपरिवारः समागात् । मणिचूडो जगौ–भो महाबाहो ! युगबाहो ! ममेयं सुता मम जीवितमस्ति । पूर्वं नैमित्तिकेन मया पृष्टेन त्वमस्याः पतिः कथितोऽसि । सांप्रतं तु ज्ञापितोऽसि विद्याधरेशैः । तत्त्वां प्रतिप्रदानेऽस्याः, का नाम प्रभुता मम । किन्तु प्रतिज्ञानिर्वाहोऽ–प्यस्यास्त्वय्येव तिष्ठति ॥१॥ निष्कारणोपकर्तारः, क नाम स्युर्भवादृशाः । दृष्टः किं विष्टपोज्जीवी, यदिवा न दिवाकरः ॥ २ ॥ एवं

तस्मिन् खगे वदति ज्ञात्वा स्वपुत्रस्थितिवृत्तान्तं विक्रमबाहुः समागात् । सङ्गमस्तत्र चान्योऽन्य-मुभयोरपि भूभुजोः। प्रशस्यः समभूद्गङ्गा-कालिन्दीस्रोतसोरिव ॥ १ ॥ ततः पवनवेगोऽपि युगबाहुं प्रणम्याह-मया स्त्रीहरणात्पापं कृतं तत् क्षमस्व। ततो युगबाहुस्तं स्वसेवकं चक्रे। मणिचूडः सर्वान् खगान् स्वपुरेऽनैपीत् । ततः पुरीपरिसरे रम्ये संसूत्र्य मण्डपं कारयामास मञ्चोन्मञ्चान् । ततः सर्वेषु भूचरेषु खेचरेषु मञ्चोन्मञ्चेषु उपविष्टेषु विक्रमबाहुमणिचूडभूपावुपविष्टौ । युगबाहुरपि तत्रोपविष्टः । ततोऽनङ्गसुन्दरी याप्ययानारूढा सारालङ्कारवस्त्रभूषितगात्रा तत्रागत्य पितुश्चरणौ प्रणम्य निषसाद पितुरग्रतः । ततो राजाऽवग्-इयं मम पुत्री प्रश्नचतुष्टयं स्वकृतं जल्पिष्यति । तस्य यः प्रत्युत्तरं दास्यति स परिणेष्यति मत्पुत्रीम्। ततस्तयोक्तं कः सकलः १, कः सद्बुद्धिः २, कः शुभगः ३, को विश्वजयी ४, एतस्य प्रश्नचतुष्टयस्य प्रत्युत्तरो न केनाऽप्यपुरि । ततो युगबाहुस्वर्णपाञ्चालिकापार्श्वादेवं पूरयामास। कः सकलः? सुकृतरुचिः १, कः सद्बुद्धिः? विधेयकरुणापरः २, कः शुभगः? शुभवादी ३, को विश्वजयी? जितक्रोधः ४ ॥१॥ एवं समस्यायां पूरितायां जयजयारावे जायमाने कुमारी युगबाहुकण्ठे वरमालां चिक्षेप । शुभे मुहूर्ते विशेषतो राजा तयोः पाणिग्रहणं कारयामास । ततो मणिचूडो विक्रमबाहुप्रभृतीन् भूपान् सद्वस्त्रभूषणादिना मानयामास । ततो विक्रमबाहुः पुत्रयुतः स्वपुरमाययौ ।

नृपः पवनवेगोऽपि स्वपुरं ययौ । क्रमादन्येद्युर्मन्त्रीश्वरानापृच्छ्य जिनेन्द्रस्य पूजां कारयित्वा बन्दीजनमोक्षणं च कृत्वा स्वपुत्रं युगबाहुं स्वपदेऽभिषिच्य संयमश्रीगुरूपान्ते संयमं जग्राह । युगबाहुनृपस्तु पितृदत्तविद्ययाऽनेकान् वैरिणागन् वशीचकार । मणिचूडविद्याधरेणापि दीक्षां जिघृक्षुणा युगबाहुर्विद्याधरनायकश्चक्रे । अन्येद्युरनङ्गसुन्दरी शुभेऽह्नि सत्स्वप्नसूचितं पुत्रमसूत । जन्मोत्सवं कृत्वा सूनो रत्नबाहुरिति नाम ददौ राजा । वर्द्धमानः क्रमाद्धर्म-कर्मशास्त्राणि पाठितः पित्रा । अन्येद्युः श्रीविक्रमबाहुमुनिर्विहरमाणः प्राप्ताचार्यपदस्तत्राययौ । ततः श्रीयुगबाहुर्धर्मं श्रोतुं गतस्तत्र । गुरुरित्याह—धर्मो विशिष्टः पितृमातृपत्नी—सुहृत्सुतस्वामिसहोदरेभ्यः । सनातनोऽयं सह याति मृत्यौ, दुःखापहोऽमी पुनरीदृशा न ॥ १ ॥ धर्मो सदा मङ्गलमङ्गभाजां, धर्मो जनन्युदलिताखिलार्तिः । धर्मः पिता प्रतिचिन्तितार्थो, धर्मः सुहृद्वर्तितनित्यहर्षः ॥ २ ॥ विद्युद्विलासस्थितिजीवितव्यं, सन्ध्येव लक्ष्मीः क्षणदृष्ट-नष्टा । तरङ्गभङ्गप्रतिमं प्रभुत्वं, धर्मस्ततः शाश्वत एव सेव्यः ॥ ३ ॥ इत्यादि धर्मोपदेशं श्रुत्वा युगबाहुः स्वपुत्रं रत्नबाहुं स्वपदेऽभिषिच्य श्रीविक्रमबाहुगुरुपार्श्वे दीक्षां ललौ । तदा गुरुभिरुक्तं—चारित्रं शुद्धं पालनीयं, यतश्चारित्रात् स्वर्गापवर्गादिसुखं भवति । यतः—एके सिंहीभूय चारित्रं गृह्णन्ति शृगालीभूय पालयन्ति १, एके शृगालीभूय

चारित्रं गृह्णन्ति सिंहीभूय पालयन्ति २, एके शृगालीभय चारित्रं गृह्णन्ति शृगालीभूय पालयन्ति ३, एके सिंहीभूय चारित्रं गृह्णन्ति सिंहीभूय पालयन्ति ४, त्वया चारित्रं चतुर्थभङ्गे पालनीयम्। श्रुत्वेति गुरुवचो युगबाहुः षष्ठाष्टमपक्षक्षपणमासक्षपणादितपः कुर्वाणो युगबाहुः कर्मविच्छेदं चकार। युगबाहुना तपः कुर्वता सर्वकर्मक्षयात् केवलज्ञानं प्रपेदे। ततोऽनेकभव्यजीवान् चिरं प्रबोध्य युगबाहुर्मुक्तिं गतः। ॥ इति युगबाहुकथा समाप्ता ॥ ३५ ॥

अज्जगिरि अज्जरक्खिअ, अज्जसुहत्थी उदायणो मणगो। कालयसूरी संबो, पज्जुन्नो मूलदेवो य ॥५॥

लभन्ते भवीनः सौख्यं, कुर्वाणा धर्म्ममार्हतम्। आर्यमहागिरिसुह-स्तिनाविवावनीतले ॥ १ ॥

तथाहि---स्थूलभद्रमुनीन्द्रस्य शिष्यौ आर्यमहागिरिसुहस्तिनावभूताम्। चरणाविव धर्मस्य, ज्ञानस्य नयने इव। तावभूषयतां साङ्ग--दशपूर्वधरौ धराम् ॥ १ ॥ आर्यमहागिरिरनेकशः शिष्यान् वाचनादानैर्निष्पादयामास। निजं-गच्छभारं सुहस्तिनि न्यस्य। एकोऽभून्मनसा कामं, जिनकल्पार्हवृत्तिधीः। व्यवच्छेदाज्जिनकल्पस्य, गच्छस्थोऽपि तदर्हकृत्। महागिरिर्महीपीठे, विजहार महातपाः ॥ १ ॥ तौ सूरी पाटलीपुरमध्येऽन्येद्युर्ययतुः। तत्र वसुभूतिर्महे-भ्यो बोधितोऽस्ति श्रीसुहस्तिभिः जीवाजीवादितत्त्वज्ञोऽभूत्। क्रमाद्वसुभूतिः सुश्रावको निजस्वजनान् बोधयितुं

प्रवृत्तः। तेन ते बोधयितुं न शेकिरे। प्रतिबोधयितुं बन्धुवर्गं मोहग्रहग्रस्तं तद्वानिव वसुभूतिः स्वयं स्वगुरुं तत्र निन्ये। तत्र व्याख्या भवतापापहारिणी श्रीसुहस्तिना समारब्धा। तत्र भिक्षार्थमार्यमहागिरिरायर्यौ। तत्क्षणमेवोत्थाय श्रीसुहस्तिसूरिर्भक्तिपूर्वं श्रीआर्यमहागिरिं ववन्दे। श्रेष्ठी जगाद—भगवन् सुहस्तिसूरे! तव सर्वगुरोरपि किमेष गुरुः?। श्रीसुहस्ती प्राह—गुरवोऽमी मम तपश्चरन्तोऽत्र त्यागार्हं भक्तं पानं च गृह्णते कर्मरोगच्छिदे एवंविधं तपः कुर्वते-स्वामी। एवं विनयं तस्य सूरेर्वीक्ष्य धर्मोपदेशमाकर्ण्य च तत्कुटुम्बं प्रबुद्धम्। ततः सुहस्ती तान् बन्धून् प्रतिबोध्य स्वाश्रयं ययौ। इतो वसुभूतिरभाषिष्ट, स्वजनान् प्रति—ईदृग् मुनीन्द्रो मोक्षमार्गदायी यदाऽऽत्मीयगृहे समायाति, तदाऽस्मै मुनीशाय त्यज्यमानं भक्तं पानं च देयम्। तद्दानं बहुफलं मुक्तिदायिनं भविष्यति। अथ तत्रैव भिक्षार्थं प्राप्तोऽन्यदा श्रीमहागिरिस्तत्रागात्। यदा ते श्राद्धास्त्यज्यमानभक्तपानप्रतिलाभनायोद्यता अभूवन्। तदा ज्ञानाद्-शुद्धमाहारं ज्ञात्वा महामुनिरुपाश्रये गत्वा सुहस्तिसूरिं प्रति जगाद—त्वदुपदेशात्ते श्राद्धा अशुद्धां भिक्षां मह्यं दातुमसज्जयन्। नेदं पुनः करिष्याम्यशुद्धमाहारमित्युक्त्वा आर्यसुहस्ती क्षमयामास विनीतात्मा। जीवन्तस्वामि-प्रतिमारथयात्रां निरीक्षितुं आर्यमहागिरिसुहस्तिसूरी गच्छतः स्मावन्तीम्। तदा तत्र नृपः संप्रतिर्जितानेकवैरिचक्र

आसीत् । उत्सवादथ श्रीजीवन्तस्वामिनो निर्ययौ रथः । संसारसागरोत्तारकारणं नीयमानः स रथोऽन्वीयमानः सुहस्तिसूरिणा श्रीसङ्घेन च पुर्यां स्थाने स्थाने पर्यटतिस्म । इतो रथो भ्राम्यमाणो राजद्वारमागात् । तदा राजा संप्रतिर्गवाक्षस्थः श्रीसुहस्तिनं सूरिं गच्छन्तमवलोक्य दध्याविति—किमेष यतीशः शान्तात्मा पुण्यमूर्तिर्मया पूर्वस्मिन् भवे वा कुत्रचिद् दृष्टोऽसौ, येनास्मिन् दृष्टेऽतीव मोदो जायमानोऽस्ति । "यस्मिन् दृष्टे भवेन्मोदो, द्वेषश्च प्रलयं व्रजेत् । स विज्ञेयो मनुष्येण, बान्धवः पूर्वजन्मनः ॥ १ ॥" इत्येवं पुनर्विमृशन् प्राप्तमूर्च्छो नृदेवः पपातावनीतले । तदा मन्त्रिभिरनेकैर्वातप्रक्षेपादिभिरुपचारैः सचेतनीकृतः । सचेतनो भूत्वा जातिस्मृतिं प्राप । उत्थाय तत्क्षणान्नृदेवो गुरुं त्रिःप्रदक्षिणीकृत्य श्रीसुहस्तिनं पूर्वभवसम्बंधिनं स्वगुरुं जानन् भूतलमिलन्मौलिर्ननामोच्चैः । ततो हस्तौ योजयित्वा राजा सानंद उवाच—भगवन् ! केन फलेन जिनधर्मः फलति । आख्यद्गुरुस्तरोरस्य, सुपक्वममृतं फलम् । अपक्वफलभेदास्तु, कल्पाश्चानुत्तराश्च ते ॥ १ ॥ पुनः पृथ्वीशः पप्रच्छ—अव्यक्तस्य सामायिकस्य किं फलं भवति ? । गुरुराह—सामायिकस्य कर्तुर्यत्पुण्यं भवति, तस्य सङ्ख्यां कर्तुं शक्यते न । "सामाईअंमि कए, समणो इव सावओ हवइ जम्हा । एएण कारणेणं, बहुसो सामाइअं कुज्जा ॥ १ ॥" ततोऽव्यक्तसामायिकाद्राज्यं

प्राप्यते ततो राज्यफलम्। एतत् श्रुत्वा राजा जगौ–भगवन्! अहं त्वयोपलक्ष्यो न वा। उपयोगेन विज्ञाय गुरुभिरमाह्–ज्ञानोपयोगात् विहरन्तो वयं श्रीमहागिरिसूरिभिः समं सगच्छाः कौशाम्ब्यामागच्छाम। साधुबाहुल्यात् वसतेः संकीर्णत्वात् पृथक् स्थितौ आवां तदाऽतिदुर्भिक्षे प्रवर्तमाने श्राद्धा महर्द्धिका अस्मभ्यं बहु अन्नं विहारयन्तितराम्। कस्यापि श्रेष्ठिनो गृहे साधवोऽस्मदीया भिक्षायै ययुः। तदा एको रङ्कस्तेषां पृष्ठिस्थो धान्यं बहु विहार्यमाणं वीक्ष्य वर्त्मनि जगौ–अहं दीनो बुभुक्षितोऽस्मि, म्रियेऽहं तेन भोज्यं किंचिद्दीयताम्। साधवोऽस्मदीया जगुः–गुरवो जानन्ति वयं तु तदधीनाः, स्वयं दातुं किमपि नेश्वराः। ततो रङ्को गुरुपार्श्वे गत्वा भोजनमयाचत। तदा गुरुभिरतिशयज्ञानवद्भिस्तस्याग्रेतनं भवं दृष्ट्वा प्रोक्तं–व्रतं चेद्व्रजसे तदा लभसे भक्तमस्मत्पार्श्वात्। अचिन्तयदयं रङ्कः–चिरं कष्टं सहाम्यहम्। तद्वरं व्रतजं कष्टं, यथेष्टं यत्र भुज्यते ॥ १ ॥ रङ्कः प्राह–मम संयमं ददत यूयम्। ततो गुरुभिः संयमश्रीस्तस्मै विश्राणिता। अल्पमायुर्मत्वा स्वन्नपानदानेन भोजयित्वा भाववृद्धये साध्वीपार्श्वे साधुयुतो रङ्कसाधुः प्रेषितः। साध्वीभिरुत्थाय महेभ्यप्रियापुत्रीयुताभिर्वन्दितो यतिः। तदा ध्यातं तेन–अहो धर्मस्य साम्राज्यं, मया यत् कदाचिद् दृष्टं नान्नं तद्भुक्तं, एवंविधाः साध्व्यादयो मामद्य दीक्षितं वन्दन्ते। वर्द्धमानभावो रङ्कः पश्चात्

शालायां समागतोऽकस्मादतिस्निग्धाहाराजीर्णत्वात् ग्लानीभूतो रात्रौ तस्यां गुरुभिर्निर्यामितो मृतः । स रङ्कराड्गुरुदत्त-
सामायिको विपद्य राजंस्त्वं मृणालनृपकुणालप्रियाङ्गजोऽभूः, वयं ते रङ्कस्य दीक्षादातारः स्मः । पुनः भूपोऽवग्—भगवत्येव
राज्यसम्भवो भवत्प्रसादः । भगवन् ! यदि तदा युष्माकं दर्शनं नाभवन्मम, तदा मम केवलं संयमः । पूर्वजन्मनि
यूयं गुरवो जाताः । अस्मिन्नपि भवे भवन्तो गुरवो भवन्तु । श्रीसुहस्तिसूरिराह—राजन्नाजन्मस्वर्गापवर्गसुखदं
प्रवरं जिनधर्म्मं भज । येन धर्म्मेण संसारान्निस्तारो भवति । ततो राजा बहुपरिवारयुक् श्रीगुरुपार्श्वे धर्म्मं श्रोतुं
गतः । ततो गुरुराह—"त्रिवर्गसंसाधनमन्तरेण, पशोरिवायुर्विफलं नरस्य । तत्रापि धर्मं प्रवरं वदन्ति, न तं विना
यद्भवतोऽर्थकामौ ॥ १ ॥ ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं, चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते
जडाः । विक्रीय द्विरदं गिरीन्द्रसदृशं क्रीणन्ति ते रासभं, ये लब्धं परित्यज्य धर्म्ममधमा धावन्ति भोगाशया ॥ २ ॥"
संप्रतिर्जैनधर्म्मं जग्राह । देवो गुरुधर्म एव मे भवतु । ततः संप्रतिभूपतिर्जिनधर्मवासितसप्तधातुश्राद्धपुङ्गवोऽभूत् ।
यतः—" आसन्ने परमपए, पावेयव्वंमि सयलकल्लाणे । जीवो जिणिंदभणियं, पडिवज्जइ भावओ धम्मं ॥ १ ॥ "
सन्ध्यात्रये जिनार्चां करोतिस्म राजा । साधर्मिकवात्सल्यं प्रतिदिनं व्यधाच्च । सप्तक्षेत्र्यां धनं व्ययन् मनागपि

वेलां निष्फलां न निर्गमयामास । अवाप्य धर्मावसरं विवेकी, कुर्याद्विलम्बं नहि विस्तराय । तातो जिनस्तक्षशिलाधिपेन, रात्रिं व्यतिक्रम्य पुनर्न नेमे ॥१॥ अदरिद्रनिदानानि दानानि याचकेभ्यो दीनेभ्यो दत्तेरम भूपः ततो दिग्यात्रां कुर्वाणः संप्रतिभूपास्त्रिखण्डं भरतं साधयामास । क्रमात् संप्रतिभूपतेस्त्रिखण्डाधिपतेरष्टौ सहस्रं राजानः सेवां कुर्वते, पञ्चाशत्सहस्रमिता मतङ्गजा आसन्, एककोटिमितास्तुरङ्गमा जाताः, कोटिसप्तमिताः सेवकाः, रथानां कोट्यो नवाभवन्, अनेके देवाः सर्वत्र सान्निध्यं कुर्वते । सुवर्णरूप्यटंककादिकोशस्य प्रमाणं तस्य भूपतेर्न ज्ञायते विबुधैरपि । श्रीसुहस्तिसूरिगुरूक्तं धर्मं सदा कुर्वन् बहु पुन्यमर्जयामास । श्रीसङ्घेन सह वर्षे वर्षे चैत्ययात्रोत्सवः संप्रतिभूपेन तन्यते । धुर्यो भूनरथ रथः, श्रार्हन्तस्य तीर्थकृतः । स्वयमात्मेव संसाग-चैत्यद्वारादकृष्यत॥१॥पुरि तस्यां श्रीसुहस्तिगुरवोऽपि नानादेशेषु विहृत्य तत्रागच्छन्तिस्म । तदा श्रीजिनचैत्येभ्यो, वालयित्वा विलोचनम् । चमत्कृतैः ससम्यक्त्वै-र्दृश्यमानो वैमानिभिः॥१॥ न ननतुर्विधाऽऽतोद्य वाद्योरुप्रेक्षणीयकः । आनन्दनिद्रानिर्मग्न जनः स्वप्नायितोत्सवः ॥२॥ सरासैः श्राविकालोके र्भ्रमद्भिःर्गकुल्यागिनैः । धर्मार्णवमहावर्तैरिव मार्जितपातकः ॥ ३ ॥ पूज्यमानजिनो भक्तैः, मत्यट्टाट्टालकालयम् । काश्मीरनीरपूरेण, सीच्यमानक्ष्मोऽग्रतः ॥ ४ ॥ चतुर्विधमहासङ्घचतुरङ्गचमूवृतः । रथस्तीर्थपतेर्मोह—द्रोहिण्या यात्रयाऽचलत् ॥ ५ ॥

पञ्चभिः कुलकम् । त्रिखण्डक्ष्मातलोद्धार-धुर्यैः संप्रतिभूपतेः । भाग्यैः स कृष्यमाणोऽपि, राजद्वारं शनैर्ययौ ॥ १ ॥ कर्माण्युच्छेत्तुमिवाष्टौ अष्टप्रकाराभिः पूजाभिः संप्रतिभूपो जिनप्रतिमामपूजयत् । तत्रैवाहूय स सांप्रतिः आवेताढ्यं सामन्तान् तानित्यवोचत्—अपि चेन्मयि यदि भवन्तो भक्ताः स्युस्तदा श्रमणानामुपासका भवन्तु । इति संप्रतिराजादेशात्ते भूपाः स्वस्वदेशे जैनधर्म्मं श्रमणोपासकपरास्तेनिरे । आर्यदेशस्थान् भूपान् जिनधर्म्मकारकान् कृत्वा शुद्धधीः सांप्रतिभूपतिरिति दध्यौ निशीथे । अनार्यदेशेषु मया कथं जैनधर्म्मः कारयिष्यते लोकपार्श्वात् । साधून् विना धर्मोपदेशं को ददाति । तेन प्रथमं श्रमणोपासकाः प्रेष्यन्ते । ते तत्र धर्मोपदेशं दत्वा श्रावकान् कुर्वते । ततः संप्रतिभूपेन बहवः श्रावका यतिवेषधारकाः कृत्वा चालिताः तत्रोपरि प्रोक्तं—तत्र भवद्भिर्द्विचत्वारिंशद्दोषवर्जितमाहारं गृहीत्वा साधुभिरिव भवद्भिः स्वाध्यायादि सर्वं कर्तव्यं नो चेदत्र वः सर्वो ग्रासो गृहीष्यते मया । एवं मदुक्तं चेद्यदि करिष्यते तदा द्विगुणो ग्रासो दास्यते मया । ततः संप्रतिभूपतिनिर्देशात्ते श्रमणोपासका गृहीतसाधुवेषा निर्वाहमात्रगृहीतधना अनार्यदेशेषु ययुः । तत्रत्या लोकाः श्रीसम्प्रतिभूपगुरून् मत्वा धर्मोपदेशमिति शृण्वन्ति । तथाहि-धर्माज्जन्मकुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसम्पत्तयः । कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते,

धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥१॥ अहिंसासत्यमस्तेयं, त्यागो मैथुनवर्जनम् । एतेपु पञ्चसूक्तेषु, सर्वे धर्माः प्रतिष्ठिताः ॥ २ ॥ प्राज्यानि राज्यानि सुभोजनानि, सौभाग्यमारोग्यसुयोग्यवार्ता । रामा रमा रम्ययशोविलासाः, स्वर्गापवर्गौ प्रभवन्ति धर्मात् ॥ ३ ॥ दारिद्र्यमुद्रा परकर्म्मकृत्वा, दुष्टस्वभावासुखसङ्गतानि । एकत्वरङ्कत्वकदन्नभो-ज्य-कुरूपमुख्यानि भवन्त्यधर्मात् ॥ ४ ॥ नित्यं शुद्धान्नपानदानेन प्रतिलाभयन्ति ते तत्रत्या लोकाः क्रमाच्चैर्यतिभि-स्तद्देशस्थे बहवो जना जिनधर्मं ग्राहिताः जिनभवनादिपु स्वां श्रियं व्ययन्तिस्म । तैः साधुभिस्ते अनार्यदेशवास्त-व्यजनाः श्रावकीकृताः सन्तो जल्पन्तिस्म । भवतां को गुरुरस्ति । तैरुक्तमस्माकं गुरुः श्रीसुहस्तिसूरिः । क्रमात्संप्रतिना साधुविहारमनार्यदेशेपु जायमानं श्रुत्वा हृष्टम् । ततोऽनेके साधवस्तेपु तेपु अनार्यदेशेपु गुरुभिर्विहारिताः । अग्रेतना ये साधवस्तत्र गतास्तेऽपि गृहीतं संयमं न मुमुचुः । यतः—" अद्यापि नोज्झति हरः किल कालकूटं, कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे । वारांनिधिर्वहति दुर्वहवाडवाग्नि-मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ १ ॥" अन्येद्युः श्रीगुरु-भिरुक्तं—भो संप्रतिभूप । विशेपतो दानमनर्गलं दीयते । दानं विना भोगो न भवति । चतुर्धा धर्मः श्रीजिनैरुक्तः । तत्र दानधर्मो मुख्यतया श्रीवीतरागैरपि प्रोक्तः । यतो दानं विना अपरे धर्माः कर्तुं न शक्यन्ते । यतः "निखि-

लेष्वपि धर्मेषु, दानधर्मो विशिष्यते । दानधर्मं विना यस्मान्मुक्तिर्नैवाप्यते क्वचित् ॥ १ ॥" इत्यादि० । ततो ग्रामे ग्रामे पुरे पुरे सत्रागारानकारयन्नृपः । अन्येद्युर्गुरुपार्श्वे धर्मोपदेशं श्रोतुं गतः । तदा श्रीगुरुभिः प्रोक्तम् । जिणभवणबिंबपुत्थयसंघसरूवेसु सत्तखित्तेसु । ववीयं धणंपि जायइ शिवफलाइमहो अणंतगुणं ॥ १ ॥ क्ष्माभृद्रंकतयोर्मनीषिजडयोर्नीरोगरोगार्तयोः, श्रीमद्दुर्गतयोर्बलाबलवतोः सद्रूपनीरूपयो. । सौभाग्यासुभगत्वसङ्गमजुषोस्तुल्ये पितृत्वे पुन-र्यत्तत्कर्मनिबन्धनं तदपि नो जीवं विना युक्तिमत् ॥ २ ॥ प्रासादान् श्रीजिनेन्द्राणां, कारयन् भव्यमानवः । लभते सपदि श्रेयः सुखं श्रीहरिषेणवत् ॥ ३ ॥ पुरा श्रीहरिषेणचक्रवर्ती श्रीगुरूक्तधर्ममाकर्ण्य षट्खण्डामखण्डां महीमभ्रंलिहजिनागारैर्भूषयामास । ततः स चक्रवर्ती सर्वकर्मक्षयं कृत्वा मुक्तिं ययौ । इति श्रुत्वा संप्रतिचक्री त्रिखंडां महीं जिनमन्दिरैरमण्डयत् । सत्रागारेषु दीयमाने यदवशिष्टं भुक्तं भक्तघृतादिकं भवति तत् सत्रागाराधिकारिणो गृह्णन्ति स्म । नृपोऽन्यदा सत्रागाररक्षकान् प्रति जगौ । यद्यदवशिष्टमन्नं भवति । तत्तत् व्रतिभ्यो देयं शुद्धत्वात् साधवोऽकृताकारितमाहारं गृह्णन्ति । भवद्भ्यो विभवं भूरि, गृहनिर्वाहहेतवे । दास्यामि कामितं यद्वः, पूरयिष्यामि तच्च भोः ॥ १ ॥ राजाज्ञया साधुभ्योऽन्नं प्रासुकं ददिरे सत्रागाररक्षकास्ते । ततस्तैः दीयमानमन्नं प्रचुरं विशिष्ट-

भगुरुमपि गुरुबुद्ध्या गृह्णन्तिस्म साधवः । सेहे स्वयं सुहस्ती तु, सदोषं तद्विदन्नपि । सूनोरिव स्वशिष्यस्य, को न रागेण लिप्यते ॥ १ ॥ अन्येद्युः श्रीआर्यमहागिरिः श्रीसुहस्तिसूरिं तथाविधाहारं गृह्णन्तं श्रुत्वा तत्रोवाच । किं राजपिण्डं सदोषं जानन्नपि त्वं गृह्णासि । गृह्णानान् साधूनप्यनुजानासि । सत्रागारे तु साधूनामाहारं गृहीतुं न कल्पते । यतः—" आहाकम्मुद्देसिय पूईयकम्मे य मीसजाए य ठवणा पाहुडिआए० १ । सुहस्त्यूचे—प्रभो भक्तिभासुरा अमी ददते दानम् । अस्माभिरीदृग्दानविश्राणनविषये किमप्युक्तं नास्ति । स्वभावेन परार्थमत्र निष्पाद्यमानमस्ति तेनात्र को दोषः । नणु मुणिणा जं न कयं, न कारियं नाणुमोइअं तंसि, गिहिणा कडमाईयउ, तिगरणसुद्धस्स को दोसो ॥१॥ न कारितं कृतमनुगतमस्माभिरतोऽत्र दाने को दोषः महागिरिगुरुः स्माह । सच्चं तहवि मुणंतो गिन्हंतो छुदए पसंगं से । निद्धंधसो य गिद्धो, न मुयइ सजीयंपि बहु पच्छा ॥ १ ॥ महागिरिगुरुः स्माह, शान्तं पापं किमात्थ भोः । अनेन वचसा शस्त्र—पातो भवति देहिनाम् ॥ २ ॥ पृथग् जनानां साधूनां, सामाचार्येव सङ्गतिः । सामाचारी विभेदेन, दुर्गतिर्जायते खलु ॥ ३ ॥ भयेन डिम्भवद्वेप—मानो मानयितुं गुरून् । पादावादाय शिरसा, जगावार्य-गुरुस्त्वयं ॥ १ ॥ हहा महापराधोऽयं, मयैको विदधे विभो । । क्षन्तव्यं भवताऽथैक—वारं कुर्वे इदं न तु ॥ २ ॥

श्रीमहागिरिसूरिराह—भवतः को दोषो दीयते । दुःषमाकालविलसितमिदं यतः इति संबोध्य श्रीसुहस्तिसूरिं श्रीमहागिरिसूरिः श्रीजीवन्तस्वामिनं जिनं नन्तुमवन्त्यां ययौ । तत्र जिनं नत्वा यत्र दशार्णभद्रशक्रौ श्रीवीरं समवसरणस्थं नन्तुं स्वस्वर्द्धिसमेतौ समेतौ यत्र च गजेन्द्रोऽङ्घ्रिं न्यधत्त । तस्मिन् तीर्थे जिनं नन्तुं ययौ । तत्रानशनं गृहीत्वा श्रीमहागिरिसूरिर्देवलोकं गतः । ततश्च्युत्वा मुक्तिं यास्यति । श्रीसुहस्तिसूरिभिरप्यनेकान् भव्यशरीरिणः प्रबोध्य त्रिदिवं भेजे । क्रमान्मुक्तिं यास्यति । इति श्रीआर्यमहागिरिश्रीसुहस्तिसूरिकथा समाप्ता ॥ ३६ ॥

स्वकुटुम्बं भवाम्भोधौ, पतन्तं वाणीवेडया । उत्तार्य भविकैरार्य, रक्षितेनेव वेगतः ॥ १ ॥

आर्यरक्षितसूरिदीक्षादिसम्बन्धः श्रीवज्रस्वामिचरित्रे पुरा प्रोक्तोऽस्ति स वाच्यः । एकदा श्रीआर्यरक्षितसूरिः स्वकुटुम्बं प्रतिबोधाय चचाल । तत्र गतो गुरुः स्वकुटुम्बप्रबोधार्थम् । ततः श्रीआर्यरक्षितेन स्वकुटुम्बं प्रतिबोधितम् । रुद्रसोमा माता भगिनी च बहुपरिवारयुता संयमं जग्राह । पुनः सोमदेवो जनको दीक्षां पालयितुमशक्तः श्रीआर्यरक्षितादिकुटुम्बस्यानुरागेण तैः समं ग्रामे ग्रामे पुरे पुरे वने वने गच्छति । न पुनः सोमदेवो लज्जया रजोहरणादि गृह्णाति । यदा श्रीआर्यरक्षितःयतिर्दीक्षार्थं पितुः कथयति । तदा सोमदेवोऽवग् । अत्र मम सज्जनाः सन्ति ।

नेन स्वजनमध्येऽहं लज्जामि । यदि नमाम्बरयुगं कुण्डिकां छत्रिकोपानहौ यज्ञोपवीतं अनुजानीत यूयं तदाऽहं दीक्षां गृहीष्यामि । गुरुभिरुक्तं—एवं भवतु । ततो विप्रवेषयुतः प्रव्रज्यां जग्राह सोमदेवः । ततो गुरुणाऽनुज्ञातो धौतिकाम्बरादि सर्वं सोमदेवो दधाति स्म । अन्यदा गुरवश्चैत्ये देवान्नन्तुं गताः । तत्र पूर्वशिक्षिताः शिशवः सोमदेवं विना सर्वान् साधून् ववन्दिरे । तदा एकेन शिशुनोक्तं—एष साधुः कथं न वन्द्यते । तदाऽपरैरुक्तं—वयं साधूनेव वन्दामहे । एष साधुर्न गृहस्थवेषधारणात् । ततः सोमदेव ऋजुस्वभावः साधुस्तान् प्रति प्राह—यूयमेतान् साधून् वन्दध्वं मां न नमत । ततः किं नाहं साधुः । तैरुक्तं भवान् कथं साधुर्भवतु । वस्त्रयुगं गृहस्थतुल्यं वर्तते । ततस्तेन सोमदेवेनैकं वस्त्रं स्थापितम् । एवं कुण्डिकोपानहछत्रयज्ञोपवीतानि त्याजितः सोमदेवः कटिपट्टकमेकं न मुञ्चति बहुशो बालकपार्श्वाज्जाल्पितोऽपि सोमदेवः । इतस्तत्र साधुस्तीव्रतपरकारी भक्तप्रत्याख्यानं चकार । तदाऽनेके जनाः श्राद्धास्तस्य साधोरनशनमहोत्सवं चक्रुः तदा साधुभिश्चाराधना तस्य साधोः सम्यक् कारिता । जिनेन्द्रध्यानपरो मृत्वा साधुः स्वर्गं जगाम । ताहे तस्सनिमित्तंकडिपट्टवोसिरणट्ठाए आयरिआ भणंति—य एतं मृतं साधुं वहते तस्यानंतं पुण्यं मुक्तिगमनयोग्यं भवति । तथा पृथक् पृथक् सर्वे साधवो जल्पन्ति । अहमेनं साधुं वहामि । तदा

सोमदेवोऽपि जगाद चाहमपि साधुमेनं वहामि । तदा गुरुभिः प्रोक्तं—मृतं साधुं वहतां साधूनां देवा विघ्नं कुर्वन्ति । यदि न क्षुभ्यति साधुस्तत्र तदा तस्य देवा अपि प्रसन्ना भवन्ति । तदा सोमदेवो जगौ—अहमेनं साधुं वहामि । ममानन्तं पुण्यं भवति । गुरवो जगुः । अत्र विघ्नं बालकादिकृतं बहु समुत्पद्यते तव साधुं वहतः । सोमदेवोऽवग । मया सर्व उपसर्गः सहिष्यते । तदा सोमदेवः साहसीभूय साधुमुत्पाटयितुं लग्नो यदा तदा श्रीगुरुभिः शिक्षिता बालकास्तत्राभ्येत्याकस्मात्तस्य साधोः सोमदेवस्य धौतिकं कर्षयामासुः । तदा गुरुभिः प्रोक्तं—भो साधव एकं वस्त्रमानयत आनयत । तदा सोमदेवो जगौ—जं दट्ठवं तं तु दट्ठमेव । एवं जल्पन्तं सोमदेवं चोलपट्टं परिधापयामासुः । ततः सोमदेव. सत्यसाधुरभूत् । तस्य साधोरग्निसंस्कारे कृते गुरवो यदा देवगृहे देवान्नन्तुं आगताः तदा सर्वान् साधून् सोमदेवं च श्राद्धा वन्दन्तेस्म । सोमदेवो लज्जमानो भिक्षार्थं श्राद्धगृहे न गच्छति । एकदा श्रीगुरुभिरासन्ने ग्रामे गच्छाद्भिः प्रोक्तं—शुद्धमन्नमानीय भक्षितव्यं सोमदेवो भिक्षां विना तिष्ठतु । श्रीगुरुषु ग्रामं गतेषु साधुभिर्गुरूक्तं कृतम् । एवं द्वितीये दिने गते तृतीये दिने गुरुरागात् । सोमदेवेन तद् भक्तस्वरूपं प्रोचे । ततो गुरुः प्राह भो—शिष्या अस्मत्पितुः कथं भक्तं नानीतम् । ततः पूर्वाशिक्षिता जगुः । किमयं स्वयं विहर्तुं न याति । ततो गुरुभिरुक्तं—सोमदेवाग्रे यूयम-

ग्रामन्तगृहे गत्वाऽऽहारमानयत । गुरुणोक्तो लज्जन् कस्यापि महेभ्यस्य गृहछंडिके प्रविष्टः । श्रेष्ठिनोक्तं—यते! छंडिके न प्रविश्यते । साधुः प्राह—लक्ष्मीः छंडिकेऽपि प्रविष्टा वरा । श्रेष्ठी हृष्टः द्वात्रिंशान् मोदकान् ददौ । हृष्टो यतिर्गुरून्त्ये दर्शयत । गुरुणोक्तं साधुभ्यो मोदकान् ददत । सोऽवग्—एषां प्रस्तरा दीयन्ते यैरेवमहं विगोपितः । गुरुभिरूचे—यूयं राजव्यापारे स्थिताः पूर्वं सेवकेभ्यो दत्त्वैव भोक्तारः । अधुनाऽपि तथा कुर्वन्तु । ततः साधुभ्यो मोदकान् द्वात्रिंशद् दत्वा पुनर्लाभोदयकर्मयोगात् परमान्नं विहृत्यागात् पारणं चक्रे । ततो लज्जां मुक्त्वा सदा विहृत्यायाति सोमदेवो भिक्षामानीय पारणं चकार । श्रीआर्यरक्षितसूरयो भव्यजीवान् प्रबोधयामासुः । अन्येद्युः श्रीआर्यरक्षितसूरयः पाटलीपुरपत्तने ययुः । तत्र चन्द्रनरेश्वरो धर्मं श्रोतुमाययौ । तत्र श्रीगुरुभिरिति धर्मोपदेशो ददे । "निर्दन्तः करटी हयो गतजवश्चन्द्रं विना शर्वरी, निर्गन्धं कुसुमं सरो गतजलं छायाविहीनस्तरुः । रूपं निर्लवणं सुतो गतगुणश्चारित्रहीनो यति-र्निर्देवं भुवनं न राजति यथा धर्मं विना पौरुषम् ॥ १ ॥" इत्यादि धर्मोपदेशमाकर्ण्य राज्ञा जिनधर्मं प्रपेदे । श्रीआर्यरक्षितसूरिप्रभृतिसूरयः क्रमादवसरे स्वर्गलोकं ययुः । श्रीआर्यरक्षितस्य श्रीआर्यसमुद्रणसम्बन्धो वज्रस्वामिवृत्तेर्ज्ञेयः । इतिश्रीआर्यरक्षितसूरिसम्बन्धः ॥ ३७ ॥

अनर्घ्यं वस्तु भुक्त्वापि, न मुञ्चेत् धृतिमात्मनः । राजर्षिपदमादायो-दायनः शिवमासदत् ॥ १ ॥

तथाहि—एकदा श्रीवीरजिनो राजगृहे समवासार्षीत् । तत्राभयकुमारो धर्मं श्रोतुं समागात् । परमं मुनिं वीक्ष्याप्राक्षीत्–भगवन् ! कोऽयं यतिः ? । प्रभुणोक्तम्–अन्तिमो राजर्षिरयमुदायननृपः । अभयोऽवग्–अनेन कथं व्रतं गृहीतं कथं मुक्तिं गमिष्यति । प्रभुणोक्तं–श्रूयताम् । सिन्धुदेशालङ्करणे वीतभये पत्तने उदयनो राजा राज्यं करोतिस्म । तस्य चेटकराजपुत्री प्रभावतीनाम्नी पत्नी बभूव । इतस्तत्र वास्तव्यः कुमारनन्दी सुवर्णकारो विषयलोलुपोऽन्यदा देवताद्वयदर्शनात् प्राह–के भवत्यौ स्तः ताभ्यां प्रोचे–पञ्चशैलद्वीपवासिन्यौ हासाप्रहासाह्वे देव्यौ स्तः । यदि तव भोगेच्छाऽस्ति तदा तत्रागत्यावयोः पतिर्भव इत्युक्त्वा ते गते । सोऽपि स्वर्णकारस्तयोर्देव्योः पतिर्भवामीति वाञ्छन् केनापि नरेण समं तरीमारुह्य नीरधौ चचाल । वर्त्मनि स्वर्णकारः प्राह–कथं हासाप्रहासयोर्योगो भवति । तेन सांयात्रिकेणोक्तम्–अग्रे दृश्यमानगिरेरुपकण्ठे तरुर्महानस्ति । तस्याधो यानपात्रे गच्छति यः साहसी तस्य तरोः शाखां हस्ताभ्यां गृह्णाति, तत्र वृक्षे स्थितश्च निशि विश्रान्तानां भारण्डपक्षिणां चरणे विलगति च । स तत्र गतो मृत्वा तयोः पतिर्भवति । इति तस्य नागिलस्य (सांयात्रिकस्य) वचः श्रुत्वा स स्वर्णकारस्तथाकृत्वा तयोः पतिर्व्यन्तरोऽभूत् ।

नागिलोऽपि भवे याने (मित्रे मृते) प्रव्रज्य तपस्तप्त्वा द्वादशमे स्वर्गे सुरोऽभूत् । अथाच्युतदेवो नन्दीश्वरे यात्रायां गच्छन् तं व्यन्तरं गले बद्धमृदङ्गमुपलक्ष्य प्राह—किं जातमिदं तव । व्यन्तरेण तेनोक्तं—दुःखे पतितोऽस्मि निस्तारय मामस्मात्कष्टात् । ततो देवेनोक्तं—यदि त्वं श्रीदेवाधिदेवप्रतिमां नवीनां कृत्वा गोशीर्षचन्दनादिना प्रपूज्य क्वापि तां प्रपूज्यमानां कारय । ततस्तवास्मात्कर्मणो निस्तारो भवति । तदा स व्यन्तरस्तथा कृत्वा तामेव प्रतिमां केनचित् सांयात्रिकोपान्तेन वीतभये पत्तने प्रापितवान् । तां प्रतिमां च प्रभावत्यै अर्पयामास स सांयात्रिकः । बहुकालं तां प्रतिमां प्रभावती प्रपूज्यासन्नमृत्युं ज्ञात्वा श्रीदेवाधिदेवप्रतिमां दास्याः कुब्जिकायाः पूजायै अर्पयामास । सा ततो विशेषात् प्रभुं पूजयामास । राज्ञी समुत्पन्नवैराग्या श्रीवीरपार्श्वे संयममादाय क्रमेण सौधर्मे देवत्वेनोत्पन्ना । देवाधिदेवस्य पूजां कुर्वत्यास्तस्याः कोऽपि गन्धाराख्यः श्राद्धो देवान् सर्वत्र वन्दमानस्तत्रागात् । कियन्तं कालं स गन्धारस्तत्र स्थितः । अन्यदा तस्य देहे रोगः समुत्पन्नः । तया दास्या शुश्रूषितस्तदा । ततस्तेन श्राद्धेन तस्यै दास्यै गुटिका बहयोऽर्पिताः । ततः कुब्जिका एकगुटिकाभक्षणेन देवाङ्गनातुल्यदेहाऽभूत् । ततः सा वर्यं वरमङ्गीकर्तुं ध्यायति । ततः केनचिदव्रत्याः प्रणीतनो भूपः प्रोक्तस्तव योग्योऽस्ति । ततो द्वितीयागुटिका भक्षिता । तस्या अधिष्ठायकदेवेन तस्या दास्या

मनोगतभावं रूपं च चण्डप्रद्योतनाग्रे निवेदितम् । ततः प्रद्योतनोऽनिलागिरिकुञ्जरारूढो रहोवृत्त्या तत्रागत्य दासीं देवाधिदेवप्रतिमायुतां लात्वा स्वस्थाने ययौ । उदयनो निजेभमदगलनादिना दासीप्रतिमाहरणस्य स्वरूपं ज्ञात्वा चुक्रोध । ततः संनह्य महासेनायुतः उदायनः प्रद्योतनाधिष्ठितामवन्तीं ययौ । तत्र दासी प्रतिमायुता मार्गिता । स यदा नार्पयति । तदा महायुद्धे जायमाने उदयनः प्रद्योतनं बबन्ध रणे । दासी नष्टा प्रतिमा तु ततः स्थानान्न चलिता यदा तदा उदयनपत्नी प्रभावतीदेवः स्वर्गादागत्य प्राह—भो उदयन ! त्वन्मरणादनु वीतभये पत्तने धूलि-कोटिः पतिष्यति। तेन न तत्र नेतव्या, अत्रैव तिष्ठतु । तथा कृतं तेन उदयनेन । मम दासीपतिरेष इति अक्षराणि प्रद्योतनमस्तके दापयित्वा स्वपुरं प्रति चलितः, ततो मार्गे पर्युषणापर्वं समागतं तत्र राजा स्थितः, प्रभोः पूजा कृता राज्ञा तस्मिन् हि दिने क्षपणं कृत्वा सूपकारायादिष्टम् । प्रद्योतनमापृच्छ्य यत्तस्य रोचते तद्भोजनं तस्य देयम् । ततः सूपकारः प्रद्योतनपार्श्वे गत्वाऽवग्—भवतोऽद्य का रसवती रोचते । तदा प्रद्योतनेन चिन्तितमद्य यावन्न किमपि पृष्टं राज्ञा सह भोजनं ममाऽप्यभूत् । नूनं विषं दास्यत्यसौ मम । एवं ध्यात्वा प्रद्योतनः प्राह—पुरा एवं कदाऽपि न पृष्टमधुना एवं कथं पृच्छ्यते ? ततस्तेन राज्ञोक्तं सर्वं पर्युषणावृत्तान्तं सूपकारेणोक्तम् । ततः सोऽपि

मायां विधाय प्राह—अहमपि श्राद्धः पर्युषणापर्व विस्मरितं दुःखात् । ततो ममाप्युपवासो भवतु । ततः प्रद्योतनप्रोक्तं राज्ञोऽग्रे तेन निवेदितम् । ततः राजा साधर्मिकोऽयं ममेति कृत्वा क्षामणकं विना प्रतिक्रमणकं न शुध्यति । इति ध्यात्वा च प्रद्योतनो बन्धनाच्छोटितः । मस्तके तस्य स्वर्णमयं पट्टबन्धं कारयित्वा क्षामणकं च कृत्वा उदायनः प्रद्योतनं पश्चात् प्रेषयामास । ततः प्रद्योतनो राजा जैनधर्मं शुद्धमाराध । उदायनः स्वपुरं प्राप्तः । उदायनः परमार्हतोऽन्यदा श्रीवीरजिनपार्श्वे धर्ममिति शुश्राव । मज्जं विसयकसाया, निद्दा विगहा य पञ्चमी भणिया । एए पञ्च पमाया, जीवं पाडंति संसारे ॥ १ ॥ आर्यदेशकुलरूपबलायु–र्बुद्धिबन्धुरमवाप्य नरत्वम् । धर्मकर्म न करोति जडो यः, पोतमुज्झति पयोधिगतः सः ॥ २ ॥ इत्यादि धर्मोपदेशं श्रुत्वा प्राप्तवैराग्यः स्वभागिनेयं स्वराज्ये निवेश्य श्रीवीरपादान्ते दीक्षां जग्राह । ततो नानातपः कुर्वाणः क्रमान्नृपो वीतभये समागात् । भागिनेयेन राज्ञा स्वराज्यापहरणशङ्कितेन हि पारणेषु विषं दापितं प्रपंचेन । शासनदेवतायाः सानिध्यात्समुत्तीर्णविषः प्रान्ते महाध्यानपरः सर्वकर्मक्षयं कृत्वा मुक्तिं यास्यति । उदायनोऽयं चरमराजर्षिः । ततोऽभयकुमारः समुत्थाय तं चरमराजर्षिंभूपं भूयसीभक्त्या प्रणनाम । ततः क्रमादायुःसमाप्तौ उदायनो मुक्तिं गतः । प्रभावतीजीवोऽपि मुक्तिं गमिष्यति ।

इति उदायनप्रभावतीकथासमाप्ता ॥ ३८ ॥

किञ्चित् सिद्धान्तभणनाराधनादर्थवीक्षणात् । लभते सुखदं स्थानं, मनकक्षुल्लवत्स्फुटम् ॥ १ ॥

तथाहि——शय्यंभवभट्टो यज्ञं कारयति । तदा श्रीप्रभवस्वामिना स्वगच्छमध्ये तादृशं पट्टस्थापनार्हमदृष्ट्वा यज्ञकर्मकृच्छय्यंभव उपयोगेन ज्ञातः । साधुद्वयं प्रेष्य अहोकष्टमहोकष्टमिति ज्ञापिते स प्रष्टुं लग्नः । ताभ्यामुक्तं-अस्मद्गुरवो विदन्ति । गुरुभिरूचे-यूपान्तस्तत्वमस्ति । तत्र श्रीशान्तिनाथप्रतिमां प्रादुष्कृतां वीक्ष्य गुरुपार्श्वे दीक्षां-जग्राह तदा । पूर्वं तस्य पत्नी साधानाऽभूत् । ततस्तया पुत्रोऽसावि । तस्य मनक इति नाम ददौ माता । मनकः क्रमाद्वर्धमानो मात्रा लेखशालायां मुक्तः । यतः—“ प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम् । तृतीये नार्जितो धर्मः, चतुर्थे किं करिष्यति ॥ १ ॥ ” अन्येद्युरपितृकमिति लेखशालकैर्हसितो मनकस्ततो दोदूयांकुर्वाणो मातृपार्श्वे गत्वा जगौ-मामपितृकमिति लेखशालकाः कथं हसन्तिस्म, मम पितुः किं नाम कुत्र गतोऽस्ति इति मातरमपृच्छन्मनकः । माता तमुवाच—तव पित्रा जैनदीक्षा गृहीता । अधुना शय्यंभवसूरिर्जिनतत्त्वज्ञो भव्यजीवान् प्रबोधयन्नास्ति पाटलीपुरे । ततो मनको मातरमापृच्छ्य पितृमिलनार्थं चलितः । पाटलीपुरसमीपे मनको गतः । इतः श्रीशय्यंभवसूरिं तनुगमनिकायामागतं वीक्ष्य मनकस्तं पप्रच्छ—शय्यंभवः सूरिः क्वास्ति,

[illegible]रोऽस्ति ? । ततो गुरुभिः प्रकारेणोक्तम्—अहमेवाऽस्मि, त्वया सम्बन्धः कस्याप्यग्रे न प्रोक्तव्यः । ततो गुरुणा सार्धं शालायां गतो मनकः । ततो मनको गुरुपार्श्वे दीक्षां जग्राह । श्रीशय्यंभवसूरिभिर्मनकस्याल्पमायुर्ज्ञात्वा सिद्धान्तमध्यात् श्रीदशवैकालिकं कर्षयित्वा मनकस्य पठनाय दत्ते । मनकेन षड्मासे दशवैकालिकं पठितम् । लघु-[illegible] वैयावृत्त्यादिनाऽशयोऽभूत् गुरूपदेशात् । क्रमादायुषोऽन्त्यवेलायां मनकस्याराधना गुरुभिः कारिता । शुभध्यान-परायणो मनको मृत्वा स्वर्गं जगाम । ततोऽग्निदाहं तस्य मनकस्य दत्वा श्रीसङ्घो गुरुपार्श्वे धर्मोपदेशं श्रोतुमा-गतवान् । गुरुभिरुपदेशं ददद्भिरश्रुपातः कृतः । उपदेशानन्तरं श्रीसङ्घेनाश्रुपातस्वरूपं पृष्टम् । ततो गुरुभि-रुक्तं—मनको मम पुत्रः । ततः श्रीयशोभद्रसूरिप्रभृतिसाधुभिरुक्तं—किं न ज्ञापितमदः श्रीपूज्यपादैः ? गुरवः प्रोचुः—यद्यहं ज्ञापयामि तदाऽसौ मनकश्चारित्रं नाराधयिष्यत् । वैयावृत्त्यं विना न कर्मक्षयो भवति । ततः श्रीशय्यंभवसूरिः श्रीदशवैकालिकं पश्चादपि सिद्धान्तमध्ये क्षिपति तावच्छ्रीसंघः श्रीयशोभद्रसूरयो-ऽपि जगुः—भगवन्नयं श्रीदशवैकालिकग्रन्थः पृथक् सिद्धान्तात्तिष्ठतु साधूनामुपकाराय । अयं ग्रन्थः सिद्धान्तस्य-सारभूतोऽस्ति । ततः शय्यंभवसूरिभिस्तथा दशवैकालिकग्रन्थः स्थापितः । साधवोऽधुना पठन्ति च । उक्तं च—

सिज्जंभवं गणहरं जिणपडिमादंसणेण पडिबुद्धं। मणगपियरं दसविकालयस्स, निज्जूहगं वंदे ॥ १ ॥ मणगं पडुच्च सिज्जंभवेण, निज्जूहिया दसज्झयणा। वेयालिआ य ठविया, तम्हा दसकालियं नाम ॥ २ ॥ छहिं मासेहिं अहीअं, अज्झयणमिणं तु अज्जमणगेणं। छम्मासा परिआओ, अह कालगओ, समाहीए ॥३॥ आणंदअंसुपायं, कासी सिज्जंभवा तहिं थेरा। जसभद्दस्स य पुच्छा, कहणा य विआलणा संघे ॥ ४ ॥ इति श्रीमनककथा समाप्ता ॥ ३९ ॥

दत्तेन भूभुजा याग-फलं पृष्टोऽन्यदा हठात्। कालिकाचार्य आचष्ट, नरकस्य गतिं स्फुटम् ॥ १ ॥

तथाहि–तुरमण्यां पुरि कालिको भूदेवो बभूव। तस्य भद्राह्वा सहोदरी जाता। तस्य स्वस्रीयो दत्त इति नामाऽभूत्। कालिकः क्रमात् गुरूपान्ते धर्मोपदेशमाकर्ण्य वैराग्यात् संयमश्रियं जग्राह। तं शास्तारं विना दत्तोऽत्यन्त-निर्गलोऽभूत्। क्रमात्सप्तव्यसनासक्तो बभूव। क्रमात्दुर्दैवयोगाज्जितशत्रुभूपस्य दत्तः सेवकोऽभूत्। अन्येन भूपेन जितशत्रुणा स दत्तः प्रधानपदवीं प्रापितः। क्रमात्सर्वान् सेवकान् वशीकृत्य तं भूपं निर्वास्य दत्तः स्वयं राजाऽभूत्। दुर्वृत्तप्लवगव्याल–व्याघ्रमार्जारवाह्निवत्। नोपकारैः परिग्राह्यः, स भूपो विबुधैरपि ॥१॥ ततस्तस्य राज्ञो बुधाः प्रजाश्च विश्वासं न कुर्वते विश्वस्तघातत्वात्। यतः–"ये कुलाचारतो भ्रष्टाः, परलोकादभीरवः। तेषां कुर्वीत विश्वासं, न कथं–

सिज्जंभवं गणहरं जिणपडिमादंसणेण पडिबुद्धं । मणगपियरं दसविकालयस्स, निज्जूहगं वंदे ॥ १ ॥ मणगं पडुच्च सिज्जंभवेण, निज्जूहिया दसज्झयणा । वेयालिआ य ठविया, तम्हा दसकालियं नाम ॥ २ ॥ छहि मासेहि अहीअं, अज्झयणमिणं तु अज्जमणगेणं । छम्मासा परिआओ, अह कालगओ, समाहीए ॥३॥ आणंदअंसुपायं, कासी सिज्जंभवा तहिं थेरा । जसभद्दस्स य पुच्छा, कहणा य विआलणा संघे ॥ ४ ॥ इति श्रीमनककथा समाप्ता ॥ ३९ ॥

दत्तेन भूभुजा याग-फलं पृष्टोऽन्यदा हठात्। कालिकाचार्य आचष्ट, नरकस्य गतिं स्फुटम् ॥ १ ॥

तथाहि—तुरमण्यां पुरि कालिको भूदेवो बभूव । तस्य भद्राह्वा सहोदरी जाता । तस्य स्वस्रीयो दत्त इति नामाऽभूत् । कालिकः क्रमात् गुरूपान्ते धर्मोपदेशमाकर्ण्य वैराग्यात् संयमश्रियं जग्राह । तं शास्तारं विना दत्तोऽत्यन्तनिर्गलोऽभूत् । क्रमात्सप्तव्यसनासक्तो बभूव । क्रमाद्दुर्दैवयोगाज्जितशत्रुभूपस्य दत्तः सेवकोऽभूत् । अज्ञेन भूपेन जितशत्रुणा स दत्तः प्रधानपदवीं प्रापितः । क्रमात्सर्वान् सेवकान् वशीकृत्य तं भूपं निर्वास्य दत्तः स्वयं राजाऽभूत् । दुर्वृत्तप्लवगव्याल—व्याघ्रमार्जारवह्निवत् । नोपकारैः परिग्राह्यः, स भूपो विबुधैरपि ॥१॥ ततस्तस्य राज्ञो बुधाः प्रजाश्च विश्वासं न कुर्वते विश्वस्तघातत्वात् । यतः—"ये कुलाचारतो भ्रष्टाः, परलोकादभीरवः । तेषां कुर्वीत विश्वासं, न कथं—

सप्तदिनेभ्यः पुरतो जीविष्यामि तदा कालिकाचार्यममुं हनिष्यामि। ततस्तस्य सूरेरन्तिके स्वसेवकान् मुक्त्वा स दुष्टमतिर्दत्तः सौधमध्ये सप्तदिनानि स्थातुं स्थितः। इतो जितशत्रुभूपभक्तैर्जनैर्जितशत्रुभूपो राज्यदानार्थं प्रकटीचक्रे प्रच्छन्नं। इतो रक्ष्यमाणेषु राजमार्गेषु अशुचिषु वस्तुषु अपसार्यमाणेषु सप्तमे दिने दत्तो राजा हृष्टस्तुरगारूढोऽष्टमदिनभ्रान्त्या ध्रियमाणातपत्रो राजमार्गे निस्ससार। इतो मालिकः पुष्पपूर्णकरण्डकयुतो राजमार्गे समागात्। भेर्यादिनिनादैः श्रुतमात्रैरकस्मात्तस्यात्यन्तं मलोत्सर्गचिन्ताऽभून्मालिकस्य। लोकबाहुल्यादन्यत्र गन्तुमशक्नुवन् लब्धलक्षतया त्वरितं मलोत्सर्गं तत्रैव कृत्वा तस्योपरि पुष्पपुञ्जं मुक्त्वा मालिकोऽग्रतो गतः। तदा राज्ञो दत्तस्य तस्मिन् मार्गे गच्छतस्तुरङ्गमखुरोत्खातो विट्लेशो वदनेऽविशत्। स राजा दत्तस्तेन प्रत्ययेन पश्चाद्यावद् गृहाभिमुखं समायाति, तावन्मंत्रिनियुक्तैः सेवकैर्दत्तो हतः, स दत्तो मृत्वा सप्तमनरकं गतः। स जितशत्रुभूपः स्वराज्ये उपविष्टः। ततस्तं कालिकाचार्यं भूपो निषेवतेस्म, जिनधर्म्मं चाङ्गीचकार ॥ इति कालिकाचार्यकथा ॥

श्रीपुरे प्रजापालभूपस्य राज्ञी पुत्रं प्रासूत। तस्याभिधानं कालिककुमार इत्यभूत्। पुत्री तु भानुश्रीरासीत्। कालिककुमारः श्रीगुरुपार्श्वे धर्मं श्रुत्वा दीक्षां ललौ। स च बहुश्रुतोऽभूत् गुरुभिः सूरिपदं दत्तम्। इतो राज्ञा

भानुश्रीर्भृगुकच्छे जिनारिभूपस्य दत्ता । तस्याः सुतौ बलमित्रभानुमित्रौ । तयोर्भागिनेयो बलभानुरभूत् । एकदा तत्र गुरवः कालिकसूरय आगताः । तत्र धर्मोपदेशं श्रुत्वा बलभानुर्दीक्षां जग्राह । तदा गुरुस्तैः ...गङ्गाधरः पुरोहितो वादे जितः । एकदा गुरवो विहारं कृत्वा तत्रागताः, बलमित्रभानुमित्रयोराग्रहात् गुरवस्तत्र चातुर्मासीं स्थिताः । ततो गङ्गाधरपुरोहितस्तान् गुरून् कर्पितुमिच्छन् पूर्ववैरात् भूपाग्रे छन्नं जगौ—देव ! एए जइ पुज्जा, भमंति जहिं तत्थ गच्छिरंमि जणे । गुरुपयअक्कमणकया, होइ अवन्ना दुरिअहेऊ ॥ १ ॥ उक्तं च "यत्र देवर्षिपूजादेः क्रियतेऽतिक्रमः क्वचित् । तच्चेत्सहते राजा, घोरं तत्र भयं भवेत् ॥ १ ॥" राजाऽवक्—किं क्रियते गुरवः सुस्थिताः, तेषां चलनविषये वक्तुं न युक्तम् । पुरोहितोऽवग्—गृहे गृहे नवीना वर्या रसवती कार्यते । यदा साधवो विहर्तुमायान्ति तदोच्यते—श्रीपूज्यपादकृते रसवती कृताऽस्ति । ततोऽनेषणां ज्ञात्वा गुरवः स्वयमन्यत्र गमिष्यन्ति । भूपेन तथा कारिते गुरवः प्रतिष्ठानपुरे चातुर्मासकमध्ये गताः प्रवेशमहोत्सवोऽभूत् । तत्र सातवाहनो भूपः पृथिवीं पालयतिस्म । पर्यूषणापर्व समीपं समायातं, तत्र भूपोऽवग्—भगवन् ! पर्युषणापर्व कस्मिन् दिने करिष्यते गुरवो जगुः—भाद्रसुदिपञ्चम्याम् । तदा भूपोऽवक् पञ्चम्यामत्रेन्द्रमहोत्सवो भवति तेन

पर्युषणापर्व एकस्मिन् दिने कथं करिष्यते । भाद्रशुक्लपञ्चम्या अर्वाक् पश्चाद्वा भवति तदाऽहं पर्युषणापर्वणि तपोनियम-
जिनालयोत्सवादि करोमि । तदा गुरवो जगुः—भाद्रशुक्लपञ्चम्याः पुरतः प्रहरेऽपि न क्रियते अर्वाक् तु भवति ।
उक्तं च—"तेणं कालेणं तेणं समएणं समणे भगवं महावीरे वासाणं सवीसइमासे विइक्कंते वासावासं पज्जोसवेति ।"
उक्तं च—"आसाढपुन्निमाए, संवच्छरियसामग्गि होइ पज्जोसवणा । तत्तो सावणपंचमि—माइसु अभिवाड्ढकारणओ"
॥ १ ॥ इत्यादि । "इत्थ य पणगं पणगं, करणीयं जाव वीसई मासो । सुद्धदसमीइ ठिआण य, आसाढी
पुन्निमोसरणं ॥२॥" इत्यादि । यदि चतुर्थ्यां क्रियते तदा घटते । ततो राजा प्रतिपद्दिने उत्तरपारणकं चकार श्राद्धा
अपि तथा चक्रुः । ततः सर्वाचार्यसंमतं पर्युषणापर्व श्रीकालिकसूरिभिः कृतम् । ततः सर्वैः सूरिभिस्तथा सर्वत्र पर्यु-
षणापर्व चक्रे यतः—"अवलंबिऊण कज्जं, जं किंचिवि आयरंति गीअत्था । थोवावराहबहुगुणं, सव्वेसिं तं पमाणं ति
॥१॥ आयरणा वि हु आणा, अविरुद्धा होइ चेव आणत्ति । इयरा तित्थयरासायण त्ति, तल्लक्खणं चेयं ॥ २ ॥
असढेण समाइन्नं, जं कत्थइ केणई असावज्जं । न निवारिअमन्नेहिं, बहुमणुमयमेयमायरिअं ॥३॥ कदाचिदवन्त्यां
कालिकसूरयः स्थिताः । तत्र प्रमादपरान् साधून् दृष्ट्वा जगुः—भो साधवो युष्माकं नैव, प्रमादः क्रियते व्रते ।

पर्युषणापर्व एकस्मिन् दिने कथं करिष्यते । भाद्रसुदिपञ्चम्या अर्वाक् पश्चाद्वा भवति तदाऽहं पर्युषणापर्वणि तपोनियमजिनालयोत्सवादि करोमि । तदा गुरवो जगुः—भाद्रसुदिपञ्चम्याः पुरतः प्रहरेऽपि न क्रियते अर्वाक् तु भवति । उक्तं च—"तेणं कालेणं तेणं समएणं समणे भगवं महावीरे वासाणं सवीसइमासे विइक्कंते वासावासं पज्जोसवंति ।" उक्तं च—"आसाढपुन्निमाए, संवच्छरियसामग्गि होइ पज्जोसवणा । तत्तो सावणपंचमि—माइसु असिवाइकारणओ" ॥ १ ॥ इत्यादि । "इत्थ य पणगं पणगं, करणीयं जाव वीसई मासो । सुद्धदसमिइ ठिआण य, आसाढी पुन्निमोसरणं ॥२॥" इत्यादि । यदि चतुर्थ्यां क्रियते तदा घटते । ततो राजा प्रतिपद्दिने उत्तरपारणकं चकार श्राद्धा अपि तथा चक्रुः । ततः सर्वाचार्यसंमतं पर्युषणापर्व श्रीकालिकसूरिभिः कृतम् । ततः सर्वैः सूरिभिस्तथा सर्वत्र पर्युषणापर्व चक्रे यतः—"अवलंबिऊण कज्जं, जं किंचिवि आयरंति गीयत्था । थोवावराहबहुगुणं, सव्वेसिं तं पमाणं ति ॥१॥ आयरणा वि हु आणा, अविरुद्धा होइ चेव आणत्ति । इयरा तित्थयरासायण त्ति, तल्लक्खणं चेवं ॥ २ ॥ असढेण समाइन्नं, जं कत्थइ केणई असावज्जं । न निवारिअमन्नेहिं, बहुमणुमयमेयमायरिअं ॥३॥ कदाचिदवन्त्यां कालिकसूरयः स्थिताः । तत्र प्रमादपरान् साधून् दृष्ट्वा जगुः—भो साधवो मनाग् नैव, प्रमादः क्रियते व्रते ।

कुमारो व्रतं ललौ । गुरुपार्श्वे कालिककुमारः पठन् साहित्यतर्कलक्षणछन्दोऽलङ्कारनाटकाद्यागमशास्त्रकुशलोऽभूत् । श्रीगुणधरसूरिभिर्योग्यं मत्वा कालिकसाधोः सूरिपदं ददे । विहारं भूमण्डले कुर्वन् भव्यजीवान् प्रबोधयतिस्म । अन्यदा श्रीकालिकसूरिरुज्जयिन्यां बहिरुद्याने समवासार्षीत् । तदा सरस्वती साध्वी प्राप्तप्रवर्तिनीपदा पुरमध्ये यियासुर्गुरून् प्रणम्य पुरद्वारे समागात् । तदा तत्रत्यो गर्दभिल्लो राजा पुराद् बहिर्निस्सरन् सरस्वतीं साध्वीं विलपन्तीं रूपशालिनीं वीक्ष्य रागातुरः स्वान्तःपुरे बलात् क्षेपयामास । गुरुणा गर्दभिल्लभूपस्य कृतं ज्ञातं, ततो गुरुणा श्रीसङ्घः प्रेषितः साध्वीवालनार्थं राजपार्श्वे गत्वा प्राह—महासतीयं मुच्यतां तपोधनाः तपस्विन्यो राज्ञो यस्य भूमौ तपः कुर्वन्ति, तस्य पुण्यविभागो राज्ञः समेति । तेन स्वामिन्नियं मुच्यताम् । त्वं प्रजापालोऽसि, तपस्विनां तु भूप एवाधारोऽस्ति यतः—" नरेश्वरभुजच्छायामाश्रित्याश्रयिणः सुखम् । निर्भयाः सर्वकार्याणि, धर्मादीनि वितन्वते ॥ १ ॥ " एवं श्रीसङ्घेनोक्तो भूपः प्राह—नाहमिमां मुञ्चे उपदेशः स्वगृहे दीयते भूपस्याग्रे न दीयते एवंविधः । ततः श्रीगुरुभिर्भूपपार्श्वे गत्वोक्तम्—इयं तपस्विनी मम भागिन्यस्ति तेन मुच्यतां त्वं प्रजापालोऽसि त्वमाधारस्तपस्विनां ततो गुरूक्ते यदा राजा न मुञ्चति सरस्वतीं तदा गुरवः स्वस्थानेऽभ्येत्य श्रीसङ्घमाकार्य प्राह—अयं दुष्टो राजा सरस्वतीं जहार, अस्य

कुमारो व्रतं ललौ। गुरुपार्श्वे कालिककुमारः पठन् साहित्यतर्कलक्षणछन्दोऽलङ्कारनाटकाद्यागमशास्त्रकुशलोऽभूत्। श्रीगुणधरसूरिभिर्योग्यं मत्वा कालिकसाधोः सूरिपदं ददे। विहारं भूमण्डले कुर्वन् भव्यजीवान् प्रबोधयतिस्म। अन्यदा श्रीकालिकसूरिरुज्जयिन्यां बहिरुद्याने समवासार्षीत्। तदा सरस्वती साध्वी प्राप्तप्रवर्तिनीपदा पुरमध्ये यियासुर्गुरून् प्रणम्य पुरद्वारे समागात्। तदा तत्रत्यो गर्दभिल्लो राजा पुराद् बहिर्निस्सरन् सरस्वतीं साध्वीं विलपन्तीं रूपशालिनीं वीक्ष्य रागातुरः स्वान्तःपुरे बलात् क्षेपयामास। गुरुणा गर्दभिल्लभूपस्य कृतं ज्ञातं, ततो गुरुणा श्रीसङ्घः प्रेषितः साध्वीवालनार्थं राजपार्श्वे गत्वा प्राह—महासतीयं मुच्यतां तपोधनाः तपस्विन्यो राज्ञो यस्य भूमौ तपः कुर्वन्ति, तस्य पुण्यविभागो राज्ञः समेति। तेन स्वामिन्नियं मुच्यताम्। त्वं प्रजापालोऽसि, तपस्विनां तु भूप एवाधारोऽस्ति यतः—"नरेश्वरभुजच्छायामाश्रित्याश्रयिणः सुखम्। निर्भयाः सर्वकार्याणि, धर्मादीनि वितन्वते॥ १ ॥" एवं श्रीसङ्घेनोक्तो भूपः प्राह—नाहमिमां मुञ्चे उपदेशः स्वगृहे दीयते भूपस्याग्रे न दीयते एवंविधः। ततः श्रीगुरुभिर्भूपपार्श्वे गत्वोक्तम्—इयं तपस्विनी मम भगिन्यस्ति तेन मुच्यतां त्वं प्रजापालोऽसि त्वमाधारस्तपस्विनां ततो गुरूक्ते यदा राजा न मुञ्चति सरस्वतीं तदा गुरवः स्वस्थानेऽभ्येत्य श्रीसङ्घमाकार्य प्राह—अयं दुष्टो राजा सरस्वतीं जहार, अस्य

सर्वे भूपाः मया सार्द्धं आगच्छन्तु। भवतां उज्जयिन्या राज्यं दास्यते मया। आकारयतु भवान् भूपान् सर्वान्। ततो—विचारं कृत्वा षण्णवतिर्भूपाः स्वतुरङ्गमपत्तिकुटुम्बयुताश्चेलुः। वर्त्मनि तेषां वर्षाकालः समायात। ततो टंकपर्वतपार्श्वे सुराष्ट्रमध्यस्थे ते भूपास्तस्थुः। शम्बलक्षीणा भूपा जगुः—भो कालिकावधूत! शम्बलं विना कथमुज्जयिन्यां गम्यते तत्रत्यं राज्यं च गृहीष्यते। सूरिः प्राह—स्थिरं स्थीयतां सर्वं वयं भविष्यति तदा सरस्वत्या आचाम्लतपस्करणस्वरूपं शासनदेव्या प्रोक्तम्। ततः [गुरुणा] चूर्णेन इष्टिकानिवाहं स्वर्णीकृत्य सर्वेषां भूपानां विभज्य ददौ सूरिः। ततः सर्वे भूपाः सुस्थिता बभवुः। ततः सूरिणा शिबिरं चालितं गुर्जरात्रमध्ये भूत्वोज्जयिनीपार्श्वे ययौ। तदा गर्दभिल्लो भूपः संमुखमागत्य युद्धं कुर्वाणं वैरिबलं महत दृष्ट्वा वप्रमध्ये प्रविवेश। सर्वे भूपाः सूरेरादेशेन वप्रं वेष्टयित्वा स्थिताः। राज्ञा ध्यातमिदं सैन्यं महत् तेन किं क्रियते। अत्रान्तरे सूरिणा ज्ञापितं सरस्वतीं मुञ्च नो चेदतो मरणं भावि। ततः सूरिमागतं श्रुत्वा वैरिबलं महद्दृष्ट्वा गर्दभिल्लो विद्यां साधयितुमुपविष्टः। तदा सूरिभिर्गर्दभिल्लीविद्यां साधयंतं गर्दभिल्लं भूपं ज्ञात्वा प्रोक्तम्—असौ भूपोऽग्रेतन्यामष्टम्यां गर्दभिल्लीं साधयिष्यति। सा च यदा वप्रोपरि चटित्वा शब्दं करोति, तदा यः शब्दं श्रोष्यति स मरिष्यति। अतः कारणात अष्टोत्तरशतं शब्दवेधिनो मया सह

सर्वे भूपाः मया सार्द्धं आगच्छन्तु। भवतां उज्जयिन्या राज्यं दास्यते मया। आकारयतु भवान् भूपान् सर्वान् । ततो—विचारं कृत्वा षण्णवतिर्भूपाः स्वतुरङ्गमपत्तिकुटुम्बयुताश्चेलुः । वर्त्मनि तेषां वर्षाकालः समायात् । ततो टंकपर्वतपार्श्वे सुराष्ट्रमध्यस्थे ते भूपास्तस्थुः । शम्बलक्षीणा भूपा जगुः—भो कालिकावधूत ! शम्बलं विना कथमुज्जायिन्यां गम्यते तत्रत्यं राज्यं च गृहीष्यते । सूरिः प्राह—स्थिरं स्थीयतां सर्वं वर्यं भविष्यति तदा सरस्वत्या आचाम्लतपस्करण· स्वरूपं शासनदेव्या प्रोक्तम्। ततः [गुरुणा] चूर्णेन इष्टिकानिवाहं स्वर्णीकृत्य सर्वेषां भूपानां विभज्य ददौ सूरिः । ततः सर्वे भूपाः सुस्थिता बभवुः । ततः सूरिणा शिबिरं चालितं गुर्जरात्रमध्ये भूत्वोज्जयिनीपार्श्वे ययौ । तदा गर्दभिल्लो भपः संमुखमागत्य युद्धं कुर्वाणं वैरिबलं महत् दृष्ट्वा वप्रमध्ये प्रविवेश । सर्वे भूपाः सूरेरादेशेन वप्रं वेष्टयित्वा स्थिताः । राज्ञा ध्यातमिदं सैन्यं महत् तेन किं क्रियते । अत्रान्तरे सूरिणा ज्ञापितं सरस्वतीं मुञ्च नो चेदतो मरणं भावि । ततः सूरिमागतं श्रुत्वा वैरिबलं महद्दृष्ट्वा गर्दभिल्लो विद्यां साधयितुमुपविष्टः । तदा सूरिभिर्गर्दभिल्लीविद्यां साधयंतं गर्दभिल्लं भूपं ज्ञात्वा प्रोक्तम्—असौ भूपोऽग्रेतन्यामष्टम्यां गर्दभिल्लीं साधयिष्यति । सा च यदा वप्रोपरि चटित्वा शब्दं करोति, तदा यः शब्दं श्रोष्यति स मरिष्यति। अतः कारणात् अष्टोत्तरशतं शब्दवेधिनो मया सह

सत्यभामा रुपारुणा कृष्णस्याग्रे गत्वा जगाद—मया हस्तिमल्लोऽद्य स्वप्ने दृष्टः। ततो नारायणस्तस्या जल्पितमिङ्गिताकारैः कूटं मत्वा जजल्प—भो पत्नि ! त्वया किं खिद्यते परराज्यदं भामिनीं श्रुत्वा। सत्यभामाऽवग्—मदीयं जल्पितं न कूटं भविष्यति। ततस्तयोर्मिथस्तदा सत्यभामारुक्मिण्योर्विवादे जायमाने सत्यभामा सा जगौ—यस्याः पुत्रः प्रथमं परिणेष्यति, तस्यै अन्यया स्वमस्तकस्थां वेणीं छित्त्वाऽर्पणीया, तत्र साक्षिणः कृताः। दैवादुभे अपि सख्यौ गर्भं दधतुः, क्रमाद्रुक्मिण्या जनिते पुत्रे प्रद्योतनत्वात् प्रद्युम्न इति नाम दत्तं, सत्यभामया द्वितीये दिने पुत्रे प्रसूते भानुरिति नामाऽभूत्। इतो धूमकेतुरसुरो रुक्मिण्या गृहेऽभ्येत्य छद्मना गृहीत्वा प्रतिवैताढ्यमभ्यगात्। तत्र टंकशिलायामुपरि मुक्त्वा देवस्तिरोदधे। इतस्तत्रागतः कालसंवरः खेचरस्तं बालकं गृहीत्वा स्वपुरं ययौ। कनकमालानाम्न्यै स्वपत्न्यै विश्राणितः पालनीयः पुत्रस्थाने स्थापितश्च तया। प्रोक्तं च खगेन पत्न्यग्रे—मया पुत्रो जनित इति सर्वत्र प्रघोषो वक्तव्यः। ततस्तया तथा कृते प्रकृष्टदीप्तिमच्छरीरत्वात् प्रद्युम्न इति नाम दत्तं तस्य सूनोः। ततः क्रमात् स्तन्यपानादिना स प्रद्युम्नः पुत्रो ववृधे। इतो नारदः कृष्णं पुत्रवियोगदुःखितं मत्वा श्रीसीमन्धरस्वामिपार्श्वे गतः, श्रीसीमन्धरस्वामिपार्श्वे पृष्टं प्रद्युम्नस्वरूपं, श्रीसीमन्धरस्वामिनः सकाशात् प्रद्युम्नस्थितिस्वरूपं धूमकेतु-

सत्यभामा रुषारुणा कृष्णस्याग्रे गत्वा जगाद—मया हस्तिमल्लोऽद्य स्वप्ने दृष्टः । ततो नारायणस्तस्या जल्पितमिङ्गिताकारैः कूटं मत्वा जजल्प—भो पत्नि ! त्वया किं खिद्यते परसम्पदं भाविनीं श्रुत्वा । सत्यभामाऽवग्—मदीयं जल्पितं न कूटं भविष्यति । ततस्तयोर्मिथस्तदा सत्यभामारुक्मिण्योर्विवादे जायमाने सत्यभामा सा जगौ—यस्याः पुत्रः प्रथमं परिणेष्यति, तस्यै अन्यया स्वमस्तकस्थां वेणीं छित्त्वाऽर्पणीया, तत्र साक्षिणः कृताः । दैवादुभे अपि राज्यौ गर्भं दधतुः, क्रमाद्रुक्मिण्या जनिते पुत्रे प्रद्योतनत्वात् प्रद्युम्न इति नाम दत्तं, सत्यभामया द्वितीये दिने पुत्रे प्रसूते भानुरिति नामाऽभूत् । इतो धूमकेतुरसुरो रुक्मिण्या गृहेऽभ्येत्य छन्नमर्भं गृहीत्वा प्रतिवैताढ्यमभ्यगात् । तत्र ढंकशिलायामुपरि मुक्त्वा देवस्तिरोदधे । इतस्तत्रागतः कालसंवरः खेचरस्तं बालकं गृहीत्वा स्वपुरं ययौ । कनकमालानाम्न्यै स्वपत्न्यै विश्राणितः पालनीयः पुत्रस्थाने स्थापितश्च तया । प्रोक्तं च खगेन पत्न्यग्रे—मया पुत्रो जनित इति सर्वत्र प्रघोषो वक्तव्यः । ततस्तया तथा कृते प्रकृष्टदीप्तिमच्छरीरत्वात् प्रद्युम्न इति नाम दत्तं तस्य सुनोः । ततः क्रमात् स्तन्यपानादिना स प्रद्युम्नः पुत्रो ववृधे । इतो नारदः कृष्णं पुत्रवियोगदुःखितं मत्वा श्रीसीमन्धरस्वामिपार्श्वे गतः, श्रीसीमन्धरस्वामिपार्श्वे पृष्टं प्रद्युम्नस्वरूपं, श्रीसीमन्धरस्वामिनः सकाशात् प्रद्युम्नस्थितिस्वरूपं धूमकेतु-

ततस्तया दत्ते ते द्वे विद्ये गृहीत्वा प्रद्युम्नो विधिना साधयामास । ततो विद्याभृत्प्रियाऽऽचष्ट—भोगान् मया सहाधुना प्रद्युम्न ! भुंक्ष्व स्ववाचां पालय । यतः—“ अलसायंतेण वि सज्जणेण, जे अक्खरा समुल्लविआ । ते पत्थरटंकुक्कीरिअव्व, न हु अन्नहा हुंति ॥ १ ॥ ” यतः—“ अक्खाणसणी कमाण मोहणी, तह वयाण बंभवयं । गुत्तीण य मणगुत्ती, चउरो दुःखेण जिप्पंति ॥१॥ ” ततः प्रद्युम्नो जगाद—त्वं मम माताऽसि मात्रा समं यस्य पतिसम्बन्धो भवति तस्य नूनमधो गतिः स्यात् । भो मातस्त्वमेवं किं वक्षि । यतः “ वरमग्गिमि पवेसो० ॥१॥ ” इति जल्पन् प्रद्युम्नः पुराद् बहिरगात् । तदा नखैः स्वदेहं निकृत्य दीर्घं कनकमाला कलकलं कृत्वाऽभ्यधात्—भो भो लोका ! धावत धावत । अयं दुष्टः प्रद्युम्नो भोगसुखार्थी मां विदार्यैवं गतः किमिदं किमिदमिति जल्पन्तः कनकमालापुत्रास्तत्राययुः । ज्ञात्वा प्रद्युम्नचेष्टितं मातुः पार्श्वे ते पुत्रा रोषारुणा योधाः प्रद्युम्नं हन्तुं लग्नाः प्रद्युम्नो विद्याबलेन तान् जघान । हतान् सुतान् ज्ञात्वा संवरः पिता युद्धार्थं निर्ययौ । तमपि युध्यमानं संवरं विद्यया स्तब्धवान् सः । ततः संवरो-जगौ—भो महानुभाग ! त्वं पुत्रोऽसि मम किमेवं कदर्थयसि ? मां मुत्कलं मुञ्च यत्त्वं जल्पसि तत्करोम्यहम् । ततस्तत्क्षणात् संवरो मुत्कलः कृतः । ततः प्रद्युम्नः पितुः पार्श्वे गत्वा प्रणामं कृत्वा च जगौ—इयं तव पत्नी वर्या न

ततस्तया दत्ते ते द्वे विद्ये गृहीत्वा प्रद्युम्नो विधिना साधयामास । ततो विद्याभृत्प्रियाऽऽचष्ट—भोगान् मया सहाधुना प्रद्युम्न ! भुंक्ष्व स्ववाचां पालय । यतः—“ अलसायंतेण वि सज्जणेण, जे अक्खरा समुल्लविआ । ते पत्थरटंकुक्कीरिअव्व, न हु अन्नहा हुंति ॥ १ ॥ ” यतः—“ अक्खाणसणी कमाण मोहणी, तह वयाण बंभवयं । गुत्तीण य मणगुत्ती, चउरो दुःखेण जिप्पंति ॥१॥ ” ततः प्रद्युम्नो जगाद—त्वं मम माताऽसि मात्रा समं यस्य पतिसम्बन्धो भवति तस्य नूनमधो गतिः स्यात् । भो मातस्त्वमेवं किं वक्षि । यतः “ वरमग्गिमि पवेसो० ॥१॥ ” इति जल्पन् प्रद्युम्नः पुराद् बहिरगात् । तदा नखैः स्वदेहं निकृत्य दीर्घं कनकमाला कलकलं कृत्वाऽभ्यधात्—भो भो लोका ! धावत धावत । अयं दुष्टः प्रद्युम्नो भोगसुखार्थी मां विदार्यैवं गतः किमिदं किमिदमिति जल्पन्तः कनकमालापुत्रास्तत्राययुः । ज्ञात्वा प्रद्युम्नचेष्टितं मातुः पार्श्वे ते पुत्रा रोषारुणा योधाः प्रद्युम्नं हन्तुं लग्नाः प्रद्युम्नो विद्याबलेन तान् जघान । हतान् सुतान् ज्ञात्वा संवरः पिता युद्धार्थं निर्ययौ । तमपि युध्यमानं संवरं विद्यया स्तब्धवान् सः । ततः संवरो-जगौ—भो महानुभाग ! त्वं पुत्रोऽसि मम किमेवं कदर्थयसि ? मां मुत्कलं मुञ्च यत्त्वं जल्पसि तत्करोम्यहम् । ततस्तत्क्षणात् संवरो मुत्कलः कृतः । ततः प्रद्युम्नः पितुः पार्श्वे गत्वा प्रणामं कृत्वा च जगौ—इयं तव पत्नी वर्या न

कृत्वा जीर्णवासः परिधाय बुडबुडेतिविद्यां कुलदेव्यग्रेजपन्ती जल्प मामाधिकरूपां कुरु कुरु स्वाहा । ततो भामा विद्यां साधयितुं मस्तकं भद्रीकृत्य तस्थावेकान्ते । विद्याबलात्तदा भामाचेटीभिः परिवेषितं सर्व्वमन्नं पानं विवाहयोग्यं निष्ठापयामास प्रद्युम्नः । ततः स बालमुनिः रुक्मिणीगृहे यावद्ययौ, तावद्रुक्मिणी मुदिता वर्यविष्टरग्रहणार्थमन्यत्र गता च । इतः स मुनिः कृष्णसिंहासने उपविष्टः । रुक्मिणी पश्चाद्यावदागता, तावत् कृष्णसिंहासनारूढं दृष्ट्वा जगादेति—कृष्णं वा कृष्णजातं वा, विना सिंहासनेऽत्र हि । अन्यं पुमांसमासीनं, सहन्ते न हि देवताः ॥ १ ॥ सोऽप्याह—तपो मेऽतुलं विद्यते, षोडशवर्षप्रान्ते पारणायाहमिहागाम् । तेन त्वं मां पारणं कारय नोचेद्भामागृहे यास्यामि । रुक्मिणी प्राह—मया किमपि विरूपं नोक्तं मम बाढं पुत्रवियोगोऽस्ति । प्रद्युम्नः प्राह ममापि मातुर्वियोगोऽस्ति किं दुःखं क्रियते । त्वं वद तव पुत्रः क गतोऽस्ति । ततस्तया रुक्मिण्या स्वपणसम्बन्धः प्रोक्तः । मया च पुत्रप्राप्त्यर्थं देवी समाराधिता जगौ—तव पुत्रः षोडशवर्षप्रान्ते समेष्यति सोऽद्यापि नागतः । ततोऽधुना त्वं ज्ञानी समायातोऽसि शास्त्रादि विलोक्य पुत्रागमनस्वरूपं कथय सोऽपि मुनिः प्राह—रिक्तहस्तो जनो देवं, गुरुं वा पितरं नृपम् । न पश्यति लसत्साताभिलाषी मेदिनीतले ॥ १ ॥ रुक्मिणी प्राह—तुभ्यं पेया दास्यते । ततस्तया तस्मै